Page	line	read	for
Page 69	line 3	read पूर्वं	for पूर्वं
,, 71	,, 12	,, १।६१	,, १।१।६१
,, 72	,, 8	,, अश्वाजनि	,, अश्वा जनि
,, 75	,, 15	,, पूर्वौ	,, पूर्वो
,, 76	,, 14	,, -वरुणावृ-	,, -वरुणा वृ-
,, 77	,, 23	,, B^3	,, B^n
,, 80	,, 18	,, किं	,, कं
,, 81	,, 16	,, ओषधीषु	,, ओषधाषु
,, 82	,, 1	,, ब्रुवन्तु	,, ुवन्तु
,, 83	,, 19	,, पार्थिवासः	,, पाथिवासः
,, 84	,, 1	,, नोऽहिर्-	,, नाऽहिर्-
,, 88	,, 9	,, यो	,, या
,, 101	,, 11	,, वो	,, वा
,, 103	,, 2	,, अश्वेपितं	,, अश्वेपि'
,, ,,	,, 16	,, रोदसीमे	,, रोदसी मे
,, 104	,, 3	,, एकारौकारपरौ	,, एकारौकार परौ
,, ,,	,, 26	,, 73,74	,, 73 74
,, 110	,, 25	,, struck	,, srtruck
,, 115	,, 14	,, अन्यत्त्वम्	,, अन्यत्वम्
,, 119	,, 25	,, B^n	,, B^2
,, 125	,, 13	,, स्वरितो-	,, स्वरिता-
,, 126	,, 5	,, पूर्वं	,, पूर्वं
,, 127	,, 14	,, ४।१६	,, १।४।१६
,, 128	,, 25	,, यं यं	,, ' यं
,, 132	,, 17	,, -तव्यम्	,, -तव्यम्
,, 142	,, 23	,, before	,, Before
,, 149	,, 24	,, B^3I^2	,, B^2I^2
,, 153	,, 6	,, पणीँर्	,, पणीर्
,, 155	,, 25	,, प्रत्युदाहरणं;	,, प्रत्युदाहरणं
,, 163	,, 21	,, दाशति०	,, दाशति-

उवटकृतभाष्यसहितं

श्रीशौनकीयम्

ऋग्वेदप्रातिशाख्यम्

ऑफ़ वेल्स गवर्नमेण्ट संस्कृत लाइब्रेरी, सरस्वतीभवन,
बनारस, इत्यस्याध्यक्षेण

देव शास्त्री, एम० ए०, डी० फ़िल० (ऑक्सफ़ोर्ड)

इत्येतेन

नानादेशीयजीर्णातिजीर्णहस्तलिखितपुस्तकानि
पर्यालोच्य सम्पादितम्

———:※:———

खिस्ताब्दाः १९३१

Page	line	read	for
Page 349	line 18	read पूर्व-	for पूव-
,, 351	,, 13	,, द्व्यू-	,, द्व्यू-
,, 365	,, 18	,, सन्ननव-	,, सन्नव-
,, 368	,, 19	,, B[3]),	,, B[3])
,, 371	,, 16	,, पूर्वाह्णे	,, पूवाह्णे
,, 377	,, 16	,, पार्षद्-	,, पापद्-
,, 378	,, 10	,, ऊर्ध्वे-	,, ऊध
,, 381	,, 14	,, वह्वीः	,, वह्वाः
,, 389	,, 14	,, पूर्वे-	,, पूव-
,, 403	,, 2	,, -स्थानाम्१ अनादो	,, -स्थानान्ना१दो
,, ,,	,, 6	,, दोपौ	,, दौपौ
,, ,,	,, 19	,, -स्थानात्	,, -स्थानात् ना-
,, ,,	,, ,,	,, -स्थानां	,, -स्थानां ना-
,, 404	,, 12	,, अन्ताभ्याम्	,, अन्ताप्राभ्याम्
,, ,,	,, 17	,, ऽन्ये-	,, ऽये-
,, ,,	,, 24	,, दोपं	,, दो
,, 405	,, 9	,, विधिं	,, विधि
,, 407	,, 16	,, घोपिणस्	,, घापिणस्
,, ,,	,, 17	,, ऊष्मणो	,, ऊष्मणा
,, 411	,, 5	,, ते	,, त
,, 423	,, 18	,, मा० शि० ६७	,, या० शि० ६३
,, 428	,, 25	,, स्युर	,, स्युर
,, 445	,, 9	,, हरी इह	,, हरीह
,, ,,	lines 9-10	,, आ० श्रौ० ६।३।१	,, शा० श्रौ० ६।२।२
,, 446	line 2	,, -निचॄन्	,, -निचन्
,, 461	,, 15	,, चत्वारो	,, चत्वारा
,, 478	,, 9	,, नेतिपू-	,, नेति पू-
,, 480	,, 6	,, गुर्वे-	,, गुर्व-
,, 482	,, 8	,, पूर्वासाम्	,, पूर्वासां
,, ,,	,, 22	,, मन्यन्ते B[3]	,, मन्यन्ते B[2]

THE

VEDA-PRĀTIŚĀKHYA

WITH

HE COMMENTARY OF UVAṬA

FROM ORIGINAL MANUSCRIPTS, WITH INTRO-
TION, CRITICAL AND ADDITIONAL NOTES,
ENGLISH TRANSLATION OF THE TEXT,
AND SEVERAL APPENDICES

BY

MANGAL DEVA SHASTRI

M.A. (PUNJAB), D. PHIL. (OXON.), U. P. E. S.,
RARIAN, PRINCESS OF WALES GOVERNMENT SANSKRIT
LIBRARY, SARASVATI BHAVANA, BENARES

Volume II

TEXT IN SUTR A-FORM

ासिकेतर

OMMENTARY WI. ITICAL APPARATUS

THE INDIAN PRESS, LIMITED, ALLAHABAD

1931

ऋग्वेदप्रातिशाख्यस्य विषयानुक्रमणिका

तृतीयं पटलम्—

सूत्रसंख्या

पञ्चमं पटलम्—

सूत्रसंख्या

सूत्रसंख्या

त्रयोदशं पटलम्—

चतुर्दशं पटलम्—

सूत्रसंख्या

ABBREVIATIONS

(The symbols designating MSS. and other sources of various readings are explained in the Introduction, in Vol. I.)

अथ० प्रा० = अथर्वप्रातिशाख्यम (= शौनकीया चतुरध्यायिका), edited by W. D. Whitney.

अनुवाकानु० = अनुवाकानुक्रमणी, edited, with the Ṛk-sarvānukramaṇī, by A. A. Macdonell. Oxford, 1886.

आ० गृ० = आश्वलायनगृह्यसूत्रम्, Bibliotheca Indica, 1869.

आ० श्रौ० = आश्वलायनश्रौतसूत्रम्, Bibliotheca Indica, 1874.

ऋ० = ऋग्वेदसंहिता.

ऋ० खि० = ऋग्वेदखिलानि, Aufrecht's edition of the Ṛgveda, Vol. II, pages 672 ff.

ऋ० प० = ऋग्वेदपदपाठः.

ऋ० क्र० = ऋग्वेदक्रमपाठः.

ऋ० वि० = ऋग्विधानम्, edited by A. R. Meyer. Berlin, 1877.

ऐ० आ० = ऐतरेयारण्यकम्, edited by A. B. Keith. Oxford, 1909.

ऐ० ब्रा० = ऐतरेयब्राह्मणम्, edited by T. Aufrecht. Bonn, 1879.

का० ब्रा० = कौषीतकिब्राह्मणम्, edited by B. Lindner. Jena, 1887.

तै० प्रा० = तैत्तिरीयप्रातिशाख्यम्, edited by W. D. Whitney.

तै० ब्रा० = तैत्तिरीयब्राह्मणम्, Bibliotheca Indica, 1859 and following.

द० स्मृ० = दक्षस्मृतिः, Ānandāśrama Sanskrit Series (स्मृतीनां समुच्चयः), 1905.

धा० पा० = पाणिनीयधातुपाठः.

नि० = निरुक्तम्. Referred to by Adhyāyas and Pādas.

पा० = पाणिनीयाष्टाध्यायी.

पा० वा० = वार्त्तिकपाठः on पाणिनीयाष्टाध्यायी.

पा० शि० = पाणिनीयशिक्षा, Benares Sanskrit Series (शिक्षासंग्रहः), Benares, 1893.

पि० = पिङ्गलकृतच्छन्दःसूत्रम्.

प्र० सू० प० = प्रतिज्ञासूत्रपरिशिष्टम्, Benares Sanskrit Series, Benares, 1888.

प्रै० = Die Apokryphen des Ṛgveda, edited by J. Scheftelowitz. Referred to by pages.

बृ० दे० = बृहद्देवता, edited by A. A. Macdonell.

म० स्मृ० = मनुस्मृतिः.

महा० = महाभारतम्, edited by T. A. Krishnacharya and T. R. Vyasacharya. Bombay, 1908.

मा० शि० = अथर्ववेदीया माण्डूकी शिक्षा, Benares Sanskrit Series (शिक्षासंग्रहः), Benares, 1893.

मा० श्रौ० = मानवश्रौतसूत्रम्, edited by F. Knauer. St. Petersburg, 1900-1903.

मैत्र्युप० = मैत्र्युपनिषद्, Bibliotheca Indica, 1870.

या० शि० = याज्ञवल्क्यशिक्षा, Benares Sanskrit Series (शिक्षासंग्रहः), Benares, 1893. Prose portions are referred to by pages.

वा० प्रा० = वाजसनेयिप्रातिशाख्यम् .

वा० सं० = वाजसनेयिमाध्यन्दिनसंहिता.

शा० श्रौ० = शाङ्खायनश्रौतसूत्रम्, Bibliotheca Indica, 1888.

ओ३म्

श्रीशौनकाय नमः

अथ विष्णुमित्रकृता वर्गद्वयवृत्तिः

सूत्रभाष्यकृतः सर्वान् प्रणम्य शिरसा शुचिः ।
शौनकं च विशेषेण येनेदं पार्षदं कृतम् ॥ १ ॥
तथा[1] वृत्तिकृतः सर्वांस्तान्सूत्रयशसस्तथा ।
तेषां प्रसादादेतेषां स्वशक्त्या वृत्तिमारभे ॥ २ ॥
लेख्यदोषनिवृत्त्यर्थं विस्त[2]रार्थं कचित्कचित् ।
ज्ञातार्थंपाठनार्थं[3] च योज्यते सा[4] मया पुनः ॥ ३ ॥
तस्याः समापने शक्तिं त एव प्रदिशन्तु मे ।
लब्ध्वा[5] काममहं तेभ्यो गच्छेयं[6] पारमीप्सितम् ॥४॥
चम्पायां न्यवसत्पूर्वं वत्सानां कुलमृद्धिमत् ।
यस्मिन्द्विजवरा जाता बह्वृचाः पारगो[7]त्तमाः ॥ ५ ॥
देव[8]मित्र इति ख्यातस्तस्मिञ्जातो महामतिः ।
स वै पारिषदे[9] श्रेष्ठः सुतस्तस्य महात्मनः ॥ ६ ॥

(१) यथा B^2. (२) विस्ता- B^n. (३) I^2, ज्ञानार्थपठनार्थं B^3, ज्ञानार्थं पठनार्थं B^2, बहूदाहरणार्थं B^n. (४) B^2, स corrected to सा in I^2, स B^3. (५) लब्धा B^2. (६) प्रमेयं corrected to गच्छेयं on the margin in B^2, प्रमेयं $I^2B^3B^n$. (७) पारमो- B^n. (८) वेद- B^2. (९) B^3B^n, स वै पार्षदे I^2, स चैष पार्षद- B^2 and the Paris MS. (Cp. Roth, *Zur Litteratur und Geschichte des Weda*).

नाम्ना तु विष्णुमित्रः[१] स कुमार इति शस्यते[२] । शिष्यते
तेनेयं योजिता वृत्तिः संक्षिप्ता पार्षदे स्फुटा ॥ ७ ॥
परिगृह्णन्तु विप्रेन्द्राः सुप्रसन्ना इमां मम ।
अज्ञानाद्यदयुक्तं स्यात् तदृजूकृत्य गृह्यताम् ॥ ८ ॥
शास्त्रावतारं[३] सम्बन्धं[४] विषयं च प्रयोजनम्[५] ।
ज्ञात्वा ग्राह्यं भवेच्छास्त्रमिति शिष्टानुशासनम् ॥

तस्मादादौ तावच्छास्त्रावतार[६] उच्यते ।

शौनको[७] गृहपतिर्वै[८] नैमिषीयैस्तु दीक्षितैः[९] ।
दीक्षासु चोदितः प्राह सत्रे तु द्वादशाहिके ॥

इति शास्त्रावतारं स्मरन्ति । अथ सम्बन्ध उच्यते । इह हि[१०] द्विजानां[११] वेदाभ्यासः सकलपुरुषार्थसिद्धेः[१२] कारणमिति[१३] वैदिकः[१४]सिद्धान्तः । स च पुरुषार्थश्चतुर्विधः । धर्मार्थकाम-मोक्षा इति । तदप्युक्तमृग्विधाने । यथा प[१५]वमाननाभानेदिष्ठ-हृद्य[१६]पुरुषसूक्तादिषु ।

वेदाभ्यासो हि पञ्चधा विहितः[१७] । अध्ययनं विचारोऽभ्यसनं जपोऽध्यापनमिति । तथा[१८] च स्मर्यते ।

---

(१) -पुत्रः the Paris MS. (२) The Paris MS. शस्य (व्य ते corrected to शब्द्यते on the margin in B^2I^2, शब्द्यते B^3 B^n. (३) -तार- B^n. (४) सम्बन्ध- B^n, सम्बन्धे B^2. (५) षड्विधं परिकीर्त्तयन् corrected to विषयं— -नम् in B^2. (६) -तारः B^2. (७) अथ शौनको B^2. (८) वै गृहपतिर् B^2. (९) संस्थितैः B^2. Instead of the line शौनको—दीक्षितैः, I^2 has (*sic*) शान- - - - -पयस्तु शि- - - । (१०) B^2 omits हि. (११) द्विजातीनां B^2. (१२) -सिद्धि- B^2. (१३) हि added in I^2B^2. (१४) वैदिक- B^n. (१५) पा- B^2I^2. (१६) -दा- B^2. (१७) -भिहितः B^2. (१८) यथा I^2B^3.

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥ (द०स्मृ०२।३४)

इति । तदपि वक्ष्यति । एकः श्रोता दक्षिणतो निषीदेत् (१५।२) इत्यादिना[1]ध्ययनम् । अभ्यासार्थे द्रुतां वृत्तिम्[2] (१३।४९) इत्यभ्यसनम् । प्रयोगार्थे तु मध्यमाम् (१३।४९) इति जपादि । अध्यापनम्[3]—पारायणं वर्तयेद् ब्रह्मचारी (१५।१) इत्येवमादिना[4] । तस्मादधीतवेदस्य हि सति सामर्थ्ये सम्पूर्णफलेच्छया विचारस्यावसरः प्राप्तः । स च विचारो द्विविधः । अर्थतो लक्षणतश्चेति । तथा चोक्तम् ।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥

(नि० १।६) इति[5] । तथा च ।

लक्षणं यो न वेत्त्यृक्षु न कर्मफलभाग्भवेत् ।
लक्षणज्ञो हि मन्त्राणां सकलं भद्रमश्नुते ॥

इति[6] । तस्मात्तावत्पूर्वं लक्षणमुच्यते । लक्षणपूर्वकं[7] ह्यर्थपरिज्ञानम् । तथा चोक्तम् ।

स्वरो वर्णोऽक्षरं मात्रा दैवं[8] योगार्षमेव[9] च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ॥ इति ।

सर्वत्र[10] शास्त्रादौ नमस्कारं करोत्याचार्य इष्टसिद्ध्यर्थम्[11] । यथा । स्वयंभुवे ब्रह्मणे विश्वगोप्त्रे[12] (ऋ० वि०१।१।१) । यथा च ।

---

(१) -दि अ- B². (२) द्रुता वृत्तिः I². (३) तद्दानं च शिष्येभ्य इत्यध्यापनं । B². (४) -दि च B². (५) Instead of किलाभूद्—इति Bⁿ reads : किलाभूदित्यादिना । (६) Bⁿ, इति च B³B², omitted in I². (७) -पूर्वं B². (८) दैव- I². (९) योगार्षं एव B³Bⁿ. (१०) I², सर्व-corrected to सर्वत्र in B², सर्व-B³ Bⁿ. (११) Bⁿ omits इष्टसिद्ध्यर्थम्. (१२) -गोप्त्रे०। B².

सर्वात्मानं विश्वसृजं स्वयंभुवम्। इति[१]। यथा च। पितृदेवर्षिसाध्येभ्यः[२] (अनुवाकानु० ३) इति[३]। अतोऽत्रापि शौनकाचार्यो भगवान्छास्त्रादौ नमस्कारं[४] चकार। अविघ्नार्थं च। ~~मन्त्रस्तुतिश्च~~

> परावरे ब्रह्मणि यं सदाहुर्
> वेदात्मानं वेदनिधिं मुनीन्द्राः।
> तं पद्मगर्भं परमं त्वादिदेवं
> प्रणम्यर्चां लक्षणमाह शौनकः॥ १ ॥[५]

परं चावरं च[६] परावरं ब्रह्म[७]। परं नाम मनसा ध्यान[८]गम्यं सदसद्वात्मकं वेदान्तेषु यदुच्यते। यदेतद्धृदयं मनश्च (ऐ० आ० २।६) इत्यादि। तथा च। महापुरुष इति यमवोचाम (ऐ० आ० ३।२।३) इत्यादि। तथा च।

ज्योतिरजरं ब्रह्म[९] यद्योगात्समुपाश्नुते (बृ० दे० ७।१०९) इति।

स ब्रह्मामृतमत्यन्तं योनिं सदसतोर्ध्रुवम्।

महच्चाणु च विश्वेशं विशति ज्योतिरुत्तमम्॥ (बृ० दे० ८।१४०)

इति च[१०]। अवरं[११] तु पुनः करणवदुपांशुध्वाननिमदोपब्दि-

---

(१) Bⁿ omits इति. (२) -देवर्षिसाध्येभ्यः Bⁿ, -देवर्षि-सर्वेभ्यः B³I², -देवसर्वेभ्य०। B². (३) B² omits इति. (४) B² adds प्रतिज्ञां च. (५) Instead of this stanza I² reads : परावरे शौनकः।, B³ परावरे० शौनकः॥ (६) B³ omits अवरं च. (७) ब्रह्मा B². (८) ध्याय-I². (९) See note; तथा च। (तथा B³) ज्योतिरजं तं प्राह B³B², तथा च ज्योतिरजतं प्राह I², ततो ज्योतिरजतं प्राह Bⁿ. (१०) See note; स ब्रह्मामृत-मत्यंतं योनिं सदसदात्मकं। इति॥ महच्चाणुत्वपरं च यत्। (instead of स ब्रह्मामृतम्—इति च) B², स ब्रह्ममतमत्ययोनिसदसदोः (-सदो I², -सो B³) ध्रुवं महच्च (महच्चेत् Bⁿ) स्थाणु विश्वे सन्ति ज्योतिरुत्तममिति च। B³I²Bⁿ. (११) अपरं I².

मन्मन्द्र[1]मध्यमोत्तमस्थानेषु जपादिषु कर्मसु[2] यत्प्रयुज्यते शब्दाख्यम्—अग्निमीळे (ऋ० १।१।१) इत्यादि। तदुक्तम्।

द्वे ब्रह्मणी[3] वेदितव्ये शब्दब्रह्म परं च यत्।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥ (मैत्र्युप० ६।२२)

इति शब्दब्रह्मज्ञानपूर्वकं पर[4]ब्रह्मज्ञानम्।

तस्मिन्परावरे ब्रह्मणि यं वेदब्रह्माख्यं सदा सर्वदाहुर्वदन्ति। स्तुत्यादिभिः स्तुवन्ति विचारयन्ति मीमांसन्ते। एतं ह्येव[5] बह्वृचा महत्युक्थे[6] मीमांसन्ते (ऐ० आ० ३।२।३) इति यथा। क आहुः। मुनीन्द्राः। मुनिप्रधाना ऋषयो मन्त्रद्रष्टारः। कैर्नामभिरित्युच्यते। वेदात्मा वेदनिधिः पद्मगर्भः परम[7] आदिदेव इत्येवमादिभिः। वेदानामात्मा वेदात्मा। वेदा[8] इति। विद्यते[9] ज्ञायते[10] लभ्यते[11] वैभिर्धर्मादिपुरुषार्थ[12] इति वेदाः। मन्त्रब्राह्मणयोर्वेदनामधेयम् (प्र० सू० प० १।२)। तत्र ह्यव्यभिचारेण तत्स्वरवर्णमात्रापूर्वकः पाठः। सर्वकालं सर्वदेशेषु प्रतिचरणमविभागेनैकैको मन्त्रराशिर्वेद इत्यु[13]च्यते। आत्मा। अत सातत्यगमने (धा०पा०)। सततं सर्वदा सर्वदेशे सर्वकाले च[14] भोक्तृत्वेन च[15] स्रष्टृत्वेन चातति गच्छतीत्यात्मा। तं वेदात्मानम्।

---

(१) B², करण (कारण I²)। यदुपांशुध्वनिनादो (-नादोः। B³, नादोः corrected to नादैः in I²) यद्धि (ह्यद्धि I²) मंद्र- (मंत्र-B³) B³I²Bⁿ. (२) जपादिकर्मसु Bⁿ. (३) ब्रह्मणि B³. (४) परं B². (५) एते ह्येव B³, एतह्येव Bⁿ. (६) महदुक्त Bⁿ. (७) परमं Bⁿ. (८) वेद B², Reg. (९) विद्यंते B², Reg. (१०) ज्ञायंते B², Reg. (११) लभ्यंते B², Reg. (१२) I²;-र्था B³B²Bⁿ, Reg. (१३) इति omitted in B³B². (१४) सर्वदा सर्वदेशे सर्वकाले च B³I²Bⁿ; सर्वदावेशनेन B², Reg. (१५) Bⁿ omits च.

वेदनिधिम्। वेदानां निधिर्वेदनिधिः। वेदानां स्थानमित्यर्थः। जनयति पोषयति च[१]। तथा च व्यासः।

सृष्ट्यादौ ब्रह्मणो वेदा मुखेभ्यश्च विनिर्गताः।
तत्रैव च लयं यान्ति प्रलये समुपस्थिते॥

इति। तं वेदनिधिम्। पद्मगर्भम्। पद्मो गर्भः[२] पद्मगर्भः। पद्मगर्भादुत्पन्नः। तथा च।

विष्णोर्जले शयानस्य[३] नाभेः पद्मं समुत्थितम्।
तस्मिन्ब्रह्मा समुत्पन्नस्तेन दृष्टं चराचरम्॥

इति। तं पद्मगर्भम्। परमम्। स एव देवानां परमोऽन्ये[४] देवा अवमा इत्यर्थः। तं परमम्। तुशब्दो विशेषणार्थः। आदिदेवमिति। स एव ह्यादावुत्पन्नः पश्चादन्ये देवा इति। देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा (नि० ७।४)। तमेवं गुणविशिष्टं ब्रह्मावराख्यं[५] प्रणम्य प्रणामं कृत्वा। प्रकर्षेण नमनं प्रणमनं नमस्कारं कृत्वेत्यर्थः।

ततः किं कृतवानित्युच्यते। ऋचां लक्षणमाह शौनक इति। ऋच इति परिमिताक्षरपादार्धर्चविहिता मन्त्राः। तथा चोक्तम्।

यः कश्चित्पाद[६]वान्मन्त्रो युक्तश्चाक्षरसंपदा।
स्वरयुक्तोऽवसाने च[७] तामृचं परि[८]जानते॥

इति। लक्षणं च स्वरवर्णाक्षरमात्रादिलक्षितम्[९]। तदुक्तम्। स्वरो वर्णोऽक्षरं मात्रा। इति[१०]। आह ब्रवीति वदति। उच्चारयतीत्यर्थः।

---

(१) B^2 omits च. (२) B^2 omits पद्मो गर्भः.. (३) B^n, जलशयानस्य B^2, जलशायिनो I^2B^3. (४) परम अन्ये B^3 B^2, परमं B^n. (५) ब्रह्माख्यं B^n. (६) पद-B^n. (७) I^2 B^3;-सानेषु B^2, Reg;-सानेन B^n. (८) प्रति-B^n. (९) Reg., -वर्णाक्षरमात्रालक्षितं I^2B^3,-वर्णमात्रादिलक्षितं B^2,-वर्णाक्षरमात्रा इतिB^n. (१०) तदुक्तम्—इति omitted in B^n.

शौनक[1] आचार्यो भगवान् । शुनकस्यापत्यं शौनकः । नामग्रहणं स्मरणार्थम् । यावदस्मिँल्लोके पुरुषः पुण्येन कर्मणा श्रूयते तावदयं स्वर्गे लोके वसति—इति श्रुतिः[2] । तथा चोक्तम् ।

दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणाम्[3] ।
यावत्[4] स शब्दो भवति तावत्[5] पुरुष उच्यते ॥

(महा० ३।३१४।१२२)

इति । यथा । महिदास ऐतरेय आह (ऐ०आ०२।१।८) इति । यथा च । मनुराह प्रजापतिः (म० स्मृ० १०।७८)[6] । ऋचां लक्षणमाहेतीयमाचार्यस्य प्रतिज्ञा । अत ऊर्ध्वं यदुच्यते तत्सर्वमृचां लक्षणमिति[7] वेदितव्यम् । संहिता पदप्रकृतिः (२।१) इत्येवमादि तत्सर्वमृचां लक्षणमिति[8] वेदितव्यम् । यथा । अग्न्याधेयप्रभृतीन्याह वैतानिकानि[9] (आ० श्रौ० १।१।२) । यथा च । गृह्याणि वक्ष्यामः (आ० गृ० १।१।१) इति प्रतिज्ञां करोति । तथा सर्वत्र वेदितव्यम् ॥

एवं शास्त्रादौ नमस्कारं च[10] प्रतिज्ञां च कृत्वा शास्त्रप्रयोजनमाह—

माण्डूकेयः संहितां वायुमाह
तथाकाशं चास्य माक्षव्य एव ।[11]

इत्यादि । तथा च ।

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यताम्[12]॥ इति ।

---

(१) शौनकस्तु Reg. (२) श्रुतेः B². (३) I²B³Bⁿ, पुण्येन कर्मणा B². (४) तावत् B². (५) यावत् B². (६) B² adds इति. (७) इति omitted in Bⁿ and Reg. (८) इति omitted in B³Bⁿ. (९) -प्रभृतीनि० । B². (१०) Bⁿ omits च. (११) B³ (मांडव्य for माक्षव्य), मांडूकेयः संहिताम् B²I²BⁿP. See note on the reading माक्षव्य. (१२) -ताम् corrected to ते in B²I².

माण्डूकेय आचार्यो भगवान्संहितां द्यावापृथिव्योः संहितां वायु-माह ब्रवीति। अथातः संहिताया उपनिषत्[१] पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेयः (ऐ० आ० ३।१।१) इति। तथाकाशं चास्य माक्ष*व्य एव[२]। तथा तयोरेव द्यावापृथिव्योराकाशं च संहिता-मस्योपासनस्य माक्षव्यो[३] नामाचार्य इच्छति। चशब्दाद्वायुं च ॥

समानतामनिले चाम्बरे च
मत्वागस्त्योऽविपरिहारं तदेव ॥२॥[४]

समानतां समाने तुल्ये एते संहिते अनिले चाम्बरे च। एवं मत्वा आगस्त्योऽगस्त्यपुत्रोऽवि[५]परिहारं दत्तवांस्तदेव[६] नान्य इति[७]। विविधः[८] परिहारो विपरिहारः। अवि[९]परिहारं मत्वा अपरित्यक्तो वायुराकाशतत्त्वे सति[१०]॥

अध्यात्मक्लृप्तौ शूरवीरः सुतश्च
वाङ्मनसयोर्विवदन्त्यानुपूर्व्ये ।[११]

अध्यात्म[१२]क्लृप्तावध्यात्मविषये क्लृप्तिः कल्पना प्राणः संहिता[१३]। शूरवीरो नामाचार्यस्तस्य सुतश्च[१४] विवदन्ति विवादं कुरुतो[१५] वाङ्-मनसयोरानुपूर्व्ये क्रमे। कथम्। अध्यात्मं वाक्पूर्वरूपं मन उत्तर-

---

(१) B[2] omits अथातः—षत्. (२) B[3]B[n] (both read मांडव्य for माक्षव्य), तथाकाशं—एव omitted in B[2]I[2]. (३) B[2]P, मांडव्यो B[3]I[2]B[n]. (४) This line omitted in B[2]I[2]. (५) -पुत्रो वि- B[2], -पुत्रः वि-I[2]B[3]PB[n] (६) तदेव दत्तवान् B[2]. (७) तदेव नान्यदिति B[2]. (८) विगतः B[2]. (९) अ- B[2]. (१०) -काशत्वे सति B[2], -काशे तत्वे B[n], -काशश्चेति P. (११) This ~~line~~ Half-stanza omitted in B[2]I[2]. (१२) अध्यात्मक्लृप्तौ शूरवीरः अध्यात्म-B[3]I[2]. (१३) प्राणसंहितां B[2]. (१४) सुताश्च B[2]. (१५) कुर्वंति B[2].

रूपं प्राणः संहिता (ऐ० आ० ३।१।१) इत्येकः । अपरस्तद्विपरीतमाह । मनः पूर्वरूपं वागुत्तररूपम् (ऐ० आ० ३।१।१) इति [१] ।

एवम्—अथातः संहिताया उपनिषत् (ऐ० आ० ३ । १ । १) इत्यस्यार्थः सूचितः । तस्य प्रयोजनं किल वक्ष्यति । पूर्वमक्षरं पूर्वरूपमु[२]त्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण सा संहिता (ऐ० आ० ३ । १ । ५) इति । तत्र पृथिव्यां दृष्टिदृष्टेः[३] फलं तत्फलप्राप्तिः स्यादिति । वक्ष्यति च । स य एवमेतां संहितां[४] वेद[५] (ऐ० आ० ३ । १ । ५) इति ॥

अथेदानीं संहितापदक्रमस्वरूपमाह—

संधेर्विवर्तनं निर्भुजं वदन्ति
शौद्धाक्षरोच्चारणं च प्रतृण्णम् ॥२॥
उभयं व्याप्तमुभयमन्तरेण
तया[६] कामा अन्ननाकोभयाख्याः ।[७]

निर्भुजं[८] संहिताध्ययनमुच्यते । संधेर्विवर्तनम् । द्वयोः पदयोरक्षरयोर्वा संधिर्मध्यमवकाशोऽन्तरमित्यनर्थान्तरम् । तस्य संधेर्विवर्तनमविच्छेदाध्ययनं तन्निर्भुजं वदन्ति । आचार्याः पाठकाः । द्विविधा हि[९] संहिता । अक्षरसंहिता च[१०] पदसंहिता च । अत्राक्षरग्रहणमुपलक्षणं वर्णयन्ति । संधिविवृत्त्या तु[११] निर्भुजं वदन्तीति

---

(१) I^2 omits इति. (२) एवमथातः—रूपम् omitted in I^2. (३) B^2, वृष्टिवृष्टेः $B^3I^2B^n$. (४) B^2 omits संहितां. (५) चेद P, यो वेद corrected to वेद in B^3, यो वेद $B^2I^2B^n$. (६) उभयमंतरेणोभयं व्याप्तमग्रे (-मग्ने B^n) परे B^3B^n. See note. (७) Instead of this stanza I^2 reads : संधेयाख्याः, संधेयाख्यं P, omitted in B^2. (८) संधेर्या रचना तत् निर्भुजं B^2. (९) हि omitted in B^3B^n. (१०) च omitted in B^2B^n. (११) B^2 adds तं.

केचित्पठन्ति। अर्थस्तु स एव। शौद्धाक्षरोच्चारणम्। शुद्धे द्वे अक्षरे पदे वा संधिमकुर्वतो[1]च्चारणमभिव्याहरणं तत्प्रतृण्णं पदाध्ययनमुच्यते।

उभयं व्याप्तम्। संहिता[2] च पदं च। केने[3]त्याह। उभयमन्तरेण[4]। क्रमाध्ययनेनोभयं व्याप्तं स्थितं वेदितव्यम्। यद्धि संधिं विवर्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रतृण्णस्याग्र[5] उ एवोभयमन्तरेणोभयं व्याप्तं भवति (ऐ० आ० ३ । १ । ३) इति। उभयमन्तरेणोभयं व्याप्तमग्र इति[6] केचित्पठन्ति। स एवार्थः। अग्रे प्रथममेव क्रमादनेन व्याप्तं भवतीति वेदितव्यम्। तथा परे कामा अन्ननाकोभयाख्याः। पराः कामा य उक्ताः। अन्नकामः। नाककामः। स्वर्गकाम[7] इत्यर्थः। उभयकामः। अन्नकामः स्वर्गकामश्च। तथा चोक्तम्। अन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेण (ऐ० आ० ३।१।३) इति। एतत्सर्वं तु[8] विज्ञेयमिति वाक्यशेषः॥

प्राणः षकारो यच्च बलं णकारः[9]।

तच्च विज्ञेयम्। प्राणस्य षकारः[10] संज्ञा। षकारः प्राण आत्मा (ऐ० आ० ३ । २ । ६) इति श्रुतिः[11]। सबलां सप्राणां संहितां वेदायुष्यमिति विद्यात् (ऐ० आ० ३ । २ । ६) । बलं णकारः।

---

(१) वाऽसंधीकुर्वता नाना उ- B^2. (२) -तां B^2. (३) B^2 omits केन. (४) B^nP, उभयमुत्तरेण corrected to उभयमंतरेण in I^2, उभयमुत्तरेण B^3, उभयमंतरेणोभयं व्याप्तमग्रे परे कामा अन्नकामोभयाख्योऽभयमंतरेण B^2. (५) B^2, -स्य रूपमग्र $B^3B^nI^2$ (I^2 supplies रूपम् on the margin). (६) I^2 omits व्याप्तमग्र इति. (७) अन्नकामनाककामोभयकामा (for अन्नकामः— -काम) B^2. (८) B^n omits तु. (९) पकारे बलं णकारे यच्च B^n. (१०) पकार इति B^2. (११) श्रुतेः B^2B^n.

णकारेण हि[1] बलवती संहिता। वायोर्हि प्राणस्य बलवत्त्वं[2] कार्यं स्पृष्टं[3] करणम्। षकारः प्राण आत्मा। तथा चोक्तम्। य ऊष्माणः स प्राणः (ऐ० आ० २। २। ४) इति। तथा णकाराख्येन बलेन बलवती भवति[4]। णकारश्च स्पर्शः। स्पृष्टं[5] करणं कर्तव्यमित्यर्थः। तथा चोक्तम्। तस्यै[6] वा एतस्यै संहितायै णकारो बलं षकारः प्राण आत्मा। स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां[7] संहितां वेदायुष्यमिति विद्यात् (ऐ० आ० ३। २। ६) इति। तथा च। ते यद्वयमनुसंहितमृचो-[8]ऽधीमहे यच्च माण्डूकेयीयमध्यायं प्रब्रूमः (ऐ० आ० ३। २। ६) इति। माण्डूकेयीयमिति कथमित्युच्यते। अथ[9] वयं ब्रूमो निर्भुजवक्त्रा[10] इति ह स्माह ह्रस्वो माण्डूकेयः पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण येन संधिं विवर्तयति येन स्वरास्वरं[11] विजानाति येन मात्रामात्रां विभजते सा संहितेति (ऐ० आ० ३। १। ५)। स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति (ऐ० आ० ३। १। ५) इति[12]प्रशंसा॥

वाक्प्राणयोर्यश्च होमः परस्परम्॥ ४॥

तच्च विज्ञेयम्। वाचि प्राणो हूयते प्राणे च वाग्घूयते। तथा चोक्तम्। तद्यत्रैतदधीते वा भाषते वा वाचि तदा प्राणो भवति

---

(१) Bⁿ omits हि. (२) बलत्वं B^2. (३) स्पृष्ट- B^n. (४) B^n omits भवति. (५) स्पर्शः स्पृष्टं B^n, स्पर्शः स्पष्टं I^2, स्पर्शपृष्टं B^2, स्पर्शं स्पृष्टं B^3. (६) त्यस्यै B^n. (७) संहितायै—सप्राण omitted in B^n. (८) वेद सबलां—ऋचो omitted in B^2. (९) अथ B^3B^2P, corrected to अथ वै in I^2, अथ वै B^n. (१०) -वक्त्राः स्म B^nI^2 (स्म supplied on the margin in I^2). (११) स्वराः स्वरं B^2, स्वरात्स्वरं B^n. (१२) B^2 omits इति.

वाक्तदा प्राणं रेढ्यथ यत्र तूष्णीं वा भवति स्वपिति वा प्राणो तद्दा वागभवति प्राणस्तदा वाचं रेळ्हि (ऐ० आ० ३ । १ । ६)। तथा च। किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययः (ऐ० आ० ३।२।६) इति ॥

एवं च[१] संहितोपनिषदि योऽर्थः स एवाचार्येण प्रदर्शित इति विज्ञापनार्थम्। तस्य किल तत्प्रयोजनम्[२]। वेदे योऽर्थोऽभिहितः स एव शास्त्रे प्रतिबद्ध इति ज्ञापनार्थं च। यथा[३]। अथाप्यृच[४] उदाहरन्ति[५] (आ० गृ० १।१।४)। यथा च। अग्न्याधेयप्रभृतीन्याह वैतानिकानि (आ० श्रौ० १ । १ । २) इति[६]। यथा।

शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः (पा० शि० १)

इति[७]। कथमिति चेत्[८]। यदुच्यते वैदिककर्मानुष्ठानात्पुरुषस्य[९] निःश्रेयसार्थफलावाप्तिरेष[१०] वैदिकः सिद्धान्तः। तत्र विध्यर्थवादाः श्रूयन्ते निन्दाप्रशंसापृष्टा[११]ख्यातासाराभीक्ष्ण[१२]संप्रश्नसंशया इति। तदुक्तम्[१३]।

विधिर्निन्दा[१४] प्रशंसा च पृष्ट[११]माख्यात[१५]मित्यपि।
आसाराभीक्ष्णसंप्रश्ना[१६] ब्राह्मणे संशयश्च यः ॥

इति। यस्मात्केवलैर्वेदवाक्यैर्न शक्यतेऽनुष्ठातुं विक्षिप्तत्वाद्वेदवाक्यानां गूढार्थत्वाच्चातः कविभिराचार्यैर्वेदार्थकुशलैर्वेदार्थेभ्यो निष्कृष्य कर्मार्थं सुबोधा[१७]नीमानि विद्यास्थानानि प्रवर्तितानि शिक्षा कल्पो

---

(१) B^2 omits च. (२) B^2 adds वेदितव्यं. (३) B^2 omits यथा. (४) व्याप्य च (for अथाप्यृच) I^2P. (५) -हरति I^2. B^2 adds यः समिधेति। (६) -प्रभृतीनि। (for -प्रभृ-—इति।) B^2. (७) तत्-। (for तद्—इति) B^2. (८) केचित् B^3. (९) पुरुष- B^2B^n. (१०) इति (for एष) B^2. (११) -ष्ट- B^2. (१२) -क्ष्य- B^2. (१३) यदुक्तम् B^2. (१४) विधिनिन्दा B^3I^2. (१५) -न- B^2. (१६) -प्रश्नो B^2. (१७) कर्मार्थसुखावबोधना- B^2.

व्याकरणं निरुक्तं छन्दो ज्योतिषं धर्मशास्त्रं पुराणं न्यायविस्तरो[1] मीमांसादीनि ।

कानि पुनः प्रयोजनानि विद्यास्थानानामनुप्र[2]वर्तन्ते । अत आह । शिक्षा स्वरवर्णोच्चारणोपदेशकं[3] शास्त्रम् । कल्पो वेदविहितानां[4] कर्मणामानुपूर्व्येण कल्पनाशास्त्रम् । व्याकरणं च[5] शब्दार्थव्युत्पत्तिकरं शास्त्रम् । निरुक्तं पदविभागमन्त्रार्थदेवतानिरूपणार्थं[6] शास्त्रम् । छन्दो गायत्र्यादीनां[7] छन्दसां ज्ञानशास्त्रम् । ज्योतिषं कालपरिज्ञापनार्थं[8] शास्त्रम् । धर्मशास्त्रमाचाराद्युपदेशकं शास्त्रम् । पुराणं स्थित्युत्पत्तिप्रलयादिसूचकं शास्त्रम् । न्यायविस्तरः[9] प्रमाणैरर्थपरीक्षणं करोति शास्त्रम् । मीमांसा वेदवाक्यार्थ[10]विचारणाय शास्त्रम् । इत्येवमादीनि प्रयोजनानि विद्यास्थानानाम् ।

अत आचार्यो भगवाञ्छौनको वेदार्थवित्सुहृद् भूत्वा ब्राह्मणेभ्योऽर्थवादानुत्सृज्य विधिं समाहृत्य पुरुषहितार्थमृग्वेदस्य शिक्षाशास्त्रं कृतवानिति प्रदर्शनार्थं वर्णयन्ति[11]। अन्यथा वेदार्थो न शक्यते ज्ञातुम्। तथा चोक्तम् । न प्रत्यक्षमनृषे[12]रस्ति मन्त्रः (बृ० दे० ८।१२९) इति । यथा च ।

योगेन दाक्षिण्येन दमेन बुद्ध्या[13]बाहुश्रुत्येन[14]तपसा नियोगतः[15] (बृ० दे० ८ । १३०) इति ॥

प्रसङ्गाद्बहु लपितमिदानीं प्रकृतमुच्यते—

---

(१) -विचारो B^2. (२) -स्थानानां प्र- B^2. (३) -शिकं B^3. (४) -विचिह्नानां B^2. (५) B^2 omits च. (६) B^3, -देवतानिरूपणार्थं- I^2B^n, -वेदनासंनिरूपकं B^2. (७) गायत्र्यादि- B^2. (८) -ज्ञानार्थं B^3B^2. (९) -विचारः B^2. (१०) B^3 omits -वाक्यार्थ-. (११)-यति B^2. (१२) नाप्रत्यक्षमृषे- B^2. (१३) पुष्ट्या B^2. (१४) बहुश्रुतेन B^2. (१५) नियोगत B^2, नियोगात् P, नियोत I^2, नियोज्यत B^3, नियुज्यत B^n.

गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च ।
लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥५॥
स्वरितोदात्तनीचत्वं श्वासो नादस्तथोभयम् ।[1]

वर्णानां गुरुत्वं चाधिक्यं हि यथा—गुरूणि दीर्घाणि (१।२०) इत्येवमादि । तथा साम्यं समत्वमित्यर्थः । ह्रस्वत्वं दीर्घत्वं प्लुतत्वं च[2] । लोपश्चागमश्च विकारश्च । वर्णानां लोपो यथा । चित्कम्भनेन स्कभीयान् (ऋ० १०।१११।५) इति । आगमः । अस्कृतोपसम् (ऋ० १०।१२७।३) इति । विकारः । सुपुमा यातम् (ऋ० १।१३७।१) इति । प्रकृतिः । प्रकृत्येतिकरणादौ प्रगृह्याः (२।५१) इति । यथा । प्रो अस्मै (ऋ० ८। ६२।१) । इन्द्राग्नी अपादियम् (ऋ० ६।५९।६) इति । विक्रमः । विक्रान्तः[3] प्रा[4]कृतोपधः (४।३५) इति । याः फलिनीः (ऋ० १०।९७।१५) । अगस्त्यः खनमानः (ऋ० १।१७९।६) । क्रमश्च वेदितव्यः । यथा । स्वरानुस्वारोपहितः (६।१) इति द्वित्वं वर्णानाम् । यथा । आ प्र द्रव परावतः (ऋ० ८।८२।१) । स्वरितत्वमुदात्तत्वम् । नीचत्वम् । अनुदात्तत्वमित्यर्थः । यथा । उदात्तश्चानुदात्तश्च (३।१) इत्यादि । श्वासत्वं नादत्वं तथोभयं[5] श्वासनादत्वम् । श्वासोऽघोषाणाम् (१३।४) इत्येवमादि ॥

एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता[6] ॥६॥

एतत्सर्वं यदनुक्रान्तम्—माण्डूकेयः संहिताम्—इत्येवमादि तत्सर्वं विज्ञेयं विविधं ज्ञेयम्[7] । वेदितव्यमित्यर्थः । केनेत्यत आह ।

---

(१) Instead of गुरुत्वं— -भयम् I² reads : गुरूभयं. स्वरितो- —भयम् omitted in B². (२) प्लुतत्वं च B², omitted in B³ I² Bⁿ. (३) क्रान्तः Bⁿ, विक्रान्तः omitted in B². (४) प्र- B³. (५) -भयत्वं Bⁿ. (६) एतत्० यता (*sic*) I². B² adds : छंदोज्ञानमाकारभूतं ज्ञानं छंदसां व्याप्तिं स्वर्गामृतप्राप्तिं । (७) Bⁿ omits ज्ञेयम्.

छन्दोभाषां योऽधीते तेनेत्यर्थः। नान्येन। द्विविधा हि भाषा। लौकिकी वैदिकी च। या वैदिकी सा छन्दो[1]भाषेत्युच्यते। यथा चोक्तम्। लोकवेदयोः (पा० शि० १) इति। विज्ञेयमिति सर्वत्रानुषज्यते[2] पुरस्तादुपरिष्टाच्च ॥

छन्दोज्ञानमाकारं भूतज्ञानं
छन्दसां व्याप्तिं स्वर्गामृतप्राप्तिम्।[3]

छन्दसां ज्ञानं छन्दोज्ञानं यथा गायत्र्यादि। तथा छन्दसामाकारं श्वेतादि। भूतज्ञानं छन्दसाम्[4]। यथा। सर्वाणि भूतानि मनो गतिश्च (१८।५९) इत्यादि। तथा छन्दसां व्याप्तिम्। यथा। गुर्वक्षराणां गुरुवृत्ति सर्वम् (१८।६०) इत्यादि। स्वर्गप्राप्तिं चामृतप्राप्तिं च स्वर्गामृतप्राप्तिम्[5]। यथा। स्वर्गं जयत्येभिरथामृतत्वम् (१८।६२) इति[6] ॥

तच्च विज्ञेयं यस्मात्तस्मात्

अस्य ज्ञानार्थमिदमुत्तरत्र
वक्ष्ये शास्त्रमखिलं शैशिरीये ॥७॥[7]

अस्य कस्य। माण्डूकेयः संहिताम्—इत्येवमादेर[8]नुक्रान्तस्य ज्ञानार्थम्। ज्ञानप्रयोजनायेत्यर्थः। इदं शास्त्रं पार्षदाख्यमखिलं संपूर्णं कृत्स्नम्[9] उत्तरत्र वक्ष्ये। वक्ष्याम इत्यर्थः। शैशिरीये[10]।

---

(१) छंदसो B². (२) -ज्येत B³. (३) Instead of this ~~line~~ Half Stanza B² reads छंदोप्राप्ति, I² छंदोप्राप्तिं. (४) -सा B². (५) -मृतत्वप्राप्तिः Bⁿ. (६) इत्यादि Bⁿ. (७) अस्य ये (instead of अस्य— -ये) B², अस्य०रीये I². (८) इत्यादेर- B². (९) B², कृछ्रं (-च्छ्रं Bⁿ) B³I²Bⁿ. (१०) शैशरीये Bⁿ.

पारायणपाठ इति वाक्यशेषः। शैशि[1]रीयायां संहितायामित्यर्थः। शैशि[1]रीया संहिता[2] शिशिर[3]दृष्टत्वात्। तथा पुराण उक्तम्।

मुद्गलो गोखुलो वात्स्यः शारीरः[4] शिशिरस्[5] तथा।
पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः॥

इति। तथा च[6] ऋग्वेदे शैशिरीयायां संहिताया[7]मिति। यथा।

ऋग्वेदे पारणाम्नाये[8] शाकल्ये शैशि[1]रीयकम्[9]।

इति च[10]॥

पदक्रमविभागज्ञो वर्णक्रमविचक्षणः।
स्वरमात्राविशेषज्ञो गच्छेदाचार्यसंपदम्॥८॥[11]

पदानां क्रमः पदक्रमः[12]। अनुपरिपाद्या[13] संहिता पदसंहिता। वर्णसंहिता च यथा[14]वर्णानां क्रमो वर्णक्रमः। वर्णसंहिताविचक्षण इत्यर्थः। अथवान्यथा योजना। पदानां क्रमस्य च पदाध्ययनस्य च[15]क्रमाध्ययनस्य च[16]विभागो विविधो भागो विभागः। एवं यो जानाति स च[15]पदक्रमविभागज्ञः। वर्णक्रमविचक्षण इति संहिताध्ययनविचक्षण इत्यर्थः। एवमध्ययनत्रितयं च प्रकृतं निर्भुजं प्रतृण्णमुभयमुत्तरं[17]च। तस्मादेवमुच्यते॥

---

(१) -श- B^n. (२) B^2 omits शैशिरीया संहिता. (३) शिशिर- I^2 P, शैशिर- B^2, शैशिरि- B^3, तद् B^n. (४) शारीशः B^n, शैशिरः B^2. (५) शिशिरस् B^2 P, शिशिरिस् B^3 I^2 B^n. (६) B^2 omits च. (७) शैशरीयां संहिता-B^n. (८) -वेदपारणाम्नाये B^3, -वेदे पारायणाम्नाये B^2. (९) -के B^2. (१०) इति वा ज्ञानार्थमिदं उत्तरत्र वक्ष्ये शास्त्रमखिलं (for इति च) B^2. (११) B^2 omits this stanza, I^2 reads (instead of it): पद० सदं. (१२) शैशिरीयपदानां क्रमं पदक्रमं B^2. (१३) ^-पाद्या B^n, -पाद्य। B^2. (१४) B^n omits यथा. (१५) B^2 omits च. (१६) B^n omits क्रमाध्ययनस्य च. (१७) उत्तरं B^3 B^2 I^2 B^n. See note.

स्वरमात्राविशेषज्ञः। स्वराश्च मात्राश्च स्वरमात्राः। स्वरा उदात्तादयः। मात्रा ह्रस्वादयः। एवं विशेषं यो जानाति स गच्छेद् व्रजेत्। क गच्छेदित्युच्यते। आचार्यसंपदम्[1]। आचार्यत्वं कुर्यादित्यर्थः। अन्यथाधिकार्येव न भवति। तथा चोक्तम्। याजनाध्यापनाभ्यां स[2] च्छन्दसां[3] यातयाम च[4] स्थाणुं वर्च्छति[5] गर्तं वा पात्यते प्रमीयते वा। इत्यादि। तथा चोक्तम्।

वटवः[6] पण्डिता मूर्खा अन्योन्याध्यापकाश्च ये।
दोषं कुर्वन्ति ते मूढास्तस्माद् वृद्धं तु[7] सेवयेत्॥

इति। अथवा गच्छत्याचार्यसंसदमिति पाठः। गच्छति व्रजति प्राप्नोति। आचार्याणां संसदं सभास्थानम्। सुमन्त्वादय आचार्या यत्र[8] तिष्ठन्ति तत्रेत्यर्थः। एवं वृद्धप्रशंसा। यथा। ऋङ्मयो यजुर्मयः साममयः (ऐ० आ० १। २२ ।१५) इति। यथा च। स य एवमेतां संहितां वेद (ऐ० आ० ३। १। ५) इति॥

एवं शास्त्रप्रयोजनमुक्त्वा[9] शास्त्र[10]संव्यवहारार्थं वर्णक्रमार्थं चाक्षरसमाम्नायमाह—

अकारऋकाराविउएओऐऔ।

अकारश्च ऋकारश्च अकारऋकारौ। अ ऋ इति। अथ इकारश्च उकारश्च एकारश्च ओकारश्च ऐकारश्च औकारश्चेति। इ उ ए ओ ऐ औ इति। एवमनेन क्रमेणाष्टौ[11] वर्णा वेदितव्याः॥

---

(१) B^nB^2, -संसदम् B^3I^2. (२) B^2PB^3, -भ्यां स corrected to -भ्यास- I^2, -भ्यास- B^n. (३) -सा B^n, -सो P. (४) -यामं वा P. (५) I^2B^2, वर्त्स्यति B^3B^n (व- B^n.). (६) B^n, बटवः B^3I^2, वडवः B^2. (७) B^3 omits तु. (८) B^3I^2 add ते. (९) उक्तं अथ B^2. (१०) शास्त्रे B^2. (११) क्रमेण व्याख्येयं। अष्टौ B^2, Reg.

पदाद्यन्तयोर्न ऌकारः स्वरेषु ।

पदस्याद्यावन्ते[1] च ऌवर्णः स्वरेषु न गृह्यते । पदमध्ये भवतीति[2] वेदितव्यम् । उत्तरत्रापि विचारयिष्यामः ॥

आकारादीन्दीर्घरूपान्द्वितीयान्ह्रस्वेषु[3] ।

अकारादयो ह्रस्वा उक्ताः । तेषु तेषु ह्रस्वेष्वाकारादयो दीर्घरूपाः । तान्द्वितीयान्विजानीयात् । किमुक्तं भवति । अकारो ह्रस्वः । तस्य आकारो दीर्घो द्वितीयो वेदितव्यः[4] । तथा ऋकारो ह्रस्वः । तस्य ॠकारो दीर्घो द्वितीयः । तथा इकारो ह्रस्वः । तस्य ईकारो दीर्घो द्वितीयः । तथा[5] उकारो ह्रस्वः । तस्य ऊकारो दीर्घो द्वितीयः[6] । अ आ ऋ ॠ इ ई उ ऊ इत्येतत्सिद्धं भवति ॥

पञ्चस्वपि तानि सन्ति ॥८॥

तानि कानि । दीर्घाणीत्यर्थः । पञ्चस्वपि ह्रस्वेषु द्वितीया भवन्ति किं पुनश्चतुर्षु । अपिशब्द ऌ[7]कारस्य विकल्पार्थः[8] । यदि दीर्घो वर्तते । वक्ष्यति । ऋकारल्कारौ[9] (१ । ४१) इति[10] । तथा । ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ (१ । ५५) इति ॥

कखौ गघौ ङः[11] ।

ककारश्च खकारश्च कखौ । तथा गकारश्च घकारश्च गघौ । ङकारश्च । क ख ग घ ङः[11] । एवं पञ्चभिर्वर्णैः प्रथमः पञ्चवर्गो वेदितव्यः ॥

---

(१) अन्त्ये B^3B^n. (२) भवेदिति B^2, Reg. (३) B^2 adds पंचसु. (४) B^n omits वेदितव्यः. (५) B^2 omits तथा. (६) I^2 adds वेदितव्यः. (७) -शब्दः ऌ- I^2B^2, -शब्दो ऌ- (ऋ- B^3) B^3B^n. (८) B^2B^n, -र्थं B^3I^2, -र्थे Reg. (९) -रऌकाराव MSS. and B^n. (१०) अपि B^2. (११) ङः B^n.

चछौ जझौ ञ[1] ।

चकारश्च छकारश्च चछौ । जकारश्च झकारश्च जझौ । ञकारश्च । च छ ज झ ञ[1] । एवं पञ्चभिर्वर्णैः[2] द्वितीयः पञ्चवर्गः ॥

टठौ डढौ ण[3] ।

टकारश्च ठकारश्च टठौ । डकारश्च ढकारश्च डढौ । णकारश्च । ट ठ ड ढ ण[4] । एवं पञ्चभिर्वर्णैस्तृतीयः पञ्चवर्गः ॥

तथौ दधौ न[5] ।

तकारश्च थकारश्च तथौ । दकारश्च धकारश्च दधौ । नकारश्च । त थ द ध न[5] । एवं पञ्चभिर्वर्णैश्चतुर्थः पञ्चवर्गः ॥

पफौ बभौ म[6] ।

पकारश्च फकारश्च पफौ । बकारश्च भकारश्च बभौ । मकारश्च । प फ ब भ म[6] । एवं पञ्चभिर्वर्णैः पञ्चमः पञ्चवर्गः ॥

यरलवाः ।

यकारश्च रेफश्च लकारश्च वकारश्च यरलवाः । एते चत्वारो वेदितव्याः ॥

हशषसाः ।

हकारश्च शकारश्च षकारश्च सकारश्च हशषसाः । एते चत्वारोऽनेन क्रमेण वेदितव्याः ॥

अः ꣸क ꣸प अं ।

अः इति विसर्जनीयः । ꣸क इति जिह्वामूलीयः । ꣸प इत्युपध्मानीयः । अं इत्यनुस्वारः । एवमपरे चत्वारोऽनेनैव[7] क्रमेण वेदितव्याः ॥

---

(१) ञः Bⁿ. (२) पंचवर्णैः B². (३) णः Bⁿ. (४) -णः Bⁿ. (५) नः Bⁿ. (६) मः Bⁿ. (७) अनेन Bⁿ.

इति वर्णराशिः क्रमश्च[१] ॥१०॥

इत्येवमु[२]क्तप्रकारेण वर्णराशिर्वेदितव्यः । अकाराद्यनुनासिकान्तः । वर्णानां राशिर्वर्णराशिः[३] । संघातः समूहः । वर्णकोशो वर्णसमाम्नाय इत्यनर्थान्तरम् । वर्णक्रमश्चायमेव वेदितव्य उक्तप्रकारेण । वक्ष्यति । ऋकारादयो दश नामिनः स्वराः (१ । ६५) इति । तथा । परेष्वैकारमोजयोः (२ । १८)[४] औकारं युग्मयोः (२ । १९) इति । अन्त्याः सप्त तेषामघोषाः (१ । ११) । तथा । प्रथमपञ्चमौ च द्वा[५] ऊष्मणाम् (१ । ३९) इति । एवमादिष्वयं क्रमो वेदितव्यः ॥

एवं वर्णसमाम्नायमुक्त्वा तत्र लघुनोपायेन संज्ञापरिभाषाभ्यां शास्त्रे संव्यवहारसिद्धिं मन्यमानः संज्ञासंज्ञिसम्बन्धार्थमाह ॥

॥ इति श्रीदेवमित्रसुतविष्णुमित्रकृते प्रातिशाख्ये[६] वर्गद्वयवृत्तिः[७] ॥[८]

---

(१) वर्णराशिक्रमश्च Bⁿ. (२) पंच इत्येवमु-B². (३) Bⁿ omits वर्णराशिः. (४) B² adds इति. (५) B²Bⁿ, द्वाव् B³I². (६) B³B²I²Bⁿ, प्रातिशाख्यभाष्ये P. (७) -वृत्ति B³I². (८) This colophon occurs before एवं वर्णसमाम्नायमुक्त्वा—आह in B³Bⁿ. After आह Bⁿ adds अष्टौ समानाक्षरमित्यादि । इति परावरे ब्रह्मणीत्यारभ्य सकलदेशीयवैदिकैः पठ्यमानस्य वर्गद्वयस्य व्याख्या । अथ भाष्यम् ।

अथ शौनकीयमृग्वेदप्रातिशाख्यम्

उवटकृतभाष्यसहितम् ।

ओ३म्

नमो भगवते मङ्गलेश्वरश्रीमद्दिव्यलक्ष्मीनृसिंहाय

श्रीवेदपुरुषाय नमः

अष्टौ समानाक्षराण्यादितः ॥ १ ॥

किमर्थमिदमारभ्यते ।

शिक्षाच्छन्दोव्याकरणैः सामान्येनोक्तलक्षणम् ।
तदेवमिह शाखायामिति[1] शास्त्रप्रयोजनम् ॥

प्रातिशाख्यप्रयोजनमनेन श्लोकेनोच्यते । शिक्षादिभिर्यत्सामान्येनोत्सर्गेणोक्तं लक्षणम् । यथा तावच्छिक्षायाम्—स्युर्मूर्धन्या ऋटुरषाः (पा० शि० १७) सामान्येन सर्वशाखासु रेफो मूर्धन्य इत्युक्तः । तथान्यस्यां शिक्षायाम्[2]—दन्तमूलीयः (या० शि० पृष्ठ ३३) इति रेफो दन्तमूलीय उक्तः[3]। एवं सर्वा शिक्षा[4] वर्णेषु स्थानकरणानुप्रदानादि सर्वासु शाखासु विदधाति। न तु नियमतः[5] कस्यां शाखायां रेफो मूर्धन्यः कस्यां दन्तमूलीय इति । अत एतद्व्य[6]वस्थापकमारभ्यते—दन्तमूलीयस्तु तकारवर्गः (१ । ४४) सकाररेफलकाराश्च (१ । ४५) रेफं वर्त्स्यमेके (१ । ४६) । एवमस्यां शाखायां दन्तमूलीयो वा वर्त्स्यो वा रेफ इत्येतदवधारितम्[7] । (१ = बर्स्व्य)

---

(१) शाखा (instead of शाखायामिति) B^3. (२) शाखायां B^2. (३) इत्युक्तः B^2. (४) B^3I^2, सर्वशिक्षा B^2, सर्वाः शिक्षा B^n. (५) B^2B^n, नियतः B^3I^2. (६) B^2B^n, एवद्व्य- B^3, एतदन्य- I^2. (७) B^2,-त्सारितं (instead of -धारितम्) $B^3I^2B^n$.

तथा सर्वैश्छन्दोविचित्यादिभिः[१] पिङ्गलयास्क[२]सैतवप्रभृतिभिर्यत्सामान्येनोक्तं लक्षणम्। यथा षट्सप्तत्यक्षरा चातिधृतिर्भवति। तथा[३] तत्रैवोक्तम्—पादः (पि० ३।१) इत्यादिपूरणः (पि० ३।२)। एवं सामान्यलक्षणे सति—स हि शर्धो न मारुतम् (ऋ० १।१२७।६) इति चातिच्छन्दस्यष्टापदायामष्टषष्ट्यक्षरायामृचि संदेहः। किमियमष्ट[४]षष्ट्यक्षरात्यष्टिः पादानामविकर्षेण। आहोस्वित्पादानां विकर्षेणातिधृतिः। अस्मिन्संदेह इदं विशेषलक्षणमारभ्यते—सखे च स हि शर्धश्च मध्यमो वर्ग उच्यते (१६। ९१) इति। एवमस्यां शाखायां पादविकर्षेणेयमतिधृतिः।

तथा व्याकरणे यत्सामान्येन। यथा—ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् (पा० ६। ३। १३३) इति। अस्य सूत्रस्यायमर्थः। ऋग्विषये तु नु घ मक्षु तङ्। आख्यातानि पिपृत गायत इत्येवमादीनि तङ्शब्देन गृह्यन्ते। कुत्र उरुष्य एतानि पदानि व्यञ्जने परे दीर्घमापद्यन्ते। तु। आ तू न इन्द्र वृत्रहन् (ऋ० ४।३२।१)। नु। नू ष्टुत इन्द्र नू गृणानः (ऋ० ४। १६।२१)। घ। आ घा ये अग्निमिन्धते (ऋ० ८।४५।१)। मक्षु। मक्षूमक्षू कृणुहि गोजितो नः[५] (ऋ० ३। ३१। २०) इत्यादि। तद्व्यवस्थापयितुमिदमारभ्यते। न सर्वत्रैतानि पदान्यस्यां शाखायां दीर्घाणि[६] भवन्ति। यथा। तु। तत्तु प्रयः प्रत्नथा ते शुशुक्वनम्[७] (ऋ० १। १३२। ३)। नु। अधि वोचा नु सुन्वते (ऋ० १। १३२। १)। घ। आ घ त्वावान्त्मनाप्तः (ऋ० १। ३०। १४)।

---

(१) B^n, सर्वैश्छंदश्चित्यादिभिः I^2, सर्वैश्छंदश्चिदित्यादिभिः B^3, सर्वैश्छंदश्चित्या- B^2. (२) B^2B^n, -लास्क्य- I^2, -लयस्क- B^3. (३) B^2, तथा च $I^2B^3B^n$. (४) B^2, अष्टा- $I^2B^3B^n$. (५) I^2, कृणुहि० B^2, गोजितो नः omitted in B^3B^n. (६) दीर्घ corrected to दीर्घाणि I^2, दीर्घी- B^3, दीर्घा B^2B^n. (७) शुश्वुक्वनं I^2, शुशुक्वनम् omitted in B^3 B^n, B^2 gives only तत्तु प्रयः।

ननु मत्त्रुशब्दस्य सामान्यलक्षणेनैव दीर्घभाव उक्तः । न चात्रापवादोऽस्ति । तत्र ह्येवं पठ्यते—मद्विवत्युकारः प्लुवते सर्वत्राप्यपदान्तभाक् (७ । ५)। अतो मत्त्रुशब्दस्य मृग्यं प्रयोजनम्। नैष दोषः। सामान्यलक्षणानुवादेनैव विशेषलक्षणं विधातुं शक्यते। नान्यथा। सोऽयं मत्त्रुशब्दस्यानुवादो द्रष्टव्यः। एवमन्यत्रापि सामान्यविशेषलक्षणसाम्ये[१] परिहारो द्रष्टव्यः।

एवं शिक्षाच्छन्दोव्याकरणैर्यत्सर्वासु शाखासु सामान्येन लक्षणमुच्यते तदेवास्यां शाखायामनेन व्यवस्थाप्यत इत्येतत्प्रयोजनमस्याङ्गस्य। तथा चाथर्वणप्रातिशाख्य इदमेव प्रयोजनमुक्तम्—एवमिहेति च विभाषाप्राप्तं सामान्येन (अथ० प्रा० १ । २)। अस्य सूत्रस्यायमर्थः। सामान्येन लक्षणेन यद्विकल्प[२]प्राप्तं तदेवमस्यां शाखायां व्यवस्थितं भवतीति प्रातिशाख्यप्रयोजनमुक्तम् ।

अथवा नैवैतदङ्गं शिक्षाच्छन्दोव्याकरणैः सामान्येनोक्तलक्षणस्य विशेषे व्यवस्थापकम्[३] । किंतु स्वतन्त्रमेवैतदन्यशास्त्र[४]निरपेक्षम्। तथाहि शिक्षाच्छन्दोव्याकरणैर्यन्न विहितं तदिह विधीयमानं दृश्यते। यथा क्रमः क्रमहेतुः पारायणमित्येव[५]मादिकम् । अङ्गता चास्यान्य[६]शास्त्र[७]सव्यपेक्षस्य नैव स्यादकृत्स्नत्वात्। कृत्स्नतां वेदाङ्गतामनिन्द्यतामार्षतां च स्वयमेव शौनको दर्शयिष्यति—कृत्स्नं च वेदाङ्गमनिन्द्यमार्षम् (१४ । ६८) इति । अनयोः पक्षयोर्यतरः पक्षः श्रेयांस्ततरो ग्रहीतव्यः ॥

उक्तं शास्त्रप्रयोजनम् । प्रथमे तु पटले संज्ञाः परिभाषाश्चोच्यन्ते । तदर्थमिदमारभ्यते—

---

(१) B^2 B^n, -सामान्ये I^3, -साम्येन्ये B^3. (२) विकल्पं B^3. (३) B^2, विशेषव्यवस्थापकं B^n, विशेषेऽवस्थापकं B^3 I^2. (४) B^2, अन्यच्छास्त्र- B^3 I^2, अन्यच्छास्त्र- B^n. (५) पारायण इत्येव- B^3. (६) B^2 B^n, वास्यान्य- B^3 I^2. (७) B^2 I^2 B^n, -शा- omitted in B^3.

अष्टौ समानाक्षराण्यादितः ॥ १ ॥

अष्टाविति संख्या। समानाक्षराणीति संज्ञा। आदित इति पञ्चमी। पञ्चम्यास्तसिल् (पा० ५। ३। ७) इति हि वैयाकरणाः पठन्ति। अथ कोऽर्थः। आदित आरभ्य वर्णसमाम्नायस्याष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्ति। यथा अ आ ऋ ॠ इ ई उ ऊ। समानाक्षरसंज्ञायाः प्रयोजनम्—समानाक्षरे सस्थाने (२। १५) इति।

अथवा आदित इति नैवायं पञ्चम्यर्थे तसिल्। किं तर्हि। सप्तम्यर्थे। तत्रापि हि लक्षणं स्मर्यते—तसिप्रकरणे[1] आद्यादिभ्य उपसंख्यानम् (पा० वा० ५। ४। ४४) इति। तत्र चैतान्युदाहरणानि—आदितो मध्यतः पृष्ठत इति। अतोऽयं सप्तम्यर्थ एव। अस्मिन्पक्ष एवम्। वर्णसमाम्नायस्यादावष्टाक्षराणि समानाक्षरसंज्ञकानि भवन्ति॥

ततश्चत्वारि संध्यक्षराण्युत्तराणि ॥ २ ॥

ततस्तेभ्यः समानाक्षरेभ्य उत्तराणि चत्वारि संध्यक्षरसंज्ञकानि भवन्ति। अकारस्य इकारेण उकारेण एकारेण ओकारेण[2] च सह संधौ यान्यक्षराणि निष्पद्यन्ते तानि तथोच्यन्ते। यथा ए ओ ऐ औ। संध्यक्षरसंज्ञायाः प्रयोजनम्—संध्यानि संध्यक्षराण्याहुरेके (१३। ३८) इति। तत इत्यनयैव पञ्चम्या संध्यक्षराणां समानाक्षरैः सहानन्तर्ये सिद्धे यदुत्तराणीति वदति तदन्तरा ऌ ॡ इत्यनयोः स्वरयोः प्रतिषेधार्थम्। तथा च यत्नं करिष्यति—ऋकारादयो दश नामिनः स्वराः (१। ६५) इति॥

---

(१) तसिप्रकरणे I^2, तसिल्प्रकरणे B^3 B^2 B^n. (२) B^2 B^n; एकारेण च (instead of एकारेण) B^3 I^2; अकारस्य इकारेण [ईकारेण] उकारेण ऊकारेण Reg. (ईकारेण is supplied by Reg. himself); उकारेण omitted in I^2.

एते स्वराः ॥ ३ ॥

य एते समानाक्षरसंध्यक्षरसंज्ञा वर्णास्त एते द्वादश स्वरसंज्ञा वेदितव्याः । उदात्तानुदात्तस्वरितप्रचया एष्वक्षरेषु[1] स्थिताः । स्वर्यन्ते शब्द्यन्त[2] इति स्वराः । यथा अ आ ऋ ॠ इ ई उ ऊ ए ओ ऐ औ इति । स्वरसंज्ञायाः प्रयोजनम्—स्वरानुस्वारोपहितो द्विरुच्यते (६। १) इति ॥

ननु कथं वर्णसमाम्नायमनुपदिश्यैव—अष्टौ समानाक्षराण्यादितः (१। १) इति । उपदिष्टस्य हि व्यपदेश एवमुपपद्यत आदित इति । नानुपदिष्टस्य । तथा—चत्वारि संध्यक्षराण्युत्तराणि (१ । २) इत्युत्तरव्यपदेशो नैव घटत इति ।

नैष दोषः। उपदिष्टो वर्णसमाम्नायो लौकिको विद्यते । तत्र यावन्तो वर्णा अस्यां शाखायामुपयोक्ष्यन्ते[3] तावतां संज्ञां कर्तुं तमेव वर्णसमाम्नायमुररीकृत्याह—अष्टौ समानाक्षराण्यादितः[4] (१।१)। तथा तामेवानुपूर्वीमङ्गीकृत्य—चत्वारि संध्यक्षराणि (१ । २) इत्युत्तरशब्दमाह ।

ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते एवं तर्हि तयानुपूर्व्या भवितव्यम् । तत्र च ऊकारात्[5] परौ ऋॠकारौ समामनन्ति—उ ऊ ऋ ॠ इति । तथा ऐकारात्पूर्वमेकारमौकारात्पूर्वमोकारम्—ए ऐ ओ औ इति। सकारात्परं हकारं समामनन्ति—श ष स ह इति ।

सत्यम्[6] । आचार्यप्रवृत्त्या क्रमोऽन्यथानुमीयते । तद्यथा—ऋकारादयो दश नामिनः स्वराः (१ । ६५) इति । यद्याकारात्परौ पठ्येते तदानीं दश नामिनः स्वराः संपद्यन्ते । तथा—संध्येष्वकारोऽर्धमिकार उत्तरं युजोरुकारः (१३ । ३९) इति । यदि ए ओ ऐ

---

(१) यत्त्वक्षरेषु I^2. (२) B^3 B^2 I^2 B^n, पठ्यंत Reg. (३) B^3 B^2 B^n, उपयोज्यंते I^2. (४) I^2 B^3 B^n, -दित इति B^2 (५) I^2 B^n, उऊकारात् B^2, कुकारात् B^3. (६) सत्यम् omitted in I^2.

श्रौ एवं पाठो भवति तदानीं युजोरुत्तरमर्धमुकारः संपद्यते। तथा यदि शकारात्[1] पूर्वो हः पठ्यते[2] तदानीं—दुस्पृष्टं तु प्राग्घकाराच्चतुर्थाम् (१३ । १०) अयं पाठक्रम उपपद्यत इति। सोऽयमाचार्यप्रवृत्त्या पाठक्रमोऽनुमीयमानो लौकिकवर्णसमाम्नायस्य द्विधा पाठं गमयति। अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते। तथा तयानुपूर्व्या तन्न दुरुक्तमिति। उभे अप्येते आनुपूर्व्यौ[3] लौकिकस्य वर्णसमाम्नायस्य द्रष्टव्ये ॥

इपरो दीर्घवत्प्लुतः ॥ ४ ॥

इकारपरः प्लुतो दीर्घवत्प्रत्येतव्यः। वतिः सर्वसादृश्यार्थः। यथा ईकार[4] इतिना सह संधौ दीर्घमेकमीकारं निरनुनासिकमापद्यते तथायमपि प्लुत ईकारं निरनुनासिकमापद्यत इत्यर्थः। क्रमसंहितायां परिग्रहस्य[5] पूर्वे वचन ईत्वभूतो भवति। द्वितीयेऽनुनासिकस्त्रिमात्रस्तु[6]। यथा—विन्दतीति विन्दती३ (ऋ० क० १०। १४६ । १) ॥

अनुस्वारो व्यञ्जनं वा स्वरो वा ॥ ५ ॥

अं इत्यनुस्वारो वर्णसमाम्नाये पठ्यते। स कांश्चित्स्वरधर्मान्गृह्णाति कांश्चिद्व्यञ्जनधर्मान्। तद्यथा ह्रस्वत्वं दीर्घत्वं प्लुतत्वमुदात्तत्वमनुदात्तत्वं[7] स्वरितत्वमिति स्वरधर्माः। तथार्धमात्राकालता[8] स्वरवशेनोदात्तानुदात्तस्वरितत्वं संयोगश्चेति व्यञ्जनधर्माः। तत्रोभयधर्मयोगादुभयस्वभावं स्वरव्यञ्जनयोरन्यद्वर्णान्तरं प्रकाशयति—अनुस्वारो व्यञ्जनं वा स्वरो वा इति। वर्णस्वरूपकथनेन[9]

---

(१) सकारात् I^2. (२) B^n, पठ्यते B^2, पठ्यत I^2 B^3. (३) अनुपूर्व्यौ B^3. (४) ईकार Reg.; इकार $B^3B^2I^2B^n$. (५) B^2B^n; परिग्रहस्य omitted in B^3I^2, Reg. (६) B^3I^2; त्रिमात्रश्च B^n; त्रिमात्रः B^2, Reg. (७) B^3I^2, Reg.; अनुदात्तत्वं omitted in B^2B^n. (८) तथार्धमात्र- B^3. (९) B^n; वर्णस्वरूपकथन- I^2B^2, Reg.; वर्णस्वरूपकत्वेन B^3.

प्रयोजनम्[१] । तेन[२] स्वरग्रहणेन व्यञ्जनग्रहणेन च न[३] गृह्यते । स्वशब्दग्रहणेन वर्णग्रहणेन च गृह्यते[४] । यथा—स्वरानुस्वारोपहितो द्विरुच्यते (६।१) इति स्वरशब्देन न गृह्यते । स्वशब्देन च गृह्यते[५] । अनुस्वारो व्यञ्जनं चाक्षराङ्गम् (१ । २२) इति च व्यञ्जनग्रहणेन न गृह्यते । एके वर्णाञ्छाश्वतिकाञ्च कार्यान् (१३ । १४) इत्यत्र वर्णग्रहणेनानुस्वारोऽपि गृह्यत इति ।

ननु—सर्वः शेषो व्यञ्जनान्येव (१।६) इति व्यञ्जनग्रहणेनानुस्वारग्रहणमस्तु । को गुण इति चेत् । सूत्रमेतन्नारब्धव्यं[६] स्याद्व्यञ्जनग्रहणेन ग्रहणात् । सव्यञ्जनः सानुस्वारः शुद्धो वापि (१८ । ३२) अनुस्वारो व्यञ्जनं चाक्षराङ्गम् (१ । २२) इति—संयोगानुस्वारपराणि यानि (१ । २१) इत्येवमादिसूत्रेष्वनुस्वारग्रहणं न कर्तव्यं स्याद्व्यञ्जनग्रहणेनैव सिद्धत्वात् । स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः (६ । १) इत्यत्रानुस्वारस्य व्यञ्जनत्वे सत्यपि वचनात्परस्य संयोगादेर्द्विरुक्तिर्भविष्यति न त्वनुस्वारस्यैव । इत्येवमनुस्वारस्य व्यञ्जनत्वेन सर्वमभिप्रेतं सिद्ध्यति । अतो व्यञ्जनग्रहणेनैवानुस्वारग्रहणं भवतु किमनेन योगेन—अनुस्वारो व्यञ्जनं वा स्वरो वा इति ।

सत्यमेतद्यदि नामानुस्वारस्य स्वरूपं न कथितं स्यात् । तस्मात्स्वरव्यञ्जनातिरिक्तमन्यद्वर्णान्तरमेतदित्येतत्ख्यापन[७]परमेवैतत्सूत्रमिति सिद्धान्तितम् ॥

---

(१) -प्रयोजनमिति Reg. (२) न (instead of तेन) Reg. (३) न omittted in B³. (४) स्वशब्दग्रहणेन वर्णग्रहणेन च गृह्यते omitted in I². (५) स्वशब्देन च गृह्यते omitted in I². (६) नारब्धं (instead of नारब्धव्यं) B². (७) व्यापन- (instead of ख्यापन-) B².

सर्वः शेषो व्यञ्जनान्येव ॥६॥

उपयुक्तेतरवचनः शेषशब्दः। स्वरानुस्वारव्यतिरिक्तः सर्वः शेषो वर्णराशिर्व्यञ्जनसंज्ञको[1] वेदितव्यः। व्यञ्जयन्ति प्रकटान्[2] कुर्वन्त्यर्थानिति[3] व्यञ्जनानि। सर्वशब्दो यमादीनां परिग्रहणार्थः। तेषां यद्यप्यत्र संज्ञाधिकारे ग्रहणं न कृतं तथापि स्थानाधिकारे ग्रहणं कृतमेव[4] —नासिक्ययमानुस्वारान् (१।४८) इति। ऌकारस्य मात्रिकस्य इकारस्य च प्लुतस्य सर्वशब्देन ग्रहणं न भविष्यति स्वरशब्देन ग्रहणात्। धातौ स्वरः कल्पयताव्लकारः[5] (१३। ३५) इति ऌकारस्य स्वरसंज्ञा। तथा—तिस्रः प्लुत उच्यते स्वरः (१ । ३०) इति प्लुतस्य स्वरसंज्ञा। अतश्च स्वरग्रहणेनैव ग्रहणाद्व्यञ्जनत्वं न भवति। व्यञ्जनान्येवेत्यवधारणमनुस्वारस्योभयरूपतामुज्ज्वलयति। व्यञ्जनसंज्ञायाः प्रयोजनम्—दीर्घं ह्रस्वो व्यञ्जने (७।१) इति॥

तेषामाद्याः स्पर्शाः ॥ ७ ॥

तेषां व्यञ्जनानामाद्या वर्णाः स्पर्शसंज्ञा वेदितव्याः। स्पृष्ट[6]करणाः। स्पर्शाः कादयो मान्ताः। स्पर्शसंज्ञायाः प्रयोजनम्—स्पर्शाः पूर्वे व्यञ्जनान्युत्तराणि (४। १) इति॥

पञ्च ते पञ्चवर्गाः ॥ ८ ॥

ते च स्पर्शाः पञ्चवर्गाः। पञ्चभिः स्पर्शैर्वर्ग एषामिति पञ्चवर्गाः। कियन्तस्ते वर्गा इति। पञ्च। यथा कखगघङ चछजझञ टठडढण तथदधन पफबभम। वर्गसंज्ञायाः प्रयोजनम्—वर्गे वर्गे च प्रथमावघोषौ (१।१२) इति॥

---

(१) व्यंजनराशिर्वर्णसंज्ञको B². (२) प्रकटी- B². (३) -ति omitted in B². (४) कृतमेवा I². (५) B³, कल्पयताकार I², कल्पयताक्लृकार B², कल्पयताह्लृकार Bⁿ. (६) स्पष्ट- B².

चतस्रोऽन्तस्थास्ततः ॥ ९ ॥

ततस्तेभ्यः स्पर्शेभ्योऽनन्तराश्चतस्रोऽन्तःस्थासंज्ञिका[1] वर्णव्यक्तयो वेदितव्याः। स्पर्शोष्मणामन्तर्मध्ये तिष्ठन्तीत्यन्तःस्थाः। व्यञ्जनान्येवैतानि स्त्रीलिङ्गानि निर्दिष्टानि। यथा य र ल व[2]। अन्तःस्थासंज्ञायाः प्रयोजनम्—अन्तस्थासु रेफवर्जं परासु (४ । ७) इति।

उत्तरेऽष्टा ऊष्माणः ॥ १० ॥

अन्तःस्थाभ्य उत्तरेऽष्टा ऊष्माणो वेदितव्याः। ऊष्मा वायुस्तत्प्रधाना वर्णा ऊष्माणः। यथा ह श ष स अः ᳵक ᳶप अं[3] इति। ऊष्मसंज्ञायाः प्रयोजनम्—तमेवोष्माणमूष्मणि (४ । ३२) इति। यस्तु—चतस्रोऽन्तस्थास्तत उत्तरे—इत्येवं सूत्रमिच्छति तस्य चतस्रोऽन्तःस्था इत्यनयोः पदयोः स्त्रीलिङ्गबहुवचनान्तत्वादुत्तर इत्यस्य च[4] पदस्य पुंलिङ्गबहुवचनान्तत्वात्सम्बन्धो दुर्लभः। अतः—चतस्रोऽन्तस्थास्ततः—इत्यत्रैव सूत्रच्छेदः॥

अन्त्याः सप्त तेषामघोषाः ॥ ११ ॥

तेषामेवोष्मणामन्त्याः सप्तोष्माणोऽघोषसंज्ञा वेदितव्याः। यथा श ष स अः ᳵक ᳶप अं[5] इति। अघोषसंज्ञायाः प्रयोजनम्—अघोषे रेफ्यरेफी च (४ । ३१) इति॥

वर्गे वर्गे च प्रथमावघोषौ ॥ १२ ॥

वर्गे वर्गे प्रथमद्वितीयौ वर्णावघोषसंज्ञौ वेदितव्यौ। यथा कख चछ टठ तथ पफ इति। पारिशेष्यादन्यानि घोषवत्संज्ञकानि व्यञ्जनानि॥

---

(१) I^2B^2, -संज्ञका B^3B^n. (२) B^3I^2, यरलवा B^2, यरलवाः B^n. (३) अᳵकᳵपᳵअं B^2, अ ᳵक ᳶप अं B^3, अः ष स ᳵक च ह ᳶप अं (instead of अः ᳵक ᳶप अं) I^2, अः कः पः अं B^n. (४) B^3I^2, च omitted in B^2B^n. (५) अᳵकᳵपᳵअं B^2, अः कः प अं B^n, अः ᳵक ᳶप अं B^3I^2.

युग्मौ सोष्माणौ ॥ १३ ॥

वर्गे वर्ग इति वर्तते[१] । वर्गे वर्गे च युग्मौ द्वितीयचतुर्थौ वर्णौ सोष्माणौ वेदितव्यौ । अन्वर्थसंज्ञेयम् । ऊष्मा वायुस्तेन सह वर्तन्त इति सोष्माणः । यथा खघ छझ ठढ थध फभ इति । सोष्मसंज्ञायाः प्रयोजनम्—सोष्मा तु पूर्व्येण[२] सहोच्यते (६ । २) इति ॥

अनुनासिकोऽन्त्यः ॥ १४ ॥

वर्गे वर्गे चेति वर्तते[३] । प्रतिवर्गमन्त्यो वर्णोऽनुनासिकसंज्ञो वेदितव्यः । यथा ङ ञ ण न म इति[४] । अनुनासिकसंज्ञायाः प्रयोजनम्—परेषु स्पर्शेष्वनुनासिकेषु (६ । २९) इति । इयमप्यन्वर्थसंज्ञा[५] । नासिकामनु यो वर्णो[६] निष्पद्यते स्वकीय[७]स्थानमुपादाय स द्विस्थानोऽनुनासिक इत्युच्यते । तथा चोक्तम्—मुखनासिकावचनोऽनुनासिकः (पा० १ । १ । ८) इति ॥

तस्मादन्यमवसाने तृतीयं गार्ग्यः स्पर्शम् ॥ १५ ॥

ऊष्मान्तस्थसोष्म-[८] (१२ । १) इत्यत्र प्रथमतृतीयपञ्चमान्स्पर्शान्पदान्तीयान्[९] वक्ष्यति । तत्र प्रथमतृतीयविकल्पार्थमिदमारभ्यते । तस्मादनुनासिकादन्त्यात्स्पर्शादन्यं पदावसाने वर्तमानं स्पर्शं गार्ग्य आचार्यः स्वं[१०] तृतीयं मन्यते । यथा[११]। वाग् । षड् । तद् । ककुब्[१२]। तस्मादन्यमिति किम् । तान् । तम् ।

---

(१) प्रवर्त्तते I^2. (२) B^2B^n, पूर्वेण B^3I^2. (३) B^2, चेति वर्ते B^3, चेति प्रवर्त्तते I^2, इति वर्त्तते B^n. (४) B^3B^n, इति omitted in B^2I^2. (५) B^2B^n, Reg.; -संज्ञा च B^3I^2. (६) $B^3B^2I^2B^n$; वर्णो यो (instead of यो वर्णो) Reg., M.M. (७) या स्वकीय-I^2. (८) $B^3I^2B^2$, ऊष्मान्तस्थासोष्म B^n, ऊष्मान्तःस्थसोष्म Reg. (९) पदांतीयां च B^3. (१०) स्व I^2. (११) B^2, Reg. ; तथा $B^3I^2B^n$. (१२) वीवा कुप् I^2.

प्रथमं शाकटायनः ॥ १६ ॥

शाकटायन आचार्यः प्रथमं[1] मन्यते। यथा। वाक्। षट्। तत्। ककुप्॥

ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम् ॥ १७ ॥

ओजा विषमाः स्वराणां मध्ये ह्रस्वसंज्ञा वेदितव्याः सप्तमपर्यन्ताः। यथा अ ऋ इ उ इति। ह्रस्वसंज्ञायाः प्रयोजनम्—ह्रस्वपूर्वस्तु सोऽकारम् (२। २७) इति॥

अन्ये दीर्घाः ॥ १८ ॥

ह्रस्वसंज्ञकेभ्यो येऽन्ये स्वरास्ते दीर्घसंज्ञा वेदितव्याः। यथा आ ॠ ई[2] ऊ ए ओ ऐ औ इति। दीर्घसंज्ञायाः प्रयोजनम्—दीर्घं ह्रस्वो व्यञ्जने (७। १) इति॥

उभये त्वक्षराणि ॥ १९ ॥

य इह ह्रस्वदीर्घ[3]संज्ञाः स्वरा निर्दिष्टाः। यौ च वक्ष्यमाणकौ स्वरौ—धातौ स्वरः कल्पयताल्लकारः[4] (१३। ३५) इति—तिस्रः प्लुत उच्यते स्वरः (१। ३०) इति लकारईप्लुतौ[5]। एत उभये त्वक्षरसंज्ञा वेदितव्याः। यथा अ आ ऋ ॠ इ ई उ ऊ ए ओ ऐ औ इति। ऌ ई३[6] इति।

ननु कस्मात्प्रकृता[7] एव स्वरा दीर्घा ह्रस्वाश्चोभयग्रहणेन नान्तर्भाव्यन्ते। येनेमौ व्यवहितावपि लकारप्लुतावुभयग्रहणेनान्तर्भाव्येते इति। शृणु। तन्त्रान्तरे—स्वरोऽक्षरम् (अथ० प्रा० १। ९३॥

---

(१) B³I²B²Bⁿ, स्वं प्रथमं Reg. (२) ई ॠ (instead of ॠ ई) B². (३) -दीर्घ- omitted in B³. (४) B³B², कल्पयतां ककार; I², कल्पयता लृकार Bⁿ. (५) लृकारईप्लुतौ B³B² Bⁿ, ईलृकारप्लुतौ I². (६) ई B³B²Bⁿ, इ I². (७) I², प्राकृता B³B²Bⁿ.

वा० प्रा० १ । ९९) इति स्वरमात्रस्याक्षरसंज्ञा विधीयते । अयमपि—सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् (१८ । ३२) इति स्वरस्याक्षरसंज्ञां विधास्यति । न चाक्षरसंज्ञां[1] विनोदात्तादयः स्वरास्तदाश्रयाः स्युः । त उच्यन्तेऽक्षराश्रयाः (३ । १—२) इति वचनात् । किंच[2] गुरुलघुपूर्वाङ्गपराङ्गचिन्तामक्षरस्यैवेदानीं वक्ष्यति । तस्मादक्षरसंज्ञाप्राप्त्यर्थमिह[3] लृकारप्लुतावुभयशब्देनान्तर्भाव्येते । न तु प्रकृता[4] एव ह्रस्वदीर्घाः स्वरा इति । अक्षरसंज्ञायाः प्रयोजनम्—यकाराद्यक्षरं परम् (२ । ३५) इति ॥

गुरूणि दीर्घाणि ॥ २० ॥

यानि दीर्घाण्यक्षराणि तानि गुरुसंज्ञकानि वेदितव्यानि । प्लुतस्याप्यत्र ग्रहणं द्रष्टव्यम् । यो हि द्विमात्रं गुरुं कल्पयति कल्पयत्येवासौ त्रिमात्रमपीति । यथा आ ॠ ई ऊ ए ओ ऐ औ ई३[5] इति । गुरुसंज्ञायाः प्रयोजनं—गुर्वक्षराणां गुरुवृत्ति (१८ । ६०) इति ॥

तथेतरेषां संयोगानुस्वारपराणि यानि ॥ २१ ॥

यथा दीर्घाणि गुरुसंज्ञकानि तथेतरेषां ह्रस्वानामक्षराणां यानि संयोगपराणि यानि चानुस्वारपराणि तानि गुरुसंज्ञकानि भवन्ति । संयोगपराणि । प्रप्र वस्त्रिष्टुभम् (ऋ० ८ । ६९ । १) इति । अनुस्वारपराणि । वसुं सूनुं सहसो जातवेदसम् (ऋ० १ । १२७ । १) इति[6] । त्वं सोमासि सत्पतिः (ऋ० १ । ९१ । ५) । पारिशेष्यादन्यानि लघुसंज्ञकानि । संहितायां लघोर्लघु (२ । ३५) इति

(१) $B^3B^2B^n$, संज्ञया I^2. (२) $B^3B^2B^n$, किंच omitted in I^2. (३) $B^3I^2B^n$, -संज्ञार्थमिह B^2. (४) I^2, प्राकृता $B^3B^2B^n$. (५) B^3I^2, ई B^2, ई३ omitted in B^n. (६) B^3B^n, M. M. ; सहस इति I^2B^2, Reg.

संव्यवहारदर्शनाच्च। ऋषभं मा समानानाम् (ऋ० १० । १६६ । १) इत्युदाहरणम् ॥[1]

अनुस्वारो व्यञ्जनं चाक्षराङ्गम् ॥ २२ ॥

एवम्—अष्टौ समानाक्षराणि (१ । १) इत्यादिना वर्णसमाम्नायमनुक्रम्य ततः—सर्वः शेषो व्यञ्जनानि (१ । ६) इत्यादिना व्यञ्जनगताः संज्ञाः कृत्वा अनन्तरम्—ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम् (१ । १७) इत्यादिनाक्षरगताः संज्ञाः कृत्वा अधुनाक्षरव्यञ्जनसंनिकर्षे किं कस्याङ्गमित्येतन्निरूपणायाह—अनुस्वारो व्यञ्जनं चाक्षराङ्गम्। स्वराङ्गमित्यर्थः। अत्र यानि स्वरमध्यगतानि व्यञ्जनानि न[2] भवन्ति तान्युदाहरणम्। यथा। प्र[3]। पकाररेफा[4]वकारस्याङ्गम्। वर्क्[5] (ऋ० १ । ६३ । ७)। वकाररेफककारा[6] अकारस्याङ्गम्। चक्रं यत्[7] (ऋ० १०। ७३ । ९)। ककाररेफानुस्वारा अकारस्याङ्गम्। अव्यञ्जनत्वादनुस्वारस्य ग्रहणम्। अङ्गसंज्ञायाः प्रयोजनम्। यानि यस्य स्वरस्याङ्गभूतानि व्यञ्जनानि[8] तानि तेनैव स्वरेण समानस्वराणि भवन्ति। तथा चोक्तम्।

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।

स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम्॥ (या० शि० ११८) इति।

स्वरान्तरे व्यञ्जनान्युत्तरस्य ॥ २३ ॥

एवं तावद्यत्रैकः स्वरस्तत्र पूर्वाणि पराणि च व्यञ्जनानि तस्यैवाङ्गं भवन्ति। अथ पुनर्यानि स्वरयोर्मध्यगतानि तानि किं पूर्वस्य उत

---

(१) Bⁿ adds : नन्वेवं विसर्गपरस्य लघोर्गुरुसंज्ञा न स्यात्। मा भूत्। पादमध्ये तु व्यञ्जनपरस्य विसर्गान्तस्य संयोगपरत्वादेव गुरुसंज्ञासिद्धेः। इतरत्र त्वस्मिञ्छास्त्रेऽनुपयुक्तत्वात्। यद्वा—नःकारे च गुरावपि (८ । ३७) इति ज्ञापकाद्विसर्गपरस्यापि लघोर्गुरुसंज्ञासिद्धेरिति। (२) न omitted in I². (३) B³ I², प्र इत्यत्र B² Bⁿ. (४) B²I² Bⁿ, -रेफ B³. (५) B³ I² B², वर्क इत्यत्र Bⁿ. (६) -ककार। B³. (७)B³ I², यत् अत्र B², यदित्यत्र Bⁿ. (८) B² I² Bⁿ, तानि (instead of व्यञ्जनानि) B³.

उत्तरस्या[1]ङ्गमित्यस्मिन्संदेहे त्विदमारभ्यते । स्वरयोरन्तरे यानि व्यञ्जनानि तान्युत्तरस्यैवाङ्गं[2] भवन्ति। न पूर्वस्य। यथा अ॒यम् इत्ययंशब्दस्यान्तोदात्तत्वाद्यकार उदात्तवच्छ्रूयते। तथा—अ॒यं दे॒वाय॒ जन्मने (ऋ० १।२०।१) इत्यत्रैकारस्यानुदात्तत्वाद्दकारोऽनुदात्तवच्छ्रूयते। यथा—गायन्ति त्वा (ऋ० १।१०।१) इत्यकारस्य स्वरितत्वाद्यकारः स्वरितवच्छ्रूयते[3] ॥

पूर्वस्यानुस्वारविसर्जनीयौ ॥ २४ ॥

स्वरान्तर इति वर्तते[4] । अनुस्वारविसर्जनीयौ स्वरान्तरे वर्तमानौ पूर्वस्वरस्याङ्गं भवतः। यथानुस्वारस्योदाहरणं भवति। वसुं सूनुं सहसः (ऋ० १।१२७।१)। विसर्जनीयस्य। नॄः पात्रम् (ऋ० १।१२१।१) इति[5] । नॄः[6] प्रणेत्रम् (तै० ब्रा० ३।६।२।१) इत्येवमादि ॥

संयोगादिर्वा ॥ २५ ॥

संयोगस्यादिभूतो वर्णः स्वरान्तरे वर्तमानः पूर्वस्य वा स्वरस्याङ्गं भवति परस्य वा। यथा—आ त्वा[7] रथम् (ऋ० ८।६८।१) इति द्वौ तकारौ वकारश्च संयोगः। तत्र क्रमजः प्रथमस्तकारः पूर्वस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते । द्वितीयः संयोगादिः पूर्वस्य वोदात्तस्य स्वरस्याङ्गमुत्तरस्य वानुदात्तस्वरस्याङ्गमुदात्तानुदात्तवच्छ्रूयत इत्यर्थः। वकारो द्वितीयस्य स्वरस्याङ्गं तस्य चानुदात्तत्वादनुदात्तवच्छ्रूयते।

---

(१) B² I² Bⁿ, किं पूर्वस्योत्तरस्या- B³, पूर्वस्योत्तरस्या- Reg. (२) B² I² Bⁿ, उत्तरस्यांग B³. (३) B², Reg.; स्वरित एव श्रूयते B³ I² Bⁿ. (४) B² I², त्यनुवर्त्तते B³, स्वरान्तर इति वर्तते omitted in Bⁿ. (५) B² I², इति omitted in B³ Bⁿ. (६) इदं (instead of नॄः) I². (७) B², Reg.; यथात्वा B³ I²; यथा इत्वा Bⁿ.

तथा—अग्निमीळे (ऋ० १।१।१) इति द्वौ गकारौ नकारश्च संयोगः। तत्र प्रथमो गकारः क्रमजः पूर्वस्य स्वरस्याङ्गं तस्य चानुदात्तत्वादनुदात्तवच्छ्रूयते। द्वितीयो गकारः संयोगादिः स यमीभूतः पूर्वस्य वा स्वरस्याङ्गं परस्य वोदात्तसंज्ञित[1]स्योदात्तानुदात्तवच्छ्रूयते। नकारो द्वितीयस्य स्वरस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते।

च परक्रमे द्वे ॥ २६ ॥

चकारो भिन्नक्रमः[2] समुच्चयार्थीयः[3]। परस्य च व्यञ्जनस्य यत्र क्रमः[4] क्रान्तिर्द्विरुक्तिस्तत्र द्वे व्यञ्जने वा पूर्वस्वरस्याङ्गमुत्तरस्य वा। यथा—आर्त्नी इमे (ऋ० ६।७५।४) इति रेफो द्वौ तकारौ नकारश्च संयोगः। तत्र—स्वरभक्तिः पूर्वभागक्षराङ्गम् (१।३२) इति स्वरभक्तिसहितो रेफः पूर्वस्य स्वरस्याङ्गं तस्य चोदात्त[5]त्वादुदात्तवच्छ्रूयते। क्रमजस्तकारः संयोगादिश्च यमीभूतः[6] पूर्वस्य वा स्वरस्याङ्गमुत्तरस्य[7] वा। नकारस्तूत्तरस्य स्वरस्याङ्गं तस्य च[8] स्वरितत्वात्स्वरितवच्छ्रूयते[9]।

तथा[10]—पार्ष्ण्या वा (ऋ० १।१६२।१७) इति रेफः[11] षकारौ द्वौ णकारो यकारश्च संयोगः। तत्र रेफः स्वरभक्त्या[12] सहितः पूर्वस्वरस्याङ्गं तस्य चोदात्तत्वादुदात्तवच्छ्रूयते। षकारौ[13] पूर्वस्य वा[14]

---

(१) -संसित- I². (२) -क्रम। B². (३) B³ I² Bⁿ, समुच्चयार्थः यः B², समुच्चयार्थः Reg. (४) B³ B², क्रमः omitted in I² Bⁿ. (५) तस्योदात्त- Reg. (६) B³ I², Reg.; संयोगादिश्च स यमीभूतः B²; संयोगादिः स यमीभूतः Bⁿ. (७) उत्तरस्यांगं (गं supplied on the margin) I². (८) च omittted in B²,Reg. (९) स्वरित एव श्रूयते B³. (१०) B³ I², तथा omitted in B², यथा Bⁿ. (११) B³ I² Bⁿ, रेफ- B². (१२) स्वरभक्ति- B². (१३) पकारौ Bⁿ, पकारौ क्रमजश्च णकारः(क्रमजश्च णकारः with marks of deletion) B³, पकारः क्रमजश्च (after this णकारः is struck off) I², पकारः क्रमश्च B². (१४) वा omitted in B².

Cont

स्वरस्याङ्गमुत्तरस्य वा । संयोगादिर्यकारो यकारश्चोत्तरस्य स्वरस्याङ्गं तस्य स्वरितत्वात्स्वरितवच्छ्रूयेते[1] ॥

मात्रा ह्रस्वः ॥ २७ ॥

ह्रस्वस्वरो[2] मात्राकालो वेदितव्यः । यथा अ ऋ इ उ ऌ इति ॥

तावदवग्रहान्तरम् ॥ २८ ॥

अवग्रहो नानाग्रहः । समासवर्तिनोः पदयोः पृथक्करणं मात्राकालं भवतीत्यर्थः । पुरःऽहितम् । रत्नऽधातमम् । (ऋ० प० १।१।१) ॥

द्वे दीर्घः ॥ २९ ॥

द्विमात्राकालो दीर्घस्वरो[3] वेदितव्यः । यथा आ ॠ ई ऊ ए ओ ऐ औ इति[4] ॥

तिस्रः प्लुत उच्यते स्वरः ॥ ३० ॥

स्वरसंज्ञा प्लुतस्यानेन विधीयते । स च तिस्रो मात्रा भवति[5] ॥

अधःस्विदासी३दुपरि स्विदासी३-
दर्थे प्लुतिर्भीरिव विन्दतीँ३ त्रिः ॥ ३१ ॥

तिस्रो मात्राः प्लुतस्वरो[6] भवतीति प्रतिज्ञाय अधुनोदाहरणैस्तानेव प्लुतान्दर्शयितुमाह । अधः स्विदासी३दुपरि स्विदासी३त् (ऋ० १०।१२९।५) । न त्वा भीरिव विन्दतीँ३ (ऋ० १०।१४६।१) । एतेषूदाहरणेष्वर्थे प्लुतिः । अर्थसमाप्तौ प्लुतिः । आख्यातस्यान्ते स्वरे प्लुतिरित्यर्थः । उदाहरणैरेव त्रित्वस्य सिद्धत्वाद्यत्त्रिर्ग्रहणं करोति तद्विषयापेक्षयैव[7] । सप्रैषसंहितायां चतुःषष्ट्यां त्रिरेव प्लुतो भवति । अधउपरिशब्दौ[8] विशेषणत्वेनोपादीयेते—किं स्विदासीदधिष्ठानम्

---

(१) I², श्रूयते B³ B² Bⁿ. (२) ह्रस्वः स्वरो I². (३) दीर्घः स्वरो I². (४) B³Bⁿ, इति omitted in B² I². (५) B² I² Bⁿ, मात्रो भवन्ति B³. (६) प्लुतः स्वरो I². (७) विषयापेक्षयैव B². (८) -शब्दो B³.

(ऋ० १० । ८१ । २) इत्यत्र प्लुतिर्मा भूदिति। भीरिवग्रहणं च विशेषणग्रहणार्थ—भयं विन्दति मामिह (ऋ० ६ । ६७ । २१) इत्येवमादिनिवृत्त्यर्थम् ॥

स्वरभक्तिः पूर्वभागक्षराङ्गम् ॥ ३२ ॥

ऋकारवर्णा स्वरभक्तिरुत्तरा (६।४६) इति वक्ष्यति। सा स्वरभक्तिः पूर्वं रेफं[1] लकारं वा भजते। रेफादुत्तरा रेफसदृशी भवति। लकारादुत्तरा लकारसदृशी भवति। स्वराङ्गं च भवति। रेफाद्वा[2] लकाराद्वा[3] यस्माद्व्यञ्जनादुत्तरा भवति तत्सहिता सा पूर्वस्य स्वरस्याङ्गं भवतीत्यर्थः। यथा। प्रत्यु अदर्शि (ऋ० ७।८१।१)। आर्ष्टिषेणः (ऋ० १० । ९८ । ५)। वनस्पते शतवल्शः (ऋ० ३ । ८ । ११)। नारायासो न जल्हवः (ऋ० ८ । ६१ । ११)। अन्वर्थसंज्ञा चेयम्। स्वरभक्तिः स्वरप्रकार इत्यर्थः ॥

द्राघीयसी सार्धमात्रा ॥ ३३ ॥

तत्र या दीर्घतरा स्वरभक्तिः सार्धमात्राकाला भवति। यथा। प्रत्यु अदर्शि (ऋ० ७ । ८१ । १)। कर्हि[4] (ऋ० ५ । ७४ । १०)। वनस्पते शतवल्शः (ऋ० ३ । ८ । ११) ॥

इतरे च ॥ ३४ ॥

उक्तकालेभ्यो येऽन्ये[5] वर्णास्तेऽर्धमात्राकाला भवन्ति। कादीनि व्यञ्जनान्युदाहरणम् ॥

---

(१) B² Bⁿ, Reg.; पूर्वरेफं B³ I². (२) रेफाद्वा omitted in I², Reg. (३) लकाराद्वा omitted in I², Reg. (४) B³ Bⁿ, कर्हि कर्हिं B², कर्हि omitted in I². (५) ये (instead of येऽन्ये) I².

अर्धोनान्या ॥ ३५ ॥

द्राघीयस्याः स्वरभक्तेर्यान्या स्वरभक्तिः सार्धोना भवति । पाद-मात्रा[1] भवतीत्यर्थः । यथा । आर्ष्टिषेणः (ऋ० १०।९८।५) । वर्ष्यान्[2] (ऋ० ५।८३।३) ॥ .

रक्तसंज्ञोऽनुनासिकः ॥ ३६ ॥

अनुनासिको वर्णो रक्त उच्यते । यस्य वर्णस्यानुनासिकसंज्ञा विहिता तस्यानेन रक्तसंज्ञा विधीयते । यथा । अनुनासिकोऽन्त्यः (१ । १४) । ङञणनमाः । पूर्वस्तत्स्थानादनुनासिकः स्वरः (४।८०) । महाँ इन्द्रो नृवदा चर्षणिप्राः[3] (ऋ० ६।१९।१) । यन्नीक्षणं माँस्पचन्या उखायाः[4] (ऋ० १।१६२।१३) । रक्त-संज्ञायाः प्रयोजनम्—रक्तं ह्रस्वं द्राघयन्त्युग्रं श्लोकः (१४।५१) रक्ते रागः समवाये स्वराणाम् (१४।५६) इति ॥

संयोगस्तु व्यञ्जनसंनिपातः ॥ ३७ ॥

व्यञ्जनयोर्मेलकः संयोगसंज्ञो भवति । यथा । प्रप्र वस्त्रिष्टु-भमिषम् (ऋ० ८।६९।१) । संयोगसंज्ञायाः प्रयोजनम्—स्वरा-नुस्वारोपहितो द्विरुच्यते संयोगादिः (६।१) इति ॥

इदानीं वर्णानां स्थानान्युच्यन्ते[5] —

कण्ठ्योऽकारः ॥ ३८ ॥

कण्ठे भवः कण्ठ्यः । कण्ठस्थानोऽकारवर्णः प्रत्येतव्यः । ह्रस्वा-देशे ह्रस्वदीर्घौ सवर्णौ (१।५५) इति वक्ष्यत्यतोऽकाराकारौ[6] गृह्येते।

---

(१) पादामात्रा B³. (२) वर्ष्यान् B³; वर्ष्यन् Bⁿ; वर्ष्मान् I²; वर्ष्मन् B², Reg. (B² has the sign = on वर्ष्मन्); cp. M. M. (३) B³I², Reg.; महाँ इन्द्रो नृवत् Bⁿ; महाँऽइन्द्रः B². (४) B³ I² B², Reg.; यन्नीक्षणं माँस्पचन्याः Bⁿ. (५) The whole sentence इदानीं—च्यन्ते is given after the Sūtra कण्ठ्योऽकारः in all the MSS. (६) अकाराकारौ B², अकारआकारौ B³I²Bⁿ.

यथा अ आ। स्थानकथने प्रयोजनम्—निरस्तं स्थानकरणापकर्षे (१४।२) इति॥

प्रथमपञ्चमौ च द्वा ऊष्मणाम् ॥३९॥

प्रथमो हकारः पञ्चमो विसर्जनीय एतौ चोष्मणां मध्ये कण्ठस्थानौ वेदितव्यौ। ह अः। द्वाविति पादपूरणः[1] प्रथमपञ्चमाविति द्विवचनेनैव द्वित्वस्याभिहितत्वात्[2] ॥

केचिदेता उरस्यौ ॥ ४० ॥

केचिदाचार्या एतौ हकारविसर्जनीयावुरःस्थानाविच्छन्ति। ह अः॥

ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयः प्रथमश्च वर्गः ॥ ४१ ॥

ऋकारश्च लृकारश्च षष्ठश्चोष्मा जिह्वामूलीयः प्रथमश्च ककारादिवर्ग एते जिह्वामूलस्थाना वेदितव्याः। ऋॠ लृॡ ᳵक[3] कखगघङ। ननु च—धातौ स्वरः कल्पयताल्लकारः[4] (१३।३५) इति लृकारस्य स्वरसंज्ञा कृता। चाक्लृप्रे तेन ऋषयो मनुष्याः (ऋ० १०।१३०।६) इति प्रयोगश्च दृश्यते। लृकारस्तु चतुःषष्ट्यां न दृश्यते। अथ किमर्थमुदाह्रियते। नैष दोषः। यथोदकाहारस्य मत्स्याहरणमविरुद्धम्। यथा पुष्पाहारस्य फलाहरणमविरुद्धम्। एवमेतदपि प्रसङ्गादुच्यते॥

तालव्यावेकारचकारवर्गाविकारैकारौ यकारः शकारः ॥ ४२ ॥

एकारश्च चवर्गश्च इकारश्च ऐकारश्च यकारश्च शकारश्चैते तालुस्थाना[5] वेदितव्याः। ए चछजझञ इई ऐ य श[6] ॥

---

(१) B^3 B^2 B^n; पदपूरणः I^2, Reg. (२)-भिनिहितत्वात् B^3. (३) B^2, ᳵक B^3 I^2 B^n. (४) कल्पयतौ लृकार $B^3 I^2$, कल्पयताक्लृकार B^2, कल्पयता लृकार B^n. (५) -स्थानो B^3. (६) B^3 I^2 B^2, -शाः-B^n.

मूर्धन्यौ षकारटकारवर्गौ ॥ ४३ ॥

मूर्ध्नि स्थाने षकारश्च टवर्गश्च प्रत्येतव्यौ[१] । ष टठडढण[२] ॥

दन्तमूलीयस्तु तकारवर्गः ॥ ४४ ॥

दन्तमूल[३]स्थानस्तकारवर्गो वेदितव्यः । तथदधन[४] ॥

सकाररेफलकाराश्च ॥ ४५ ॥

सकारादयश्च वर्णा दन्तमूल[५]स्थाना वेदितव्याः । स र ल[६] ॥

रेफं वर्त्स्य(? = वर्स्व्यं)मेके ॥ ४६ ॥

एक आचार्या रेफं वर्त्स्यं(? = वर्स्व्यं)मिच्छन्ति। वर्त्से[७] (? = वर्स्वे) भवो वर्त्स्यः (? = वर्स्व्यः) । वर्त्स(? = वर्स्व)शब्देन दन्तमूलादुपरिष्टादुच्छूनः प्रदेश उच्यते । अवकां दन्तमूलैः (वा० सं० २५।१) इति[८] । मृदं वर्त्सैः[९] (? = वर्स्वैः । वा० सं० २५।१) इति दर्शनात् ॥

शेष ओष्ठ्योऽपवाद्य नासिक्यान् ॥ ४७ ॥

शेषो वर्णराशिरोष्ठस्थानो वेदितव्यः । किमविशेषेण । नेत्याह । अपवाद्य नासिक्यान् । परिवर्ज्य नासिकास्थानान्वर्णानित्यर्थः । कश्च शेषः । उ ऊ ओ औ प फ ब भ म व उपध्मानीयः ᳲप[१०] इति ॥

के ते नासिक्या इत्यस्यामपेक्षा[११]यामाह—

---

(१) B^3 B^2 I^2, वेदितव्यौ B^n. (२) B^3 I^2 B^2, षटठडढणाः B^n. (३) -मूली- I^2. (४) B^3 I^2 B^2, तथदधनाः B^n. (५) -मूली- I^2. (६) B^3 B^2, सरलः I^2, सरलाः B^n. (७) वर्त्स्ये I^2. (८) $B^3I^2B^2$, M.M.; अवको दन्तमूलीयैर् B^n. (९) B^3B^2, M.M.; मृदं वर्त्स्यैर् I^2; omitted in B^n. See note. (१०) -ध्मानीयᳲप B^2, ध्मानीय प्प B^3I^2, -ध्मामीयः प्प B^n. (११) $B^3I^2B^n$; इत्यपेक्षा-B^2, Reg.

नासिक्ययमानुस्वारान् ॥ ४८ ॥

ᳲ इति नासिक्यः[१]। कं खं गं घं इत्यादयो[२] यमाः। वक्ष्यति हि। यमः प्रकृत्यैव सदृक् (६।३२) इति। अं इत्यनुस्वारः। एते नासिक्याः॥

इति स्थानानि ॥ ४९ ॥

अधिकरणं[३] वर्णानां स्थानशब्देनोच्यते। इतिकरणः समाप्त्यर्थः। कण्ठ्योऽकारः (१।३८) इत्यत आरभ्य यत्परिभाषितं तानि स्थानानि वेदितव्यानि॥

अत्र यमोपदेशः ॥ ५० ॥

कण्ठ्योऽकारः (१।३८) इत्यत आरभ्य यानि स्थानान्युक्तान्यत्र एषु स्थानेषु यमानां स्थानोपदेशः कर्तव्यः। नासिक्यास्तावत्सर्व एव यमा उक्ताः। द्वितीयं तु प्रकृत्याश्रयं[४] यत्स्थानं तदर्थमिदमुक्तम्। तच्च भवद्यथान्तरं भवति। पलिक्नीः (ऋ० ५।२।४) इत्यत्र ककारसरूपो यमः। चख्नथुः[५] इत्यत्र खकारसरूपो यमः। जग्मतुः (ऋ०१०।४०।१४) इत्यत्र गकारसरूपो यमः[६]। जघ्नथुः (ऋ० ७।९९।४) इत्यत्र घकारसरूपो यमः। वक्ष्यति। यमः

---

(१) ᳲ इति नासिक्यः I² (इत्यस्याम् to नासिक्यः supplied on the margin); ᳲः हुं इति वा इति नासिक्यः B³, ङं इति नासिक्यः B², इति नासिक्यः Bⁿ, इति नासिक्यः corrected to ङ् ञ् ण् न् म् इति नासिक्याः in a (M.M.). (२) I², Reg.; इति B³Bⁿ; ङं इत्यादयो B². (३) B³B², अधिकरणं च B²I² (व corrected to च in I²). (४) B²I², Reg. (I² corrects -श- to -श्र-); -शयं (instead of -श्रयं) B³Bⁿ. (५) B³I²Bⁿ, चख्नतुर् B². (६) From चख्नथुः to गकारसरूपो यमः omitted in Reg.

प्रकृत्यैव सदृक् (६ । ३२) इति । एवं विंशतिर्यमा बह्वृ[१]चानां भवन्ति । स्वरूपैश्चत्वार एव । तदुत्तरत्र यमलक्षणे विचारयिष्यामः[२] ॥

डकारस्य पूर्वोक्तस्थानापरितोपात्स्थानान्तरं प्रतिपादयितुमाह—

जिह्वामूलं तालु चाचार्य आह
स्थानं डकारस्य तु वेदमित्रः ॥ ५१ ॥

अधस्तनं स्थानमुपसंहरन्नाह । आचार्यो वेदमित्रो जिह्वामूलं तालु च डकारस्य स्थानमाह । कोऽन्यथा ब्रवीति । आचार्यग्रहणं पूजार्थम् ॥

द्वयोश्चास्य स्वरयोर्मध्यमेत्य
संपद्यते स डकारो ळकारः ।
ळ्हकारतामेति स एव चास्य
ढकारः सन्नूष्मणा[३] संप्रयुक्तः ।
इळा साळ्हा चात्र निदर्शनानि
वीड्वङ्ग इत्येतदवग्रहेण ॥ ५२ ॥

स एवोक्तस्थानो डकारोऽस्याचार्यस्य मतेन द्वयोः स्वरयोर्मध्यं प्राप्य ळकारभावं याति । किंच स एव डकारो[४] हकारेणोष्मणा संप्रयुक्तः सन्नस्यैवाचार्यस्य मतेन ढकारः[५] । तथा च[६] सति स[७] ढकारो ळ्हकारतां याति । अस्यार्थस्ये[८]ष्टत्वात्स्वयमेवोदाहरणानि दर्शयति । इळा साळ्हा चात्र यथासंख्येन ळकारळ्हकारयोरुदाहरणे । इळां देवीम्[९] (ऋ० ७ । ४४ । २) । मरुद्भिरुग्रः पृतनासु साळ्हा (ऋ०

---

(१) बह्वृ- I^2. (२) B^2 B^n, from स्वरूपै- to -ष्यामः omitted in I^2, स्वरूपैश्चत्वार एव त B^3. (३) B^n, संनूष्मणा B^3 B^2, सं ऊष्मणा I^2. (४) B^n; ळकारो B^2, Reg.; लकारो B^3 I^2. (५) B^3 I^2 B^2, ढकारे B^n. (६) च omitted in B^n. (७) B^3 I^2 B^2, स एव B^n. (८) B^3 I^2 B^n, अस्यार्थस्प-B^2. (९) I^2, Reg., M.M.; इळा देवी B^2; इळां देवीः :B^n; from -हरणे to साळ्हा is damaged in B^3.

७ । ५६ । २३) । बहुवचनं वक्ष्यमाणोदाहरणापेक्षम् । वीड्वङ्ग इत्येतदुदाहरणमवग्रहेण सह[1] भवति । वनस्पते । वीळुऽअङ्गः[2] । (ऋ० प० ६ । ४७ । २६) । स्वरयोरिति किम् । वनस्पते वीड्वङ्गः (ऋ० ६ । ४७ । २६) । मीढ्वस्तोकाय तनयाय (ऋ० २ । ३३ । १४) ॥

न्यायैर्मिश्रानपवादान्प्रतीयात् ॥ ५३ ॥

न्याया उत्सर्गा महाविषया विधयः । अपवादा अल्पविषया विधयः । तानुत्सर्गैर्[3] मिश्रानेकीकृताञ्जानीयात् । अपवादविषयं[4] मुक्त्वोत्सर्गाः प्रवर्तन्त इत्यर्थः । स्पर्शाः पूर्वं व्यञ्जनान्युत्तराण्यास्थापितानामवशंगमं तत् (४।१) इति[5] संधिविषय उत्सर्गः । घोषवत्पराः प्रथमास्तृतीयान् (४।२) इत्यपवादः । एष स्य स च स्वराश्च पूर्वं भवन्ति[6] व्यञ्जनमुत्तरं यदेभ्यः[7] (२।८) इत्युत्सर्गः । अस्य स्वयमेवापवादमाह । सामवशा इति चैवापवादान् (१।६०) । अनुलोमानामन्वक्षरसंधीनामपवादानिति ॥

सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् ॥ ५४ ॥

सर्वं च[8] तच्छास्त्रं च सर्वशास्त्रम् । तस्यार्थः सर्वशास्त्रार्थः । तं सर्व[9]शास्त्रार्थमुत्सर्गत्वेन पुरस्कृत्य तस्यैवापवादत्वेन प्रतिकण्ठमुक्तं जानीयात् । प्रतिकण्ठशब्देन निपातनमुच्यते । तद्धि कण्ठं कण्ठमिव प्रतिसंगृह्यैकैकस्यैव[10] प्रदर्श्यते[11] । नू इत्था ते (ऋ० १।१३२।४) इत्यत्र न्वित्था इति प्राप्ते चैप्रसन्धेरपवादो दीर्घत्वं च निपात्यते । परीतो

---

(१) सं- (instead of सह) I². (२) B³ B², Reg.; वीलु० अंगः I²; वीलु । अङ्गः Bⁿ. (३) B³ I² Bⁿ; उत्सर्गेण B², Reg. (४) I²Bⁿ, Reg.; -विषय-B³ B². (५) B², इति omitted in B³ I² Bⁿ. (६) B³B²Bⁿ, भवति I². (७) B² I², यदेभ्य B³ Bⁿ. (८) B² Bⁿ, च omitted in B³ I². (९) सर्व-omitted in B³. (१०) B³ I² ।B² Bⁿ;-कैकस्य Reg., M.M. (११) प्रदश्यते Bⁿ.

षिञ्चत (ऋ० ९ । १०७ । १) इति इतः सिञ्चत इति प्राप्ते विसर्जनीयस्य सोपधस्यौत्वं[1] निपात्यते । परस्य च षत्वम् ॥

स्थानप्रश्लेषोपदेशे स्वराणां
ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ ॥ ५५ ॥

कण्ठ्यो ऽकारः (१।३८) इत्यादि स्थानोपदेशः । समानाक्षरे सस्थाने (२।१५) इत्यादि प्रश्लेषोपदेशः । एतस्मिन्नुभयरूपे स्वराणामुपदेशे सति यत्र ह्रस्वस्वर[2] आदिश्यते तत्रोभावपि ह्रस्वदीर्घौ सवर्णौ प्रत्येतव्यौ । कण्ठ्यो ऽकारः—इत्युक्ते ह्रस्वदीर्घावपि गृह्येते । उपलक्षणार्थं चैतत् । तथाहि—अधः स्विदासी३त् (ऋ० १० । १२९ । ५) इत्यादीनां प्लुतानां तालुस्थानं भवतीति । तथा—इकारोदय एकारमकारः सोदयः[3] (२ । १६) इत्युक्ते ह्रस्वदीर्घावपि गृह्येते । स्थानप्रश्लेषोपदेश इति किम् । ह्रस्वपूर्वस्तु सो ऽकारम् (२ । २७) इति ह्रस्व एव गृह्यते ॥

असावमुमिति तद्भावमुक्तं यथान्तरम् ॥ ५६ ॥

असाविति प्रथमानिर्दिष्टस्य ग्रहणम् । अमुमिति द्वितीयानिर्दिष्टस्य । यत्रासौ वर्णो ऽमुमित्येवं वक्ष्यति तत्र तद्भावमुक्तं जानीयात् । तदित्यनेन द्वितीयानिर्दिष्टं परामृश्यते । तेन रूपेण भवनं तद्भावः । स च प्रथमानिर्दिष्टस्य भवति । तं च तद्भावं यथान्तरं जानीयात् । यो यस्यान्तरः संनिकृष्टः स्थान[4]करणानुप्रदानैः स तस्य भवति । यथा । समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम् (२।१५) इति । तव अयम् । तवायम् (ऋ० ३ । ३५ । ६) अत्रासावमुमिति तद्भावमुक्तमिति द्वावकारौ दीर्घमेकं स्वरमापद्येते[5] । तं च[6] यथान्तरमिति

---

(१) $B^3 B^n$, -स्यौत्वं B^2 I^2. (२) ह्रस्वः स्वर I^2. (३) B^3 I^2 B^2, सोदयस्तथा B^n. (४) B^2, संनिकृष्टस्थान-B^3 I^2 B^n. (५) आपद्यते B^n. (६) Reg.; तच्च B^3 I^2 B^2 B^n.

कृत्वा आकारमेवापद्येते[1] । मधु उदकम् । मधूदकम् (ऋ० ८।६७।३२) अत्रासावसुमिति तद्भावमुक्तमिति द्वावुकारौ दीर्घमेकं स्वरमापद्येते[2] । तं च यथान्तरमिति कृत्वा ऊकारमेवापद्येते[3] ॥

न्यायैर्मिश्रानपवादान् (१। ५३) इत्यत आरभ्य परिभाषासूत्राण्येतानि ॥

पादवच्चैव प्रैषान् ॥ ५७ ॥

होता यक्षदग्निं समिधा सुषमिधा (तै० ब्रा० ३। ६। २। १) इत्यादयः[4] प्रैषास्तान्पादतुल्यलक्षणाञ्जानीयात् । ऋक्षु यल्लक्षणं तत्प्रैषेष्वपि[5] भवतीत्यर्थः । तद्यथा—नकार आकारोपधः (४। ६५) इत्यनेन नकारलोपः पदवृत्तिषु विहितः स प्रैषेष्वपि भवति । होता यक्षदिन्द्रं हरिवाँ इन्द्रो धानाः (आ० श्रौ० ५।४।३) इति । इन्द्राग्नी छागस्य (तै० ब्रा० ३। ६। ८। १) इत्यत्र—छकारो दीर्घेण च मेतिवर्जम्[6] (६।१२—१३) इति वचनाच्छकारस्य द्वित्वं न भवति ॥

प्राक्चानार्षादितिकरणात्पदान्ताँस्तद्युक्तानाम् ॥५८॥

पदान्तान्पदादिभिः संदधदेति[7] यत्सा (२। २) इति संहितालक्षणं वक्ष्यति । न च पदान्तपदाद्योर्लक्षणमनुक्त्वा संहितालक्षणं वेदितुं[8] शक्यते । तत्र पदादयो ज्ञायन्त एव । पदान्ता अपि येऽत्रेतिकरणरहिताः । येऽत्र सेतिकरणास्ते संदिह्यन्ते[9] । अतस्तत्र लक्षणमाह ।

प्राक्पूर्वेण अनार्षादितिकरणादवैदिकादितिकरणात् पदान्ताञ्जानीयात् । कथंभूतानाम् । तद्युक्तानां तेनानार्षेणेतिकरणेन

---

(१) B[3] I[2] B[2], Reg.; आपद्यते B[n]. (२) आपद्यते B[n]. (३) B[2], उकारमेवापद्येते B[3] I[2], ऊकारमेवापद्यते B[n]. (४) सुषमिध्येत्यादयः B[3] B[2], सुषमित्यादयः I[2], सुसमिद्धेत्यादयः B[n]. (५)-ष्वापि I[2]. (६) मेतिवर्ज्यम् I[2]. (७) B[2] I[2], संदधेति B[3], संदधदिति B[n]. (८) वदितुं I[2]. (९) B[3] I[2],-ह्यन्ते B[2],-ह्यते B[n].

युक्तानां संवद्धानाम्[१] । प्रातरिति । सोमम् । (ऋ० प० ७ । ४१ । १) । देवम् । भारिति भाः[२] । (ऋ० प० १ । १२८ । २) । अत्र विसर्जनीयः पदान्तीयो[३] न तु रेफः । ऊष्मान्तस्थसोंष्म[४]चकारवर्गानान्तं यान्त्यन्यत्र विसर्जनीयात् (१२ । १) इति वचनात् । अनार्षादितिकरणादिति किम् । यः प्राणिति (ऋ० १० । १२५ । ४) ॥

तेन येऽसंहितानाम् ॥ ५८ ॥

यत्रेतिकरणो[५] विद्यते न तु पदान्तेन संसृष्टस्तत्रायं विधिरुच्यते । तेनानार्षेणेतिकरणेनासंहितानामसंवद्धानां पदानां ये पदान्तास्त एव पदान्ता वेदितव्याः । इन्द्राग्नी इति । (ऋ० प० ६ । ५९ । ६) । अस्मे इति । (ऋ० प० १ । ९ । ७) । इन्द्राग्नी इत्यपादियम्[६] । प्रातरिति सोमम् । इत्येवं संहिता मा भूदित्येवमर्थ आरम्भः ॥

सामवशा इति चैवापवादान्
कुर्वन्ति ये संपदं पादवृत्तयोः ॥ ६० ॥

सामवशान्संधीनुपरिष्टाद्वक्ष्यति । यथादिष्टं सामवशः स संधिः (७ । १) इति । तान्सामवशान्संधीननुलोमानामन्वक्षरसंधीनामपवादभूताञ्जानीयात् । अन्वर्थसंज्ञा चेयम् । समस्य भावः सामम् । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् (पा० ५ । १ । १२९) इत्युद्गात्रादित्वादञ् । छन्दसां समत्वं वशः प्रयोजनं येषामन्वक्षरसंधीनां ते सामवशाः संधयः । छन्दसां संपत्करा[७] इत्यर्थः । अत एवमाह । कुर्वन्ति ये संपदं पादवृत्तयोः । कतरौ तौ पादस्य वृत्तौ ।

---

(१) संवंध्वानां I². (२) The passage from संवद्धानाम् to भाः is damaged in B³. (३) B³ I² B², पदान्तः Bⁿ. (४) B² I², ऊष्मान्तर्सोष्म-B³, ऊष्मान्तस्थसोष्म- Bⁿ. (५) -करणे B³. (६) Bⁿ, इंद्राग्नी इति अपादियं B³ I² B². (७) संध्यक्षरा I².

गुर्वक्षरप्रपञ्चो लघ्वक्षरप्रपञ्चश्च । ताभ्यां हि प्रपञ्चाभ्यां गायत्र्यादय:[1] पादा वर्तन्ते । अतः पादस्यैतौ[2] वृत्तौ । पादवृत्तयो:[3] संपदं कुर्वन्ति । नार्थान्तरं कुर्वन्ति । मक्षूमक्षू कृणुहि गोजितो नः (ऋ० ३ । ३१ । २०) इत्यादीन्युदाहरणानि ॥

अप्रत्याम्नाये पदवच्च पद्यान् ॥ ६१ ॥

पदान्तादिष्वेव विकारशास्त्रम् (२ । ५) इति वक्ष्यति । न तु तत्पद्येषु प्राप्नोति । अतस्तत्प्रापणार्थमाह । प्रत्याम्नाय: पुनर्वचनम् । असति पुनर्वचने पदवत्पद्याञ्जानीयात् । त्वाऽऊतासः । त्वोतासो न्यर्वता (ऋ० १ । ८ । २) । उकारोऽ[4]दय ओकारम् (२।१७) इति पदसंधिषु[5] वक्ष्यति । पद्येष्वपि[6] तद्भवति । अप्रत्याम्नाय इति किम् । वसोरिन्द्रं वसुपतिम् (ऋ० १ । ९ । ९) इति । षष्ठं चाष्टाक्षरेऽक्षरम् (८ । ३९) इति प्लुतिः प्राप्ता[7] —विग्रहे (८ । १) इति पुनर्वचनान्न भवति ॥

किमेतावानेवापवादः । नेत्याह—

ऋते नतोपाचरितक्रमस्वरान् ॥ ६२ ॥

ऋते विहाय परित्यज्य नतम् उपाचरितं क्रमं स्वरं चान्यत्र पदवत्पद्याञ्जानीयात् । इह तु पदस्य यत्कार्यं विधीयते तत्पद्यस्य न भवति । नते । सुदीतिभिः सु दीदिहि (ऋ० ६ । ४८ । ३) । यदि हि पदकार्यं पद्येऽपि स्याद्भिःशब्देनाबह्वक्षरेणोपहितत्वात्— स्वबह्वक्षरेण (५ । ५) इति सुशब्दस्य षत्वं स्यात् । यदहं गोपतिः स्याम् (ऋ० ८ । १४ । २) । यदि पदकार्यं पद्येषु[8] स्यादत्रापि—पदादयश्च

---

(१) B^2 I^2; गायत्र्यादयः B^3 B^n, Reg., M. M. (२) B^3 I^2, पादस्यैतो B^2, पदस्य तौ B^n. (३) B^2, पादवृत्तस्य B^3 I^2 B^n. (४) ऊकारो- B^2. (५) -संधिषु इति B^2. (६) तत्पद्येष्वपि B^2. (७)-क्षरमितिः प्राप्तौ I^2. (८) B^3 $B^2$$I^2$, पद्ये B^n.

स्यिति (५ । ६) इति पतिशब्देनावह्वचरेणोपहितत्वात्स्यिति[1] पदादेः षत्वं स्यात् ।

णत्वे तूदाहरणं[2] नास्ति । उपाध्यायस्तु—पितृयाणम् (ऋ० १०।२।७) इत्युदाहरति । पूर्वपद[3]स्थान्निमित्तादुत्तरस्य पद्यस्थस्य[4] नकारस्य पदवत्पद्यानिति पदभावाद्भिन्नपदवत्त्वान्[5] नतिर्न प्राप्नोति । तत ऋते[6] नत- इत्यनेन प्राप्यत इत्यनेनाभिप्रायेण । एतच्चासत् । यत्र हि सामान्येन पदस्य[7] कार्यं विधीयते । तच्च[8] पदवत्पद्यान् इत्यनेन पद्येष्वपि प्राप्यते[9] । तत्प्राप्तं सद् ऋते नत- इत्यनेन पुनर्निषिध्यते । सोऽस्यापवादसूत्रस्य[10] विषयः । अत्र तु स्वयमेव सूत्रकारोऽवोचत्—ऋकाररेफषकारा नकारं समानपदेऽवगृह्ये नमन्ति । अन्तःपदस्थम् (५।४०) इति । अत एतदसदुदाहरणम् ।

उपाचरितः । पथस्पथः परिपतिम् (ऋ० ६ । ४९ । ८) । अत्रापि[11] पदकार्यं यदि पद्येषु स्यात्पथस्पथ इत्यत्रोपाचरितो न स्याद्भिन्नपदत्वात् । अन्तःपदं तु सर्वत्रैवोपाचरितः (४।४१) इत्यनेनान्तःपदमुपाचरितो विधीयते । अतः[12] पदवद्भावः पद्यानाम्[13] उपाचरिते निषिध्यते । निरवकाशोऽयमन्तःपदविधिरिति चेत् । न[14] । अञ्जस्पाइव (ऋ० १० । ९४ । १३) दुष्प्राव्योऽवहन्ता (ऋ० ४।२५।६) त्वं हि गाधस्पते

---

(१)-तत्वा स्यिति- B^3. (२) रूदाहरणं I^2. (३) $B^2 I^2 B^n$, पूर्वपद्य- B^3. (४) $B^2 I^2$, उत्तरपदस्थस्य (instead of उत्तरस्य पद्यस्थस्य) B^2, पद्यस्थस्य omitted in B^n. (५) $B^3 I^2 B^n$, भिन्नपदत्वान् B^2. (६) ततो ऋते $B^3 I^2 B^2 B^n$. (७) पद- B^2. (८) $B^3 I^2 B^n$, तत्र B^2. (९) $B^3 I^2 B^n$, प्राप्येत B^2. (१०) -सूत्र- B^2. (११) अत्र Reg. (१२) $B^2 B^n$, Reg.; अंतः- $B^3 I^2$. (१३) B^3 $I^2 B^2$, Reg.; उपधानाम् (instead of पद्यानाम्) B^n. (१४) B^2 B^n, न omitted in $B^3 I^2$.

(ऋ० ८। ६१। १४) इत्येवमादिषु समापाद्योपाचरितेषु स्यात्। अत्र हि विक्रान्तसन्धिरेव भवति। न तु खण्डनम्।

क्रमः। सुतसोमा अहर्विदः। (ऋ० क्र० १।२।२)। अत्र यदि पदवत्पद्याः स्युः—क्रमो द्वाभ्यामभिक्रम्य(१०।१—२)इति द्वाभ्यां पदाभ्यां स्यात्।

स्वरः। पुरोहितमिति पुरःऽहितम्। (ऋ० क्र० १। १। १)। अत्र पुरःशब्दस्यान्तोदात्तस्य हितशब्दोऽनुदात्तो मात्राकालव्यवहितः। तत्र पदवद्भावे संति पूर्वमन्तोदात्तं पद्यमनपेक्ष्यैव[1] हितशब्दोऽनुदात्तः स्यात्। अतः स्वरग्रहणम्। ननु[2]—यथा संधीयमानानाम् (३। २४) इत्यनेनावग्रहस्य स्वरं वक्ष्यति। एवं तर्हि स्पष्टार्थं स्वरग्रहणम्॥

अष्टावाद्यानवसानेऽप्रगृह्या-
नाचार्या आहुरनुनासिकान्स्वरान्॥ ६३॥

अष्टौ स्वरानाद्यानकारादीनाचार्या अप्रगृह्यानवसाने[3]ऽनुनासिकान् ब्रुवन्ति। ईड्यो नूतनैरुतँ[4] (ऋ० १। १। २)। इन्दवो वामुशन्ति हिँ[5] (ऋ० १।२।४)। आद्यानिति किम्। अग्ने। शतक्रतो। अवसान इति किम्। न नि मिषति सुरणः (ऋ० ३। २९। १४)। अप्रगृह्यानिति किम्। सुतानां वाजिनीवसू (ऋ० १। २। ५)॥

तत्त्रिमात्रे शाकला दर्शयन्त्या-
चार्यशास्त्रापरिलोपहेतवः॥ ६४॥

तदेतदानुनासिक्यं त्रिमात्रे स्वरे शाकल्य[6]ऋषेर्मतानुसारिणो दर्शयन्ति। अत्र हेतुमाह। आचार्यशास्त्रमनेनैकेन प्लुतेनानुनासि-

---

(१) B²I², अनपेक्षयैव B³Bⁿ. (२) स्वरग्रहणमनु (instead of स्वरग्रहणम्। ननु) B². (३) अप्रगृह्यानवसाने omitted in I². (४) B³B², Reg.,M.M.; नूतनैरुत I² Bⁿ. (५) B³B², Reg., M.M.; हि I²; हि omittted in Bⁿ. (६) B³ I²Bⁿ, शाकल-B², शाकल्यस्य Reg.

केन सतास्माकमपरिलुप्तं यथा स्यादिति। न त्वा भीरिव विन्दती३ (ऋ० १० । १४६ । १) ॥

ऋकारादयो दश नामिनः स्वराः ॥ ६५ ॥

ऋकारमादौ कृत्वा दश स्वरा नामिसंज्ञा वेदितव्याः । नमयन्ति दन्त्यं सन्तं मूर्धन्यं कुर्वन्तीति नामिनः । ऋ ॠ ऽ ई उ ऊ ए ओ ऐ औ इति । नामिसंज्ञायाः प्रयोजनम्—अन्तःपादं नाम्युपधः सकारः (५ । १) इति ॥

पूर्वो नन्ता नतिषु नम्यमुत्तरम् ॥ ६६ ॥

ऋकाररेफषकारा नकारं नमन्ति (५ । ४०) इति वक्ष्यति । तत्र पूर्व ऋकारादय उत्तरे वा । अतस्तद्व्यवस्थार्थमाह । पूर्वो नन्ता नतिषु नम्यमुत्तरम्। नतिषु वर्तमानानां वर्णानां पूर्वो नन्ता वर्णो भवति । नम्यं व्यञ्जनमुत्तरं भवति। पन्थामनु प्रविद्वान्[1] पितृयाणम् (ऋ० १०। २ । ७)। पूर्वो नन्तेति किम् । अर्वाञ्चमद्य यय्यं नृवाहणम् (ऋ० २। ३७। ५)। ऋकारात्पूर्वस्य नकारस्य नतिर्मा भूदिति। नम्यमुत्तरमिति किम् । ऋकारादुत्तरस्य वाहन[2]नकारस्य नतिर्यथा स्यादिति ॥

सहोपधोऽरिफित एकवर्णव-
द्विसर्जनीयः स्वरघोषवत्परः ॥ ६७ ॥

अरिफितो विसर्जनीय उपधासहित एकवर्णवद्द्रष्टव्यः स्वरपरो घोषवत्परश्च सन् । स्वरपरः । य इन्द्र सोमपातमः (ऋ० ८। १२। १)। ह्रस्वपूर्वस्तु सोऽकारम् (२। २७) इति सोपधस्याकारः । घोषवत्परः । नमो भरन्त एमसि (ऋ० १ । १ । ७)। ओकारं ह्रस्वपूर्वः (४ । २५) इति सोपधस्यौकारः । अरिफित इति किम् । पुनर्द्यौर्देवी पुनरन्तरिक्षम् (ऋ० १० । ५९ । ७) । स्वरघोषवत्पर इति किम् । यस्तिग्मश्रृङ्गो वृषभो न भीमः (ऋ० ७ । १९ । १) ॥

---

(१) प्रविद्वान् (instead of प्रविद्वान्) I². (२) वाहनं B².

ओकार आमन्त्रितजः प्रगृह्यः ॥ ६८ ॥

ओकार आमन्त्रिताज्जातः प्रगृह्यसंज्ञो भवति। इन्द्रो इति। विष्णो इति। प्रगृह्यसंज्ञायाः प्रयोजनम्—प्रकृत्येतिकरणादौ प्रगृह्याः (२।५१) इति। एतच्च सूत्रं स्वार्थमभिधायोत्तरसूत्रेषु प्रगृह्यसंज्ञामधिकरोति। अतोऽधिकारसूत्रमेवैतत्। ननु अधिकारसूत्रं परार्थं भवति। एतत्तु स्वार्थमभिधाय परार्थं भवति[1]। अथ कथमधिकारसूत्रमेतदिति। नैष दोषः। गुणोऽयं शास्त्रकृतो यदनेनैव सूत्रेण स्वार्थमभिधत्ते। अधिकारं च प्रकरोति[2]। अतोऽधिकारसूत्रमेवैतदिति। आह च।

उभयार्थं परार्थं वा सूत्रं स्यादाधिकारिकम्।
संज्ञासूत्रं परार्थं स्यात् पारिभाषिकमेव च॥
परिभाषां च संज्ञां च कार्यकालां[3] प्रचक्षते।
अधिकारः कृतो यत्र ततोऽन्यत्र न गच्छति॥

पदं चान्यः ॥ ६९ ॥

आमन्त्रितसंज्ञितादोकारादन्य ओकारः पदम् ओ इति सोऽपि प्रगृह्यसंज्ञो भवति। ओ हि वर्तन्ते रथ्येव चक्रा[4] (ऋ०१०।११७।५)॥

अपूर्वपदान्तगश्च ॥ ७० ॥

पूर्वपदान्तगश्च य ओकारो न भवति स प्रगृह्यसंज्ञो भवति। पूर्वपदोत्तरपदव्यपदेशश्च[5] समास एव भवति। अतोऽयमर्थः। पूर्वपदान्तस्यौ[6]कारस्य प्रगृह्यसंज्ञो न भवति। यॉंश्चो नु दाधृविर्भरध्यै (ऋ० ६।६६।३)। एषो उषा अपूर्व्या (ऋ० १।४६।१)।

---

(१) B³ B² Bⁿ, वदति I². (२) करोति Bⁿ. (३) B³B², कार्याकालं corrected to कार्यकालं in I², कार्य्यकालं Bⁿ. (४) चक्रा omitted in Reg. (५) -व्यपदेशः Reg. (६) पूर्वपदस्यौ- Bⁿ.

अपूर्वपदान्तग इति किम् । यदहं गोपतिः स्याम् (ऋ० ८ । १४ । २) । कुवित्सु नो गविष्टये (ऋ० ८ । ७५ । ११) । ननु अनेनैव सूत्रेणाधस्तनयोः सूत्रयोर्विषयः सूचितः[1] । एवं तर्ह्यधस्तनाभ्यामस्यैव[2] सूत्रस्य प्रपञ्चः कृतः । ते वै विषयः संगृहीता[3] येषां लक्षणं प्रपञ्चश्च ॥

षष्ठादयश्च द्विवचोऽन्तभाजस्त्रयो दीर्घाः ॥ ७१ ॥

षष्ठादयश्च त्रयो दीर्घाः स्वरा द्विवचनाभिधायिनः प्रगृह्यसंज्ञा भवन्ति । इन्द्राबृहस्पती वयम् (ऋ० ४ । ४९ । ५) । इन्द्रवायू इमे सुताः (ऋ० १ । २ । ४) । द्वे विरूपे चरतः स्वर्थे (ऋ० १ । ९५ । १) । द्विवचोऽन्तभाज इति किम् । अग्न आ याहि वीतये (ऋ० ६ । १६ । १०) ॥

साप्तमिकौ च पूर्वौ ॥ ७२ ॥

एतेषामेव[4] त्रयाणां वर्णानां मध्ये यौ पूर्वौ दीर्घौ[5] स्वरौ तौ प्रगृह्यसंज्ञौ भवतः सप्तम्यर्थाभिधायिनौ चेद्भवतः । दृतिं न शुष्कं सरसी शयानम्[6] (ऋ० ७ । १०३ । २) । सरस्यामिति प्राप्ते छान्दसः सप्तम्यर्थे[7] ईकारः । सोममिन्द्र चमू सुतम् (ऋ० ८ । ७६ । १०) । चम्वामिति[8] प्राप्ते सप्तम्यर्थे[9] ऊकारः । स्वायां तनू ऋत्व्ये (ऋ० १० । १८३ । २) । सोमो गौरी अधि श्रितः (ऋ० ९ । १२ । ३) । स्तीर्णं राये सुभरं वेद्यस्याम्[10] (ऋ० २ । ३ । ४) । साप्तमिकाविति किम् । पीत्वी सोमस्य वावृधे (ऋ० ३ । ४० । ७) ॥

---

(१) सूचितं I². (२) अधस्तनाभ्यां सूत्राभ्यां अस्यैव Bⁿ. (३) I²P, संगृहीताः B², संगृहीतव्या B³Bⁿ. (४) B³I² Bⁿ, एषामेव B². (५) दीर्घौ omitted in I². (६) B², M.M.; सरसी (instead of सरसी शयानम्) B³I², Reg.; सरसी इति Bⁿ. (७) सप्तम्यर्थे B². (८) चम्वाश्वमिति I². (९) सप्तम्यर्थे B², सप्तम्या अर्थे I². (१०) B², Reg., M. M.; वेदी B³I²Bⁿ.

अस्मे युष्मे त्वे अमी च प्रगृह्याः ॥ ७३ ॥

अस्मे युष्मे त्वे अमी इत्येते च ईकारैकाराः प्रगृह्यसंज्ञा भवन्ति। अस्मे। अस्मे आ वहतं रयिम्। (ऋ० ८। ५। १५)। युष्मे। न युष्मे वाजबन्धवः (ऋ० ८। ६८। १९)। त्वे। त्वे इद्धूयते हविः (ऋ० १। २६। ६)। अमी। अमी ये पञ्चोक्षणः (ऋ० १। १०५। १०)। प्रगृह्यसंज्ञाधिकारे पुनः प्रगृह्यग्रहणमीकारस्य एकारस्य च सप्तम्यर्थनिवृत्त्यर्थम् ॥

उपोत्तमं नानुदात्तं न पद्यम् ॥ ७४ ॥

अस्मे युष्मे त्वे अमी इत्येतेषां पदानां यदुत्तमस्य[1] पदस्य समीपे पदं[2] तदनुदात्तं वा पद्यं वा[3] तत्प्रगृह्यसंज्ञं न भवति। ओहब्रह्माणो वि चरन्त्यु त्वे (ऋ० १०। ७१। ८)। त्वं तमग्ने अमृतत्व[4] उत्तमे (ऋ० १। ३१। ७) ॥

उकारश्चेतिकरणेन युक्तो
रक्तोऽपृक्तो द्राघितः शाकलेन ॥ ७५ ॥

अपृक्तश्च उकारः प्रगृह्यसंज्ञो भवति। स चेतिकरणेन युक्तो रक्तोऽनुनासिको दीर्घश्च भवति शाकलेन मतेन। ऊँ इति। अपृक्त इति किम्। स्विति सु। इतिकरणेन युक्त इति युक्तवचनमितिकरणात्परस्याप्युकारस्य[5] दीर्घत्वं रक्तत्वं च करोति। ऊँ इत्यूँ।

---

(१) B³ I²; B² adds उपोत्तमं after पदानां; यदुत्तमं तस्य (instead of यदुत्तमस्य) Reg.; अस्मे युष्मे इत्यादीनां यदुत्तमस्य Bⁿ. (२) B³I²Bⁿ,Reg.; पदं त्वे इति B². (३) B²I², वा omitted in B³Bⁿ. (४) मृतत्व (instead of अमृतत्व) I². (५) परस्याप्युकारस्य B³I²Bⁿ, परस्य B².

आर्ष्यां च संहितायामितिकरणायोगाद्रक्तत्वं दीर्घत्वं[1] प्रगृह्यसंज्ञत्वं च[2] न भवति। अवेद्विन्द्र जल्गुलः (ऋ० १ । २८ । १) ॥

ऊष्मा रेफी पञ्चमो नामिपूर्वः ॥ ७६ ॥

पञ्चम ऊष्मा विसर्जनीयो नामिपूर्वः सन्रेफिसंज्ञो भवति। अग्निरस्मि जन्मना (ऋ० ३ । २६ । ७)। पूर्वीरहं शरदः (ऋ० १ । १७९ । १)। रेफिसंज्ञायाः प्रयोजनम्—सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफी (४ । २७) ॥

अहोऽपोवर्जमितरो यथोक्तम् ॥ ७७ ॥

अहः अपः इत्येते पदे वर्जयित्वा उक्तादन्य इतरोऽनामिपूर्वो यः पञ्चम ऊष्मा विसर्जनीयः स यथोक्तं यथा[3] वक्ष्यमाणं तथा रेफिसंज्ञो भविष्यतीत्येतदधिकृतं वेदितव्यम्। अवर्मह इन्द्र[4] (ऋ० १ । १३३ । ६) अपस्कः (ऋ० ७ । २१ । ३) इत्येते[5] वर्जयित्वा।

ननु कस्मादनयोः पदयोः पुरस्तादपवादः क्रियते। एते हि पदे वक्ष्यमाणानां पदानां विशेषणाभिप्रायेण पठ्येते। नैतत्। यथाभूतं चेतरेषां[6] विशेष्यभूतानां पदानां[7] रूपं तथाभूतमनयोरपि[8] पदयोः। तेषामप्यनामिपूर्वो विसर्जनीयः। यथा च तेषां[9] तथानयोरपि पदयोः। अतस्तुल्यरूपत्वात्कस्यचिन्मन्दबुद्धेः संदेहो मा भूदिति पुरस्तादपवादः क्रियते।

यद्येवमर्थं पुरस्तादपवादः क्रियते[10]। एवं तर्हि न कर्तव्योऽपवादः। तत्रैव वयं तथा व्याख्यास्यामो यथा विशेषणार्थतानयोः

---

(१) B^3B^n; दीर्घत्वं च $B^2 I^2$, Reg. (२) $B^3I^2B^n$, Reg.; प्रगृह्यसंज्ञं B^2. (३) B^2I^2, Reg.; यथा omitted in $B^3 B^n$. (४) B^3B^n, अवर्महः B^2I^2. (५) $B^3I^2B^n$, इत्येते च B^2. (६) $B^3I^2B^n$. यथाभूतमितरेषां B^2. (७) पादानां B^3. (८) $B^3I^2B^n$, अनयोः B^2. (९) $B^3I^2B^n$, च तेषां omitted in B^2. (१०) B^3B^2, यद्येवमर्थं—क्रियते omitted in I^2.

पदयोर्भविष्यति। तद्यथा—अपस्कः (१ । ६०) इत्यत्र तावदप इत्येतस्य पदस्य करित्येतस्मिन्पदे परभूत उपाचरितं वक्ष्यति—करं कृतं कृधि करत्करित्यपि परेषु (४ । ४ । ४३) अपि (?)[1]। अतोऽप इत्येतस्य विशेषणार्थतावगम्यते[2]। आचार्यश्च—अपस्कः (१ । ६०) इत्यत्र सकारं विसर्जनीयस्य दर्शयिष्यति। अतोऽस्मिन्पदे विशेषणार्थता स्थिता। तथा—अवर्मह: (१ । ६६) इत्यत्र—वरवरावरिति चैकपादे व्यपपूर्वाणि (१ । ६६) इत्यनेनावरित्येतस्य[3] पदस्य रेफिसंज्ञा न प्राप्नोति। अतो[4] मह इत्येतत्पदं विशेषणार्थं पठितमिति गम्यते। संधौ च रेफदर्शनात्—अवर्मह: (१ । ६६) इति।

न चायमर्थ आशङ्कनीयो यथा निपातनान्युभयार्थान्यपि भवन्तीति। तद्यथा—अनुसेषिधत् (५ । ३०) इत्यत्र पद्यादेः सकारस्य षत्वनिषेधः परस्य च[5] षत्वं युगपन्निपात्यते। एवमिहापि—अवर्मह:—इति युगपत्पदयोरुभयो रेफिसंज्ञा मा भूदित्यतो[6] मह इत्येतस्य पदस्य पुरस्तादपवादः क्रियत इति। यतो निपातनं नामाचार्योच्चारणमुच्यते। यथा—अनुसेषिधत् (५। ३०) इतो षिञ्चत (५।१७) इति बह्वप्यप्राप्तमाचार्योच्चारणात्साधु भवति। नह्यत्राचार्यो रेफं दर्शयति द्वयोरपि पदयोः—अवर्मह: (१ । ६६) इति। अतो निपातना[7]शङ्का न कर्तव्येति। एवं तर्हि किमर्थमाचार्यः[8] पुरस्तादपवादं करोति।

---

(१) अपि B³I²B². See note. (२) -र्थव- I². (३) B³I², -रित्यस्य B². (४) B³I², अवो B². (५) B³I², च omitted in B³. (६) भूदिति। अवो B². (७) B³I², निपातन- B². (८) B³I²B², आचार्यः किमर्थं Bⁿ.

अत्र ब्रूमः । यदेवमनेन प्रकारेण दुःप्रतिपाद्यत्वमस्यार्थस्य अयं तावत्प्रधानभूतो[1] दोषः । अन्यच्च[2] ग्रन्थगौरवभयाद् दृष्ट[3]-शिष्येणैतन्नोदितं—महोऽपोवर्जमित्यनयोः पदयोः[4] पुरस्तादपवादो न कर्तव्य इति । तच्च ग्रन्थगौरवमनेन प्रकारेण प्रतिपादयतः सुतरामपरि[5]हृतमेवास्ते । अतोऽयं लाघविक आचार्यः पुरस्तादपवादं चक्रे—महोऽपोवर्जम्—इति ॥

अन्तोदात्तमन्तः ॥ ७८ ॥

अन्तरित्येतत्पदमन्तोदात्तं सद्रेफिसंज्ञं भवति । अन्तरिच्छन्ति तं जने (ऋ० ८ । ७२ । ३)। अन्तोदात्तमिति किम् । इयं वेदिः परो अन्तः पृथिव्याः (ऋ० १ । १६४ । ३५) ॥

अक्षार्विपर्यये ॥ ७९ ॥

अक्षारित्येतत्पदमधस्तनस्य पदस्य[6] स्वरविपर्यये सति रेफिसंज्ञं भवति । अन्तोदात्तं चाधस्तनपदं तत्स्वरविपर्ययेऽनुदात्तं वाद्युदात्तं वा भवति । अनुदात्तम् । अनूपे गोमान्गो[7]भिरक्षाः (ऋ० ९ । १०७ । ९)। आद्युदात्तम् । यदक्षारति देवयुः (ऋ० ९ । ४३ । ५)। विपर्यय[8] इति किम् । न्युप्ता अक्षा अनु दीव आसन् (ऋ० १० । २७ । १७) ॥

स्पर्शे चोषः प्रत्यये पूर्वपद्यः ॥ ८० ॥

उषरित्ययं पूर्वपद्यः सन्स्पर्शे प्रत्यये रेफिसंज्ञो[9] भवति । उषर्बुध आ[10] वह (ऋ० १ । ४४ । ९)। उषर्भुद्भूदतिथिः (ऋ०

---

(१) B³B²Bⁿ, प्रधानीभूतो I². (२) B³B²Bⁿ, अन्य- I². (३) B³B²Bⁿ, -भयदुष्ट- I². (४) B²I²Bⁿ, पदयोः omitted in B³. (५) B³I²Bⁿ, अप-B². (६) B³I²; पदस्य omitted in B²Bⁿ, Reg. (७) B³B², Reg.; गोमान्यान्गो- I²; गोमानो- Bⁿ. (८) B³I²Bⁿ, स्वरविपर्यय B². (९) B³I²Bⁿ, -संज्ञं B². (१०) आह B².

६ । ४ । २)। स्पर्श इति किम्। उषउषो हि वसो (ऋ० १० । ८ । ४)। पूर्वपद इति किम्। उषो मघोनि (ऋ० ४ । ५५ । ९)॥

प्रातः ॥ ८१ ॥

प्रातरित्येतत्पदं रिफितसंज्ञं भवति। प्रातरग्निं प्रातरिन्द्रं हवामहे (ऋ० ७ । ४१ । १)॥

देवं भाः ॥ ८२ ॥

भारित्येतत्पदं रिफितसंज्ञं भवति देवमित्येतत्पदं[1] पूर्वं चेत्। देवं भाः परावतः[2] (ऋ० १ । १२८ । २)। देवमिति किम्। बृहद्भा बिभ्रतो हविः (ऋ० १ । ४५ । ८)॥

वधराद्युदात्तम् ॥ ८३ ॥

वधरित्येतत्पदमाद्युदात्तं चेद्रिफितसंज्ञं भवति। वधर्जघान तविषीभिरिन्द्रः (ऋ० ५ । ३२ । ३)। आद्युदात्तमिति किम्। आरे गोहा नृहा वधो वो अस्तु (ऋ० ७ । ५६ । १७)॥

करनुदात्तम् ॥ ८४ ॥

करित्येतत्पदं रिफितसंज्ञं भवत्यनुदात्तं चेत्[3]। नि काव्या वेधसः शश्वतस्कः[4] (ऋ० १ । ७२ । १)। अनुदात्तमिति किम्। को अद्य नर्यो देवकामः (ऋ० ४ । २५ । १)॥

अबिभः ॥ ८५ ॥

अबिभरित्येतत्पदं रिफितसंज्ञं भवति। पितेव पुत्रमबिभरुपस्थे (ऋ० १० । ६९ । १०)॥

---

(१) पद- I². (२) -वत I². (३) अनुदात्तं चेद् occurs before रिफितसंज्ञं in B². (४) कहंस्ते Reg.

तदादः ॥ ८६ ॥

आ[1]दरित्येतत्पदं तदि[2]त्येतत्पूर्वं चेद्रिफितसंज्ञं भवति। दिवस्परि सुग्रथितं तदादः (ऋ० १। १२१। १०)। तदाद इति[3] (?) किम्। अष्टा महो दिव आदो हरी इह[4] (ऋ० १। १२१। ८)। आदरिति[5] किम्[6]। अदो यद्दारु प्लवते (ऋ० १०। १५५। ३)॥

स्तः प्रागाथम् ॥ ८७ ॥

स्तरित्येतत्पदं प्रागाथं चेद्रिफितसंज्ञं भवति। मा न स्तरभिमातये (ऋ० ८। ३। २)। प्रागाथमिति किम्। नास्य ते महिमानं परि ष्टः (ऋ० १। ९१। ८)॥

एतशे कः ॥ ८८ ॥

करित्येतत्पदमेतशेपूर्वं चेद्रिफितसंज्ञं भवति। पुरः सतीरुपरा एतशे कः (ऋ० ५। २९। ५)। एतश इति किम्। को अद्य नर्यः (ऋ० ४। २५। १)। करनुदात्तमुक्तमुदात्तार्थ आरम्भः॥

दिवे कः ॥ ८९ ॥

करित्येतत्पदं रिफितसंज्ञं भवति दिवेपूर्वं चेत्[7]। महे यत्पित्र ईं रसं दिवे कः (ऋ० १। ७१। ५)। दिवे करिति किम्[8]। को अद्य नर्यः (ऋ० ४। २५। १)। उदात्तार्थ आरम्भः॥

अपस्कः ॥ ९० ॥

करित्येतत्पदं रिफितसंज्ञं भवति अप इत्येतत्पदं पूर्वं चेत्। इन्द्राय यो नः प्रदिवो अपस्कः (ऋ० ६। २३। ५)। अप इति

---

(१) आ- B³B²Bⁿ (अ- corrected to आ- in B³), अ- I².
(२) -दि- B³B²Bⁿ, -दे- I². (३) तदाद इति I²B²B³. See note.
(४) B², आदो हरी Reg., आदः B³I². (५) B³I², आद इति B². (६) तदेति किम् (instead of तदाद इति किम् to आदरिति किम्) Bⁿ; cp. also M.M. (७) B³I²Bⁿ, दिवेपूर्वं चेद्रिफितसंज्ञं भवति B². (८) दिव इति किं Bⁿ.

किम् । को वस्त्राता वसवः[1] (ऋ० ४ । ५५ । १) । उदात्तार्थ आरम्भः ॥

अत्साः ॥ ९१ ॥

अत्सारित्येतत्पदं रिफितसंज्ञं भवति[2] । लोपाशः सिंहं प्रत्यञ्चमत्साः (ऋ० १० । २८ । ४) ॥

अविपूर्वमस्तः ॥ ९२ ॥

अस्तरित्येतत्पदं रिफितसंज्ञं भवति विपूर्वं चेन्न भवति[3] । वज्रेण हि वृत्रहा वृत्रमस्तः (ऋ० १० । १११ । ६) । अविपूर्वमिति किम् । पुरुत्रा वृत्रो अशयद्व्यस्तः (ऋ० १ । ३२ । ७) ॥

स्वः स्वरितम् ॥ ९३ ॥

स्वरित्येतत्पदं रिफितसंज्ञं भवति स्वरितं चेत्[4] । स्वर्यद्वेदि सुदृशीकमर्कैः (ऋ० ४ । १६ । ४) । स्वरितमिति किम् । यो नः स्वो अरणः (ऋ० ६ । ७५ । १९) ॥

न समासाङ्गमुत्तरम् ॥ ९४ ॥

स्वरित्येतत्पदं समासस्योत्तराङ्गं सद्रिफितसंज्ञं न[5] भवति । यः पुष्पिणीश्च प्रस्वश्च धर्मणा (ऋ० २ । १३ । ७) । उत्तराङ्गमिति किम् । मादयस्व स्वर्णरे (ऋ० ८ । १०३ । १४) ॥

स्वरादेशोऽपूर्वपदेषु ॥ ९५ ॥

योऽयं स्वरादेशः—अन्तोदात्तमन्तः (१ । ७८) वधरायुदात्तम् (१ । ८३) स्वः स्वरितम् (१ । ९३) इत्यादेशः सः[6] । अपूर्वपदेष्विति पूर्वपदेषु न भवति । एतदुक्तं भवति ।

---

(१) वसवः omitted in B^n. (२) $B^3I^2B^n$, स्यात् B^2. (३) B^2I^2, न चेत् (instead of चेन्न भवति) B^3B^n. (४) $B^3I^2B^n$, स्वरितं चेत् precedes रिफितसंज्ञं भवति in B^2. (५) न omitted in I^2. (६) B^2B^n, सः omitted in B^3 I^2.

यदि पूर्वपदानि भवन्ति तदान्यस्वरानुदात्तादियुक्तान्यपि रिफितान्येव[1] भवन्ति । अन्तर्वावत्क्षयं दधे (ऋ० १ । ४० । ७) । वधर्यन्तीं वहुभ्यः (ऋ० १ । १६१ । ९) । स्वर्जिदुभ्जित्पर्वते सहस्रजित्[2] (ऋ० ९ । ७८ । ४) ॥

अवर्महः ॥ ९६ ॥

अवरित्येतत्पदं रिफितसंज्ञं भवति मह इत्येतस्मात्पदात्पूर्वं चेत् । अवर्मह इन्द्र दादृहि (ऋ० १ । १३३ । ६) । मह इति किम् । अवो बभूथ शतमूते अस्मे[3] (ऋ० ७ । २१ । ८) ॥

अनर्धर्चान्ते स्वरघोषवत्परमूधः ॥ ९७ ॥

ऊधरित्येतत्पदं स्वरघोषवत्परं रिफितसंज्ञं भवति अर्धर्चान्तं[4] चेन्न भवति[5] । प्र कृष्णाय रुशदपिन्वतोधर्ऋतम् (ऋ० १० । ३१ । ११) । ऊधर्न गोनां स्वाद्मा पितूनाम् (ऋ० १ । ६९ । २) । अनर्धर्चान्त इति किम् । सकृच्छुक्रं दुदुहे पृश्निरूधः (ऋ० ६ । ६६ । १) । स्वरघोषवत्परमिति किम् । पृथिव्यामतिषितं यदूधः (ऋ० १० । ७३ । ९) ॥

न रेफेऽरुषासोऽतृणन्मही ॥ ९८ ॥

रेफादौ पदे परभूते अरुषासः अतृणत् मही इत्येतेषु परभूतेषु[6] ऊधः-शब्दो रिफितसंज्ञो न भवति । रेफे । समूधो रोमशं हतः (ऋ० ८ । ३१ । ९) । अरुषासः । रिहन्त्यूधो अरुषासो अस्य (ऋ० १ । १४६ । २) । अतृणत् । शुच्यूधो अतृणन्न गवाम् (ऋ० ४ । १ । १९) । मही । पृश्निर्यदूधो मही जभार (ऋ० ७ । ५६ । ३) ॥

---

(१) I^2B^n, -युक्तान्यरिफितान्येव B^3, -युक्तान्यपि रिफितसंज्ञान्येव B^2. (२) सहस्रजित् omitted in B^n. (३) अस्मे omitted in B^n. (४) $B^3I^2B^n$, अर्धर्चांते B^2. (५) $B^3I^2B^2$, न चेत् (instead of चेन्न भवति) B^n. (६) B^3 I^2B^2, परभूतेषु च B^n.

वरवरावरिति चैकपादे
व्यपपूर्वाण्यसमासाङ्गयोगे ॥ ८८ ॥

वः अवः आवः इत्येतानि पदानि रिफितसंज्ञानि[1] भवन्ति। कथंभूतानीति। अत आह। एकस्मिन्पादे यदि वि अप इत्येवं-पूर्वाणि भवन्ति। यदि चोभयोरपि समासाङ्गयोगो न भवति। यदि च वः अवः आवः इत्येतानि च[2] पदानि समासाङ्गभूतानि न भवन्ति। वि अप इत्येते च[3] पदे यदि समासाङ्गभूते न भवत इत्यर्थः। वः। गृणानो अङ्गिरोभिर्दस्म वि वरुषसा (ऋ० १। ६२। ५)। यो गा उदाजदप हि वलं वः (ऋ० २। १४। ३)। अवः। वि ज्योतिषा संववृत्वत्तमोऽवः (ऋ० ५। ३१। ३)। अपावरद्रिवो बिलम् (ऋ० १। ११। ५)। आवः। व्यावर्देव्या मतिम् (ऋ० ८। ९। १६)। अप द्रुहस्तम आवरजुष्टम् (ऋ० ७। ७५। १)।

एकपाद इति किम्। अभैष्माप तदुच्छत्वनेहसो वः (ऋ० ८। ४७। १८)। व्यपपूर्वाणीति किम्। को वस्त्राता वसवः[4] (ऋ० ४। ५५। १)। महि त्रीणामवोऽस्तु (ऋ० १०। १८५। १)। प्रावो[5] यद्दस्युहत्ये कुत्सवत्सम्[6] (ऋ० १०। १०५। ११)। असमासाङ्गयोग[7] इति किम्। अपावरद्रिवो बिलम् (ऋ० १। ११। ५)। असमासाङ्गयोग इत्युभयार्थं कस्मात्। विद्युन्न तस्थौ मरुतो रथेषु वः (ऋ० १। ६४। ९)॥

---

(१) B³ Bⁿ, -संज्ञा B², -संज्ञ I². (२) च omitted in Bⁿ. (३) B³ I² Bⁿ, च omitted in B². (४) B³I² B², Reg.; वसवः omitted in Bⁿ. (५) B²I², आवो B³Bⁿ. (६) B²I², कुत्सपुत्रं B³Bⁿ. (७) B², असमासांग B³ I²Bⁿ.

पथ्या मघोनी दिवि चक्षसा मदे
पूर्वोऽर्चिषातीतृषामोत्तरेषु न ॥ १०० ॥

पथ्या मघोनी दिवि चक्षसा मदे पूर्वः अर्चिषा अतीतृषाम इत्येतेषु पदेषु पर[1]भूतेषु वः अवः आवः इत्येतानि पदानि[2] रिफितसंज्ञानि न[3] भवन्ति। पथ्या। व्युषा आवः पथ्या[4] जनानाम् (ऋ० ७।७६।१)। मघोनी। अथो अद्येदं व्यावो मघोनी (ऋ० १।११३।१३)। दिवि। व्युषा[5] आवो दिविजा ऋतेन (ऋ० ७।७५।१)। चक्षसा। वि यदावश्चक्षसा सूर्यस्य (ऋ० १।११३।६)। मदे। वि वो मदे शीरम्[6] (ऋ० १०।२१।१)। पूर्वः। उतान्यो अस्मद्यजते वि चावः पूर्वः-पूर्वः[7] (ऋ० ५।७७।२)। अर्चिषा। व्युषा[8]श्चन्द्रा मह्यावो अर्चिषा (ऋ० १।१५७।१)। अतीतृषाम। नापाभूत न वोऽतीतृषाम (ऋ० ४।३४।११)। एतेषूत्तरेष्विति[9] किम्। वि सूर्यो रोदसी चक्षसावः (ऋ० ७।७६।१)॥

होतः सनितः पोतर्नेष्टः सोतः सवितर्नेतस्त्वष्टः।
मातर्जनितर्भ्रातस्त्रातः स्थातर्जरितर्धातर्धर्तः ॥१०१॥

होतः सनितः पोतः नेष्टः सोतः सवितः नेतः त्वष्टः मातः जनितः भ्रातः त्रातः स्थातः जरितः धातः धर्तः इत्येतानि पदानि रिफितसंज्ञानि

---

(१) परि- B^2. (२) B^3 I^2 B^n, पदानि omitted in B^2. (३) न omitted in I^2. (४) पथ्या३ $B^3 B^n$, Reg.; पथ्या२ B^2, पथ्यान् I^2. (५) व्यू१षा B^3. (६) $I^2 B^2$, Reg.; यज्ञाय स्तीर्णवर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे B^3; यज्ञाय स्तीर्णवर्हिषे विवो मदे B^n. (७) B^2,Reg.; पूर्वः (instead of पूर्वः-पूर्वः) $B^3 I^2 B^n$. (८) व्यू१षा- B^3. (९) I^2, एतेपूत्तरेषु $B^3 B^n$, एतेषु परेष्विति B^2.

भवन्ति। होतः। यथा होतर्मनुषो देवताता (ऋ० ६।४।१) सनितः। सनितः सुसनितरुग्र (ऋ० ८।४६।२०)। पोतः। पोतर्यज (मा० श्रौ० २।४।१।२८) इति प्रैषिकम्। नेष्टः। ग्नावो नेष्टः पिब ऋतुना (ऋ० १।१५।३)। सोतः। ज्येष्ठेन सोतरिन्द्राय (ऋ० ८।२।२३)। सवितः। विश्वानि देव सवितः (ऋ० ५।८२।५)। नेतः। ते ते देव नेतः (ऋ० ५।५०।२)। त्वष्टः। शिवस्त्वष्टरिहा गहि (ऋ० ५।५।९) मातः। पितर्मातर्यदिहोपब्रुवे वाम्[1] (ऋ० १।१८५।११)। जनितः। बोधि प्रयन्तर्जनितर्वसूनाम् (ऋ० १।७६।४)। भ्रातः। इन्द्र भ्रातरुभयत्रा ते अर्थम् (ऋ० ३।५३।५)। त्रातः। ओजिष्ठ त्रातरवितः (ऋ० १।१२९।१०)। स्थातः। स्मसि स्थातर्हरीणाम् (ऋ० ८।४६।१)। जरितः। प्र बोधय जरितर्जारमिन्द्रम् (ऋ० १०।४२।२)। धातः। ०धातर्विधातः कलशाँ अभक्षयम् (ऋ० १०।१६७।३)। धर्तः। धनानां धर्तरवसा (ऋ० १।१०२।५)॥

जामातर्दुहितर्दर्तः प्रशास्तरवितः पितः।
दोष्मावस्तरवस्पर्तः प्रयन्तश्चेङ्ग्यमुत्तमम् ॥ १०२ ॥

जामातःप्रभृति प्रयन्तःपर्यन्तान्येतानि पदानि रिफितसंज्ञानि भवन्ति। किमविशेषेण सर्वाण्येव पदानि। नेत्याह। इङ्ग्यमुत्तमम्। इङ्ग्यशब्देन सावग्रहं पदमुच्यते। उत्तमं पदं सावग्रहं भवति तदानीं रिफितसंज्ञं भवति।

जामातः। त्वष्टुर्जामातरद्भुत (ऋ० ८।२६।२१)। दुहितः। प्रावाद्य दुहितर्दिवः (ऋ० १।४९।२)। दर्तः।

(१) B², Reg.; यदिहोप B³I²Bⁿ.

पुरां दर्तः पायुभिः[1] (ऋ० १ । १३० । १०) । प्रशास्तः । प्रशास्तर्यज (मा० श्रौ० २ । ४ । १ । २८) इति प्रैपिकम् । अवितः । ओजिष्ठ त्रातरविता रथम् (ऋ० १ । १२९ । १०) । पितः । पितर्मातर्यदिहोपब्रुवे वाम् (ऋ० १ । १८५ । ११) । दोपावस्तः । दोपावस्तर्धिया वयम् (ऋ० १।१।७) । अवस्पर्तः । अवस्पर्तरधिवक्तारमस्मयुम्[2] (ऋ० २ । २३ । ८) । प्रयन्तः । बोधि प्रयन्तर्जनितर्वसूनाम् (ऋ० १ । ७६ । ४) । इङ्गमुत्तममिति किम् । उपप्रयन्तो अध्वरम् (ऋ० १ । ७४ । १) । प्रयन्त(?)[3]पदमत्र नावगृह्यते । अतो रिफितं न ॥

दीधरभारवरीवरदर्दर्दरदर्धरजागरजीगः । वारपुनः पुनरस्पसरक स्पः सस्वरहः सनुतः सवरस्वाः॥१०३

दीधः अभाः अवरीवः अदर्दः दर्दः अदर्धः अजागः अजीगः वाः अपुनः पुनः अस्पः अकः स्पः सस्वः अहः सनुतः सवः अस्वाः इत्येतानि पदानि रिफितसंज्ञानि[4] भवन्ति ।

दीधः । आमासु पक्वं शच्या नि[5] दीधः[6] (ऋ० ६ । १७ । ६) । अभाः । इषमूर्जं सुक्षितिं विश्वमाभाः (ऋ० १० । २० । १०) । अवरीवः । किमावरीवः कुह कस्य शर्मन् (ऋ० १० । १२९ । १) । अदर्दः । अदर्दरुत्समसृजो[7] वि खानि (ऋ० ५ । ३२ । १) । दर्दः । अपो यदद्रिं पुरुहूत दर्दराविः (ऋ० ४ । १६ । ८) । अदर्धः । उत्संहायास्थाद्व्यृतूँरदर्धः (ऋ० २ । ३८ । ४) ।

---

(१) B³I²Bⁿ, Reg.; पायुभिः पाहि शग्मैः B². (२) B³ B²Bⁿ, Reg.;-वक्तारं I². (३) See note. (४) पदानि रिफितानि B², रिफितसंज्ञानि B³Bⁿ, रिफिसंज्ञानि I². (५) न (instead of नि) B³. (६) जायमाना घोरा मर्त्याय रिपवे नि दीधः (ऋ० ६ । ६७ । ४) (instead of आमासु to दीधः) Reg. (७) असजो I².

अजागः। अजागरा[1]स्वधि देव एकः (ऋ० १०। १०४। ९)। अजीगः। आदिद् ग्रसिष्ट ओषधीरजीगः (ऋ० १। १६३। ७)। वाः। वारिन्मण्डूक इच्छति[2] (ऋ० ९। ११२। ४)। अपुनः। अनानुकृत्यमपुनश्चकार[3] (ऋ० १०। ६८। १०)। पुनः। पुनरागाः पुनर्नव (ऋ० १०। १६१। ५)। अस्पः। महो राये चितयन्नत्रिमस्पः (ऋ० ५। १५। ५)। अकः। अवद्य-मिव मन्यमाना गुहाकः (ऋ० ४। १८। ५)। स्पः। शूरो न युध्यन्नव नो निद स्पः (ऋ० ९। ७०। १०)। सस्वः। सस्व-श्चिद्धि तन्वः शुम्भमानाः (ऋ० ७। ५९। ७)। अहः। अहश्च कृष्णमहरर्जुनं च (ऋ० ६। ९। १)। सनुतः। सनुत-र्धेहि तं ततः (ऋ० ८। ९७। ३)। सबः। सबर्दुघायाः पय उस्रियायाः (ऋ० १। १२१। ५)। अस्वाः। आ यस्ते योनिं घृतवन्तमस्वाः[4] (ऋ० १०। १४८। ५)॥

इति श्रीपार्षदव्याख्यायां वज्रटसुत-
उवट[5]कृतौ परिभाषा प्रथमं
पटलम्॥

---

(१) अजागराः I^2. (२) $B^3I^2B^2B^n$, ऋतस्य वारसि क्षयं (ऋ० १। १३२। ३) (instead of वारिन्मण्डूक इच्छति) Reg. (३) B^2B^n, Reg.; चकार यात् B^3I^2. (४) $B^3I^2B^n$, Reg.; अस्वारुर्भिः B^2. (५) B^3I^2, -सुतोव्वट- B^n, -पुत्रटयट- B^2.

संहिता पदप्रकृतिः ॥ १ ॥

संहिता पदप्रकृतिरित्येतदधिकृतं वेदितव्यमा सीमापटलात् । पदानि प्रकृतिभूतानि यस्याः संहितायाः सा पदप्रकृतिः संहितात्र[1] विकारः । तथा हि षत्वणत्वादयो विकाराः संहिताया एव भवन्ति । प्रकृतिभूतत्वाच्च पदानां सिद्धत्वम् ॥

पदान्तान्पदादिभिः संदधदेति यत्सा कालाव्यवायेन ॥ २ ॥

संहितायाः पदानि प्रकृतिभूतानीत्युक्तम् । न तु संहितायाः स्वरूपं प्रतिपादितमित्यत आह । पदान्तान्पदादिभिर्यदेकीकुर्वन्नेति ग्रन्थमनुसरति सा संहितोच्यते । कालाव्यवायेन तु पदानाम्[2] । कालक्रमादुपादानं[3] परिपाद्य[4] । सा च द्विविधा संहिता । आर्षी क्रमसंहिता च । आर्षी । अयं देवाय जन्मने (ऋ० १ । २० । १) । क्रमसंहिता । पर्जन्याय प्र । प्र गायत । गायत दिवः । (ऋ० क्र० ७ । १०२ । १) । संहितासंज्ञायाः प्रयोजनम्[5]—ऋते न च द्वैपदसंहितास्वरौ (११ । ७०) ॥

स्वरान्तरं तु विवृत्तिः ॥ ३ ॥

अस्यामेव संहितायां यत्स्वरयोरन्तरं वक्ष्यति तद्विवृत्तिसंज्ञं स्यात् । नू इत्था ते पूर्वथा च (ऋ० १ । १३२ । ४) । विवृत्तिसंज्ञायाः प्रयोजनम्—यतो दीर्घस्ततो दीर्घा विवृत्तयः (२ । ७९) इति ॥

---

(१) $B^3 B^n I^2$; पदप्रकृतिः । संहिता तत्र B^2,Reg. (२) पदांतानां B^3. (३) Reg., कालक्रमानुपादानं $B^2 I^2$ (-पदानां corrected to -पादानं in I^2), कालक्रमानुपादान- B^n, कालक्रमानुपदांतानां B^3. (४) $B^2 B^3$,Reg.; परिपाद्याः I^2; परिपाठ्या B^n. (५) $B^3 I^2 B^n$, प्रयोजनं संहितायां लघोर्लघु इति B^2.

सा वा स्वरभक्तिकाला ॥ ४ ॥

सा विवृत्तिः स्वरभक्तिकाला वा स्यात्। अधिककाला वा[1] । स्वरभक्तेः[2] कालः[3] —द्राघीयसी सार्धमात्रा (१ । ३३) अर्धोनान्या (१ । ३५) इति। तत्रायं विवृत्तेर्विभागस्त्रिप्रकारः[4] । उभयतोह्रस्वा पादमात्राकाला। प्र ऋभुभ्यः (ऋ० ४ । ३३ । १) । प्रत्यु अदर्शि (ऋ० ७ । ८१ । १) एकतोदीर्घार्धमात्राकाला । नू इत्था ते[5] (ऋ० १ । १३२ । ४) । सा नो अव्ये (ऋ० ६ । ६१ । १) । उभयतोदीर्घा पादोनमात्राकाला। ता ईं वर्धन्ति (ऋ० १ । १५५ । ३) । इमा गावः सरमे या ऐच्छः (ऋ० १० । १०८ । ५) । विवृत्तिषु प्रत्ययादेरदर्शनम् (१४ । ५६) इति दोषं वक्ष्यति। अतश्छायोष्मवद्विवृत्तिरिति[6] सम्यग्व्याख्यानं[7] न भवति ॥

पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टेषु वचनात्प्रतीयात् ॥ ५ ॥

यत्किञ्चिद्विकारशास्त्रं तत्पदान्तेषु पदादिषु च वेदितव्यम्। पदे दृष्टेषु पदावस्थायामुपलब्धेषु। पदेषु[8] दृष्टेष्वपि वचनात्प्रतीयात् । वचनमन्तरेण विकारो न भवति। पदान्तेषु[9] । वसुं सूनुं सहसः (ऋ० १ । १२७ । १) । त्र्यर्यमा मनुषः (ऋ० ५ । २६ । १) । पदादिषु[10] । आपो हि ष्ठा मयोभुवः (ऋ० १० । ९ । १) ।

---

(१) B³I²B², Reg.; अधिककाला वा omitted in Bⁿ. (२) B³Bⁿ, स्वरभक्तिकालः पादमत्र इहेष्यते । कालाव्यवायेनेति सन्निधानादिति वृत्तिः । स्वरभक्ति- (instead of स्वरभक्तेः) B², स्वरभक्तिः I². (३) B³B²Bⁿ, कालं I². (४) त्रिःप्रकारः B³Bⁿ. (५) ते omitted in B³. (६) B²I²Bⁿ, -ष्मवृद्धिवृत्तिरिति B³. (७) B³ B²I², व्याख्यात Bⁿ. (८) B³I²Bⁿ, पदांतादिषु पदे B², पदांतादिषु पदेषु Reg. (९) B³B²Bⁿ, पदांतेषु भवति I². (१०) B³B² Bⁿ, पदादिषु भवति I².

परा वीरास एतन (ऋ० ५ । ६१ । ४) । पदे दृष्टेष्विति किम् । ता अस्य पृशनायुवः (ऋ० १ । ८४ । ११) । तस्मा अरं गमाम वः (ऋ० १० । ९ । ३) । अत्र पद आकार[1]स्यादृष्टत्वात्स्वरसंधिर्न भवति । वचनादिति किम् । अग्निमीळे पुरोहितम् (ऋ० १ । १ । १) । अत्र मकारस्य पदान्तीयस्य वचनमन्तरेण न कश्चिद्विकारः ॥

पदं पदान्तादिवदेकवर्णं प्रश्लिष्टमपि ॥ ६ ॥

एको वर्णोऽस्येत्येकवर्णम । एकवर्णं यत्पदं तत्पदान्तवत्[2] पदादिवच्च कार्यं लभते । यद्यपि प्रश्लिष्टं भवति । इन्द्रेहि मत्स्यन्धसः (ऋ० १ । ९ । १) । उद्धेति सुभगः (ऋ० ७ । ६३ । १) ॥

आनुपूर्व्येण संधीन् ॥ ७ ॥

पदान्तान्पदादिभिः संदधदेति यत्सा कालाव्यवायेन (२ । २) इत्यत्र पदपाठक्रमानुपूर्व्येण संधय उक्ताः सामान्यतः । अथेदानीं[3] प्रश्लिष्टान्संधीनाह । पदानुपूर्व्येण प्रश्लिष्टान्संधीन्कुर्यात् । तद्यथा । इन्द्र । आ । इहि । मत्सि । अन्धसः । (ऋ० प० १ । ९ । १) । इन्द्रशब्दस्य त्वाकारेण सह संधौ कृत इन्द्रा इति भवति । तत इहि अनेन सह संधौ इन्द्रेहि इति[4] भवति ।

ननु—पदान्तान्पदादिभिः संदधदेति—इत्यनेनाप्येतदेव प्राप्नोतीत्यथ किमर्थोऽयं योगः । शृणु । पदं[5] पदान्तादिवदेकवर्णम् (२ । ६) इत्यनेन सूत्रेण पदान्तवत्कार्यं लभत इत्येतत्प्रथममुक्त्वा पश्चात्पदादिवदित्युक्तम् । अतः प्रश्लिष्टस्य पदस्य पूर्वमन्तकार्याणि

---

(१) अकार- B^3. (२) तत्पदंतावत् (instead of तत्पदान्तवत्) B^3. (३) Reg.; सामान्यतोथेदानीं B^2I^2; सामान्यतोप्येदानीं B^3; सामान्यतोऽपीदानीं B^n. (४) B^2, इति omitted in $B^3I^2B^n$. (५) पदं omitted in B^2.

प्रवर्तन्ते। पश्चात् पदादिकार्याणि। तथा चानिष्टं रूपं सिध्यति। अतस्तदपवादार्थमाह। अत्रापि पदानुपूर्व्येण संधयो भवन्तीति॥

एष स्य स च स्वराश्च पूर्वं
भवन्ति व्यञ्जनमुत्तरं यदेभ्यः।
तेऽन्वक्षरसंधयोऽनुलोमाः॥ ८॥

चतुःप्रकाराः संधयो भवन्ति। तद्यथा। द्वयोः स्वरयोः। द्वयोर्व्यञ्जनयोः। व्यञ्जनस्वरयोः। स्वरव्यञ्जनयोरिति। तत्र स्वरव्यञ्जनसंधिमाह।

एषः स्यः सः एतानि च पदानि यदा पूर्वाणि भवन्ति। स्वराश्च स्वरान्तानि च यदा पूर्वाणि पदानि भवन्ति। व्यञ्जनं च यदोत्तरमेतेभ्यो भवति। तदा तेऽनुलोमा अन्वक्षरसंधय इत्येवंसंज्ञा वेदितव्याः। एषः। एष देवो अमर्त्यः (ऋ० ९। ३। १)। स्यः। उत स्य वाजी क्षिपणिम्[1] (ऋ० ४। ४०। ४)। सः। स सुतः पीतये वृषा (ऋ० ९। ३७। १)। स्वराः पूर्वे। न निमिषति सुरणः (ऋ० ३। २९। १४)।

एष स्य स च स्वराश्चेति द्विश्चकारकरणं तुल्ययोगनिवृत्त्यर्थम्। तेनैतद्भवति। प्रतिलोमास्तु विपर्यये त एव (२। ९) इत्यत्र एष स्य स इत्येते[2] न गृह्यन्ते। यदि हि गृह्येरन्—गमत्स गोमति (ऋ० ७। ३२। १०) इत्यत्र—तत्र[3] प्रथमास्तृतीयभावम् (२। १०) इति तकारस्य दकारः स्यात्। द्विश्चकारकरणात्त्वयं दोषो न भवति॥

---

(१) B²I², Reg.; क्षिपणिं तुरण्यति B³Bⁿ. (२) इत्येते हि B². (३) तत्र omitted in B².

प्रतिलोमास्तु विपर्यये त एव ॥ ९ ॥

त एवान्वक्षरसंधयः प्रतिलोमोपपदा[1] भवन्ति यदा स्वरव्यञ्जनविपर्ययो भवति । पूर्वेषु संधिषु स्वराः पूर्वे व्यञ्जनान्युत्तराणि । इह तु व्यञ्जनानि पूर्वाणि स्वरा उत्तर[2] इत्यर्थः । तमिन्द्रं दानमीमहे (ऋ० ८ । ४६ । ६) ॥

तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु नियन्ति ॥ १० ॥

तत्र[3] तेषु प्रतिलोमेष्वन्वक्षरसंधिषु प्रथमाः स्पर्शाः पदान्तीयास्तृतीयभावं गच्छन्ति । अर्वागा वर्तया हरी (ऋ० ४ । ३२ । १५) । हव्यवाळग्निरजरः पिता नः (ऋ० ५ । ४ । २) । यदङ्ग दाशुषे त्वम् (ऋ० १ । १ । ६) । इन्द्रस्य त्रिष्टुबिह भागः[4] (ऋ० १० । १३० । ५) ॥

अथेतरेषु । ऊष्मा परिलुप्यते त्रयाणां स्वरवर्जम् ॥ ११ ॥

अथेतरे[5]ष्वनुलोमेष्वन्वक्षरसंधिषु । ऊष्मा विसर्जनीयो लुप्यते । त्रयाणां पदानामेष स्य स इत्येतेषाम् । स च स्वरवर्जं[6] स्वरं वर्जयित्वा[7] । सहोपधोऽरिफितः (१ । ६७) इत्यादिना विसर्जनीयलोपे सति स्वरस्य लोपः प्राप्नोति । अतः स्वरवर्जमित्युच्यते । एष कविरभिष्टुतः (ऋ० ९ । २७ । १) । उत स्य वाजी (ऋ० ४ । ४० । ४) । स वाज्यर्वा (ऋ० ४ । ३६ । ६) ॥

---

(१) B³I², Reg.; प्रतिलोमा यदा B²Bⁿ. (२) उत्तरत्त B². (३) तत्र के I². (४) B², Reg.; भागः omitted in B³I²Bⁿ. (५) B³I² Bⁿ, इतरे- B². (६) B², स्वरवर्जं omitted in B³I²Bⁿ. (७) वसर्जयित्वा (instead of वर्जयित्वा) I².

न तु यत्र तानि पद्याः ॥ १२ ॥

एषः स्यः सः एतेषां मध्येऽन्यतमं[1] यत्र यस्मिन्पदे सावग्रहं भवति तत्र विसर्जनीय[2]लोपो न भवति। तद्यथा—पशुषो न वाजान् (ऋ० ५। ४१। १) इत्याद्युदाहरणं द्रष्टव्यम्[3] ॥

पुरएता तितउना प्रउगं नमउक्तिभिः।
अन्तःपदं विवृत्तयः ॥ १३ ॥

स्वरान्तरं तु विवृत्तिः (२। ३) इत्युक्तम्। अतः[4] पदमध्ये या विवृत्तयस्ताः प्रतिपादयत्य[5]वग्रहसंदेहव्युदासार्थम्। पुरएता तितउना प्रउगं नमउक्तिभिः एता अन्तःपदं पदस्य मध्ये विवृत्तयः। पुरएता। इन्द्र प्र णः पुरएतेव (ऋ० ६। ४७। ७)। ननु—पुरएतासि महतो धनस्य (ऋ० ९। ९७। २९) इत्येतत्कस्मान्नोदाहरणं भवति। पदवच्च पद्यान् (१। १। ६१) इति परिभाषितत्वात्पदसंधिरेवायम्[6]। तितउना। सक्तुमिव तितउना[7] (ऋ० १०। ७१। २)। प्रउगम्। छन्दः किमासीत्प्रउगम् (ऋ० १०। १३०। ३)। नमउक्तिभिः। दाश्नोति नमउक्तिभिः (ऋ० ८। ४। ६) ॥

---

(१) -तमं M.M.; -तमद् B³I²B²; -तमत् Bⁿ. (२) B³ B²Bⁿ; विसर्जनीयस्य I², M.M. (३) पाठांतरं। न तु यत्र तानि पद्यात्। न खलु लुप्यते यत्र तानि पदानि पद्यात्परभूतानि भवंति। यज्ञायत्ते वा पशुषो न वाजान्—a marginal note on this सूत्र in B³, apparently in the same hand (cp. also Bⁿ). (४) B³I²B², अन्तः Bⁿ. (५) प्रतिपादयतित्य- I². (६) B³I²B² Bⁿ, M.M.; पदसंधिरयं Reg. (७) B²I², Reg.; तितउना पुनन्तः B³Bⁿ.

अतोऽन्याः पदसंधिषु ॥ १४ ॥

अतो विवृत्तिचतुष्टयाद्या[1] अन्या विवृत्तयस्ताः पदसंधिषु वेदितव्याः। श्रुतऋषिमुग्रमभिमातिषाहम् (ऋ० १० । ४७ । ३) । कक्षीवन्तं य औशिजः (ऋ० १ । १८ । १) ॥

इत उत्तरं स्वरसंधयः प्राक्प्रकृतिभावात्—

समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम् ॥ १५ ॥

अष्टौ समानाक्षराण्यादितः (१ । १) इत्युक्तम्। समानाक्षरे समानस्थाने[2] दीर्घमेकमुभे अपि[3] स्वरमापद्येते। अश्वा जनि प्रचेतसः (ऋ० ६ । ७५ । १३)। सद्यो जज्ञानो वि हीमिद्धः[4] (ऋ० १० । ४५ । ४)। क्षीरं सर्पिर्मधूदकम् (ऋ० ९ । ६७ । ३२)। समानाक्षर इति किम्। त एते वाचमभिपद्य पापया (ऋ० १० । ७१ । ९)। सस्थानग्रहणं किम्। द्रुवन्नः सर्पिरासुतिः (ऋ० २ । ७ । ६)॥

इकारोदय एकारमकारः सोदयः ॥ १६ ॥

इकार[5]परोऽकार एकारमापद्यते। सोदयः सह परेणेकारेण। एन्द्र सानसिं रयिम् (ऋ० १ । ८ । १)। एमेनं सृजता सुते (ऋ० १ । ९ । २)॥

तथा। उकारोदय ओकारम् ॥ १७ ॥

यथेकारोदयोऽकारः[6] सोदय एकमेव[7] वर्णमापद्यते एवमवर्ण उकारोदय[8] ओकारमापद्यते। एतायामोप गव्यन्त इन्द्रम्। (ऋ० १ । ३३ । १)॥

---

(१) -ष्टयाद्वा B^3. (२) समानस्थाने च B^n, सामानस्थाने च I^2, सस्थाने $B^3 B^2$. (३) $B^2 I^2$, अपि omitted in $B^3 B^n$. (४) $B^3 I^2 B^n$, Reg.;-द्धो अख्यत् B^2. (५) इकारः B^2. (६) -दय अकारः $I^2 B^n$, -दय अकार B^3, -दये अकारः B^2. (७) $B^3 B^n$, एकं ए I^2, एकं B^2. (८) $B^3 I^2 B^n$, -दये B^2.

परेष्वैकारमोजयोः ॥ १८ ॥

परेषु संध्यक्षरेष्वैकारमापद्यतेऽकारः सोदयः। किमविशेषेण। नेत्याह[1]। ओजयोः प्रथमतृतीययोः ए ऐ इत्येतयोः। आ एनम्। ऐनं देवासः (ऋ० १ । १२३ । १)। स्मदा परैद्य दभ्रचेताः (ऋ० १० । ६१ । ८) ॥

औकारं युग्मयोः ॥ १९ ॥

द्वितीयचतुर्थयोरोकारौकारयोर[2]कार औकारमापद्यते सोदयः[3]। यत्रौषधीः समग्मत (ऋ० १० । ९७ । ६)। तं यज्ञं बर्हिषि प्रौक्षन् (ऋ० १० । ९० । ७) ॥

एते प्रश्लिष्टा नाम संधयः ॥ २० ॥

प्रश्लिष्टसंज्ञाः[4] संधयो वेदितव्या एते—समानाक्षरे सस्थाने (२ । १५) इत्यत आरभ्य। प्रयोजनम्—प्रश्लिष्टादभिनिहितात् (१३ । २६) इति ॥

समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम् ॥ २१ ॥

समानाक्षरमुक्तलक्षणमन्तःस्थामापद्यते। स्वां स्थानेन[5]। अकण्ठ्यं कण्ठ्यरहितमकाराकाराभ्यां[6] विना। स्वरोदयं स्वरपरम्। यथा[7]। अभ्यार्षेयं जमदग्निवन्नः (ऋ० ९ । ९७ । ५१)। अधीन्न्वत्र सप्ततिं च सप्त च (ऋ० १० । ९३ । १५)।

---

(१) I²Bⁿ, किमविशेषेणे नेत्याह B³, किमविशेषेण नेत्यत आह B². (२) ओकारौकारयोः (instead of ओकारौकारयोर्) B², ओकार-औकारयोः B³, omitted in I², ओ औ इत्येतयोः Bⁿ. (३) B³Bⁿ, अकार औकारमापद्यते सोदयः omitted in B² I². (४) B³B²Bⁿ, एते प्रश्लिष्टा नाम संज्ञाः I². (५) B³Bⁿ, स्वास्थानेन I², स्वस्थानेन B². (६) B²I², अकाराभ्यां (instead of अकाराकाराभ्यां) B³Bⁿ. (७) B², तथा B³I²Bⁿ.

अकण्ठ्यग्रहणं यथासंख्य[1]निवृत्त्यर्थम्। यथासंख्यं हि सम्भवति। चतस्रोऽन्तःस्थाश्चत्वारश्च[2] स्वराः—ह्रस्वदीर्घौ सवर्णौ (१।५५) इति वचनात्॥

न समानाक्षरे स्वे स्वे॥ २२॥

न भवति क्षैप्रः समानाक्षरे स्वे स्वे। ननु तत्रोक्तः प्रश्लिष्टः संधिः। सत्यमुक्तः। यदि नामैवं मन्यते। मात्रिके[3] प्रश्लिष्टश्चरितार्थः। यथा। दिवीव सूर्यं दृशे (ऋ० १०।६०।५)। सूपस्थाभिर्न धेनुभिः (ऋ० ९।६१।२१)। द्विमात्रिकेषु[4] क्षैप्रस्या[5]वकाशः। तन्मा[6] भूदिति न समानाक्षर इत्युक्तम्॥

ते क्षैप्राः प्राकृतोदयाः॥ २३॥

ते क्षैप्राः संधयः प्राकृतोदयाः[7] प्राकृतस्वरोदयाः। प्राकृतग्रहणं सोदयाधिकारनिवृत्त्यर्थम्। क्षैप्रसंज्ञायाः प्रयोजनम्—क्षैप्राभिनिहितेषु च (३।१३)॥

विसर्जनीयोऽरिफितो दीर्घपूर्वः स्वरोदयः।
आकारम्॥ २४॥

विसर्जनीयोऽरिफितो दीर्घपूर्वः सहोपधः[8] स्वरोदयः स्वरपर आकारमापद्यते। यथा। या ओषधीः सोमराज्ञीः (ऋ० १०। ९७।१८)। अरिफित इति किम्। वारिन्मंडूक इच्छति

---

(१) $B^3I^2B^n$, यथासंख्या B^2. (२) B^2B^n, -स्थाश्चतस्रश्च I^2, -स्थाश्च चत्वार B^3. (३) $B^3I^2B^n$, नाम एवमन्यतो मात्रिके (instead of नामैवं मन्यते। मात्रिके) B^2. (४) B^2B^n, द्विमात्रिकेषु तु B^3I^2. (५) क्षैप्रस्था- I^2. (६) तन्मऽ I^2. (७) $B^3I^2B^n$, ते क्षैप्राः संधयः प्राकृतोदयाः omitted in B^2. (८) $B^3I^2B^n$, सहोपधः omitted in B^2.

(ऋ० ९ । ११२ । ४) । स्वरोदयग्रहणं समानाक्षराधिकारनिवृत्त्यर्थम्[1] ॥

उत्तमौ च द्वौ स्वरौ ॥ २५ ॥

ऐ औ आकारमापद्येते स्वरोदयौ। सूर्याय पन्थामन्वेतवा उ (ऋ० १ । २४ । ८)। उभा उ नूनम् (ऋ० १० । १०६ । १) ॥

ताः पदवृत्तयः ॥ २६ ॥

ता एतास्तिस्रः पदवृत्तय उच्यन्ते। अत्र याभिः संज्ञाभिः शास्त्रकृद्व्यवहरति तावत्यः स्व[2]व्यवहारार्थाः। याभिर्व्यवहारो नास्ति तासां ज्ञाने धर्मः फलम्[3] ॥

ह्रस्वपूर्वस्तु सोऽकारम् ॥ २७ ॥

ह्रस्वपूर्वस्तु सोऽरिफितो विसर्जनीयः सोपधः स्वरोदयोऽकारमापद्यते। य इन्द्र सोमपातमः (ऋ० ८ । १२ । १)। अरिफित इत्येव[4]। अन्तरिच्छन्ति तं जने (ऋ० ८ । ७२ । ३) ॥

पूर्वौ चोपोत्तमात्स्वरौ ॥ २८ ॥

पूर्वौ चोपोत्तमात्। उत्तमात्[5] पूर्वः स्वर ऐकारस्[6] तस्मात्पूर्वौ एकारौकारौ[7] स्वरपरावकारमापद्येते। अग्न इन्द्र वरुण मित्र देवाः (ऋ० ५ । ४६ । २)। वाय उक्थेभिर्जरन्ते (ऋ० १ । २ । २) ॥

---

(१) B³B²Bⁿ, स्वरोदयग्रहणं—निवृत्त्यर्थम् omitted in I². (२) B³I²Bⁿ, तावत्यस्तद् (instead of तावत्यः स्व-) B². (३) BⁿB³ (B³ has पलीम् instead of फलम्); इतरासां ज्ञानं धर्मार्थं (instead of याभिर्व्यवहारो—फलम्) B², Reg; omitted in I². (४) B²I², इति किं (instead of इत्येव) B³Bⁿ. (५) B³I²Bⁿ, उत्तम औकारस्तस्मात् B². (६) एकारस् B³, ऐकार उपोत्तमस् B². (७) B², एकारओकारौ B³BⁿI².

त उद्ग्राहाः ॥ २९ ॥

त उद्ग्राहसंज्ञाः संधयो वेदितव्याः । उद्ग्राहाणां पूर्वरूपाण्यकारे (२ । ३३) इति प्रयोजनम् ॥

दीर्घपरा उद्ग्राहपदवृत्तयः ॥ ३० ॥

तथा त एवोद्ग्राहा दीर्घपराः[1] सन्त उद्ग्राह[2]पदवृत्तयो भवन्ति । क ईषते तुज्यते (ऋ० १ । ८४ । १७) । सहस्रसाव्ये प्र तिरन्त आयुः (ऋ० ३ । ५३ । ७)[3] ॥

ओष्ठ्ययोन्योर्भुग्नमनोष्ठ्ये
वकारोऽन्तरागमः ॥ ३१ ॥

ओष्ठ्यौ ओकारौकारौ[4] योनी ययोस्तावोष्ठ्ययोनी अकाराकारौ तयोरनोष्ठ्ये स्वरे परभूते वकारोऽत्रान्तरागमो भवति । यत ओकारौकारयोः स्थान[5]संभूतावतः कारणादकाराकारावोष्ठ्ययोनी । तेन वकारागमः । भुग्नं[6] नाम चैतत्संधानं भवति । वायवा याहि दर्शत (ऋ० १ । २ । १) । ऋतेन मित्रावरुणा वृतावृधावृतस्पृशा (ऋ० १ । २ । ८) । अनोष्ठ्य इति किम् । वाय उक्थेभिर्जरन्ते (ऋ० १ । २ । २) । उभा उपांशु प्रथमा पिबाव (ऋ० १० । ८३ । ७) ॥

ऋकार उदये कण्ठ्यावकारं तदुद्ग्राहवत् ॥ ३२ ॥

कण्ठ्यौ अकाराकारौ[7] ऋकार उदयेऽकारमापद्येते[8] । तत्संधानमुद्ग्राहवत्संज्ञं वेदितव्यम् । प्र ऋभुभ्यो दूतमिव (ऋ० ४ । ३३ । १) । आप्रुषायन्मधुन ऋतस्य (ऋ० १० । ६८ । ४) ॥

---

(१) दीर्घपरः B^3. (२) B^2, उद्ग्राह- omittted in B^{3}I^{2}B^n. (३) B^2 I^2; अग्राणामिन्द्र ओजिष्ठः (-ष्ठाः B^n) added in B^{3}B^n. (४) B^{2}I^2, ओकारऔकारौ B^{3}B^n. (५) B^{3}I^{2}B^n, स्थाने B^2. (६) अधिकाकारात् । भुग्नं (instead of भुग्नं) I^2. (७) B^{3}B^{2}B^n, अकारौ I^2. (८) B^{2}I^2, आपद्यते B^{3}B^n.

उद्ग्राहाणां पूर्वरूपाण्यकारे
प्रकृत्या द्वे ओ भवत्येकमाद्यम् ।
प्राच्यपञ्चालपदवृत्तयस्ताः
पञ्चालानामोष्ठ्यपूर्वा भवन्ति ॥ ३३ ॥

उद्ग्राहाणां संधीनां यानि पूर्वरूपाणि[1] । ये पूर्वरूपा अवयवा ह्रस्वपूर्वो विसर्जनीय एकार ओकारश्च । तान्यकारे प्रत्यये । प्रकृत्या द्वे भवतः । ओ भवत्येकमाद्यम् । ताश्च प्राच्यपदवृत्तयः पञ्चालपदवृत्तयश्चोच्यन्ते । एवं सामान्यत उक्त्वा अथेदानीं विशेषमाह । पञ्चालानामोष्ठ्यपूर्वा भवन्ति । इतरास्तु प्राच्यपदवृत्तयः । पुरोळाशं यो अस्मै (ऋ० ८ । ३१ । २) । प्रो अयासीदिन्दुरिन्द्रस्य (ऋ० ९ । ८६ । १६)[2] । ते अग्रेपा ऋभवो मन्दसानाः (ऋ०४।३४।१०)॥

अथाभिनिहितः संधिरेतैः प्राकृतवैकृतैः ।
एकीभवति पादादिरकारस्तेऽत्र संधिजाः ॥३४॥

अथशब्दो महाधिकारद्योतनार्थः। अभिनिहितसंज्ञकः[3] संधिः । वक्ष्यत इति वाक्यशेषः। स चैतैः प्राकृतवैकृतैरधस्तनैः । एकारौकाराभ्यां प्राकृताभ्यां ह्रस्वपूर्वेण च ओकारभूतेन वैकृतेन । एकीभवति पादादिरकारः । ते चात्र त्रयः संधौ दृश्यन्ते । सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने (ऋ० १ । ९४ । ११)। दधासि रत्नं द्रविणं च दाशुषेऽग्ने (ऋ० १ । ९४ । १४)। अत्रा चिन्नो मधो पितोऽरम् (ऋ० १ । १८७ । ७)। पादादिरिति किम् । चिकित्वांसो अचेतसं नयन्ति

---

(१) B³I²Bⁿ, पूर्वाणि B². (२) प्रो अयासीदिन्दुरिन्द्रस्य I² (cp. also Reg., M.M.), प्रो अयासीदिन्दुरिन्द्रस्य । अध्वर्यो अद्रिभिः सुतम् Bⁿ, अध्वर्यो अद्रिभिः सुतम् । प्रो अयासीदिन्दुरिन्द्रस्य B², अध्वर्यो अद्रिभिः सुतम् Bⁿ. (३) B³Bⁿ, Reg; अभिनिहित- (instead of अभिनिहितसंज्ञकः) B²I².

(ऋ० ७।६०।७)। आरे अस्मे च शृण्वते (ऋ० १।७४।१)[1]। अभिनिहितसंज्ञायाः प्रयोजनम्—चैप्राभिनिहितेषु च (१।३)इति[2]॥

अन्तःपादमकाराच्चेत्संहितायां लघोर्लघु।
यकाराद्यक्षरं परं वकाराद्यपि वा भवेत्॥ ३५॥

अन्तःपादं पादस्य मध्ये। अधिकारवचनम्। अकाराच्चेत्। अभिनिधीयमानस्याकारस्य[3] विशेषणानि। अकाराल्लघोः[4] परमक्षरं लघु यकारादि वा वकारादि वा यदि भवेत्संहितायां संहितापाठे[5]। अथ सोऽकारोऽभिनिधीयते। प्राकृतवैकृतैरेकीभवतीत्यर्थः।

यकारादेः। यमैच्छाम मनसा सोऽय[6]मागात् (ऋ० १०। ५३।१) वकारादेः। तं पृच्छन्तोऽवरासः (ऋ० ६।२१।६)। यस्ते मन्योऽविधद्वज्र[7] (ऋ० १०।८३।१)। तेऽवदन्प्रथमाः (ऋ० १०।१०९।१)[8]। लघोरिति किम्। व्रतैः सीक्षन्तो अव्रतम्

---

(१) आरे—शृण्वते given before चिकित्वांसो—नयन्ति in B^2; after शृण्वते B^3 B^n add अध्वर्यो अद्रिभिः सुतम् (supplied on the margin in a different hand in B^3). (२) From पादादिरिति किम् to इति omitted in I^2. (३) $B^3 I^2 B^n$, -मानाकारस्य B^2. (४) लघ्वोः B^3. (५) $B^2 B^n$, Reg; -भावे (instead of -पाठे) $B^3 I^2$ (B^3 gives पाठे also on the margin). (६) $B^3 I^2$, Reg; सोऽय- B^2, सोऽय- B^n. (७) B^n; this quotation is in a different hand given on the margin in B^3, either to be read instead of or to be inserted after तं पृच्छन्तोऽवरासः; omitted in I^2; given after तेऽवदन्प्रथमाः in B^2. (८) After प्रथमाः। B^2 reads अन्तःपादग्रहणं पादाद्यधिकारनिवृत्त्यर्थं। संहिताकाले पुनः संहिताग्रहणं किमर्थं। अस्ति सोमो अयं सुतः। माशिवासो अव क्रमुः। इत्येवमादिषु संहितायां गुरुत्वात्। यकारवकारादेः अक्षरस्य पदे लघावपि तस्मात्प्रकृतिभावार्थं।

(ऋ० ६ । १४ । ३) । लघ्विति किम् । द्रुहो निदो मित्रमहो अवद्यात् (ऋ० ४ । ४ । १५) । यकाराद्यक्षरं परं वकाराद्यपि वेति[1] किम् । ऐनं[2] देवासो अमृतासो अस्थुः (ऋ० १ । १२३ । १) । वज्रेण धृष्णो अप ता नुदस्व (ऋ० ६ । २१ । ७) । यथा शार्याते अपिवः[3] (ऋ० ३ । ५१ । ७) ॥

अन्याद्यपि तथायुक्तमावोऽन्तोपहितात्स्वतः ॥३६॥

यकारादि वकारादि वा यदक्षरमुक्तं तदु[4]च्यते । यद्यप्यन्यव्यञ्जनादि तदक्षरं भवति । तथा तेनैव प्रकारेण युक्तं भवति । संहितायां लघोर्लघु भवतीत्यर्थः । अथ तदा आवोऽन्तोपहितात्स्वतः । अकारस्याभिनिधानं[5] भवति । आवः एवमन्तो यस्य पदस्य तदावोऽन्तम् । तेनोपहित आवोऽन्तोपहितः । तस्मादावोऽन्तोपहितात्स्वतः । समत्र गावोऽभितोऽनवन्त (ऋ० ५ । ३० । १०) । तथायुक्तमिति किम् । आ गावो अग्मन्[6] (ऋ० ६ । २८ । १) । आवोऽन्तोपहितात्स्वत इति किम् । ऐनं[7] देवासो अमृतासो अस्थुः[8] (ऋ० १ । १२३ । १) ॥

अयेऽयोऽवेऽव इत्यन्तैरकारः सर्वथा भवन् ॥ ३७ ॥

अये अयः अवे अवः एवमन्तैः पदैरुपहितोऽकारः सर्वथा सर्वप्रकारोऽपि भवन्नभिनिधीयते[9] । सर्वथाग्रहणं गुरुलघ्वर्थम् । अये ।

---

(१) B^3I^2, -द्यपि वा भवेदिति B^2, -द्यपीति B^n. (२) एनं B^n. (३) $B^3B^2B^n$, यथा शार्याते अपिबः omitted in I^2. (४) $B^2I^2B^n$; उक्त तद् omitted in B^3. (५) $B^3I^2B^n$; -संधानं (instead of -निधानं) B^2, Reg. (६) $B^3I^2B^n$, Reg; अग्मन्नुत B^2. (७) एनं B^n. (८) After अस्थुः । B^2 adds पादमध्ये इति किं । इंद्र जामय उत ये जामयोर्वाचीनासः । (९) भवन्नभिनिधीयते B^3, सन्नभिनिधीयते B^n, भवन् B^2I^2.

अजीतयेऽहतये पवस्व (ऋ० ९।९६।४)। अय:। ता अञ्जयो-ऽरुणायो न सस्रुः (ऋ० १०। ९५। ६)। अवे[1]। युवं श्वेतं पेदवेऽश्विनाश्वम् (ऋ० १०। ३९। १०)। अव:। पुरूरवोऽनु ते केतमायम् (ऋ० १०। ९५। ५)। वदन्तग्रहणादिह न भवति—विपा वराहमयोअग्रया हन् (ऋ० १०। ९९। ६) तद्देवानामवो अद्या वृणीमहे (ऋ०१०। ३६। २)। पादमध्य इति किम्। इन्द्र जामय उत येऽजामयोऽर्वाचीनासः (ऋ० ६। २५। ३)। अत्र च प्रकारान्तरेण जातत्वात्[2]।

व इत्येतेन चा न प्र क चित्रः सवितैव कः।
पदैरुपहितैनैतैः॥ ३८॥

आ[3] न प्र क चित्रः सविता एव कः एतैः पदैरुपहितेन वः इत्ये-तेन पदेनोपहितोऽकारो[4]ऽभिनिधीयते। आ। आ वोऽहं समितिं ददे (ऋ० १०। १६६। ४)। न। न वोऽश्वाः श्रथयन्ताह सिस्रतः (ऋ० ५। ५४। १०)। प्र। प्र वोऽच्छा रिरिचे देवयुष्पदम् (ऋ० १०। ३२। ५)। क। क वोऽश्वाः का[5]भीशवः (ऋ० ५। ६१। २)। चित्रः। चित्रो वोऽस्तु यामः (ऋ० १। १७२। १)। सविता। तत्सविता वोऽमृतत्वमासुवत् (ऋ० १। ११०। ३)।

---

(१) अवे पादमध्ये इति कं इंद्रजामय उत येऽजामयोऽर्वाचीनासः। इति प्रत्युदाहरणं द्रष्टव्यं। अत्र च प्रकारांतरेण जातत्वात्। (instead of अवे) I^2. (२) The passage from पादमध्य इति किम् to जातत्वात् is given in B^3; B^2 also reads it here but after marking the end of the Commentary of this सूत्र by ॥ १४ ॥ १ ॥ ५। ३ ।; omitted in I^2B^n. (३) B^3B^n, च इत्येतेन पदेन। आ। B^2, व इति न पदेन आ I^2. (४) B^3B^n, पदादिरकारो (instead of वः इत्येतेन पदेनोपहितोऽकारो) B^2I^2. (५) B^nI^2, क्वा२ B^3B^2.

एव। अत्रैव वोऽपि नह्यामि (ऋ० १० । १६६ । ३) । कः। को वोऽन्तर्मरुत ऋष्टिविद्युतः (ऋ० १ । १६८ । ५)। एतैः पदैरिति किम्। अच्छा वो अग्निमवसे (ऋ० ५ । २५ । १)[1] ॥

सर्वैरेवोदयाः परे ॥ ३९ ॥

सर्वैरेव प्राकृतवैकृतैरेकारौकारैरुपहिताः सन्तः परे पदादिभूता अभिनिधीयन्ते ॥

न ज्ञायन्ते कतमे त[2] इत्यत आह—

अदादवर्त्रोऽजनयन्ताव्यत्या
अभेदयोऽपाष्टिरवन्त्ववीरता।
अमुमुक्तममतयेऽनशामहा
अव त्वचोऽवीरतेऽवांस्यवोऽरथाः ॥ ४० ॥

अदात् अवर्त्रः अजनयन्त अव्यत्यै अभेत् अयोऽपाष्टिः अवन्तु अवीरता अमुमुक्तम् अमतये अनशामहै अव त्वचः अवीरते अवांसि अवः अरथाः[3] ।

अदात्। स नः सनिता सनये स नोऽदात् (ऋ० १ । ३०।१६)। अवर्त्रः। अमर्त्योऽवर्त्रे ओषधीषु (ऋ० ६ । १२ । ३)। अजनयन्त। यं देवासोऽजनयन्ताग्निम् (ऋ० १० । ८८ । ९)। अव्यत्यै। उत स्म मेऽव्यत्यै पृणासि (ऋ० १०। ९५।५)। अभेत्। वि तिग्मेन वृषभेणा पुरोऽभेत् (ऋ० १ । ३३। १३)। अयोऽपाष्टिः। श्येनोऽयोऽपाष्टिर्हन्ति दस्यून् (ऋ० १० । ९९ । ८)। पदादौ[4] लक्षणतोऽभिनिहितः।

---

(१) B^n adds here पादमध्य इति किं । उत येजामयोर्वाचीनासः। अत्र च प्रकारान्तरेण जातत्वात् ॥ (२) कतमे ते B^3I^2, कथमेते B^n, कतम B^2. (३) After अरथाः B^3 and B^n add इति। एतेषां पदानां सर्वैः (-वैं B^3) पदैः उपहितः अकारः उदयः (-ये B^3) सन्न- (सन्नअ- B^n) भिनिधीयते, omitted in B^2I^2. (४) $B^2I^2B^n$, पादादौ B^3.

पदमध्ये निपातनात्। अवन्तु। अधि वन्तु तेऽवन्त्वस्मान् (ऋ० १०। १५। ५)। अवीरता। माशेपसोऽवीरता परि त्वा (ऋ० ७। १। ११)। अमुमुक्तम्। अत्रिं न महस्तमसोऽमुमुक्तम् (ऋ० ६। ५०। १०)। अमतये। मा नो अग्नेऽमतये (ऋ० ३। १६। ५)। अनशामहै। येन वस्योऽनशामहै (ऋ० ८। २७। २२)। अव त्वचः। शिरोऽव त्वचो भरः (ऋ० १०। १७१। २)। त्वच इति किम्। माशिवासो अव क्रमुः (ऋ० ७। ३२। २७)। अवीरते। मा नो अग्नेऽवीरते परा दाः (ऋ० ७। १। १९)। अवांसि। आ दैव्या[1] वृणीमहेऽवांसि (ऋ० ७। ९७। २)। अवः। आ तेऽवो वरेण्यम् (ऋ० ५। ३५। ३)। आ नोऽवोभिर्मरुतो यान्त्वच्छ (ऋ० १। १६७। २)। द्वे उदाहरणे। अरथाः[2]। अनश्वासो ये पवयोऽरथाः (ऋ० ५। ३१। ५)[3] ॥

वासोवायोऽभिभुवे कवष्यः
संक्रन्दनो धीजवनः स्वधावः।
उत्सादत ऋतावः सगर्भ्यो
हिरण्यशृङ्ग इति चोपधाभिः ॥ ४१ ॥

वासोवायः अभिभुवे कवष्यः संक्रन्दनः धीजवनः स्वधावः उत्सादतः ऋतावः सगर्भ्यः[4] हिरण्यशृङ्गः इति च[5]। एवंरूपाभिश्चोपधा[6]-

(१) देव्या I[2]. (२)अरश्मानो येऽरथा अयुक्ताः। अपादो यत्र युज्यासोऽरथाः। Added in B[2]. (३) I[2] (also cp. Reg. and M.M.); अपादो यत्र युज्यासोरथाः।(On the margin in a different hand, to be supplied either instead of or after अनश्वासो— -थाः)। अरश्मानो येरथाः। Added in B[3]; अरश्मानो येऽरथाः added in B[n]. (४) B[3]B[2]B[n], the words from वासोवायः to सगर्भ्यः are omitted in I[2]. (५) च omitted in B[2]. (६) B[3]I[2]B[2]B[n], -रूपाभिरुपधा- Reg.

भिरुपहितोऽकारोऽभिनिधीयते। वासोवायः। वासोवायोऽवीनाम् (ऋ० १०।२६।६)। अभिभुवे। अभिभुवेऽभिभङ्गाय (ऋ० २। २१।२)। कवष्यः। कवष्योऽकोष[1]धावनीः (तै०ब्रा०३।६।२।२)। संक्रन्दनः। संक्रन्दनोऽनिमिष एकवीरः (ऋ० १०।१०३।१)। धीजवनः। पूपेव धीजवनोऽसि सोम[2] (ऋ० ९। ८८। ३)। स्वधावः। रायस्पृधि स्वधावोऽस्ति हि ते (ऋ०१।३६।१२)। उत्सादतः। उत्सादतोऽङ्गादङ्गादवत्तानाम्[3] (वा० सं० २१।४३)। ऋतावः। सम्राळृतावो[4]ऽनु मा गृभाय (ऋ० २।२८।६)। सगर्भ्यः। सगर्भ्योऽनु सखा सयूथ्यः (ऐ० ब्रा० २।६।१२)। हिरण्यशृङ्गः। हिरण्यशृङ्गोऽयो अस्य पादाः (ऋ० १।१६३।९)॥

येऽरा रायेऽध मेऽधायि
नोऽहिरग्नेऽभिदासति।
जायमानोऽभवोऽग्नेऽयं
नृतोऽपोंऽहोऽतिपिप्रति ॥ ४२ ॥

येऽराः। रायेऽध। मेऽधायि। नोऽहिः। अग्नेऽभिदासति। जायमानोऽभवः। अग्नेऽयम्। नृतोऽपः। अंहोऽतिपिप्रति। एते च द्वैपदा यथागृहीतमभिनिधीयन्ते।

येऽराः। रथानां न येऽराः (ऋ० १०।७८।४)। रायेऽध। सत्रा रायेऽध ये पार्थिवासः (ऋ० ६।३६।१)। मेऽधायि। उप प्रागात्सुमन्मेऽधायि (ऋ० १।१६२।७)। नोऽहिः। उत

(१) -कोप- B^3B^n, Reg; -कौप- B^2; -कोश- I^2, M.M. (२) सोम B^3; सोमः B^n; omitted in B^2I^2, Reg. (३) B^2B^n, Reg; -वत्तांनां B^3. (४) From ऽस्ति हि ते to ऋतावो omitted in I^2, but उत्सादतोगादगात् supplied on the margin in a different hand.

नाऽहिर्बुध्न्यः शृणोतु (ऋ० ६ । ५० । १४)। अग्नेऽभिदासति। यो नो अग्नेऽभिदासति (ऋ० १ । ७९ । ११)। जायमानोऽभवः। जायमानोऽभवो महान् (ऋ० ९ । ५९ । ४)। अग्नेऽयम्। त्वयाग्नेऽयं[1] सुन्वन्यजमानस्य[2]। नृतोऽपः। तव त्यन्नर्यं नृतोऽप इन्द्र (ऋ० २ । २२ । ४)। अंहोऽतिपिप्रति। ये नो अंहोऽतिपिप्रति (ऋ० ७ । ६६ । ५)॥

जम्भयन्तोऽहिं मरुतोऽनुभर्त्री
यवसेऽविष्यन्वयुनेऽजनिष्ट।
वृत्रहत्येऽवीः समरेऽतमाना
मरुतोऽमदन्नभितोऽनवन्त ॥ ४३ ॥

जम्भयन्तोऽहिम्। मरुतोऽनुभर्त्री। यवसेऽविष्यन्। वयुनेऽजनिष्ट। वृत्रहत्येऽवीः। समरेऽतमानाः। मरुतोऽमदन्। अभितोऽनवन्त[3]। एते च[4] द्वैपदा यथागृहीतमभिनिधीयन्ते। जम्भयन्तोऽहिम्। जम्भयन्तोऽहिं वृकं रक्षांसि (ऋ० ७ । ३८ । ७)। मरुतोऽनुभर्त्री। एषा स्या वो मरुतोऽनुभर्त्री (ऋ० १ । ८८ । ६)। यवसेऽविष्यन्। प्रोथदश्वो न यवसेऽविष्यन् (ऋ० ७ । ३ । २)। वयुनेऽजनिष्ट। इळायास्पुत्रो वयुनेऽजनिष्ट (ऋ० ३ । २९ । ३)। वृत्रहत्येऽवीः। ताभिरू षु वृत्रहत्येऽवीर्नः (ऋ० ६ । २५ । १)। समरेऽतमानाः। न यं वयन्ति समरेऽतमानाः (ऋ० ६ । ९ । २)। मरुतोऽमदन्। स्वर्नृषाचो मरुतोऽमदन्ननु (ऋ० १ । ५२ । ९)। अभितोऽनवन्त। समत्र गावोऽभितोऽनवन्त (ऋ० ५ । ३० । १०)॥

---

(१) $B^3B^2I^2B^n$; अग्नेऽयम् M.M.(a). (२)-मानस्या न I^2. (३) जम्भयन्तोऽहिम् to अभितोऽनवन्त in the Commentary given in $B^3I^2B^2$, omitted in B^n. (४) B^2 I^2; च omitted in B^3B^n.

ब्रुवतेऽध्वँस्तवसेऽवाचि मेऽरपद्
दधिरेऽग्ना नहुषोऽस्मत्पुरोऽभिनत् ।
उप तेऽधां वहतेऽयं यमोऽदिति-
र्जनुषोऽया सुवितोऽनु श्रियोऽधित ॥४४॥

ब्रुवतेऽध्वन् । तवसेऽवाचि । मेऽरपत् । दधिरेऽग्ना । नहुषोऽस्मत् । पुरोऽभिनत् । उप तेऽधाम् । वहतेऽयम् । यमोऽदितिः । जनुषोऽया । सुवितोऽनु । श्रियोऽधित[1] । एते च द्वैपदा यथागृहीतमभिनिधीयन्ते ।

ब्रुवतेऽध्वन् । सं ह ब्रुवतेऽध्वन्ना (ऋ० १ । ३७ । १३) । तवसेऽवाचि । सत्यशुष्माय तवसेऽवाचि (ऋ० १ । ५१ । १५) । मेऽरपत् । उत मेऽरपद्युवतिः[2] (ऋ० ५ । ६१ । ९) । दधिरेऽग्ना । वैश्वानरे दधिरेऽग्ना वसूनि[3] (ऋ० १ । ५९ । ३) । नहुषोस्मत् । स नृतमो नहुषोऽस्मत्सुजातः (ऋ० १० । ९९ । ७) । पुरोऽभिनत् । पुरोऽभिनदर्हन्दस्युहत्ये (ऋ० १० । ९९ । ७) । उप तेऽधाम् । उप तेऽधां सहमानाम् (ऋ० १० । १४५ । ६) । वहतेऽयम् । वहतेऽयं मघवा सर्वसेनः (ऋ० ५ । ३० । ३) । यमोऽदितिः । नराशंसश्चतुरङ्गो यमोऽदितिः (ऋ० १० । ९२ । ११) । जनुषोऽया । न य ईषन्ते जनुषोऽया न्वन्तः[4] (ऋ० ६ । ६६ । ४) । सुवितोऽनु । सुवितो देवान्[5] सुवितोऽनु पत्म (ऋ० १० । ५६ । ३) । श्रियोऽधित । विश्वा अधि श्रियोऽधित (ऋ० १० । १२७ । १) ॥

---

(१) ब्रुवतेऽध्वन् to श्रियोऽधित in the Commentary given in $B^3B^2I^2$, omitted in B^n. (२) युवतिः $B^3I^2B^n$, omitted in B^2. (३) वसूनि $B^2I^2B^n$, omitted in B^3. (४) -या न्व१-न्तः B^3I^2, -या नु B^2, -याः B^n. (५) देवान्त् B^2, देवांत् B^n, देवात् B^3I^2.

वपुषेऽनु विशोऽयन्त सन्तोऽवद्यानि खेऽनसः ।
भरन्तोऽवस्यवोऽवोऽस्तु बुध्न्योऽजो मायिनोऽधमः ४५

वपुषेऽनु । विशोऽयन्त । सन्तोऽवद्यानि । खेऽनसः । भरन्तोऽवस्यवः । अवोऽस्तु । बुध्न्योऽजः । मायिनोऽधमः[1] । एते च द्वैपदा यथागृहीतमभिनिधीयन्ते ।

वपुषेऽनु । प्र वां वयो वपुषेऽनु पप्तन् (ऋ० ६ । ६३ । ६) । विशोऽयन्त । सं यद्विशोऽयन्त शूरसातौ (ऋ० ६ । २६ । १) । सन्तोऽवद्यानि । अन्तः[2] सन्तोऽवद्यानि पुनानाः (ऋ० ६ । ६६ । ४) । खेऽनसः । खे रथस्य खेऽनसः (ऋ० ८ । ९१ । ७) । भरन्तोऽवस्यवः । स्थूरं न कच्चिद्भरन्तोऽवस्यवः (ऋ० ८ । २१ । १) । अवोऽस्तु । महि त्रीणामवोऽस्तु (ऋ० १० । १८५ । १) । बुध्न्योऽजः । अहिर्बुध्न्योऽज एकपादुत (ऋ० २ । ३१ । ६) । मायिनोऽधमः । त्वं मायाभिरप मायिनोऽधमः (ऋ० १ । ५१ । ५) ॥

देवोऽनयत्पुरूवसोऽसुरघ्नो
भूतोऽभि श्वेतोऽरुषस्तेन नोऽव्य ।

येऽजामयस्तेऽरदन्नोऽधिवक्ता
तेऽवर्धन्त तेऽरुणेभिः सदोऽधि ॥ ४६ ॥

देवोऽनयत् । पुरूवसोऽसुरघ्नः । भूतोऽभि । श्वेतोऽरुषः । तेन नोऽव्य । येऽजामयः । तेऽरदत् । नोऽधिवक्ता । तेऽवर्धन्त । तेऽरुणेभिः । सदोऽधि[3] । एते च द्वैपदा यथागृहीतमभिनिधीयन्ते ।

---

(१) The Commentary from वपुषेऽनु to मायिनोऽधमः given in $B^3B^2I^2$, omitted in B^n. (२) अन्तः $B^3I^2B^n$, omitted in B^2. (३) The Commentary from देवोऽनयत् to सदोऽधि given in $B^3I^2B^2$, omitted in B^n.

देवोऽनयत् । देवोऽनयत्सविता सुपाणिः (ऋ० ३ । ३३ । ६)। पुरूवसोऽसुरघ्नः । पुरुहूत पुरूवसोऽसुरघ्नः (ऋ० ६ । २२ । ४)। भूतोऽभि । मेषो भूतोऽभि यन्नयः (ऋ० ८ । २ । ४०)। श्वेतोऽरुषः । कृष्णाः[1] श्वेतोऽरुषो यामो अस्य(ऋ० १० । २० । ६)। तेन नोऽद्य। तेन नोऽद्य विश्वे देवाः (ऋ० खि० १० । १६१ । ३)। तेनेति किम्। ते नो अद्य ते अपरं तुचे तु नः (ऋ० ८ । २७ । १४)। येऽजामयः । इन्द्र जामय उत येऽजामयः (ऋ० ६ । २५ । ३)। तेऽरदत् । प्र तेऽरदद्वरुणो यातवे पथः (ऋ० १० । ७५ । २)। नोऽधिवक्ता । स प्राविता मघवा नोऽधिवक्ता (ऋ० ८ । ९६ । २०)। तेऽवर्धन्त । तेऽवर्द्धन्त स्वतवसो महित्वना (ऋ० १। ८५ । ७)। ते ऽरुणेभिः ।तेऽरुणेभिर्वरमा पिशङ्गैः (ऋ० १ । ८८ । २)। सदोऽधि । राजेव दस्म नि षदोऽधि बर्हिषि[2] (ऋ० १० । ४३ । २) ॥

स्वाध्योऽजनयन्धन्वनोऽभिमाती-
रग्नेऽप दह मनसोऽधि योऽध्वनः ।
योऽह्यस्तेऽविन्दँस्तपसोऽधि न योऽधि
पादोऽस्य योऽति ब्राह्मणोऽस्य योऽनयत् ॥४७॥

स्वाध्योऽजनयन् । धन्वनोऽभिमातीः । अग्नेऽप दह । मनसोऽधि । योऽध्वनः । योऽह्यः । तेऽविन्दन् । तपसोऽधि । न योऽधि । पादोऽस्य । योऽति । ब्राह्मणोऽस्य । योऽनयत्[3] । एते च यथागृहीतमभिनिधीयन्ते ।

स्वाध्योऽजनयन् । स्वाध्योऽजनयन्ब्रह्म देवाः (ऋ०१० । ६१।७) । धन्वनोऽभिमातीः । ओज[4] स्थिरेव धन्वनोऽभिमातीः (ऋ० १०। ११६।

(१) B²Bⁿ, कृष्ण B³I². (२) बर्हिषि omitted in B². (३) The Commentary from स्वाध्यो to -नयत् given in B³ I²B², omitted in Bⁿ. (४) B³Bⁿ, ओजः B²I².

६)। अग्नेऽप इह । विश्वा अग्नेऽप दहारातीः[1] (ऋ० ७ । १ । ७)। दहेति किम् । महो रायः सातिमग्ने अपा वृधि (ऋ० ८ । २३ । २९) । मनसोऽधि । उर्वश्या ब्रह्मन्मनसोऽधि जातः (ऋ० ७ । ३३ । ११)। योऽध्वनः । मनो न योऽध्वनः सद्य एति (ऋ० १ । ७१ । ९)। योऽह्यः । शतचक्रं योऽह्यो वर्तनिः[2] (ऋ० १० । १४४ । ४) । तेऽविन्दन् । तेऽविन्दन्मनसा दीध्यानाः (ऋ० १० । १८१ । ३) । तपसोऽधि । तपसोऽध्यजायत (ऋ० १० । १९० । १) । न योऽधि । भूषन्न योऽधि बभ्रूषु (ऋ० १ । १४० । ६)। नेति किम् । पावमानीर्या अध्येति[3] (ऋ० ९ । ६७ । ३२) । पादोऽस्य । पादोऽस्य विश्वा भूतानि (ऋ० १० । ९० । ३)। योऽति । इन्द्रो विश्वा योऽति शृण्वे (ऋ० ८ । २ । ३४ ।) ब्राह्मणोऽस्य । ब्राह्मणोऽस्य मुखमासीत् (ऋ० १० । ९० । १२)। योऽनयत् । आ योऽनयत् सधमा आर्यस्य (ऋ० ७ । १८ । ७) ॥

सोऽस्माकं यो द्वेषोभ्योऽन्यकृतेभ्य-
स्तेभ्योऽकरं पयस्वन्तोऽमृताश्च ॥४८॥

सोऽस्माकं यः । द्वेषोभ्योऽन्यकृतेभ्यः । तेभ्योऽकरम् । पयस्वन्तोऽमृताः[4] । एते च[5] द्वैपदा यथागृहीतमभिनिधीयन्ते । सोऽस्माकं यः । उपस्तिरस्तु सोऽस्माकं[6] यः (ऋ० १० । ९७ । २३)। य इति किम् । सास्माकमनवद्य तूतुजान (ऋ० १ । १२९ । १)। द्वेषोभ्योऽन्यकृतेभ्यः । त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः (ऋ० ८ ।

---

(१)-रतीः I^2. (२) B^3B^2,-ह्यः (*i.e.*, वर्तनिः omitted) I^2 B^n. (३) $B^3I^2B^2$, अध्येति वृत्तिः B^n. (४) The Commentary from सोऽस्माकं to-मृताः given in $B^3I^2B^2$, omitted in B^n. (५) च omitted in B^2. (६) सो३स्माकं B^3I^2, सो२स्माकं B^2, सोऽस्माकं B^n.

७९। ३)। तेभ्योऽकरम्। इदं तेभ्योऽकरं नमः (ऋ० १०। ८५। १७)। पयस्वन्तोऽमृताः। शुक्राः पयस्वन्तोऽमृताः (तै० ब्रा० २। ६। ११। १०)॥

अन्योऽर्वाकेऽथो इति नोदयेषु
पुत्रः पराके च परावतश्च ॥४८॥

अथाभिनिहितः संधिः (२। ३४) इत्यनुक्रम्य पादादिरकार एकीभवतीति यदुक्तं तस्यापवादः[1]। अन्यः अर्वाके अथो एतेषूदयेषु[2] पुत्रः पराके परावतः एतेषु च पूर्वपदेषु यथासंख्यमभिनिहितो न भवति। अन्यः। अख्खली[3]कृत्या पितरं न पुत्रो अन्यः (ऋ० ७। १०३। ३)। अर्वाके। यन्नासत्या पराके अर्वाके (ऋ० ८। ९। १५)। अथो। आविवासन्परावतो अथो[4] (ऋ० ९। ३९। ५)॥

अन्तःपादं च वयो अन्तरिक्षे
वयो अस्याश्रथयो हेतयस्त्रयः।
वो अन्धसः शयवे अश्विनोभये
अवो अधि स्नाज्ज्यो जामयः पयः ॥ ५० ॥

अन्तःपादम् (२। ३५) इत्यु[5]पक्रम्य यदुक्तं तस्यायमपवादः। पादमध्ये च[6]। वयो अन्तरिक्षे। वयो अस्य। अश्रथयः। हेतयः।

---

(१) The reading from अथाभिनिहितः to-पवादः is that of B^3I^2; B^n differs only in having यदुक्तं before पादादिर् and not after-भवतीति. Instead of this B^2 reads, before the Sūtra अन्यो—परावतश्च, अथाभिनिहितः संधिरित्यनेन पादादिरकारोभिनिधीयत इत्युक्तं। तस्यायमपवादः। (२) $B^3I^2B^n$, एतेषु पदेषु B^2. (३) अरखली-B^3, अख्लली-I^2, अक्खली-B^2. अखखलीकृत्या omitted in B^n. (४) $B^2I^2B^n$. Reg; अथो अर्वावतः B^3. (५) B^3B^n; चेत्यु- B^2I^2, Reg. (६) पादमध्ये च B^3B^n, omitted in B^2I^2.

त्रयः। वो अन्धसः। शयवे अश्विना। उभये। अवो अधि। साञ्जयः। जामयः। पयः[१]।

वयो अन्तरिक्षे। अग्निं वयो अन्तरिक्षे पतन्तः (ऋ० १०। ८०। ५)। अन्तरिक्ष इति कस्मात्। आ वां वयोऽश्वासः (ऋ० ६। ६३। ७)। वयो अस्य। वर्धो अग्ने वयो अस्य[२] (ऋ० १। ७१। ६)। अस्येति किम्। आ वां वयोऽश्वासः (ऋ० ६।६३।७)। अश्नथयः। सतीनमन्युरश्नथायो अद्रिम् (ऋ० १०। ११२। ८)। हेतयः। शतानीका हेतयो अस्य (ऋ० ८। ५०। २)। त्रयः। चत्वारि शृङ्गा त्रयो अस्य (ऋ० ४। ५८। ३)। वो अन्धसः। पान्तमा वो अन्धसः (ऋ० ८। ९२। १)। अन्धस इति किम्। आ वोऽहं समितिं ददे[३] (ऋ० १०। १६६। ४)। व इत्येतेन चा न प्र (२। ३८) इत्यस्यायमपवादः। अयेऽयोऽवेऽव इत्यन्तैः (२। ३७) इत्यस्यापवादः शेषः[४]। शयवे अश्विना। अपिन्वतं शयवे अश्विना गाम् (ऋ० १। ११७। २०)। उभये। यद्वां हवन्त उभये अध[५] (ऋ० ७। ८२। ९)। अवो अधि। यन्नार्षदाय अवो अध्यधत्तम् (ऋ० १। ११७। ८)। अधीति किम्। अवोऽमृत्यु धुक्षत[६] (ऋ० ६। ४८। १२)। साञ्जयः। भरद्वाजान्साञ्जयो अभ्ययष्ट (ऋ० ६। ४७। २५)। जामयः। जामयो अध्वरीयताम् (ऋ०

---

(१) The Commentary from वयो अन्त-to पयः given in $B^3I^2B^2$, omitted in B^n. (२) $B^3I^2B^n$, अस्य द्विबर्हाः B^2. (३) $B^3B^2B^n$, अन्धस इति किम्। आ वोऽहं समितिं ददे omitted in I^2. (४) B^3, -स्यापवादाः शेषाः B^n, -स्यायमपवादः शेषः B^2I^2. (५) B^3I^2; अधः B^n; अध स्पृधि B^2, Reg. (६) B^2, Reg.; अधीति किं। अवो मृत्यु B^nB^3 (B^3 gives this on the margin); omitted in I^2.

१ । २३ । १६)। पयः । आसा यदस्य पयो अकृत स्वम् (ऋ० १० । १ । ३) ॥

इदानीं प्रकृतिभावः । तत्र प्रथमं पदसंहितामाह[१] —

प्रकृत्येतिकरणादौ प्रगृह्याः ॥ ५१ ॥[२]

इतिकरणादौ परभूते प्रकृत्या प्रगृह्या[३] भवन्ति । इन्दो इति । शतक्रतो इति[४] । ऊँ इति[५] । प्रो इति । इन्द्राग्नी इति । द्वे इति ॥

स्वरेषु चार्ष्याम् ॥५२॥

स्वरेषु च[६] परभूतेष्वार्ष्यां संहितायाम् । ऋषिदृष्टा आर्षी तत्र । प्रकृत्या प्रगृह्या भवन्ति । राजन्ती अस्य भुवनस्य रोदसी अस्मे (ऋ० ६ । ७० । २)। इन्द्रवायू इमे सुताः (ऋ० १ । २ । ४)। ते इद्विप्रा ईळते[७] (ऋ० ६ । ७० । ४)। प्रो अयासीदिन्दुः (ऋ० ९ । ८६ । १६)। सोमो गौरी अधि श्रितः (ऋ० ९ । १२ । ३) ॥

प्रथमो यथोक्तम् ॥ ५३ ॥

प्रथमः[८] प्रगृह्य आर्ष्यां संहितायां यथोक्तमेव भवति । कश्च प्रथमः । ओकार आमन्त्रितजः प्रगृह्यः (१ । ६८) इत्यादिना य[९] उक्तः । इन्दविन्द्राय मत्सरम् (ऋ० ९ । २६ । ६)। वाय उक्थेभिर्जरन्ते (ऋ० १। २ । २) । अत्रा चिन्नो मधो पितोऽरम् (ऋ० १ । १८७ । ७)। यददो पितो अजगन् (ऋ० १ । १८७ । ७)।

---

(१) B³I²B²Bⁿ read Sūtra 51 before the passage इदानीं—आह. (२) B³I²Bⁿ read this Sūtra here as a part of the Commentary, omitted in B². (३) B³I²Bⁿ; B² reads प्रगृह्याः before प्रकृत्या. (४) B³I²B², शतक्रतो इति शतऽक्रतो Bⁿ. (५) B³B², Reg.; उ इति I²; omitted in Bⁿ. (६) च omitted in B². (७) ईळते सु B². (८) प्रथमं B³. (९) यद् B³.

पुरुहूत पुरूवसोऽसुरघ्नः[1] (ऋ० ६ । २२ । ४) । प्रथम इति किम् । प्रो अयासीदिन्दुरिन्द्रस्य (ऋ० ९ । ८६ । १६) ॥

सहोदयास्ताः प्रगृहीतपदाः सर्वत्रैव ॥ ५४ ॥

सह उदयेन वर्तन्त[2] इति सहोदयाः । ताः संहिताः[3] प्रगृहीत-पद[4]संज्ञा वेदितव्याः । सर्वत्रैव । पदसंहितायामितिकरणादौ परभूते स्वरेषु चार्ष्यामुदयेषु प्रगृहीतपदा एव । इन्दो इति । शतक्रतो इति शतऽक्रतो । इन्द्राग्नी इति । अतप्यमाने अवसावन्ती अनु (ऋ० १ । १८५ । ४) ॥

त्र्यक्षरान्तास्तु नेवे ॥५५॥

त्र्यक्षरपर्यन्ताः पुनः प्रगृह्या इवे प्रत्यये न प्रकृत्या भवन्त्यार्ष्यां संहितायाम् । दम्पतीव क्रतुविदा[5] (ऋ० २ । ३९ । २) । आर्ष्या-मिति किम् । दम्पती इवेति दम्पतीऽइव । (ऋ० प० २ । ३९ । २) ।[6] उपधीव । उपधी इवेत्युपधीऽइव । (ऋ० प० २ । ३९ । ४) । त्र्यक्षरान्ता इति किम् । अक्षी इव चक्षुषा यातमर्वाक्[7] (ऋ० २ । ३९ । ५) । इवेति किम् । रोदसी आ वदत[8] (ऋ० १ । ६४ । ९)॥

आर्ष्यामिव संध्ययकारपूर्वौ विवृत्तेश्च प्रत्ययः सन्नुकारः ॥५६॥

---

(१) यददो पितो— -सुरघ्नः given in B^2B^n, omitted in B^3 I^2. (२) वर्तते B^3. (३) $B^2I^2B^n$, Reg.; संज्ञाः B^3. (४) B^3 B^2B^n;-पदी- I^2;-पद- omitted in Reg. (५)$B^3I^2B^n$, Reg.; विदा जनेषु B^2. (६) B^3B^n add तथा । . (७) यातमर्वाक् B^3; यातम् B^n; omitted in B^2, Reg. (८) त्र्यक्षरान्ता to वदत omitted in I^2; इवेति *to* वदत *omitted in* B^n. वदत B^2, Reg.; वदता गणश्रियः B^3.

आर्ष्यामिवेत्यवधारणं पदसंहितानिवृत्त्यर्थम्। संधौ[1] भवः संध्यः। संध्यो यकारः पूर्वो यस्मादिति संध्ययकारपूर्व उकारः प्रकृत्या भवति। प्रत्यु अदर्श्यायती (ऋ० ७। ८१। १)। अभू-र्वौर्च्चीर्व्यु आयुरानट् (ऋ० १०। २७। ७)।

विवृत्तेस्तु परभूत उकारः प्रकृत्या भवति। अभूदु भा उ अंशवे (ऋ० १। ४६। १०)। इन्द्रियं[2] सोमं धनसा उ ईमहे (ऋ० १०। ६५। १०)। संध्यग्रहणं किम्। ता मे जराय्वजरं मरायु (ऋ० १०। १०६। ६)। यकारपूर्व इति किम्। अभूर्वौर्च्चीः (ऋ० १०। २७। ७)[3]॥

ऊकारादौ स्विति ॥५७॥

ऊकारादौ पदे परभूते सु इत्येतत्पदं प्रकृत्या भवति। ताभिरू षु ऊतिभिरश्विना गतम् (ऋ० १। ११२। १)। ऊकारादाविति किम्। सूपस्थाभिर्न धेनुभिः[4] (ऋ० ९। ६१। २१)॥

पूषेत्यकारे न चेत्तदेकाक्षरतत्रपूर्वम् ॥५८॥

पूषा इत्येतत्पदमकारादौ पदे प्रत्यये प्रकृत्या भवति। यदि तत्पूषेति पदमेकाक्षरपदपूर्वं न भवति। तत्रपूर्वं चेन्न भवति। पूषा अविष्टु माहिनः (ऋ० १०। २६। ९)। स्वस्ति पूषा असुरो दधातु नः (ऋ० ५। ५१। ११)। न चेत्तदेकाक्षरतत्रपूर्वमिति किम्। न तं पूषापि मृष्यते (ऋ० ६। ५४। ४)। तत्र पूषाभवत्सचा (ऋ० ६। ५७। ४)॥

---

(१) B^n, सन्धो B^3, सन्ध्यौ B^2I^2. (२) B^3B^2, इंद्रि I^2, omitted in B^n. (३) संध्यग्रहणं to वौर्च्चीः, omitted here in I^2, is given on the margin, but the place of its insertion is wrongly marked at the end of the next Sūtra. (४) धेनुभिः (for न धेनुभिः) B^3.

श्रद्धा सम्राज्ञी सुशमी स्वधोती
पृथुज्रयी पृथिवीषा मनीषा ।
अया निद्रा ज्या प्रपेति स्वराणां
मुख्ये परे पञ्चमषष्ठयोश्च ॥५८॥

इत्येतानि[1] पदानि प्रकृत्या भवन्ति स्वराणां मध्ये मुख्ये प्रथमेऽकारे । पञ्चमषष्ठयोश्च स्वरयोः परभूतयोः[2] । इकार ईकारे चेत्यर्थः । श्रद्धा । श्रद्धा इत्ते मघवन्पार्ये दिवि[3] (ऋ० ७ । ३२ । १४)। सम्राज्ञी । सम्राज्ञी अधि देवृषु (ऋ० १० । ८५ । ४६)। सुशमी। एते शमीभिः सुशमी अभूवन् (ऋ० १० । २८ । १२)। स्वधा । स्वधा अवस्तात्प्रयतिः परस्तात् (ऋ० १० । १२९ । ५)। ऊती । ऊती अनूती हिरिशिप्रः सत्वा[4] (ऋ० ६ । २९ । ६)। पृथुज्रयी । पृथुज्रयी असुर्येव[5] (ऋ० १ । १६८ । ७)। पृथिवी । द्यावाक्षामा पृथिवी अन्तरिक्षम् (ऋ० ३ । ८ । ८)। ईषा । ईषा अक्षो हिरण्ययः (ऋ० ८ । ५ । २९)। मनीषा । वनेम पूर्वीरर्यो मनीषा अग्निः (ऋ० १ । ७० । १)। अया । अया ईशानस्तविषीभिरावृतः (ऋ० १ । ८७ । ४)। निद्रा । मा नो निद्रा ईशत मोत जल्पिः (ऋ० ८ । ४८ । १४)। ज्या । ज्या इयं समने पारयन्तो (ऋ० ६ । ७५ । ३)। प्रपा । धन्वन्निव प्रपा असि (ऋ० १० । ४ । १)। मुख्ये परे पञ्चमषष्ठयोश्चेति किम् । आरादुप स्वधा गहि (ऋ० ८ । ३२ । ६)। आर्ष्यामेवेति किम् । सम्राज्ञीति सम्ऽराज्ञी[6] । (ऋ० ऋ० १० । ८५ । ४६) ॥

---

(१) $B^3I^2B^n$, एतानि B^2. (२) परभूतयोः omitted in I^2. (३) $B^3B^2B^n$; दिवि omitted in Reg.; पार्ये दिवि omitted in I^2. (४) B^2, Reg.; सत्वा omitted in $B^3I^2B^n$. (५) असुर्येव जंजती B^2. (६) सम्ऽराज्ञी B^3, संऽराज्ञी B^2B^n. आर्ष्यामेवेति to -राज्ञी omitted in I^2.

स्वरे पादादा उदये सचेति ॥ ६० ॥

सचा इत्येतत्पदं प्रकृत्या भवति स्वरे पादादावुदयभूते। मन्दिष्ट यदुशने काव्ये सचाँ[1] इन्द्रः (ऋ० १। ५१। ११)। उदुस्रियाः[2] सृजते सूर्यः सचाँ[3] उद्यत् (ऋ० ७। ८१। २)। स्वरे पादादा उदय इति किम्। सचैषु सवनेष्वा (ऋ० १। ९। ३)। मुख्ये परं पञ्चमषष्ठयोश्चेत्यस्याधिकारस्य[4] निवृत्त्यर्थं स्वरग्रहणम्। केचित्किल[5] पार्षदप्रपञ्चं[6] यत्नप्रयोगं कुर्वन्ति। इन्द्र इद्धर्योः सचा (ऋ० १। ७। २) इत्येतस्याभ्यासेऽपीमं प्रकृतिभावं कुर्वन्ति। तन्नोपपद्यते। कथम्। संहितायां यद्दृष्टं तदनेन शास्त्रेण व्याख्यायते। नानेनादृष्टं साध्यते[7] ॥

ष्वन्तं जोपं चर्षणीश्चर्षणिभ्यः।
एकारान्तं मित्रयोरस्मदीव-
न्नमस्युरित्युपधं चेत्यपृक्तम् ॥६१॥

ष्वन्तम् जोपम् चर्षणीः चर्षणिभ्यः एकारान्तं मित्रयोः अस्मत् ईवत् नमस्युः इत्युपधं च[8]। इतिकरणः पदस्वरूपग्रहणार्थः। एवमुपधं च आ इत्येतत्पदमपृक्तं चेत्प्रकृत्या भवति। स्वरे पादादा उदय इत्यनुवृत्तिः[9]।

---

(१) सचाऽँ B², सचाँ२B³I², सचा Bⁿ. (२)-या B³. (३) सचाऽँ B², सचाँ॰ B³I², सचा Bⁿ. Thus throughout this section B³ always, but I² sometimes, mark the hiatus by means of 2 instead of ऽ. The following instances are not noted separately hereafter. (४) B²I²,-कार- B³Bⁿ. (५) किल omitted in B³. (६) B²,-पञ्चो B³, पञ्च Bⁿ. (७) केचित् to साध्यते omitted in I². (८) B³ B²I², ष्वन्तम् to च in the Commentary omitted in Bⁿ. (९) I², Reg.;-वृत्ति B²;-वर्तते B³Bⁿ.

पु इत्येवमन्तं पदं ष्वन्तम्। तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तम् (ऋ० ९। ९८। ६)। जोषम्। उतो न्वस्य जोषमाँ इन्द्रः (ऋ० ८। ९४। ६)। चर्षणीः। आ याहि पूर्वीरति चर्षणीराँ अर्यः (ऋ० ३। ४३। २)। चर्षणिभ्यः। सं सहस्रा कारिष-च्चर्षणिभ्य आँ आविः (ऋ० ६। ४८। १५)। एकारान्तं पदम्। पर्षि दीने गभीर आँ उग्रपुत्रे (ऋ० ८। ६७। ११)। मित्रयोः। उदु त्यच्चक्षुर्महि मित्रयोराँ एति (ऋ० ६। ५१। १)। न चैतदुदा-हरणमिह स्यात्—एकारौकारपरौ च (२। ६२)इत्यनेन सिद्धत्वात्। तन्न। नहि समानलक्षणानां परित्यागो न्याय्यः[1]। न चैतं विषयं स विधिः प्रवेष्टुं शक्नुयादत्रापृक्तग्रहणात्। तत्र च सामान्येन विधा-नात्। तस्मात्साधूदाहरणम्। अस्मत्। इमा अस्मै मतयो वाचो अस्मदाँ[2] ऋचः (ऋ० १०। ९१। १२)। ईवत्। आ स एतु य ईवदाँ अदेवः (ऋ० ८। ४६। २१)। नमस्युः। उप वो विश्व-वेदसो नमस्युराँ असृक्षि (ऋ० ८। २७। ११)। स्वरे पादादा उदय इति किम्। सोमं वज्रिण आभरत्[3] (ऋ० ८। १००। ८)। इत्युपध इति किम्। आ रश्मयो गभस्त्यो स्थूरयोराध्वन् (ऋ० ६। २९। २)। अपृक्तमिति किम्। यः प्राणतो निमिषतो महित्वैकः (ऋ० १०। १२१। ३)॥[4]

एकारौकारपरौ च कण्ठ्यौ लुशादर्वाक्॥ ६२॥

एकारश्च ओकारश्च परौ ययोरकाराकार[5]योस्तौ तथोक्तौ लुशा-दृषेः प्राक्प्रकृत्या भवतः। अबुध्रमु त्ये (ऋ० १०। ३५। १) इत्यत्र लुशः। एकारौकारयोर्विशेषणार्थं पादादिग्रहणमिहानुवर्तते।

---

(१) न्यायः I^2. (२) अस्मादाँ I^2. (३) आ अभरत् I^2. (४) स्वरे पादादा उदय इति किं। इंद्रो दीर्घाय चक्षस आ सूर्यं added in B^2 after-त्वैकः।. (५) अकारआका- $B^3 B^2 I^2 B^n$.

आ यन्मा वेना अरुहन्नृतस्यँ एकम् (ऋ० ८ । १०० । ५)। तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका (ऋ० १ । ३५ । ६)। त्वं न इन्द्रा भरँ ओजः (ऋ० ८ । ९८ । १०)। विश्वेदहानि तविषीव उग्रँ ओकः (ऋ० ७ । २५ । ४)। लुशादर्वागिति किम्। यः प्राणतो निमिषतो महित्वैकः (ऋ० १० । १२१ । ३)। पादादाविति किम्। मैनमग्ने वि दहो माभि शोचः (ऋ० १० । १६ । १)। अमितौजा अजायत (ऋ० १ । ११ । ४)॥

गोतमे चामिनन्त ॥ ६३ ॥

गोतमऋषिदृष्टे[1] च अमिनन्त इत्येतत्पदं प्रकृत्या भवति। आ ते सुपर्णा अमिनन्तँ एवैः (ऋ० १ । ७९ । २)। पाद्मध्यप्राप्त्यर्थं पुनर्वचनम् ॥

विभ्वा विधर्ता विपन्या कदा या मातेत्यृकारेऽप्यपादादिभाजि ॥ ६४ ॥

एतानि पदानि प्रकृत्या भवन्ति ऋकारादौ पदे प्रत्यये। अप्य-पादादिभाजीत्यपिशब्द उभयार्थः। विभ्वा। ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तः (ऋ० ४ । ३३ । ३)। विधर्ता। प्र सीमादित्यो असृजद्विधर्ताँ ऋतम् (ऋ० २ । २८ । ४)। विपन्या। प्र शर्ध आर्त प्रथमं विपन्याँ ऋतस्य (ऋ० ४ । १ । १२)। कदा। अग्ने कदाँ ऋतचित्[2] (ऋ० ५ । ३ । ९)। या। औच्छत्सा रात्री परितक्म्या याँ ऋणंचये (ऋ० ५ । ३० । १४)। माता। अप या माताँ ऋणुत व्रजं गोः[3] (ऋ० ५ । ४५ । ६)। ऋकार इति किम्। उत त्वष्टोत विभ्वानु मंसते (ऋ० ५ । ४६ । ४)॥

---

(१) B^3 I^2B^n, Reg.; -दृष्टं B^3. (२) $B^2I^2B^n$, Reg.; ऋतचिद्धातयास्ते B^3. (३) B^3I^2, Reg.; व्रजं गोः omitted in B^2B^n.

परुच्छेपे भीषा पथेत्यकारे ॥ ६५ ॥

भीषा पथा इत्येते परुच्छेप ऋषावकारे प्रकृत्या भवतः । भीषा । घृणान्न भीषाँ अद्रिवः (ऋ० १ । १३३ । ६) । पथा । याहि पथाँ अनेहसा (ऋ० १ । १२९ । ९) । ऋषिग्रहणादिह न भवति—कद्र्यम्णो महस्पथाति (ऋ० १ । १०५ । ६) । अकार इति किम् । पथेव यन्तावनुशासता रजः (ऋ० १ । १३९ । ४) ॥

एवाँ अग्निरत्रिषु सा प्लुतोपधा ॥ ६६ ॥

एवाँ अग्निम् इत्येतद्[1] द्वैपदं यथागृहीतं भवत्यत्रिमण्डले । प्लुतोपधसंज्ञकं संधानं भवति । एवाँ अग्निमजुर्यमुः[2] (ऋ० ५ । ६ । १०) । एवाँ अग्निं वसूयवः (ऋ० ५ । २५ । ९) । अत्रिग्रहणं किम् । एवाग्निं सहस्यं वसिष्ठः (ऋ० ७ । ४२ । ६) । प्लुतोपधा[3]संज्ञाया इदानीमेव प्रयोजनं वक्ष्यति ॥

सचादयो या विहिता विवृत्तयः ।
प्लुतोपधान्ता अनुनासिकोपधाः ॥ ६७ ॥

स्वरे पादादौ (२ । ६०) इत्यादिना या विहिताः सचादय एवाँ अग्निमत्रिषु सा प्लुतोपधान्तास्ता[4] अनुनासिकोपधा भवन्ति । आनुनासिक्यमुपधानां विधीयते । उदुस्रियाः सृजते सूर्यः सचाँ उद्यत्[5] (ऋ० ७ । ८१ । २) ॥

सेदु सास्मिन्सेमभि साभिवेगः
सेद्भवः सोपमा सैाषधीरनु ।

---

(१) इत्येतद् B^2 B^n, एतद् B^3I^2. (२) This quotation given in B^n, M.M.; omitted in $B^2B^3I^2$. (३) -पध- B^3. (४) प्लुतोपधा इत्यन्ताः ता M.M. (५) उद्यन् B^3.

सास्मा अरं सोत नः सेन्द्र विश्वा
सेति सास्माकमनवद्य सासि ॥ ६८ ॥

यथागृहीतान्येतानि भवन्ति। अत्र विवृत्तिलोपो निपात्यते। सेदु। सेदु राजा क्षयति (ऋ० १। ३२। १५)। उ इति[1] किम्। स इद्भोजो यो गृहवे ददाति[2] (ऋ० १०। ११७। ३)। सास्मिन्। त्वमीशिषे सास्मिन्ना सत्सि (ऋ० १०। ४४। ५)। सेमभि। धिया शमी सचते सेमभि (ऋ० ६। ७४। ७)। अभीति किम्। स ईं ममाद महि कर्म कर्तवे (ऋ० २। २२। १)। साभिवेगः। असत्सु मे जरितः साभिवेगः (ऋ० १०। २७। १)। सेदृभवः। सेदृभवो यमवथ (ऋ० ४। ३७। ६)। ऋभव इति किम्। स इद्देवेषु गच्छति[3] (ऋ० १। १। ४)। सोपमा। जीवयाजं यजते[4] सोपमा दिवः (ऋ० १। ३१। १५)। सौषधीरनु। सौषधीरनु रुध्यसे (ऋ० ८। ४३। ९)। अन्विति किम्। स ओषधीः सो अपः स वनानि (ऋ० १। १०३। ५) सास्मा अरम्। सास्मा अरं बाहुभ्यां यम् (ऋ० २। १७। ६)। अरमिति किम्। सो अस्मै चारुश्छदयदुत (ऋ० १०। ३१। ४)। सोत नः। बृहस्पते सीषधः सोत नो मतिम् (ऋ० २। २४। १)।[5] सेन्द्र विश्वा। या चकर्थ सेन्द्र विश्वास्युक्थ्यः[6] (ऋ० २। १३। ११)। विश्वेति किम्। स इन्द्र चित्राँ अभि तृन्धि (ऋ० ६। १७। २)। सेति। यं स्मा पृच्छन्ति कुह सेति घोरम् (ऋ० २। १२। ५)। सास्माकमनवद्य। सास्माकमनवद्य तूतुजान वेध-

---

(१) उदिति I^2. (२) गृहवे ददाति B^2, Reg.; गृहवे B^3I^2; गृहले B^n. (३) B^3B^n, Reg.; गच्छति omitted in B^2I^2. (४) यते I^2. (५) After मतिम्। B^n adds न इति किं। मृग्यं। (६) विश्वास्युक्थ्यः $B^3I^2B^n$ (-क्थः B^n), विश्वा B^2.

सासू[1] (ऋ० १ । १२६ । १) अनवद्येति किम्। सोऽस्माकम् (ऋ० १० । ६७ । २३) इत्येतदेव निपातनं प्रत्युदाहरणमत्र। अत्र हि[2] विसर्जनीयलोपो निपात्यते। अन्यत्र तु विसर्जनीयस्य[3] कृतौ- त्वस्याभिनिहितः। सासि। यस्ताकृणोः प्रथमं सास्युक्थ्यः (ऋ० २ । १३ । २) ॥

सेदग्ने सेदग्निर्वासिष्ठं सास्माकेभिः सेदुग्रः सेमे ।
सैना सैनं सेमं सोदञ्चं सेमां सोषां सेशे सेदीशे ॥६८॥

सेदग्ने। सेदग्निर्वासिष्ठम्। सास्माकेभिः। सेदुग्रः। सेमे। सैना। सैनम्। सेमम्। सोदञ्चम्। सेमाम्। सोषाम्। सेशे। सेदीशे[4]। एतानि च[5] यथागृहीतं भवन्ति[6]।

सेदग्ने। सेदग्ने अस्तु सुभगः सुदानुः[7] (ऋ० ४ । ४ । ७)।[8] सेदग्निर्वासिष्ठम्। सेदग्निरग्नीँरत्यस्त्वन्यान् (ऋ० ७ । १ । १४)। वासिष्ठमिति किम्। स इदग्निः कण्वतमः कण्व- सखा[9] (ऋ० १० । ११५ । ५)। सास्माकेभिः। सास्माकेभिरेतरी न शूषैः (ऋ० ६ । १२ । ४)। सेदुग्रः। सेदुग्रो अस्तु मरुतः (ऋ० ७ । ४० । ३)। उग्र इति किम्। स इद्देवेषु गच्छति (ऋ० १ । १ । ४)। सेमे। सेमे मही रोदसी यक्षत्[10] (ऋ० ६ ।

---

(१) B³B², वेधसाम् omitted in I²Bⁿ. (२) अत्र हि B³B², Reg.; अत्र I²; अत्रापि Bⁿ. (३) B²Bⁿ, Reg.; -नीय- B³I². (४) B³B²I², सेदग्ने to सेदीशे in the Commentary omitted in Bⁿ. (५) B³I², च omitted in B²Bⁿ. (६) After भवन्ति। B² reads एतेषु पदेषु अदृष्टस्याकारस्य प्रश्लेषो निपात्यते इति वृत्तिः। (७) सुदानुः omitted in B². (८) After सुदानुः। Bⁿ adds अग्र इति किं। स इत्येति। (९) B³I²Bⁿ; कण्वसखा omitted in B², Reg. (१०) B³B², यक्षत् omitted in I²Bⁿ.

७४।२)। सैना। सैनानीकेन सुविदत्रः (ऋ० २।९।६)। सैनम्। सैनं सश्चद्देवो देवम्[1] (ऋ० २।२२।१)। सेमम्। सेमं नो अध्वरं यज (ऋ० १ १४।११)। सोदञ्चम्। सोदञ्चं सिन्धुमरिणात् (ऋ० २। १५। ६)। सेमाम्। सेमामविड्ढि प्रभृतिं य ईशिषे[2] (ऋ० २।२४।१)। सोषाम्। सोषामविन्दत्स स्वः सो अग्निम्[3] (ऋ० १०।६८।९)। सेशे। न सेशे यस्य रम्बते (ऋ० १०।८६।१६)। सेदीशे। सेदीशे यस्य रोमशम्[4] (ऋ० १०।८६।१६)। ईश इति किम्। स इद्देवेषु गच्छति (ऋ० १।१।४)॥

नू इत्था ते सानो अव्ये
वा अस्मे वासौ वेद्यस्याम्।
धिष्ण्येसे नू अन्यत्रा चित्
पादादौ नू इन्द्रोत्यर्वाक् ॥ ७० ॥

यथागृहीतमेतानि पदानि[5] भवन्ति। नू इत्था ते इति दीर्घत्वं निपात्यते।[6] संधिस्तु पदेऽदृष्टस्य[7] न भवति। नू इत्था ते पूर्वथा च प्रवाच्यम् (ऋ० १।१३२।४)। त इति किम्। आरे अघा को न्वित्था ददर्श (ऋ० १०।१०२।१०)। सानो अव्ये। सानावव्य इति प्राप्त ओकारो निपात्यते। संधिस्तु पदेऽदृष्टस्य[8]

(१) $B^2I^2B^n$, देवं सत्यमिन्द्रं सत्य इंदुः B^3. (२) B^3I^2, सेमामविढि B^2, सेमामविड्ढि प्रभृतिं B^n. (३) B^3. I^2; सः स्वः सो अग्निम् in B^2 and सो अग्निम् in B^n omitted. (४) यस्य रोमशम् omitted in I^2. (५) I^2B^n, पदानि omitted in B^3B^2. (६) After निपात्यते। B^2 adds दीर्घत्वे कृते पदे अदृष्टत्वादस्य पुनः संधिर्न भवतीति वृत्तिः। (७) $B^3I^2B^n$, अदृष्टस्य (for पदेऽदृष्टस्य) B^2, Reg. (८) पदे अदृष्टे B^3I^2, अदृष्टस्य B^2, (cp. B^n).

न भवति। दश स्वसारो अधि सानो अव्ये[1] (ऋ० ९। ९१। १)। वो अस्मे। अभिनिहिताभावो निपात्यते। प्रप्रा वो अस्मे स्वयशोभिः (ऋ० १। १२९। ८)। वासौ। अस्य वासा उ अर्चिषा (ऋ० ५। १७। ३)। वै असौ प्रश्लेषो निपात्यते। वेद्यस्याम्। प्रगृह्यस्यान्तःस्थां निपातयति। स्तीर्णं राये सुभरं वेद्यस्याम् (ऋ० २। ३। ४)। धिष्ण्येमे। इकारलोपो[2] निपातितः। पदान्तपदाद्योर्[3]एत्त्वं वा। आविवासन्रोदसी धिष्ण्येमे (ऋ० ७। ७२। ३)। नू अन्यत्रा चित्। दीर्घत्वं निपात्यते। नू अन्यत्रा चिदद्रिवः (ऋ० ८। २४। ११)। पादादौ नू इन्द्र। पादादौ वर्तमानस्य दीर्घत्वं निपात्यते। नू इन्द्र राये वरिवस्कृधी नः[4] (ऋ० ७। २७। ५)। पादादाविति किम्। यदिन्न्विन्द्र पृथिवी दशभुजिः[5] (ऋ० १। ५२। ११)। ऊत्यर्वाक्। प्रकृतिभावे प्राप्तेऽन्तःस्थापत्तिर्निपात्यते। बर्हिषदः पितर ऊत्यर्वाक् (ऋ० १०। १५। ४)॥

उदू अयान्नजेषितं धनञ्च
शतञ्चसं दशोण्ये दशोण्ये।
यथोहिषे यथोचिषे दशोणिं
स्वरोदयं पिबा इमं रथोऽह ॥ ७१ ॥

एतानि च[6] यथागृहीतं भवन्ति। उदू अयान्। दीर्घत्वं निपात्यते। संधिस्तु पदेऽदृष्टस्य न भवति। उदू अयाँ उपवक्तेव बाहू[7] (ऋ० ६। ७१। ५)। अयानिति किम्। उद्वेति सुभगः

---

(१) B^3B^n, Reg., M.M.; instead of this B^2I^2 read वृषा पवित्रे अधि सानो अव्ये। (२) -लोपो न I^2. (३)-द्यौ- B^2. (४) B^2, M.M.; वरिवः (for वरिवस्कृधी नः) $B^3I^2B^n$. (५) B^3I^2, Reg.; दशभुजिः omitted in B^2B^n. (६) I^2, च omitted in $B^3B^2B^n$. (७) B^2, बाहू omitted in $B^3I^2B^n$.

(ऋ० ७। ६३। १)। रजेषितम्। विसर्जनीयस्य प्रश्लेषो निपात्यते। अश्वेषि रजेषितम् (ऋ० ८। ४६। २८)। धनर्चम्। उत्तरपदादिलोपः। हिरिश्म[1]श्रुं नार्वाणं धनर्चम् (ऋ० १०। ४६। ५)। शतर्चसम्। तुल्यं निपातनम्[2]। वि चक्रमे शतर्चसं महित्वा (ऋ० ७। १००। ३)। दशोण्ये[3]। अत्र पञ्चस्वौकारे प्राप्त ओकारो निपात्यते[4]। दशोण्ये कवयेऽर्कसातौ (ऋ० ६। २०। ४)। दशोण्ये। दशशिप्रे दशोण्ये (ऋ० ८। ५२। २)। यथोहिषे। वाचं दूतो यथोहिषे (ऋ० ८। ५। ३)। यथोचिषे। पिबा दधृग्यथोचिषे (ऋ० ८। ८२। २)। दशोणिम्। स वेतसुं दशमायं दशोणिम् (ऋ० ६। २०। ८)। स्वरोदयं पिबा इमम्। द्वैपदमेतद्यथागृहीतं भवति।[5] इन्द्र सोमं पिबा इमम्। एदं बर्हिः[6] (ऋ० ८। १७। १)। स्वरोदयमिति किम्। इन्द्र सोमं सोमपते पिबेमं माध्यंदिनम्[7] (ऋ० ३। ३२। १)। रथोळ्ह। औकारे प्राप्त ओकारो निपात्यते। एनीत तुभ्यं रथोळ्ह भक्षैः (ऋ० १०। १४८। ३)॥

वीरास एतन तसू अकृण्वं-
स्ततारेव प्रैषयू रोदसी मे।
धन्वर्णसः सरपसः सचोत
प्रधीव वीळू उत सर्तवाजौ॥ ७२॥

एतानि द्वैपदानि[8] यथागृहीतं[9] भवन्ति। वीरास एतन। परा वीरास एतन (ऋ० ५। ६१। ४)। इकारस्य एत्त्वं निपा-

---

(१) -स्म- I^2. (२) B^3I^2, तुल्यं निपातनम् before शतर्चसम् in B^2. (३) दशोण्ये स्वरोदयं चेत्। (for दशोण्ये) B^2. (४) अत्र to निपात्यते omitted in I^2. (५) After भवति। B^2 adds पिबा इमं।, I^2 adds स्वरोदयं पिबा इमं। (६) B^2 adds सदो-। after बर्हिः. (७) $B^3I^2B^n$, Reg.; माध्यंदिनम् omitted in B^2. (८) B^2 has पदानि (instead of द्वैपदानि). (९) यथागृहीतानि B^2.

स्यते। तमू अकृण्वन्। दीर्घत्वं निपात्यते। तमू अकृण्वन्त्रेधा भुवे कम् (ऋ० १०।८८।१०)। अकृण्वन्निति किम्। तम्वभि प्र गायत (ऋ० ८। १५। १)। ततारेव। एकारौकार परौ च कण्ठ्यौ (२। ६२) इति सचादिविवृत्ति[1]प्रतिषेध एत्त्वं च[2]। एवेन्नु कं सिन्धुमेभिस्ततारेव (ऋ० ७।३३।३)। प्रैषयुः। एकारे प्राप्त ऐकारः। प्रैषयुर्न विद्वान् (ऋ० १। १२०।५)। रोदसीमे। प्रगृह्यसंधेरपवादः प्रश्लेषः। अन्तर्मही बृहती रोदसीमे (ऋ० ७।८७।२)। धन्वर्णसः। पद्यादेरकारलोपो दीर्घस्य वा ह्रस्वः। धन्वर्णसो नद्यः खादोअर्णाः (ऋ० ५।४५।२)। सरपसः। पद्यादिलोपो ह्रस्वत्वं वा निपात्यते। अरमयः सरपसस्तराय कम्[3] (ऋ० २।१३। १२)। सचोत। सचादिविवृत्तेः प्रतिषेधः। स्वस्ति धामहे सचोतैधि (ऋ० ५। १६।५)। प्रधीव। प्रगृह्यस्य प्रश्लेषः। नभ्येव न उपधीव प्रधीव (ऋ० २।३९।४)। वीळू उत। दीर्घत्वं निपात्यते। वीळू उत प्रतिष्कभे (ऋ० १।३९।२)। सर्तवाजौ। प्रश्लेषो निपात्यते। अत्याँ इव प्रासृजः सर्तवाजौ (ऋ० ३।३२।६) ॥[4]

> अश्विनेव पीवोपवसनानां
> महो आदित्याँ उषसामिवेतयः।
> स्तोतव अम्भ्यं च सृजा इयध्यै
> सचेन्द्र सानो अव्यये स्वधामिता ॥७३॥

---

(१) विवृत्तेः (for -विवृत्ति-) B². (२) B², च is omitted in B³I²Bⁿ. (३) B², M.M.; कम् omitted in B³I²Bⁿ. (४) Cp. Bⁿ in which the order of phrases, notes and Vedic quotations is different from that in B³I²B². The same remark applies to the Commentary on Sūtras 73 74 below.

एतानि च पदानि यथागृहीतं भवन्ति। अश्विनेव। सचादिविवृत्तेः प्रतिषेध एत्वं च। यद्वा वाणीभिरश्विनेवेत्[1] (ऋ० ८। ६। ६)। पीवोपवसनानाम्। विसर्जनीयस्य लोपः प्रश्लेषश्च[2] निपात्यते। अग्निष्वात्तानां पीवोपवसनानाम् (वा० सं० २१। ४३)। महो आदित्यान्। अकारस्य ओत्त्वम्। महो आदित्याँ अदितिं स्वस्तये (ऋ० १०। ६३। ५)। उषसामिवेतयः। ऐकारे प्राप्त एकारो निपात्यते। आ ते चिकित्र उषसामिवेतयः (ऋ० १०। ९१। ४)। स्तोतव अम्व्यं च[3]। अभिनिहिताभाव एकारस्य च अत्त्वम्। वेति स्तोतव अम्व्यम् (ऋ० ८। ७२। ५)। सृजा इयध्यै। आकारो निपात्यते। मातुर्न सीमुप सृजा इयध्यै (ऋ० ६। २०। ८)। सचेन्द्र। सचादिविवृत्तेः प्रतिषेधः। ब्रह्म च नो वसो सचेन्द्र (ऋ० १। १०। ४)। सानो अव्यये। औकारस्य ओत्त्वं निपात्यते। वृषा पवित्रे अधि सानो अव्यये (ऋ० ९। ८६। ३)। स्वधामिता। अद्धादिपाठात्प्रकृतिभावे प्राप्ते प्रश्लेषो निपात्यते। अनु स्वधामिता दस्ममीयते (ऋ० ५। ३४। १)॥

गोओपशागोऋजीकप्रवादौ
मनीषा आ त्वा पृथिवी उत द्यौः।
मनीषावस्यू रण्या इहाव
बृहतीइवेति च यथागृहीतम् ॥७४॥

इत्येतानि च[4] पदानि यथागृहीतं भवन्ति। इतिकरणः[5] समाप्तिवचनः। चकारः समुच्चयार्थीयः[6]। गोओपशा गोऋ-

(१) B²I², अश्विनेव B³Bⁿ. (२) Bⁿ; प्रश्लेषो B³I²B², Reg. (३) B³I², च omitted in B². (४) B³I², च omitted in B²Bⁿ. (५) B²I², -करण B³Bⁿ. (६) B³I²Bⁿ, -यार्थी B².

जीक इत्युभयोः[1] प्रकृतिभावो निपात्यते। प्रवाद्वचनाल्लिङ्गविभक्तेरनुपलक्षणम्[2]। गोओपशा। या ते अष्ट्रा गोओपशाघृणे[3] (ऋ० ६।५३।९)। गोऋजीकः[4]। असावि देवं गोऋजीकमन्धः[5] (ऋ० ७।२१।१)। इमा हि वां गोऋजीका मधूनि (ऋ० ३।५८।४)। मनीषा आ त्वा प्रकृतिभावः। कद्वाहो अर्वागुप मा मनीषा आ त्वा (ऋ० १०।२९।३)। पृथिवी उत द्यौः। प्रकृतिभावः। अदितिः सिन्धुः पृथिवी उत द्यौः (ऋ० १।९४।१६)। द्यौरिति किम्।[6] मनीषावस्युः। श्रद्धादिपाठात्प्रकृतिभावे प्राप्ते प्रश्लेषो निपातनात्। प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे (ऋ० ३।३३।५)। रणया इह। दीर्घत्वं निपात्यते। उक्थेषु रणया इह (ऋ० ८।३४।११)। आव। सन्धादिनिवृत्तेः प्रतिषेधः। कदा वसो स्तोत्रं हर्यत आव[7] (ऋ०१०।१०५।१)। बृहतीइव। प्रगृह्यलक्षणतः[8] प्रश्लेषे प्राप्ते[9] प्रकृतिभावः। बृहतीइव सूनवे रोदसी (ऋ० १।५९।४)। यथागृहीतग्रहणं च[10] काकाक्षिवदुभयत्र संबध्यतेऽधस्ताच्चोपरिष्टाच्च॥

योनिमारैगगादारैगारैग्दुर्योण आवृणक्।
हन्त्याखद्रुप आरुपितमनायुधास आसता॥७५॥

---

(१) Bⁿ, गोऋजीकः। उभयोः B³B²I². (२) अनुपलक्षणम् B³I²Bⁿ, Reg.; उपलक्षणम् B². (३) B³I², घृणे omitted in B²Bⁿ. (४) B³I², गोऋजीकं B². (५) अधः B². (६) After किम्। Bⁿ adds मृग्यम्। (७) आवा B², omitted in Bⁿ. (८) B³Bⁿ; I², Reg. have -लक्षणः (त supplied on the margin in I² in a different hand); -लक्षण- B². (९) प्राप्ते च B². (१०) च omitted in Reg.

योनिमारैक्। अगादारैक्। आरैक्। दुर्योण आवृणक्। हन्त्यासत्। रुप आरुपितम्। अनायुधास आसता[1]। एतानि च[2] पदानि यथागृहीतं भवन्ति। योनिमारैक्। स्वसा स्वस्रे ज्यायस्यै योनिमारैक् (ऋ० १। १२४। ८)। योनिग्रहणं किम्।[3] अगादारैक्। रुशद्वत्सा रुशती श्वेत्यागादारैक् (ऋ० १। ११३। २)। आरैक्। निर्विशेषेणो[4]पादानमर्धर्चादि[5]ज्ञापनार्थम्। आरैक्पन्थां यातवे सूर्याय (ऋ० १। ११३। १६)। दुर्योण आवृणक्। नि[6] दुर्योण आवृणङ् मृध्रवाचम् (ऋ० ५। ३२। ८)। दुर्योण इति किम्। वज्रेण हत्व्यवृणक्कुविष्वणिः (ऋ० २। १७। ६)। हन्त्यासत्। हन्ति रक्षो हन्त्यासद्वदन्तम् (ऋ० ७। १०४। १३)। हन्तीति किम्। असत्सु मे जरितः (ऋ० १०। २७। १)। रुप आरुपितम्। अग्ने रुप आरुपितं जबारु[7] (ऋ० ४। ५। ७)। रुप इति किम्[8]। अनायुधास आसता। अनायुधास आसता सचन्ताम्[9] (ऋ० ४। ५। १४)। अनायुधास इति किम्॥

अस्त्वासतो निराविध्यदस्यादेवं क आसतः।
न्यावृणङ् नकिरादेवो न्या।विध्यदेनसायुनक्॥७६॥

एतानि च[10] पदानि यथागृहीतानि भवन्ति। अस्त्वासतः। असअस्त्वासत[11] इन्द्र वक्ता (ऋ० ७। १०४। ८)। अस्त्विति किम्।

---

(१) The Commentary योनिमारैक् to आसता omitted in $B^2I^2B^n$, given in B^3. (२) B^3I^2, च omitted in B^2B^n. (३) After किम्। B^n adds मृग्यम्। (४) $B^3I^2B^n$; -विशेषो- B^2, Reg. (५) -द्यादि- (for -र्धर्चादि-) I^2. (६) नि B^2I^2, नि omitted in B^3B^n. (७) जवारु I^2. (८) रुप इति किम् B^3B^n (रू- B^n), omitted in B^2I^2. (९) सचतां I^2. (१०) B^2I^2, च omitted in B^3. (११) असन्नस्त्वासत $B^2I^2B^n$ (-सतं B^n), अस्त्वासतं B^3,

देवानां पूर्व्ये युगेऽसतः (ऋ० १० । ७२ । २)। सतश्च योनिमसतश्च वि वः (आ० श्रौ० ४ । ६ । ३)। निराविध्यत्। निराविध्यद्गिरिभ्य आ (ऋ० ८ । ७७ । ६) । निरिति किम्। अभ्यादेवम्। भुवद्विश्वमभ्यादेवमोजसा (ऋ० २ । २२ । ४)। अभीति किम्। सनेमि त्वमस्मदाँ अदेवम् (ऋ० ९ । १०५ । ६) । क आसतः । क आसतो वचसः सन्ति गोपाः[1] (ऋ० ५ । १२ । ४)। क इति किम्। सतश्च योनिमसतश्च वि वः (आ० श्रौ० ४ । ६ । ३)। न्यावृणक्। इन्द्रो यः शुष्णमशुषं[2] न्यावृणक् (ऋ० १ । १०१ । २)। नीति किम्। वज्रेण हत्व्यवृणक् (ऋ० २ । १७ । ६)। नकिरादेवः। ययोः शत्रुर्नकिरादेव ओहते (ऋ० ८ । ५९ । २)। नकिरिति किम्। अदेवो यदभ्यौहिष्ट[3] (ऋ० ६ । १७ । ८)। न्याविध्यत्। न्याविध्यदिलीबिशस्य दृळ्हा (ऋ० १ । ३३ । १२)। नीति[4] किम्। एनमायुनक्। यमेन दत्तं त्रित एनमायुनक् (ऋ० १ । १६३ । २)। एनमिति किम्। अयं रथमयुनक्सप्तरश्मिम् (ऋ० ६ । ४४ । २४) ॥

अहिहन्नारिणक्पथ आयुक्षातामुदावता ।
रिक्थमारैग्य आयुक्त कुरु अवणमावृणि ॥ ७७ ॥

एतानि च पदानि यथागृहीतानि भवन्ति । अहिहन्नारिणक्पथः । यो[5] धौतीना[6]महिहन्नारिणक्पथः (ऋ० २ । १३ । ५) । अहिहन्निति किम्। आयुक्षाताम्। आयुक्षातामश्विना यातवे रथम् (ऋ० १ । १५७ । १)। उदावता। उदावता त्वक्षसा पन्यसा च (ऋ० ६ । १८ । ९) । रिक्थमारैक्। न जामये[7] तान्वो

(१) B³I², गोपा B³, omitted in Bⁿ. (२) -षन् B², -ष- B³I²Bⁿ. (३)-हिष्ठ I². (४) नीरिति I². (५) यौB³. (६) -ना- omitted in I². (७) जामयो I².

रिक्थमारैक् (ऋ० ३ । ३१ । २)। रिक्थमिति किम्। य आयुक्त। य आयुक्त तुजा गिरा (ऋ० ५ । १७ । ३)। य इति किम्। अयुक्त सप्त शुन्ध्युवः (ऋ० १ । ५० । ६)। कुरुश्रवणमावृणि। कुरुश्रवणमावृणि राजानम् (ऋ० १० । ३३ । ४) ॥

अत्र येषां विशेषणपदानामुदाहरणानि न विद्यन्ते तेषां छन्दःपरिपूर्तिः फलम्। योनिमारैगित्यादीनि यानि पदानि तेषु दीर्घत्वमादिस्वरस्य निपात्यते॥

शुनश्चिच्छेपं निदितं नरा वा शंसं पूषणम्।
नरा च शंसं दैव्यं ता अनानुपूर्व्यसंहिताः ॥७८॥

शुनश्चिच्छेपं निदितम्[1]। शुनश्चिच्छेपं निदितं सहस्रात् (ऋ० ५ । २ । ७)। नरा वा शंसं पूषणम्[2]। नरा वा शंसं पूषणमगोह्यम् (ऋ० १० । ६४ । ३)। नरा च शंसं दैव्यम्[3]। नरा च शंसं दैव्यं च धर्तरि (ऋ० ६ । ८६ । ४२)। ता अनानुपूर्व्यसंहिताः। नह्येतेषां[4] त्रयाणां पदानु[5]पूर्व्येण संहितास्ति। संहिता पदप्रकृतिः (२ । १) पदान्तान्पदादिभिः संदधदेति (२ । २) इत्यस्यापवादः। संज्ञाकरणप्रयोजनम्—अनापूर्व्ये[6] पदसंध्यदर्शी-[7]नात् (११ । १३) ॥

यतो दीर्घस्ततो दीर्घा विवृत्तयः ॥७९॥

स्वरान्तरं तु[8] विवृत्तिः (२ । ३) इत्युक्तम्। तत्र यतो दीर्घ[9]स्वरो भवति पुरस्तात्पश्चादुभयतो वा ततो दीर्घा विवृ-

(१) B³I², शुन- to -तम् omitted in B²Bⁿ. (२) B³I², नरा to पूषणम् omitted in B²Bⁿ. (३) B³I², नरा to दैव्यम् omitted in B²Bⁿ. (४) B³I²Bⁿ, नह्येषां B². (५) पदानामानु- B². (६) -पूर्व्येण B². (७) -संदध्य- B². (८) तु. B², omitted in B³I²Bⁿ. (९) B³B²Bⁿ; दीर्घः I², Reg.

त्तयो वेदितव्याः । गोषा इन्द्रो नृषा असि (ऋ० ९ । २ । १०) । य आनयत्परावतः (ऋ० ६ । ४५ । १) । ता आपो देवीरिह मामवन्तु[1] (ऋ० ७ । ४९ । १) । विविधान्युदाहरणानि ॥

द्विषंधयस्तूभयतःस्वरस्वराः ॥ ८० ॥

द्वौ संधी यासां विवृत्तीनां ता द्विषंधयः[2] । तास्तूभयतः-स्वरस्वरा[3] वेदितव्याः[4] । मध्यगत[5]स्वरस्योभयतः स्वरौ[6] यासां विवृत्तीनां[7] ता उभयतःस्वर[8]स्वराः[9] । अभूदु भा उ अंशवे (ऋ० १ । ४६ । १०) । तस्मा उ अद्य समना सुतं भर (ऋ० ८ । ६६ । ७) । संज्ञाप्रयोजनम्—अर्धर्चान्ते कुर्युरथो द्विषंधौ (१५ । १८) ॥

प्राच्यपञ्चाल उपधानिभोदयाः शाकल्यस्य स्थविरस्य ॥ ८१ ॥

प्राच्यपञ्चालपदवृत्तयोऽधस्तात्प्रतिपादिता विवृत्तयः । तासां शाकल्यस्य स्थविरस्य मतेन किञ्चिदुच्यते । प्राच्यपञ्चाललक्षितानां विवृत्तीनामु[10]पधाः[11] प्राच्यपञ्चाल उपधाः । तन्निभास्तादृशा

(१) Reg.; इह मा- । B^2; इह B^3I^2; इहा B^n. (२) ता द्विषंधयः B^2I^2, ता द्विसंधयः B^n, omitted in B^3. (३) तास्तूभयतःस्वरा B^n, तास्तु उभयतःस्वरा I^2, तानूभयतःस्वरःस्वरा B^2, ता उभयतःस्वरःस्वराः B^3. (४) वेदितव्याः $B^2I^2B^n$, omitted in B^3. (५) I^2, मध्यगन- B^n, मध्यगतस्य B^2, मध्यमस्य Reg. (६) I^2 B^n, Reg.; स्वरो B^2. (७) B^2B^n, Reg.; वृत्तोनां I^2. (८) -स्वर- B^n, Reg.; स्वरः B^2; omitted in I^2. (९) मध्य- to -स्वराः omitted in B^3. The readings of I^2 from द्विषंधयः to -स्वराः are from a marginal correction in a different hand for उभयतःस्वरस्वराः which is srtruck out. (१०) वृत्तीनाम् (for विवृत्तीनाम्) Reg. (११) -धा B^3.

उदया[1] यासां तास्तथोक्ताः । एष देवो अमर्त्यः (ऋ० ९। ३। १)। आङ्गिरसो जुह्वे वाजे अस्मिन् (ऋ० १०। १४९। ५)। नो अह प्र विन्दसि (ऋ० १०। ८६। २)॥

इतरा स्थितिः ॥ ८२ ॥

इतरास्माकं शाकलानां स्थितिः प्राकृतो[2]दयत्वं नाम। एष देवो अमर्त्यः (ऋ० ९। ३। १)। आङ्गिरसो जुह्वे वाजे अस्मिन् (ऋ० १०। १४९। ५)। नो अह प्र विन्दसि (ऋ० १०। ८६। २)॥

इति श्री[3]पार्षदव्याख्यायामानन्द[4]पुरवास्तव्य[5]वज्रटपुत्रउवट[6]कृतौ प्रातिशाख्यभाष्ये[7] संहितापटलं द्वितीयम् ॥

---

(१) उदयो I^2. (२) इतरा स्थितिः। इतरा एवास्माकं शाकल्यानां स्थितिर्भवति। यथा प्राकृतोदयत्वं। पुरोजितीव अंधसः। आरे अस्मे च शृण्वते। अध्वर्यो अद्रिभिः सुतम् is supplied in a different hand on the margin in I^2 instead of इतरा स्थितिः to प्राकृतो-which is omitted. (३) B^2 omits श्री- (४)-यां महानन्द- B^2, -यामाहनंद- I^2. (५) श्री-to-वास्तव्य- omitted in B^n. (६) -पुत्रस्य उवट- I^2, -पुत्रोव्वट- B^n. (७) B^3B^n, प्रातिशाख्ये I^2B^2.

उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।
आयामविश्रम्भा[1]क्षेपैस्त उच्यन्ते[2] ॥ १ ॥

प्रथमपटले संज्ञापरिभाषा अनुक्रम्य द्वितीयेन संहितागतलोपागमवर्णविकारानुक्त्वा अथेदानीं स्वरसंहितामाह । उदात्तश्चानुदात्तश्च स्वरितश्च संक्षेपतः स्वरास्त्रयो वेदितव्याः । इदानीं तानुप[3]लक्षयितुमाह । आयामविश्रम्भाक्षेपैस्त उच्यन्ते[4] । आयामो नाम वायुनिमित्तमूर्ध्वगमनं गात्राणाम् । तेन य उच्यते स उदात्तः । आ । ये[5] । विश्रम्भो[6] नामाधोगमनं गात्राणां वायुनिमित्तम् । नः । नौ । आक्षेपो नाम तिर्यग्गमनं गात्राणां वायुनिमित्तम् । क्वं । न्यक् ॥

अक्षराश्रयाः[7] ॥ २ ॥

स्वरोऽक्षरमित्युक्तम् । अक्षरमाश्रयी[8]भूतं येषां ते तथोक्ताः । स्वराणामक्षरैः सह धर्म[9]धर्मिसंबन्धो न तु व्यञ्जनैः ॥

एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ॥ ३ ॥

उदात्तानुदात्तौ स्वरौ[10] तयोः स्वरितः स्वरो निष्प[11]द्यत इत्याह[12] । एकाक्षरसमावेशे सति पूर्वयोरुदात्तानुदात्तयोः स्वरितः स्वरो निष्प-[13]

---

(१) -स्रंभा- B². (२) B³Bⁿ; उच्यंतेक्षराश्रयाः B²I², Reg., M.M. (३) तान् B³. (४) The Commentary उदात्तश् to उच्यन्ते is according to B³I²Bⁿ; B² and Reg. read, instead of it, उदात्तादिभेदेन संक्षेपतस्तावत्स्वरास्त्रयो वेदितव्याः । तानुपलक्षयति । आयामेति । (५) B²; ये omitted in B³I², Reg.; आ । ये omitted in Bⁿ. (६) -स्रंभो B². (७) A separate Sūtra in B³I²Bⁿ; a part of the Commentary of the preceding Sūtra in B² and Reg. (८) B³Bⁿ; -श्रया- I²; -श्रय- B², Reg. (९) सम- (instead of धर्म-) in B². (१०) Bⁿ adds तंत्रौ after स्वरौ. (११) निःप- B³. (१२) उदात्ता- to -त्याह omitted in B². (१३) निःप- B³.

यते। ते॑ऽवर्धन्त स्वतवसः[1] (ऋ० १। ८५। ७)। ब्राह्म-णो॑ऽस्य मुख॑मासीत्[2] (ऋ० १०। ९०। १२)। स्रुचीव घृतं चम्वीव[3] (ऋ० १०। ९१। १५)। त्र्यम्बकं यजामहे[4] (ऋ० ७। ५९। १२)। द्रुवंन्नः सर्पिरासुतिः[5] (ऋ० २। ७। ६)॥

तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा ॥ ४ ॥

तस्य स्वरितस्य स्वरस्य पृथक्कृत्य द्विस्वरसंभूतस्य व्युत्पाद्य कथनं[6] क्रियते। उदात्तात्सकाशादुदात्ततरादावर्धमात्रा वेदितव्या। त्र्यम्ब-कम्[7] (ऋ० ७। ५९। १२)। अर्धमेव वा। द्विमात्रस्य स्वरस्यायमुदात्तांशः कथितः। ते॑ऽवर्धन्त[8] (ऋ० १। ८५। ७)॥

अनुदात्तः परः शेषः स उदात्तश्रुतिः ॥ ५ ॥

स्वरितस्य परः शेषो यद्यर्ध[9]मात्रो यदि मात्रिकः स उदात्त-श्रुतिरुदात्तवच्छ्रूयते। यथा त्रपुताम्रयोः संयोगे सति कांस्यस्य[10] धात्वन्तरस्योत्पत्तिरेवमिहापि द्रष्टव्या॥

न चेत्।

उदात्तं वोच्यते किंचित्स्वरितं वाक्षरं परम् ॥ ६ ॥

---

(१) स्वतवसः omitted in B². (२) ्मु—त् omitted in B². (३) I²Bⁿ; चम्वीव omitted in B², Reg.; चम्वीव सोमः B³. (४) यजामहे omitted in B². (५) स—तिः omitted in B². (६) I²B³ (द्विः- B³; I² corrects व्युत्पाद्य कथनं to व्यु-त्पादनं), स्वरस्य द्विस्वरसंभूतस्य पृथक् व्युत्पाद्य कथनं Bⁿ, द्विःस्वरसंभूतस्य स्वरस्य पृथक्कृत्य व्युत्पाद्य कथनं B². (७) B³Bⁿ, त्र्यम्बकम् omitted in B²I². (८) B³BⁿB², तेऽवर्धन्त omitted in I². (९) यद्यध्यर्ध- B³. (१०) B³Bⁿ;- स्य on the margin in I². कांस्यस- B², कांस्य Reg.

चेन्छन्दो यद्यर्थे ।[1] यदि न भवत्युदात्तमक्षरं स्वरितं वा परम्[2] । ते ऽवर्धन्त[3] (ऋ० १ । ८५ । ७) । दिवी॑व चक्षुः[4] (ऋ० १ । २२ । २०) । द्रूवंन्नः स॒र्पिरा॑सुतिः (ऋ० २ । ७ । ६) । यदि तूदात्तं स्वरितं वा परं स्यात्तदा[5]ऽनुदात्तः परः शेषः स्यात् । स च कम्प[6] इत्युच्यते बह्वृचैः । न यो युच्छति ति॒ष्यो॑ ३ यथा॑ दि॒वो॑ ३ स्मे (ऋ० ५ । ५४ । १३) । अ॒भी॑३दमेकमेको॑ अस्मि[7] (ऋ० १० । ४८ । ७) । अ॒हं न्य१॒॑न्यं[8] सहसा[9] (ऋ० १० । ४९ । ८) । उदात्त[10]परस्योदाहरणम् । श॒तच॑क्रं यो॒ ३ ह्यो॑ वर्तनिः (ऋ० १० । १४४ । ४) । स्वरितपरस्योदाहरणम् ।

एवं च कृत्वोदात्तपूर्वाः सर्व एव[11] कम्पाः स्युः । अनुदात्तपूर्वेषु तु क्रियमाणेषु मात्राधिक्यं स्यात् । स च दोषः । अयथामात्रं वचनं स्वराणाम् (१४ । १०) इति । दर्शयति चोदात्तपूर्वत्वं कम्पानां क्रमहेतौ— स्वरैकदेशं स्वरितस्य चोत्तरं यदा निहन्यात् (११ । ५६) इति ॥

उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम् ॥ ७ ॥

[12]एवमुदात्तानुदात्तसंधौ त्रीन्स्वरितानभिधा[13]य अथेदानीमेकपदप्रभवानाह स्वरितानुदात्तस्वरूपव्याचिख्यासया । सर्वस्मि-

---

(१) B^2B^n,- र्थो without । B^3I^2. (२) परं after अक्षरं in B^3I^2. (३) B^2B^n,-न्त स्वतवसः B^3I^2. (४) B^2B^n, Reg.; चक्षुराततं B^3I^2. (५) -द- B^2. (६) B^2B^n, कंप्य B^3I^2 and Reg. (७) B^3, Reg., I^2 (एकम् omitted in I^2); एकः (instead of एको अस्मि) B^2B^n. (८) -न्यं omitted in B^2, (९) B^n, Reg.; सहसा- B^2; सहसा सहः B^3I^2. (१०) इत्युदात्त- B^2. (११) B^3I^2; एवास्य (instead of एव) B^n; सर्वं एव before उदात्तपूर्वाः in B^2, Reg. (१२) Before एवम् B^2 adds पदे उदात्तपूर्वं स्वरितमक्षरं श्रूयमाणमनुदात्तसंज्ञं वेदितव्यं । संज्ञाकरणस्य प्रयोजनं । न चेदुदात्तस्वरितोदयमिति । स्वरितत्वे प्रतिषिद्धे तस्यानुदात्तश्रवणार्थं । अग्ने तव त्ये । ६।३।. (१३)-संधा- (instead of -धा-) B^2.

न्नेव[1] पद एकमक्षरमुदात्तं वा[2] स्वरितं वा भवति। शेषमनुदात्तम्। अयं तावदुत्सर्गः। सर्वानुदात्तं त्व[3]ल्पम्। तथा ह्युदात्तैर्वा स्वरितैर्वा पदव्यपदेशः क्रियते। आद्युदात्तम्। इन्द्रः। होता। मध्योदात्तम्। अग्निना। अग्निभिः। अन्तोदात्तम्। अग्निः। जनिता। उदात्तम्। यः। नु। कः[4]। आदिस्वरितम्। स्वर्णरे[5]। मध्यस्वरितम्। हृदय्यया। अन्त[6]स्वरितम्। कन्या। स्वरित एव[7]। कं। स्वः। द्विरुदात्तः[8]। बृहस्पतिः। त्रिरुदात्तः[9]। इन्द्राबृहस्पती। सर्वानुदात्तः[10]। वः। नः। एत एकादश स्वराः पदेषु प्रत्येतव्याः। तत्प्रतिपादनार्थमाह। एकस्मिन्पद उदात्तपूर्वं स्वरितमक्षरमनुदात्तं प्रत्येतव्यम्। सांहितिकस्तस्यायं धर्मोऽनुदात्तस्य सत उदात्तपरस्य[11]। इन्द्रः। होता॥

अतोऽन्यत्स्वरितं स्वारं जात्यमाचक्षते पदे ॥८॥

अतः प्रकृतादुदात्तपूर्वात्स्वरितात्स्व[12]राद्यदन्यदेकस्मिन्नेव[13] पदे स्वरितं स्वारं तज्[14] जात्यमाचक्षते व्याळिप्रभृतयः। किमन्यत्वम्[15] अत्राभिप्रेतम्। अपूर्वत्वं वा नीचपूर्वत्वं वा। अपूर्वोदाहरणम्। स्वः। कं। न्यक्। नीचपूर्वस्य। कन्या। हृदय्यया। जात्या[16] स्वरूपेणैवोदात्तानुदात्तसंगतिं विना जातो जात्यः। यत्तूक्तं[17] स्वरित-

(१) B³I²Bⁿ; न्नेक- B², Reg. (२) वा B³I²Bⁿ; omitted in B², Reg. (३) स्व- Bⁿ, त्वु- Reg. (४) I²; या। नु। कः B³Bⁿ; यः। नु। कं B³, Reg. (५) -र्णरं B². (६) अंतः- B². (७) B³BⁿI² (I² corrects स्वरितं to स्वरित); स्वरितमेव B², Reg. (८) -दात्त Bⁿ. (९) दात्त Bⁿ. (१०) -दात्त Bⁿ. (११) उदात्तपूर्वस्य Bⁿ. (१२) स्वा-B². (१३) स्मिन् B². (१४) तज् omitted in B². (१५) अन्यत्वम् B³; अन्यत्पदम् B²I²Bⁿ, Reg. (१६) Reg.; M. M.; जात्या corrected to जात्य- I²; जात्य- B³B²Bⁿ. (१७) यत्तुक्तं Bⁿ, यदुक्तं B².

स्योदात्तानुदात्तसंगतिरिष्यते तत्तूदात्त[1]परस्यैवानुदात्तस्य सफलम्[2]। तस्योदात्तपरस्य स्वरितपरस्य च कम्पः। कन्या३ वारवायती (ऋ० ८। ९१। १)। का३भीशव: कथं शेक कथा यय[3] (ऋ० ५। ६१। २)॥

उभाभ्यां तु परं विद्यात्ताभ्यामुदात्तमक्षरम्। अनेकमप्यनुदात्तम्॥ ९॥

तुशब्दो विशेषणार्थः। उभाभ्यां तु जात्योदात्तपूर्वाभ्यां तु परं विद्यात्ताभ्यां परं जानीयात्। उदात्तमक्षरमुदात्तश्रुति। उदात्तवद्धि प्रचितः श्रूयते[4]। अनुदात्तमनेक[5]मपि बहून्यप्यक्षराणि। अत्राप्येतदेव कथ्यते यथा सर्वस्मिन्नेव पद एकमक्षरमुदात्तं वा[6] स्वरितं वा भवति शेषमनुदात्तमिति। मादयस्व[7] (ऋ० ८। १०३। १४)। अदंब्धव्रतप्रमतिः (ऋ० २। ९। १)॥

न चेत्पूर्वं तथागतात्॥१०॥

चेच्छब्दो यद्यर्थः[8]। यदि न भवति पूर्वं तथागतादक्षरात्स्वरितगतादुदात्तगताद्वा[9] स्वरितत्वं प्राप्तादुदात्तत्वं वा प्राप्तात्। यदि त्वेवंभूतादक्षरात्पूर्वं भवति अथ प्रकृत्यैवावतिष्ठते। मादयस्व

(१) B², तदुदात्त- Bⁿ. (२) B², फलं Bⁿ; तत्र त्वनुदात्तपरस्यैव (instead of यत्तूक्तं to सफलम्) I², Reg.; B³ corrects यत्तूक्तं स्वरितस्योदात्तानुदात्तसंगतिरिष्यते। तत्तूदात्तपरस्यैवानुदात्तस्य (सफलम् being omitted) to तत्र त्वनुदात्तपरस्यैव। (३) B³I², Reg.; कथं to यय omitted in B²Bⁿ. (४) B³,-श्रुतिः उदात्तवद्धि प्रचितः श्रूयते (विसर्जनीय after श्रुति supplied above the line) I², -श्रुतिः उदात्तवद्धिप्रचित्त श्रूयते B²,-श्रुतिरुदात्तवद्धिप्रचितः श्रूयते Bⁿ,-श्रुति उदात्तवद्धि प्रचितं श्रूयते Reg. (५) एक- (instead of अनेक-) B². (६) वा B², omitted in B³I²Bⁿ. (७) मादयस्व स्वर्णरे Reg. (८) B³B²I²,-थे Bⁿ. (९) वा omitted in Reg.

स्वर्णरे (ऋ० ८ । १०३ । १४) । अदब्धव्रतप्रमतिर्वसिष्ठः (ऋ० २ । ९ । १) ॥

उदात्तवत्येकीभाव उदात्तं संध्यमक्षरम् ॥११॥

इदानीं पदान्तपदाद्योः संधावुदात्तानुदात्तस्वरित[1]प्रचितानां बलाबलमाह । यस्मिन्नेकीभावे पूर्वमुत्तरं वोदात्तं भवति इतरस्तु चतुर्णां स्वराणामन्यतमः स उदात्तवानेकीभावः । तस्मिन्नुदात्तवत्येकीभाव उदात्तं संध्यमक्षरं जानीयात् । द्वयोरुदात्तयोः । तानि नरा जुजुषाणोप यातम्[2] (ऋ० २ । ३९ । ८) । इन्द्रेहि मत्स्यन्धसः (ऋ० १ । ९ । १) । अत्र मध्यगत आकार उदात्तोऽधस्तनं स्वरितमुपरितनं चानुदात्तमुदात्तीकरोति । शतं यथेमं शरदो नयातीन्द्रः (ऋ० १० । १६१ । ३) । प्रचित उदात्तेन लुप्तः ॥

अनुदात्तोदये पुनः स्वरितं स्वरितोपधे ॥१२॥

उदात्तस्तावत्सर्वान्स्वरान् लुम्पति । अथ स्वरितोऽनुदात्तं लुम्पत्येतद्दर्शयति । अनुदात्तोदये पुनरयं विशेषः । स्वरितोपधोऽनुदात्तः स्वरितमापद्यते । चोरं सर्पिर्मधूदकम् (ऋ० ९ । ६७ । ३२) ॥

इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु च ।
उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरेत् ॥ १३॥

ह्रस्वयोरिकारयोः प्रश्लेषे क्षैप्रसंधिषु चाभिनिहितसंधिषु चाविशेषेणोदात्तपूर्वरूपेष्वनुदात्तोत्तररूपेषु शाकल्या[3]चार्यस्य मतेनैवमाचरेत् । एवमिति स्वरितनिर्देशः ।[4] स्रुचीव घृतम् (ऋ० १० । ९१ । १५) । योजा न्विन्द्र ते हरी (ऋ० १ । ८२ । १) । तेऽवर्धन्त स्वतवसः (ऋ० १ । ८५ । ७) । इकारयोरिति किम् । सद्यो जज्ञानो

---

(१) उदात्तस्वरित- B^3. (२) B^2, Reg.; यातम् omitted in $B^3I^2B^n$. (३) $B^3I^2B^n$;-कल्यस्या- B^2, Reg. (४) After -निर्देशः । B^3 adds अभीहि मन्यो तवस्तवीयान्, B^2 अभीहि ।.

वि ह्वीमिद्धः (ऋ० १० । ४५ । ४)। उदात्तपूर्वरूपेष्विति किम् । उतेमाहुर्नैषो अस्तीत्येनम् (ऋ० २ । १२ । ५)। स तु वस्त्राण्यध पेशनानि (ऋ० १० । १ । ६)। हिरण्यशृङ्गोऽयो अस्य पादाः (ऋ० १ । १६३ । ९) ॥

माण्डूकेयस्य सर्वेषु प्रश्लिष्टेषु तथा स्मरेत् ॥१४॥

माण्डूकेया[1]चार्यस्य मतेन सर्वेषु प्रश्लिष्टेषू[2]दात्तपूर्वरूपेषु तथा स्मरेत् । न तु कुर्यात् । एन्द्र याहि हरिभिः (ऋ० ८ । ३४ । १)। वि ह्वीमिद्धो अख्यदा रोदसी (ऋ० १० । ४५ । ४) ॥

इत्येकीभाविनां धर्माः ॥ १५ ॥

एवंप्रकारा एकीभाविनामक्षराणां धर्माः प्रत्येतव्याः—उदात्तवत्येकीभावे (३ । ११) इत्यत आरभ्य । समाप्त्यर्थो वेतिशब्दः[3] ॥

परैः प्रथमभाविनः ॥ १६ ॥

परैस्तूदात्तैर्य एकीभावास्ते प्रथमभाविनः स्युः । द्वयोरप्याचार्ययोर्मतेनोदात्तभाविनः स्युः । उदात्तवत्येकीभावे (३ । ११) इत्येतद्धि प्रथममुक्तम् । आच्या जानु दक्षिणतः (ऋ० १० । १५ । ६) प्रास्य पारं नवतिं नाव्यानाम् (ऋ० १ । १२१ । १३) ॥

उदात्तपूर्वं नियतं विवृत्त्या व्यञ्जनेन वा ।
स्वर्यतेऽन्तर्हितं न चेदुदात्तस्वरितोदयम् ॥१७॥

उदात्तः पूर्वो य[4]स्मादित्युदात्तपूर्वम् । उदात्तपूर्वं नियतमनुदात्तं विवृत्त्या व्यञ्जनेन वान्तर्हितमक्षरं स्वर्यते । य इन्द्र सोमपातमः (ऋ० ८ । १२ । १)। अग्निमीळे पुरोहितम् (ऋ० १ । १ । १)।

---

(१) -केयस्या-Reg. (२) प्रश्लेषेषु उ- B^2. (३) B^2, समाप्तौ इतिशब्दःB^n, समाप्त्यर्थो वा इतिकरणः B^3, समाप्त्यर्थे इतिकरणः I^2.
(४) B^n, उदात्तपूर्वो य- B^2; उदात्तः पूर्वो अ- B^3I^2.

इन्द्रे॑ण सं हि दृक्ष॑से[1] (ऋ० १ । ६ । ७)। न चेदुदात्तस्वरि-तोदयमिति किम्। ज्या इ॒यं सम॑ने पा॒रय॑न्ती (ऋ० ६ । ७५ । ३)। इन्द्र॒ सोमं॑ सोमपते॒ पिबे॒मम् (ऋ० ३ । ३२ । १)। क्व१॒॑ वो॒ऽश्वाः क्वा३ भीश॑वः (ऋ० ५ । ६१ । २)॥

वैवृत्ततैरोव्यञ्जनौ क्षैप्राभिनिहितौ च तान्।
प्रश्लिष्टं च यथासंधि स्वारानाचक्षते पृथक् ॥१८॥

विवृत्तौ भवो वैवृत्तः। स्वरान्तरं तु विवृत्तिः (२ । ३) इत्युक्तम्। तिरोऽन्तर्धानं[2] व्यञ्जनं यस्येति तैरोव्यञ्जनः। क्षै[3]प्राभिनि-हितौ च प्रश्लिष्टं च। तानेतान्यथासंधि। यस्मिन्संधौ यथासंधि[4]। तद्यथा क्षिप्रसंधौ भवः[5] क्षैप्र इत्यादि। स्वारान्[6] कथयन्ति व्याळि-प्रभृतयः। पृथङ् नाना। एते चाधस्तात्सोदाहरणाः प्रतिपादिताः। संज्ञार्थं पुनर्वचनम्॥

स्वरितादनुदात्तानां परेषां प्रचयः स्वरः।
उदात्तश्रुतितां यान्त्येकं द्वे वा बहूनि वा ॥१६॥

स्वरितात्परेषामनुदात्तानां प्रचयः[7] स्वरो भवति। संहितायां प्रचयः[8] स्वरोऽधस्तान्न प्रतिपादित[9] इत्यत आह। उदात्तश्रुतितां यान्ति। उदात्तश्रुतीनि भवन्ति। एकमक्षरं द्वे वाक्षरे बहूनि वा-[10] क्षराणि। अ॒ग्निमी॑ळे पु॒रोहि॑तम् (ऋ० १। १ । १)। नास॑त्याभ्यां ब॒र्हिरि॑व (ऋ० १ । ११६ । १)। इ॒मं मे॑ गङ्गे॑ यमुने सरस्वति[11]

---

(१) B³I²; इन्द्रे॑ण—दृक्षसे in B² and दृक्षसे in Bⁿ omitted. (२) -र्धान- Reg. (३) क्षि- B³. (४)-संधिः B². (५) B³I²Bⁿ, क्षैप्रसंधौ (instead of क्षिप्रसंधौ भवः) B². (६) स्वारान् B³I²; स्वरान् B²Bⁿ, Paris MS. (cp. Reg.). (७) प्रचय B³. (८) प्रचय B³. (९) प्रतिपादित B³I²Bⁿ; निरूपित B², Reg. (१०) चा- B³. (११) B³I²B²; this quotation given after the next one in B², Reg.

(ऋ० १० । ७५ । ५) । वाजे॑वाजेऽवत वाजिनो नः[1] (ऋ० ७ । ३८ । ८) ॥

केचित्त्वेकमनेकं वा नियच्छन्त्यन्ततोऽक्षरम् ।
आ वा शेषात् ॥ २० ॥

तुशब्दो विशेषणार्थः । केचित्त्वाचार्या एकमक्षरमनेकं वाक्षरं द्वे वाक्षरे[2] नियच्छन्ति नीचीकुर्वन्त्यन्तत आरभ्य निर्निमित्तमेव । उदात्तं स्वरितं विनेत्यर्थः । आ शेषाद्वा । यावदेकमक्षरमनेकं वाक्षरं द्वे वाक्षरे[3] नियच्छन्ति । एकेनापि प्रचितस्वरूपं दर्शितं भवत्येवेत्यर्थः ॥

नियुक्तं तूदात्तस्वरितोदयम् ॥ २१ ॥

तुशब्दोऽवधारणार्थः । सर्व एवाचार्या नियुक्तं निश्चितमविप्रतिपत्त्यानुदात्तं कुर्वन्त्युदात्तोदयं स्वरितोदयमु[4]दात्तपरं स्वरितपरं च । वाजे॑वाजेऽवत वाजिनो नो धने॑षु[5] (ऋ० ७ । ३८ । ८) । तमे॒व ऋषिं तमु॑ ब्रह्माणमाहुर्यज्ञन्यम्[6] (ऋ० १० । १०७ । ६) ॥

नियमं कारणादेके प्रचयस्वरधर्मवत् ।
प्रचयस्वर आचारः शाकल्यान्यतरेययोः ॥२२॥

नियमं नियमनमनुदात्तभावं कारणादेके मन्यन्त आचार्याः । किं तत्कारणमिति चेत् । प्रचय[7]स्वरधर्म[8]युक्त[9]मध्ययनं यथा स्या-

---

(१) वाजिनः B³. (२) वाक्षरे B², अक्षरे B³I²Bⁿ. (३) वाक्षरे B², Reg., M. M.; अक्षरे B³I²; omitted in Bⁿ. (४) B², स्वरितोदयम् omitted in B³I²Bⁿ. (५) Instead of this whole quotation B² has वाजिनो हवेषु । (६) B³ I²Bⁿ; ब्रह्माणमाहुर्यज्ञन्यं (instead of the whole quotation) B², Reg. (७) प्रचयः B². (८) -धर्म- omitted in Reg. (९) B²Bⁿ., Reg.; -संयुक्त- B³I².

दिति । यदि ह्युदात्तस्वरितोदयं प्रचितं नानुदात्तं भवेदथ[1] प्रचितो-दात्तयोः को विशेषः स्यादिति । प्रचितो हि स्वरितोदात्तपरोऽनुदात्तो भवति न तूदात्तः । एवं च कृत्वा प्रचित[2]स्वर आचारोऽयं शाकल्यस्यान्यतरेयस्य च मत एतत्[3]कारणको द्रष्टव्यः । उक्तान्ये-वोदाहरणानि ॥

परिग्रहे त्वनार्षान्तात्तेन वैकाक्षरीकृतात् ।
परेषां न्यासमाचारं व्यालिस्तौ चेत्स्वरौ परौ ॥२३॥

तुशब्दो विशेषणार्थः । एतावानेव विसंवादोऽधस्तनेन[4] स्वरलक्षणेन सह । परिग्रहो वेष्टकः । एतावान्वेष्टके[5] विशेषः । अ[6]नार्षान्तात् । अनार्षो य इतिकरण उच्यते स च द्व्यक्षर आद्युदात्तः पदाभ्यासस्य[7] मध्ये वर्तमानः पूर्वपदान्तमादिना स्पृशति द्वितीयपदादिमन्तेन स्पृशति[8] । तस्यायं विकारः पदसंधिरुक्तः । स चोत्तरपदादिर्[9] व्यञ्जनादिः स्वरादिर्वा भवति । यदि व्यञ्जनादिस्तदा प्रचये प्राप्तेऽयमपवादः । अनार्षादितिकरणात्परेषामक्षराणां न्यासमनुदात्तत्वमाचारं[10] मन्यते व्यालिराचार्यः । यदा तु स्वरादिर्भवति तदा तेन[11] स्वरादिनैका[12]क्षरीकृतात्परेषां न्यासमिति[13] तुल्यम् । तौ यदि स्वरौ परौ भवत उदात्तस्वरितौ ।

---

(१) अथ च I². (२) प्रचितः 1². (३) मते एतत् B², Reg.; मते स एतत् B³; मते स तत् I²; एतत् Bⁿ. (४) B³I²Bⁿ; -धस्तन- B², Reg. (५) वेष्टको B³. (६) आ- B². (७) B³I², पदाभ्यास- B², पराभ्यासस्य Bⁿ, पदाभ्यां स Reg. (८) द्वितीय- to स्पृशति omitted in B². (९) Bⁿ; उत्तरपदादिर् omitted in B³I²; स च omitted in B², Reg. (१०) B³I²Bⁿ; अनुदात्तत्वभावम् B², Reg. (११) B³I², Reg.; -नेन B²Bⁿ. (१२) -कः B³. (१३) B³, Reg.; न्यासमेति Bⁿ; न्यासमिच्छंति B²I².

सत्यानृते अवपश्यन्[१] । सत्यानृते इति सत्यानृते[२] । (ऋ० क० ७ । ४६ । ३) । सुप्राव्यः इति सुप्रऽअव्यः । (ऋ० क० २ । १३ । ९) । तेन वै[३]काचरीकृतात् । अललाभवन्तीरित्यललाऽभवन्तीः । (ऋ० क० ४ । १८ । ६) । तौ चेत्स्वरौ पराविति[४] किम् । शतक्रतो इति शतऽक्रतो । (ऋ० प० १ । ४ । ८) अविहर्यतक्रतो इत्यविहर्यतऽक्रतो[५] । (ऋ० प० १ । ६३ । २) ॥

यथा संधीयमानानामनेकीभवतां स्वरः ।
उपदिष्टस्तथा विद्यादक्षराणामवग्रहे ॥ २४ ॥

इदानीमवग्रहस्वरूपं निरूपयति । यथा येन प्रकारेण संधीयमानानामेकीक्रियमाणानामनेकीभवतां प्रश्लेषमप्राप्नुवतां विवृत्तिव्यञ्जनतिरस्कृतानां स्वर उपदिष्टः—उदात्तपूर्वं नियतं विवृत्त्या व्यञ्जनेन वा । स्वर्यतेऽन्तर्हितम् (३ । १७) स्वरितादनुदात्तानाम् (३ । १९) इत्यादिना[६] च तथाक्षराणामवग्रहेऽपि जानीयात्[७] । ननु च यो[८] विवृत्तौ स्वर उक्तः स इह[९] भवत्येव । कस्मादयं यत्नः कृतः । मात्राकालव्यवधानत्वान्न[१०] प्राप्नोति । उषःऽउषः । (ऋ० प० १० । ८ । ४) ।

---

(१) B^3I^2; जनानां added in B^2, Reg.; सत्यानृते अवपश्यन् omitted in B^n. (२) B^3B^n; सत्यानृते इति सत्यानृते omitted in B^2I^2 and Paris MS. (cp. Reg.). (३) B^2 ;B^3 corrects तेनैवै- to तेन वै-; तेनैवै- B^n; तेनैवे- I^2. (४) चेदिति B^2. (५) अविहर्यतक्रतो to -क्रतो omitted in B^2. (६) इति (instead of इत्यादिना) B^2. (७) B^2, तथान्वक्षराणामवग्रहे विजानीयात् B^n, तथा जानीयात् । अक्षराणामवग्रहे क्रियमाणे B^3I^2. (८) $B^3I^2B^n$; यः after विवृत्तौ in B^2, Reg. (९) B^3 I^2B^n; इहापि B^2, Reg. (१०) B^3; मात्राकालव्यवधानात् न B^2, Reg.; मात्राकालत्वात् न I^2; मात्राकालत्वाद्व्यवधानं B^n.

नावाऽइव । (ऋ० प० १ । ६७ । ७) । गणऽपतिम् । (ऋ० प० २ । २३ । १) । गोऽपते । (ऋ० प० ८ । २१ । ३) । पुरःऽहितम् । (ऋ० प० १ । १ । १) । अनेकीभवतामिति किम् । अन्हाऽ-अन्हा[1] । (ऋ० प० १०।३७ । ६) ॥

पद्यादीँस्तु द्व्युदात्तानामसंहितवदुत्तरान् ॥ २५ ॥

पद्यं पदार्धम् । द्व्युदात्तानां पदानां पद्यादीनुत्तरानसंहितवज्जानीयात्स्वरविधौ । ऋतस्य पन्थामन्वेतवा उ (ऋ० ७ । ४४ । ५) । नैषा गव्यूतिरपभर्तवा उ (ऋ० १० । १४ । २) । द्व्युदात्तानामिति किम् । अश्वपते गोपत उर्वरापते (ऋ० ८ । २१ । ३) ॥

जात्यवद्वा तथा वान्तौ तनू शचीति पूर्वयोः ॥ २६ ॥

जात्येन तुल्यं जात्यवत् । यथा जात्यस्यान्तो निहन्यत उदात्ते परभूते । एवं[2] तनूशचीपदयोः[3] पूर्वपदयोः[4] सतोरन्तो निहन्यते । तथा वान्तौ कुर्याद्यथाधस्तात्प्रतिपादितम् । तनूनपादुच्यते गर्भं आसुरः (ऋ० ३ । २९ । ११) । इन्द्रं कुत्सो वृत्रहणं शचीपतिम् (ऋ० १ । १०६ । ६) । असंहितवद्वा कुर्यात् । तनूनपादुच्यते (ऋ० ३ । २९ । ११) । इन्द्रं कुत्सो वृत्रहणं शचीपतिम्[5] (ऋ० १ । १०६ । ६) । संहितवद्वा कुर्यात् । तनूनपादुच्यते । वृत्रहणं शचीपतिम् ।

---

(१) अह्नाऽअह्ना B³, अह्ना०अह्ना I² (अनेकी- to -ह्ना on the margin in I²), अह्नाह्ना B²Bⁿ, अह्ना Paris MS. (cp. Reg.). (२) एवं च I². (३) B³I²Bⁿ, तनूशचीति पूर्वपदयोः B², तनूशचीतिपदयोः Reg. (४) B³I²Bⁿ, Reg.; पूर्वपद्ययोः omitted in B². (५) य शचीपतिं I².

पृथग्वाशब्दकरणं[1] तुल्ययोगनिवृत्त्यर्थम् । तेनैवत्सिद्धं जात्यवक्षेवाध्ययनं यथा स्यादितरयोर्मा भूदिति । द्व्युदात्तानामित्येव । तनूनपात्पथ ऋतस्य (ऋ० १० । ११० । २) । शचीपते शचीनाम् (ऋ० १० । २४ । २) । ननु पदानां लक्षणं न कर्तव्यम् । सिद्धेषु हि पदेषु संहिताप्रवृत्तिः[2] । सत्यमेव । यथा[3] पुष्पाहारस्य फलाहरणं दार्वाहारस्य मध्वाहरणम् । एवमेतत् ॥

त्रिमात्रयोरुत्तरयोरन्त्यापि प्रचयस्वरे । मात्रा न्यस्ततरैकेषाम् ॥ २७ ॥

त्रीणि त्रिमात्राण्युक्तानि । तत्र त्रिमात्रयोरुत्तरयोरन्त्यापि मात्रा प्रचयस्वरे वर्तमानैकेषामाचार्याणां मतेन न्यस्ततरा नीचतरा स्यात् । उपरिं स्विदासी३त् (ऋ० १० । १२९ । ५) । न त्वा भीरिंव विन्दतीँ३ (ऋ० १० । १४६ । १) ॥

उभे व्याळिः समस्वरे ॥ २८ ॥

व्याळिस्त्वाचार्य उभे अन्त्ये मात्रे उभयोस्त्रिमात्रयोरितराभ्यां समस्वरे मन्यते । प्रचितस्वरे इत्यर्थः । उपरिं स्विदासी३त् (ऋ० १० । १२९ । ५) । न त्वा भीरिंव[4] विन्दतीँ३ (ऋ० १० । १४६ । १) ॥

असंदिग्धान्स्वरान्ब्रूयात् ॥ २९ ॥

संदेहो नामास्पष्टता । उदात्तानुदात्त[5]स्वरितप्रचितान्स्वरान-[6] संदेहजनकान्ब्रूयात् ॥

---

(१) पृथग्वा । शब्दकरणं B^2, पृथग्वा सदकरणं B^3I^2, पृथक् वा । सदकरणं B^n. (२) -प्रकृतिः Reg. (३) B^2B^n, Reg.; यदि नाम यथा B^3I^2. (४) न त्वा भीरिव omitted in B^n, न त्वा omitted in B^2. (५) $B^3B^2B^n$; -अनुदात्त- omitted in I^2, Reg. (६) स्वरान- B^2I^2, Reg.; स्वरान् न B^3B^n

अविकृष्टान् ॥ ३० ॥

विकर्षो नामासुश्लिष्टता[1] स्वराणां स्वरैः सह। स्वरसंधीनुपश्लिष्टान्[2] कुर्यादित्यर्थः ॥

अकम्पितान् ॥ ३१ ॥

कम्पनं नाम स्वराश्रितपाठदोषः प्रायेण दाक्षिणात्यानां भवति। तमुपलक्ष्य[3] स वर्ज्यः[4] ॥

स्वरितं नातिनिर्हण्यात् ॥ ३२ ॥

नातिप्रेरयेत्स्वरितमाक्षेपेण ॥

पूर्वौ नातिविवर्तयेत् ॥ ३३ ॥

पूर्वावुदात्तानुदात्तावुक्तौ ।[5] नातिवि[6]वर्तयेदायामविश्र[7]म्भाभ्यां नातिदूरं नयेत् ॥

जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च।
एते स्वाराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः ॥३४॥

इति श्री[8]पार्षदव्याख्यायामानन्दपुरवास्तव्य-
वज्रटपुत्र[9]उवट[10]कृतौ प्रातिशाख्यसूत्र-[11]
भाष्ये तृतीयं स्वर[12]पटलम्[12] ॥

---

(१) Reg., विकृष्टान्। विकर्षो नामासुश्लिष्टता I^2, विकर्षो नामाश्लिष्टता। B^3, विकर्षो नामाप्रश्लिष्टता B^2, अविकृष्टो नाम सुश्लिष्टता B^n. (२) $B^3 I^2 B^n$, Reg.; अप्रश्लिष्टान् B^2. (३) B^2, Reg.; उपसंलक्ष्य B^n; उपलभ्य $B^3 I^2$. (४) वर्ज इत्यर्थः B^2. (५) $B^2 B^n$, Reg; उक्तौ तौ $B^3 I^2$. (६) -वि- omitted in I^2. (७) -स्र- B^2. (८) $B^2 B^n$ omit श्री-. (९) B^2 omits आनन्द- — -पुत्र-, B^n omits -वज्रटपुत्र- (१०) -वास्तव्योव्वट- B^n. (११) B^3 omits -सूत्र- (१२) $B^3 I^2$ omit स्वर- (१३) B^3 adds समाप्तं.

चत्वारः संधयः । तद्यथा पूर्वे स्वराः व्यञ्जनान्युत्तराण्यनुलोमा अन्वक्षरसंधयः । पूर्वाणि व्यञ्जनान्युत्तरे स्वराः प्रतिलोमा अन्वक्षरसंधयः । स्वरसंधिस्तु प्रश्लेषाद्यनेकप्रकार उक्तः । इदानीं परिशिष्टो[1] व्यञ्जनसंधिरुच्यते[2] —

स्पर्शाः पूर्वे व्यञ्जनान्युत्तरा-
व्यास्थापितानामवशंगमं तत् ॥ १ ॥

स्पर्शाः पूर्वे सर्वाण्येव व्यञ्जनान्युत्तराणि । आस्थापितानां संधीनां मध्येऽ[3]वशंगमं नाम तत्संधानं वेदितव्यम् । यत्र द्वयोर्व्यञ्जनयोरविकारः सोऽवशंगमः[4] संधिः । आरैक्पन्थां यातवे (ऋ० १ । ११३ । १६) । वषट् ते विष्णवास आ कृणोमि (ऋ० ७ । ९९ । ७) । सूर्यां यत्पत्ये शंसन्तीम् (ऋ० १० । ८५ । ९) । विश्वे देवा अनु तद्वामजानन्पुत्रः (ऋ० १० । ८५ । १४) । इमम्मे वरुण श्रुधी हवम् (ऋ० १ । २५ । १९) ॥

आस्थापिता[5] व्यञ्जनसंधय उक्ताः । ते[6] च द्विविधाः । तत्रावशंगमा उक्ताः । वशंगमार्थ आरम्भः—

घोषवत्पराः प्रथमास्तृतीयान्स्वान् ॥ २ ॥

घोषवद्व्यञ्जनपराः प्रथमाः स्पर्शास्तृतीयान्स्पर्शानापद्यन्ते स्ववर्गीयान्[7] । यद्वाग्वदन्त्यविचेतनानि (ऋ० ८ । १०० । १०) । आ चतुर्भिरा षड्भिर्हूयमानः (ऋ० २ । १८ । ४) । यद्वा दिवि

---

(१) -श्लिष्टो I^2. (२) चत्वारः संधयः to उच्यते is given, in all the MSS. as well as in B^n, after the text स्पर्शाः to तत् । (३) संधीनां मध्ये B^2 and Reg., संधीनाम् $B^3 I^2$, संधानम् B^n. (४) -गम-Reg. (५) B^3 I^3, Reg.; -पितानां B^2; -पित- B^n. (६) एते Reg. (७) स्ववर्गीयान् before तृतीयान् in B^2.

पार्थे सुष्विमिन्द्र (ऋ० ६ । २३ । २) । स्वानित्युत्तरसूत्रार्थं[1] कृतम् । इह तु यथान्तर[2]परिभाषयापि सिध्यति ॥

उत्तमानुत्तमेषूदयेषु ॥ ३ ॥

प्रथमाः स्पर्शाः स्वानुत्तमानापद्यन्त उत्तमेषूदयेषु सत्सु । अर्वाङ् नरा दैव्येनावसा गतम् (ऋ० ७।८२।८) । ब[3]ण्महाँ असि सूर्य (ऋ० ८।१०१।११) । तन्नो मित्रो वरुणः (ऋ० १।१०९।८) । स्वानित्युच्यते परवर्गीयेष्वपि पञ्चमेषूदयेषु सत्सु[4] पदान्तीयपञ्चमो यथा स्यान्न तु परकीयपञ्चमः । स्पष्टार्थं वा ॥

सर्वैः प्रथमैरुपधीयमानः
शकारः शाकल्यपितुश्छकारम् ॥ ४ ॥

सर्वैः प्रथमैः स्पर्शैरुपधीयमानः शकारः शाकल्यपितुर्मतेन[5] छकारमापद्यते । शृङ्गेव नः प्रथमा[6] गन्तमर्वाक्छफाविव[7] (ऋ० २। ३९। ३) । विपाट्छुतुद्री पयसा (ऋ० ३।३३।१) । सर्वग्रहणं क्रियते—ङकारेऽघोषोष्मपरेऽन्तरैके ककारम् (१।४।१६) इत्येवमाद्यन्तःपात[8]प्राप्त्यर्थम् । तवायं सोमस्त्वमेह्यर्वाङ्छश्वत्तमम् (ऋ० ३।३५।६) । वनेव वज्रिञ्छ्नथिहि (ऋ० १।६३।५) ॥

पदान्तैस्तैरेव तृतीयभूतै-
स्तेषां चतुर्थानुदयो हकारः ॥५॥

पदस्यान्तभूतैरेव[9] प्रथमैः स्पर्शैः । न तु—ङकारेऽघोषोष्मपरे (४।१६) इत्येवमादिभिरन्तःपातैः । तृतीयत्वं प्राप्तैरुपहितो

---

(१) B³ I²Bⁿ; उत्तरार्थं B², Reg. (२) B³I²B²; यथान्तरं Reg.; ग्रंथांतरमिति Bⁿ. (३) प- I². (४) सत्सु omitted in I². (५) B² and Reg., मतन Bⁿ, मते B³I². (६) B³I²B²Bⁿ; प्रथमं Reg., M.M. (७) जभुराणा added in B². (८) -पातः B³. (९) B³B², पदस्यान्तभूतैरेव I², पदस्यांतैरव Bⁿ.

हकारस्तेषामेव प्रथमानां चतुर्थानापद्यत उदयभूतः शाकल्यपितुर्मतेन । आ तू न इन्द्र मद्र्यग्घुवानः (ऋ० ३।४१।१) । अवाड्ढव्यानि सुरभीणि कृत्वी (ऋ० १०।१५।१२)। पदान्तैस्तैरेव तृतीयभूतैरित्यवाच्यम् । हकारस्य चतुर्थभावं कृत्वा पश्चात्—घोषवत्पराः प्रथमास्तृतीयान् (४ । २) इत्यनेन तृतीयभावं करिष्यामः । तथा तावद्रूपं भवति । लघु च[1] सूत्रं स्यात् । नैतदस्ति । परस्य पदादेरदृष्टत्वात्तृतीयभावो दुर्लभः स्यात्[2] । तस्मात्साधूक्तं पदान्तैस्तैरेव तृतीयभूतैरिति ॥

विस्थाने स्पर्श उदये मकारः
सर्वेषामेवोदयस्योत्तमं स्वम् ॥ ६ ॥

विस्थानेऽन्यस्थाने स्पर्शे[3] उदये परभूते मकारः सर्वेषामेवाचार्याणां मतेनोदयभूतस्योत्तमं पञ्चमं[4] स्वमापद्यते । यङ्कुमार नवं रथम् (ऋ० १०।१३५।३) । अहञ्च त्वञ्च वृत्रहन् (ऋ० ८।६२।११) । तन्ते माता परि योषा जनित्री[5] (ऋ० ३।४८।२)। विस्थानग्रहणं च वशंगम[6]संधिज्ञापनार्थम् । पवर्गे तु वशंगमो[7] न भवति ॥

अन्तस्थासु रेफवर्जं परासु
तां तां पदादिष्वनुनासिकां तु ॥ ७ ॥

स एव मकारोऽन्तःस्थासु पदादिभूतासु रेफवर्जितासु परासु सतीषु तां तामन्तःस्थामापद्यते । यदि नामानुनासिकाम् । यँय्यँयुजं[8] कृणुते (ऋ० २।२५।१) । भद्रैषाँल्लक्ष्मीः (ऋ० १०।७१।२) । तव्ँव

---

(१) च omitted in I². (२) B²Bⁿ, Reg.; स्यात् omitted in B³I². (३) B²Bⁿ, स्पर्शे after उदये in B³-I². (४) पंचमं omitted in B². (५) B³B²; जनित्री omitted in I², Reg.; परि—जनित्री omitted in Bⁿ. (६) B², वशंगम-omitted in B³I²Bⁿ. (७) B³B², Reg.; वशंगमी I², अवशंगमे Bⁿ. (८) °यं युजं I².

इन्द्रं[1] न सुक्रतुम् (ऋ० ६।४८।१४)। पदादिग्रहणं क्रियते पदमध्ये वशंगमसंधिनिवृत्त्यर्थम्। अम्यक्सा त इन्द्र ऋष्टिः (ऋ० १।१६९।३)। नात्र मकारस्यान्तःस्थाभावः ॥

तथा नकार उदये लकारे ॥ ८ ॥

तेनैव प्रकारेण नकारो लकारे परभूते लकारमेवानुनासिकमापद्यते। श्वघ्नीव यो जिगीवाँल्लक्षमादत् (ऋ० २।१२।४)॥

ञकारं शकारचकारवर्गयोः ॥ ९ ॥

स एव नकारो ञकारमापद्यते शकारे चवर्गे च प्रत्यये[2]। घनेव वज्रिञ्छ्नथिहि (ऋ० १।६३।५)। मघवञ्छग्धि तव तन्नः (ऋ० ८।२४।११)। आस्माञ्जगम्यादहिशुष्म सत्वा (ऋ० ५।३३।५)॥

तकारो जकारलकारयोस्तौ ॥ १० ॥

तकारो जकारलकारयोः परभूतयोस्तावेवापद्यते। जकारे जकारं लकारे लकारम्। ऋष्वा ते पादा प्र यज्जिगासि (ऋ० १०।७३।३)। अङ्गादङ्गाल्लोम्नोलोम्नः (ऋ० १०।१६३।६)॥

तालव्येऽघोष उदये चकारम् ॥ ११ ॥

चकारच्छकारशकारा अघोषास्तालव्याश्च। एतेषु तकारश्चकारमापद्यते। तच्चक्षुर्देवहितं शुक्रमुच्चरत् (ऋ० ७।६६।१६)। वरूथमस्ति यच्छर्दिः (ऋ० ८।६७।६)। तच्छंयोरा वृणीमहे[3] (ऋ० खि० १०।१९१।५)। तालव्य इति किम्। तत्त आ वर्तयामसि (ऋ० १०।५८।४)। अघोष इति किम्। यद्यामि तदा भर[4]

---

(१) तं च इंद्र I^2. (२) B^3I^2, प्रत्यये परे B^2B^n. (३) B^3 I^2B^2, तच्छंयोरा B^n, तच्छंयोः Reg. (४) तदा भर omitted in B^n.

(ऋ० ८ । ६१ । ६) । तालव्येऽघोष इति किम्[1] । यद्वो देवाश्चकृम[2] (ऋ० १० । ३७ । १२) ॥

छकारं तयोरुदयः शकारः ॥ १२ ॥

तयोर्नकारतकारस्थानर्निर्दिष्टयोर्ञकारचकारयोरुदयभूतः शकारश्छकारमापद्यते । घनेव वज्रिञ्छ्नथिहि (ऋ० १ । ६३ । ५) । तच्छंयोरा वृणीमहे[3] (ऋ० खि० १० । १९१ । ५) । ननु—सर्वैः प्रथमैरुपधीयमानः (४।४) इत्यनेन सिद्धं चकारादुत्तरस्य शकारस्य छत्वम् । सत्यम् । सिद्धं यदि नाम शाकल्यपितुर्मतेन । तकारस्य च विपरिणामे न[4] । एतत्तु सर्वेषामाचार्याणां मतेन[5] तकारस्य च[6] चकारव्यापत्त्या । तस्मादुभयमपि वक्तव्यम् ॥

न शाकल्यस्य ॥ १३ ॥

न तु शाकल्यस्याचार्यस्य मतेन शकारश्छकारमापद्यते । घनेव वज्रिञ्श्न[7]थिहि (ऋ० १ । ६३ । ५) । तच्शं[8]योरा वृणीमहे[9] (ऋ० खि० १० । १९१ । ५) ॥

ता वशंगमानि ॥ १४ ॥

ता । नि[10]शब्दलोपो द्रष्टव्यः । छन्दोवत्सूत्राणि भवन्ति । तानि सन्धानानि वशंगमानि वेदितव्यानि[11]—घोषवत्पराः प्रथमास्तृतीयान्

---

(१) B³, तालव्ये to किम् omitted in B²I²Bⁿ. (२) B³I², यद्वो देवाः B²Bⁿ. (३) B³ I²; तच्छंयोः B²Bⁿ, Reg. (४) B³, विपरिणामेन B²I². (५) मते B³. (६) च omitted in B². (७) B²Bⁿ, छ्न-(instead of श्न-) I²; B³ corrects छ्न- to श्न-. (८) B²Bⁿ, छं- B³I². (९) B³I²; तच्शंयोः B²Bⁿ, Reg. (१०) ता । नि- Reg.; तानि- I²Bⁿ, M.M.; तानि नि- B², तानि तानि B³. (११) B²Bⁿ, अत्येतव्यानि B³I².

(४।२) इत्येवमादोन्यास्थापितानां[1] सन्धानानां[2] मध्ये। नह्यत्रापरिणतानि व्यञ्जनानि संयोगं गच्छन्ति। अतो वशंगमानीत्युच्यन्ते॥

रेफोष्मणोरुदययोर्मकारोऽ-
नुस्वारं तत्परिपन्नमाहुः॥ १५॥

रेफे चोष्मणि[3] चोदयभूते मकारोऽनुस्वारमापद्यते। तत्[4] सन्धानं परिपन्नमाहुराचार्याः। वशंगमस्यैव द्वितीया संज्ञा कार्यार्था कृता—सेति चास्य परिपन्नोपधा चेत् (५।२५) परिपन्नं प्राकृतमूष्मसंधिम् (१५।१२) इत्यादिना। वशंगमानीत्यस्याप्यत्र योगो[5] युक्तरूपः[6]। छन्दोभङ्गभयादधस्तादुक्तः। होतारं रत्नधातमम्[7] (ऋ० १।१।१)। त्वां ह त्यदिन्द्रार्णसातौ (ऋ०१।६३।६)। इन्द्रो हन्ति वृषभं शण्डिकानाम् (ऋ० २।३०।८)। वसुं सूनुं सहसः (ऋ० १।१२७।१)॥

एवमेव वशंगमव्यञ्जनसन्ध्यनन्तरमागमानाह—

ङकारेऽघोषोष्मपरेऽन्तरैके ककारम्॥ १६॥

ङकारेऽघोषोष्मपरे सत्यन्तरा ङकारस्या[9]घोषोष्मणश्च[10] एक आचार्याः ककारमागम[11]माहुः। तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमम्[12] (ऋ० ३।३५।६)। प्रत्यङ् स विश्वा भुवना[13](ऋ० ६।८०।३)। अघोषग्रहणं किम्। दध्यङ् ह यन्मध्वाथर्वणो वाम् (ऋ० १।११६।१२)। ऊष्मग्रहणं किम्। प्रत्यङ् चित्रा बिभ्रदस्य (ऋ० १०।१२३।७)॥

---

(१) B^2I^2, अस्थापितानां B^3B^n. (२) B^3I^2, संधानानां omitted in B^2B^n. (३) B^3I^2, ऊष्मणि B^2B^n. (४) तच्च B^2. (५) पाठो B^3. (६) B^3B^n, युक्तः रूपः I^2, युक्तः B^2. (७) होता- to -मम् omitted in B^3. (८) शा- I^2. (९) B^2Bn and Reg., ङकारस्य चा- B^3I^2. (१०) परस्य added in B^3I^2. (११) B^2B^n, ककारागम- B^3I^2. (१२) सुमनाः added in B^2. (१३) 'B^2B^n, Reg.; भुवनाभि पप्रथे B^3I^2.

टकारनकारयोस्तु। आहुः
सकारोदययोस्तकारम् ॥ १७ ॥

टकारनकारयोः पुनः सकारोदययोरन्तरा तकारागम[1]माहुरेक आचार्याः। अत्तेत्रवित्त्वेत्र[2]विदं ह्यप्राट्त्स प्रैति (ऋ० १०।३२।७)। त्वं तान्त्सं च प्रति चासि मज्मना[3] (ऋ० २।१।१५)॥

ञकारे शकारपरे चकारम् ॥ १८ ॥

नकारस्थानगतञकारग्रहणम्। ञकारे शकारपरे सत्यन्तरा चकारमागममाहुरेक आचार्याः[4]। घनेव वज्रिञ्छ्नथिहि (ऋ० १।६३।५)॥

तेऽन्तःपाताः ॥ १९ ॥

अन्तर्मध्ये पदयोः पतन्तीत्यन्तःपाताः। एतेऽन्तःपातसंज्ञाः संधयो वेदितव्याः—ङकारेऽघोषोष्मपरेऽन्तरैके (४।१६) इत्यादयः॥

अकृतसंहितानामूष्मान्तानां पटलेऽ-
स्मिन्विधानम् ॥ २० ॥

येषामूष्मान्तानामधस्तात्संधिर्न विहितस्तेषामिह पटले संधानमधिकृतं वेदितव्यम्। ओकारं ह्रस्वपूर्वः (४।२५) तत्रारेफी घोषवत्परः प्रत्येतव्यो न तु स्वरपरः। तद्यथा। एष देवो रथर्यति (ऋ० ९।३।५)। न तु। एष देवो अमर्त्यः (ऋ० ९।३।१) इति॥

चित्कम्भनेनोष्मलोपः ॥ २१ ॥

(१) तकारमागम- B². (२) -वित्त्वेत्र- omitted in I². (३) B³I², Reg.; मज्मना omitted in B²Bⁿ. (४) आचार्याः omitted in B².

चित्स्कम्भनेन इत्यत्र सकारलोपो निपात्यते। चास्कम्भ चित्कम्भनेन स्कभीयान्[1] (ऋ० १० । १११ । ५)। चिद्ग्रहणादिह[2] न भवति—उप द्यां स्कम्भथु[3] स्कम्भनेन (ऋ० ६ । ७२ । २) ॥

ककुद्मान् ॥ २२ ॥

ककुद्मान् इति दकारो निपात्यते—स्वानुत्तमानुत्तमेपूदयेषु (४ । २—३) इति नकारे प्राप्ते। मुमोद गर्भो वृषभः ककुद्मान् (ऋ० १० । ८ । २) ॥

सम्राट्शब्दः परिपन्नापवादः ॥ २३ ॥

सम्राट् इत्ययं शब्दः परिपन्नस्य वशंगमस्य संधेरपवादभूतो ज्ञातव्यः। विराट् सम्राड् विभ्वीः प्रभ्वीः (ऋ० १ । १८८ । ५)। शब्दग्रहणं संपूर्वस्य राजतेरेकपदीभूतस्य सर्वप्रत्ययान्तस्य सर्वविभक्तिकस्य सर्वलिङ्गयुक्तस्य च[4] ग्राहकं भवति। सम्राजन्तमध्वराणाम् (ऋ० १ । २७ । १)। सम्राजावस्य भुवनस्य (ऋ० ५ । ६३ । २)। सम्राजोरव आ वृणे (ऋ० १ । १७ । १)। सम्राज्ञी श्वशुरे भव (ऋ० १० । ८५ । ४६)। एकपदार्थं च शब्दग्रहणम्[5]। इह मा भूत्—सं राजभी रत्नधेयाय देवाः[6] (ऋ० ४ । ३४ । ११) ॥

विसर्जनीय आकारमरेफी घोषवत्परः ॥ २४ ॥

सहोपधो विसर्जनीय आकारमापद्यतेऽरेफी रेफरहितो घोषवद्व्यञ्जनपरः। पुनाना यन्त्यनिविशमानाः (ऋ० ७ । ४९ । १)। रिफितस्य संधिं[7] वक्ष्यति। घोषवत्पर इति किम्। तां विश्वरूपाः पशवो वदन्ति[8] (ऋ० ८ । १०० । ११) ॥

---

(१) B², Reg.; स्कभीयान् omitted in B³I²Bⁿ. (२) B²Bⁿ, Reg.; after इह B³I² add सकारलोपः. (३) B³I², -थुः B²Bⁿ. (४) च omitted in B³. (५) Reg., शब्दग्रहणाद् B³I², omitted in BⁿB². (६) Reg., Bⁿ omit देवाः. (७) B³I², संधिर् B²Bⁿ. (८) वदन्ति omitted in Bⁿ, Reg.

ओकारं ह्रस्वपूर्वः ॥ २५ ॥

सहोपधो विसर्जनीयो ह्रस्वपूर्व ओकारमापद्यते घोषवत्परः सन् । देवो देवेभिरा गमत् (ऋ० १ । १ । ५) । अरिफित इत्येव । प्रातर्जितं भगमुग्रम् (ऋ० ७ । ४१ । २) । घोषवत्पर इत्येव । यः पञ्च चर्षणीरभि (ऋ० ७ । १५ । २) ॥

तौ संधी नियतप्रश्रितौ ॥ २६ ॥

तावेतौ संधी नियतप्रश्रितसंज्ञौ[1] वेदितव्यौ । पूर्वो नियतः संधिः—विसर्जनीय आकारम् (४ । २४) इति । द्वितीयः प्रश्रि[2]तः —ओकारं ह्रस्वपूर्वः (४ । २५) इति ॥

**सर्वोपधस्तु स्वरघोषवत्परो
रेफं रेफी ते पुना रेफसंधयः ॥ २७ ॥**

सर्वोपधो दीर्घोपधो ह्रस्वोपधश्च स्वरपरो घोषवत्परश्च रेफी विसर्जनीयो रेफमापद्यते । ते पुना रेफसंधय उच्यन्ते । स्वरपरः । प्रातरग्निं[3] प्रातरिन्द्रं हवामहे (ऋ० ७ । ४१ । १) । वारिन्मण्डूक इच्छति (ऋ० ९ । ११२ । ४) । अग्निरस्मि जन्मना जातवेदाः (ऋ० ३ । २६ । ७) । शं नो देवीरभिष्टये (ऋ० १० । ९ । ४) । घोषवत्परः । प्रातर्मित्रावरुणा[4] (ऋ० ७ । ४१ । १) । अग्निर्वीरं श्रुत्यम् (ऋ० १० । ८० । १) । अश्वावतीर्गोमतीर्नः (ऋ० ७ । ४१ । ७) । स्वरघोषवत्पर इति किम् । अग्निस्तुविश्रवस्तमम् (ऋ० ५ । २५ । ५) ॥

रेफोदयो लुप्यते ॥ २८ ॥

---

(१) प्रश्लितसंज्ञितौ B^n. (२) -श्लि-B^n. (३) B^2B^n, Reg.; प्रातरग्निं omitted in B^3I^2. (४) B^2B^n, Reg.; प्रातः added in B^3I^2.

रिफितो विसर्जनीयो रेफोदयः सन् लुप्यते। युवो रजांसि सुयमासो अश्वा रथः[1] (ऋ० १। १८०। १)॥

द्राघितोपधा ह्रस्वस्य ॥ २९ ॥

ह्रस्वपूर्वस्य रिफितस्य विसर्जनीयस्य रेफोदयस्य लुप्यते विसर्जनीयः। उपधा[2] दीर्घमापद्यते। प्राता रत्नं प्रातरित्वा (ऋ० १। १२५। १)। अग्नी रक्षांसि सेधति[3] (ऋ० ७। १५। १०)॥

अकामनियता उभाविमौ ॥ ३० ॥

अकामश्च नियतश्चोभाविमौ संधी प्रत्येतव्यौ। पूर्वोऽकामः। द्वितीयो नियतः॥

अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे।
तत्सस्थानमनूष्मपरे ॥ ३१ ॥

अघोषे स्पर्श उत्तरे[4] रेफ्यरेफी च विसर्जनीय ऊष्माणमापद्यते। तस्याघोषस्य परत्रावस्थितस्य समानस्थानम्[5]। अनूष्मपरे स्पर्शे। ऋषिᳲ को विप्र ओहते (ऋ० ८। ३। १४)। यᳲ ककुभो निधारयः[6] (ऋ० ८। ४१। ४)। अग्निश्च सोम सक्रतू अधत्तम्[7] (ऋ० १। ९३। ५)। यद्वो देवाश्चकृम[8] (ऋ० १०। ३७। १२)। अग्निस्तुविश्रवस्तमम् (ऋ० ५। २५। ५)। देवास्तं सर्वे[9] (ऋ० ६। ७५। १९)। वायुᳲ पूषा[10](ऋ० ७।

---

(१) B²I², Reg.; अश्वाः B³ Bⁿ. (२) उपधा च B³. (३) B²I², Reg.; सेधति omitted in B³Bⁿ. (४) स्पर्शे परे B². (५) विसर्जनीयः। परभूताघोषसमानस्थानमूष्माणमापद्यते (instead of विसर्जनीय to-स्थानम्) B². (६) यᳲ to -यः omitted in B². (७) सद्क्रतू अधत्तं I². (८) B²Bⁿ, Reg.; जिह्वया added in B³I². (९) Bⁿ, Reg.; सर्वे-। B²; धूर्वंतु added in B³I². (१०) B², Reg.; सरस्वती added in B³I²; the whole quotation omitted in Bⁿ.

३६ । २)। स नॅ॒ पर्षदति द्विषः (ऋ० १० । १८७ । १)। अनूष्मपर इति किम्। महः चोण[1]स्याश्विना कण्वाय (ऋ० १ । ११७ । ८)। शतक्रतुः त्सरद्गन्धर्वमस्तृतम् (ऋ० ८ । १ । ११)॥

तमेवोष्माणमूष्मणि ॥ ३२ ॥

अघोष ऊष्मणि परत्रावस्थिते तमेवोष्माणमापद्यते विसर्जनीयः। यो वशिश[2]वतमो रसः (ऋ० १० । ९ । २)। देवीष्ष[3]ळुर्वीरुरु नः कृणोत[4] (ऋ० १० । १२८ । ५)। ये नस्स[5]पत्ना अप ते भवन्तु[6] (ऋ० १० । १२८ । ९)। अघोष इति किम्। अग्निर्होता नो अध्वरे (ऋ० ४ । १५ । १)॥

प्रथमोत्तमवर्गीये स्पर्शे वा ॥ ३३ ॥

प्रथमोत्तमवर्गीयेऽघोषे स्पर्शे। वा विकल्पतः। तत्[7]सस्थानमूष्माणमापद्यते विसर्जनीयो रेफ्यरेफी च[8] । यॅ॒ ककुभो निधारयः (ऋ० ८ । ४१ । ४)। यः ककुभो निधारयः[9] । यॅ॒[10] पञ्च चर्षणीरभि (ऋ० ७ । १५ । २)। यः[11] पञ्च चर्षणीरभि[12] ॥

ऊष्मणि चानते ॥ ३४ ॥

अघोष ऊष्मणि चानते। दन्त्य[13]मूर्धन्यापत्तिर्नतिर्[14] इत्युपरिष्टाद्वक्ष्यति। विकल्पतो[15] विसर्जनीयः स्यात्। यो वशिश-[16]

---

(१)-णा- I^2. (२) वः शि- I^2. (३) -वीः प- I^2. (४) कृणोत omitted in Reg. (५) नः स-I^2. (६) $B^3 I^2$; भवन्तु omitted in B^2, Reg.; अप to -न्तु omitted in B^n. (७) तं B^3. (८) रेफ्यरेफी च विसर्जनीयः प्रथमोत्तमवर्गीये स्पर्शे परे तत्सस्थानीयमूष्माणं विकल्पेनापद्यते (instead of the Commentary from प्रथमो- to च) B^2. (९) यः ककुभः B^2. (१०) यः I^2. (११) यप् I^2. (१२) चर्षणीरभि omitted in B^2, Reg. (१३) दंत्यस्य B^2. (१४) नतिर् omitted in B^2. (१५) अत्र विकल्पतः B^2. (१६) वः शि- I^2.

वतमो रसः[1] (ऋ० १० । ९ । २) । यो वः[2] शिवतमो रसः[3] । देवीष्षळुर्वीः (ऋ० १० । १२८ । ५) । देवीः षळुर्वीः । ये नस्स[4]-पत्ना अप (ऋ० १० । १२८ । ९) । ये नः सपत्ना अप । अनत इति किम् । निष्षिध्वरीस्ते (ऋ० ३ । ५५ । २२) ॥

व्यापन्न ऊष्मसंधिः स विक्रान्तः प्राकृतोपधः ॥३५॥

व्यापन्न ऊष्मसंधिः स वेदितव्यो नाम्ना यत्र विसर्जनीयो व्यापद्यते[5] । विक्रान्तसंधिस्तु प्राकृतोपधो वेदितव्यो यत्र विसर्जनीयः श्रूयते । उक्तान्येवोदाहरणानि ॥

ऊष्मण्यघोषोदये लुप्यते परे नतेऽपि ॥ ३६ ॥

ऊष्मणि परे । कथंभूते । अघोषोदये । लुप्यते विसर्जनीयो न-तेऽप्यनतेऽप्यूष्मणि[6] । समुद्र स्थः कलशः सोमधानः (ऋ० ६ । ६९ । ६) । प्र व स्पळक्रन्[7] सुविताय दावने (ऋ० ५ । ५९ । १) । कः स्विद् वृत्तो निष्ठितः[8] (ऋ० १ । १८२ । ७) । नि ष्टनिहि दुरिता[9] (ऋ० ६ । ४७ । ३०) । अघोषोदय[10] इति कस्मात् । देवीः षळुर्वीः[11] (ऋ० १० । १२८ । ५) । त्रिः[12] स्म माह्नः (ऋ० १० । ९५ । ५) । किमर्थमिदमुच्यते । त्रयः सकारा मा भूवन्निति । नैतदस्ति[13] प्रयोजनम् । प्रतिषिध्यते

---

(१) -तमः B². (२) व I². (३) -तमः B². (४) नः स- I². (५) B²Bⁿ, Reg.; यत्र ऊष्मा व्यापद्यते विसर्जनीयः (instead of यत्र to -द्यते) B³I². (६) अघोषोदये नतेप्यनतेपि ऊष्मणि परे विसर्जनीयो लुप्यते (instead of ऊष्मणि परे to -ष्मणि) B². (७) अक्रन्त् B³B², अक्रत I². (८) B³I², निष्टितो मध्ये अर्णसः B², निष्टितो मध्ये Reg., निष्ठितः omitted in Bⁿ. (९) बाधमानः added in B², Reg. (१०) अघोष B². (११) B³, Reg.; देवीष्पळर्वीः B²; देवीष्षळुर्वीरुरु नः I²; देवीः पट् Bⁿ. (१२) B³Bⁿ, Reg.; त्रिस B²; त्रि I². (१३) नेदमस्ति B³.

द्विर्वचनम्—न तूष्मा स्वरोष्मपरः (६ । १०) इति । एवं तर्हि परस्य द्विर्वचनार्थम्—ऊष्मणो वा (६ । ६) इति ॥

सोऽन्वक्षरसंधिवत्कः ॥ ३७ ॥

स संधिरन्वक्षरवत्कसंज्ञो[1] वेदितव्यः । भिन्नक्रमः संधिशब्दो[2] द्रष्टव्यः ॥

अव्यापत्तिः कखपफेषु वृत्तिः ॥ ३८ ॥

कखपफेषु परत्रावस्थितेष्वव्यापत्तिरेव वृत्तिः । यः[3] कृन्तदिद्वियोन्यम् (ऋ० ८ । ४५ । ३०) । अगस्त्यः[4] खनमानः खनित्रैः (ऋ० १ । १७९ । ६) । यः[5] पञ्च चर्षणीरभि[6] (ऋ० ७ । १५ । २) । याः[7] फलिनीर्या अफलाः[8] (ऋ० १० । ९७ । १५) । वृत्तिग्रहणं यथाशाखं तथापाठवृत्त्युप[9]लक्षणार्थम् । तथा हि—प्रथमोत्तमवर्गीये स्पर्शे वा (४।३३) ऊष्मणि (४।३४) अव्यापत्तिः कखपफेषु वृत्तिः—इत्येवमादयो विकल्पा व्यवतिष्ठन्ते । यत्र चैकः पाठोऽभिमतस्तत्र यत्नं करोति—संधिर्विक्रान्त एवैषः (४ । ७८) इति । तस्मादयमेवार्थः प्रतिपत्तव्यः ॥

रेफं स्वर्धूःपूरघोषेष्वविग्रहे ॥ ३९ ॥

रेफमापद्यते विसर्जनीयः । स्वः धूः पूः । अघोषेषु प्रत्ययेषु । अविग्रहेऽपृथक्पदे सति[10] । स्वः । विप्रः कविः काव्येना स्वर्चनाः

---

(१) B^2B^n, Reg.; -संज्ञको B^3I^2. (२) B^2B^n, Reg.; -शब्दोत्र B^3I^2. (३) य॒ B^2. (४) -स्त्य॒ B^2. (५) य॒ B^2. (६) चर्षणीः Reg. (७) या॒ B^2. (८) याः (instead of या अफलाः) B^2. अफला अपुष्पाः Reg. (९) M.M., B^2 (-व-for -वृ-) B^n (-प्रवृ-for-वृ-); तु तथापाठवृत्त्युप- B^3I^2 (I^2 corrects वरस्य to तु तथा-); तथा पाठ इत्युप- Reg. (१०) रेफमापद्यते to सति B^3I^2; अघोषेषु प्रत्ययेषु स्वरादीनां विसर्जनीयो रेफमापद्यते । अविग्रहे अपृथक्पदे । B^2; cp. B^n.

(ऋ० ९ । ८४ । ५)। स्वर्षामप्सां वृजनस्य गोपाम्[1] (ऋ० १। ९१ । २१)। घूः। तिष्ठद्रथं न धूर्षदम् (ऋ० १० । १३२ । ७)। पूः। मित्रायुवो न पूर्पतिम् (ऋ० १ । १७३ । १०)। अविग्रह इति किम् । स्वः[2] सनिष्यवः पृथक् (ऋ० १ । १३१ । २)। पृथ्वी पृथ्वी बहुला न उर्वी[3] (ऋ० १ । १८९ । २)॥

नाक्षा इन्दुः स्वधितीवाह एव
भूम्याददेऽहोभिरुषर्वसूयवः।
आवर्तमोऽहोरात्राण्यदो पितो
प्रचेता राजन्वर्तनीरहेति च ॥ ४० ॥

इति च विसर्जनीयो यथाप्राप्तं न भवति। अतो निपात्यते। परि ष्य सुवानो अक्षा इन्दुः (ऋ० ९ । ९८ । ३)। अक्षारिन्दुरिति प्राप्ते रेफलोपः। प्र स्वधितीव रीयते (ऋ० ५ । ७ । ८)। स्वधितिरिवेति प्राप्ते। मोत सूरो अह एवा चन (ऋ० ६ । ४८ । १७)। अहरेवेति प्राप्ते। दिवि षद् भूम्या ददे (ऋ० ९ । ६१ । १०)। भूमिरा दद इति प्राप्ते। दद इति किम्। भूमिरावपनं महत् (आ० श्रौ० १० । ९ । २)। अहोभिरक्तुभिः (ऋ० १० । १४ । ९)। अहर्भिरिति प्राप्ते। तां त्वामुषर्वसूयवः (ऋ० १ । ४९ । ४)। उषो[4] वसूयव[5] इति प्राप्ते। गावो न व्रजं व्युषा आवर्तमः (ऋ० १ । ९२ । ४)। आवस्तम इति प्राप्ते। अहोरात्राणि विदधत् (ऋ० १० । १९० । २)। अहारात्राणीति प्राप्ते। यददो पितो अजगन् (ऋ० १ । १८७ । ७)।

---

(१) B³B²; गोपाम् omitted in I², Reg.; this whole quotation omitted in Bⁿ. (२) स्वरु B³. (३) उर्वीः B³. (४) उषा M.M. (५) वयव B³, वसूय I².

अदः[1] पितो इति[2] प्राप्ते।[3] वयन्नस्मभ्यमसुर प्रचेता राजन् (ऋ० १। २४। १४)। प्रचेतो राजन्निति प्राप्ते। अनु श्येनी[4] सचते वर्तनीरह (ऋ० १। १४०। ९)। वर्तनि[5]रहेति प्राप्ते ॥

यथादिष्टं नामिपूर्वः षकारं
सकारमन्योऽरिफितः ककारे।
पकारे च प्रत्ययेऽन्तःपदं तु
सर्वत्रैवोपाचरितः स संधिः ॥ ४१ ॥

यथादिष्टं यथोक्तमापद्यते। वक्ष्यमाणे संधौ नामिपूर्वो विसर्जनीयः षकारमापद्यते। सकारमन्योऽनामिपूर्वोऽरिफितश्च। ककारे पकारे च प्रत्यये[6]। अन्तःपदं तु सर्वत्रैव। एतदधिकृतं[7] वेदितव्यम्। उपाचरितसंज्ञः[8] स संधिर्वेदितव्यः। अथो यूयं स्थ निष्कृतीः (ऋ० १०। ९७। ९)। यातं छर्दिष्पा उत नः परस्पा (ऋ० ८। ९। ११)। नि काव्या वेधसः शश्वतस्कः (ऋ० १। ७२। १)। यस्पतिर्वार्याणाम् (ऋ० १०। २४। ३)। यथादिष्टमिति किम्। यः पञ्च चर्षणीरभि (ऋ० ७। १५। २)। अरिफित इति किम्। भोजा जिग्युरन्तःपेयम् (ऋ० १०। १०७। ९)। उपाचरितसंज्ञायाः प्रयोजनम्—प्लुतोपाचरिते नतिः (१०। २०)॥

अन्तःपादं विग्रहेऽकारपूर्वः
पतिशब्दे द्व्यक्षरे पुंस्प्रवादे ॥ ४२ ॥

---

(१) B², यददः B³, अददः I². (२) ति I². (३) After प्राप्ते। B³ and I² add प्रचेता राजन्।. (४) श्यने B². (५) -रह। वर्तनि- omitted in I². (६) च प्रत्यये I², च परे B², परे च प्रत्यये B³, omitted in Bⁿ. (७) अधिकृतं omitted in B². (८) -संज्ञास् I².

अन्तःपादमित्यधिकारवचनम्[1] । विग्रह इत्यन्तःपदं[2] तु सर्वत्रैवे-त्यस्य निवृत्त्यर्थम् । अकारपूर्वो विसर्जनीयः सकारमापद्यते पतिशब्दे प्रत्यये द्व्यनुत्तरे पुंस्प्रवादे पुंशब्दवाचिनि । उत्तिष्ठ ब्रह्मणस्पते (ऋ० १ । ४० । १) । वाचस्पतिं विश्वकर्माणम् (ऋ० १० । ८१ । ७) । अन्तःपादमिति किम् । तं जानतीः प्रत्युदायन्नुषासः पतिः (ऋ० ३ । ३१ । ४) । अकारपूर्व इति किम् । आधीषमाणा-याः पतिः (ऋ० १० । २६ । ६) । द्व्यनुत्तर इति किम् । ऋतस्य नः पतयो मृळयन्तु (ऋ० ४ । ५७ । २) । पुंस्प्रवाद इति किम् । अतः पत्नीर्दशस्यत (ऋ० ५ । ५० । ३) । शब्दग्रहणं पुंस्प्रवाद-ग्रहणं चोक्तोत्तरम्[3] ॥

करं कृतं कृधि करत्करित्यपि परेषु ॥ ४३ ॥

करम् कृतम् कृधि करत् कः एतेष्वपि परेष्वकारपूर्वो विसर्जनीयः सकारमापद्यते । करम् । अहं न्यन्यं[4] सहसा सहस्करम् (ऋ० १० । ४९ । ८) । कृतम् । सोमं न चारुं मघवत्सु[5] नस्कृ-तम् (ऋ० १० । ३९ । २) । कृधि । उरुकृदुरु णस्कृधि (ऋ० ८ । ७५ । ११) । करत् । कुविन्नो वस्यसस्करत् (ऋ० ८ । ९१ । ४) । कः । नि काव्या वेधसः शश्वतस्कः (ऋ० १ । ७२ । १) ॥

पादान्तगते परीति च ॥ ४४ ॥

पादान्तप्राप्ते परि इत्यस्मिन्[6] पदे परभूतेऽकारपूर्वो विसर्जनीयः सकारमापद्यते । तदुत्तानपदस्परि (ऋ० १० । ७२ । ३) । पादान्तगत

(१) B^n, अन्तःपादमित्यधिकारसूत्रम् B^3I^2, omitted in B^2. (२) -पादं B^2. (३) B^2, वोक्तोत्तर B^3, ग्रोत्तरं I^2 B^n. (४) अहं न्य१न्य I^2, अन्न्य१न्यं B^2. (५) सोमं to -वत्सु omitted in Reg. (६) इत्यस्मिन् B^2B^n, Reg.; एतस्मिन् B^3I^2.

इति किम्। यदोषधीभ्यः परि जायते विषम् (ऋ० ७ । ५० । ३) अकारपूर्व इति किम्। दक्षाद्धदितिः परि (ऋ० १० । ७२ । ४) ॥

असोऽन्तोऽरेफवतः पारशब्दे
परि कृतानि करतीति चैषु।
अपादान्तीयेष्वपि प्रत्ययेषु ॥ ४५ ॥

अरेफवतो रेफरहितस्य असः इत्यस्य योऽन्तः स[1] सकारमापद्यते पारशब्दे परभूते[2]। परि कृतानि करति इत्येषु[3] परभूतेष्वपादान्तीयेष्वपि सकारमापद्यते। अतारिष्म तमसस्पारमस्य (ऋ० १ । ९२ । ६)। इन्द्राविष्णू अपसस्पारे अस्य (ऋ० ६ । ६९ । १)। अविह्वरन्तं मनसस्परि ध्यया (ऋ० ४ । ३६ । २)। कृतानि। इन्द्रस्येव प्र तवसस्कृतानि (ऋ० ७ । ६ । १)। करति। सुपेशसस्करति जोषिषद्धि (ऋ० २ । ३५ । १)। असोऽन्त इति[4] किम्। सुजातासः परि चरन्ति वीराः (ऋ० ७ । १ । १५)। सद्यो अस्याध्वनः पारमश्नुथ (ऋ० ५ । ५४ । १०)। यदोषधीभ्यः परि जायते विषम् (ऋ० ७ । ५० । ३)। अरेफवत इति किम्। रजसः पार ईङ्खितम् (ऋ० १० । १४३ । ५)। पादान्ताधिकारनिवृत्त्यर्थमपादान्तीयग्रहणम् ॥

वास्तोरित्येतत्पतिशब्द उत्तरे ॥ ४६ ॥

वास्तोः इत्येतत्पतिशब्द उत्तरे यथाप्राप्तमुपाचरति। शब्दग्रहणं लिङ्गविभक्तिवचनग्रहणार्थम्। वास्तोष्पते ध्रुवा स्थूणा (ऋ० ८ । १७ । १४)। वास्तोष्पतिं व्रतपां निरतक्षन्[5] (ऋ० १० । ६१ । ७) ॥

---

(१) असू इत्यस्य यो अंतः स B^2, अस इत्यस्यांतः स B^n, यः अस इत्यंतः B^3I^2. (२) B^2B^n, पारशब्दे परभूते Before सकारमापद्यते in B^3I^2. (३) इत्येषु B^2 B^n, एतेषु B^3I^2. (४) असू इति B^2. (५) वास्तोष्पति B^2.

आविर्हविर्ज्योतिरित्युत्तरश्चेत्ककारः ॥ ४७ ॥

आविः । हविः । ज्योतिः । एतेषां विसर्जनीयः षकारमापद्यत उत्तरो यदि ककारः स्यात् । आविः । आविष्कर्त महित्वना (ऋ० १ । ८६ । ९)। हविः । हविष्कृणुध्वमा गमत् (ऋ० ८ । ७२ । १)। ज्योतिः । ज्योतिष्कर्ता यदुश्मसि (ऋ० १ । ८६ । १०) ॥

अथो पान्तपश्यन्तिशब्दौ ॥ ४८ ॥

अपि च पान्तपश्यन्तिशब्दौ यद्युत्तरौ भवत[1] एतेषामेव शब्दानाम्। अथ विसर्जनीयः षकारमापद्यते । पान्तम् । हविष्पान्तमजरं स्वर्विदि (ऋ० १० । ८८ । १)। पश्यन्ति । ज्योतिष्पश्यन्ति वासरम् (ऋ० ८ । ६ । ३०)। शब्दग्रहणमुक्तार्थम्[2] ॥

इळाया गा नमसो देवयुर्द्रुहो
मातुरिळस्तानि पदप्रवादे ॥ ४९ ॥

इळायाः । गाः । नमसः । देवयुः । द्रुहः । मातुः । इळः । तान्येतानि पदशब्दप्रवाद उपाचरितं[3] लभन्ते । इळायाः । इळायास्पदे सुदिनत्वे अह्नाम् (ऋ० ३ । २३ । ४)। गाः । य ऋते चिद् गास्पदेभ्यो दात् (ऋ० ८ । २ । ३९)। नमसः । उपो एनं जुजुषुर्नमसस्पदे (ऋ० ८ । २३ । ९)। देवयुः । प्र वोऽच्छा[4] रिरिचे देवयुष्पदम् (ऋ० १० । ३२ । ५)। द्रुहः । मा न स्तेनेभ्यो ये अभि द्रुहस्पदे (ऋ० २ । २३ । १६)। मातुः । मातुष्पदे परमे अन्ति षद्गोः (ऋ० ४ । ५ । १०)। इळः । इळस्पदे समिध्यसे (ऋ० १० । १९१ । १) ॥

---

(१) भवतः तर्हि B^2. (२) उक्तार्थम् B^n. (३) B^n, उपाचरं B^2B^3, उपचारं I^2. (४) वोछो I^2.

पूर्वः पुरः पूरिति पूर्वपद्यान्
पदानि चापोद्य नवैतदेवम् ॥ ५० ॥

पूर्वः। पुरः। पूः। इत्येतान्पूर्वपद्यानपोद्य परित्यज्य वर्जयित्वा। पदानि नव च वक्ष्यमाणानि वर्जयित्वा। एतदुपाचारंप्रकरणं विहितमेवं[1] प्रत्येतव्यम्। अपवादविधिरयं सामान्यविधेः प्रभवितुमर्हति। अन्तःपदं[2] तु सर्वत्रैव (४।४१) अस्य विधेस्तावदयम[3]पवादः। पूर्वः[4]। पूर्वःपूर्वो यजमानो वनीयान् (ऋ० ५।७७।२)। पुरः[5]। पुरःप्रस्रवणा बलिम् (ऋ० ८।१००।९)। पूः[6]। मित्रायुवो न पूर्पतिं सुशिष्टौ (ऋ० १।१७३।१०)।

ननु—रेफं स्वर्धूः पुरघोपेष्ववग्रहे (४।३९) इत्यनेनैव सिद्धत्वादतिरिक्तमेतदि[7]ति यश्चोदयेत्तं प्रति ब्रूमः। प्रतिकण्ठं तावन्न भवति येन सर्वापवादकं स्यात्। सर्वापवादकं हि तत्पठितम्—सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् (१।५४) इति। अपवादस्तु[8] विसर्जनीयस्य भवति। रेफमापद्यते विसर्जनीयः स्वर्धूः पुरघोषेष्विति। अयमप्युपाचरितापवाद एव—अन्तःपदं[9] तु सर्वत्रैव (४।४१) इत्यस्योत्सर्गस्य। अतो[10] द्वयोरुत्सर्गयोर्द्वावपवादौ युक्तरूपाविति[11] नातिरिक्तम्॥

इदानीं नव पदान्युच्यन्ते—

(१) एव B^2. (२) -पादं B^2. (३) अयम् omitted in I^2. (४) पूर्वः omitted in B^2I^2. (५) पुरः omitted in B^2I^2 B^n. (६) पूः omitted in B^2B^n. (७) एतद् omitted in B^2. (८) स added in B^3I^2. (९)-पादं B^2. (१०) अतो omitted in B^2. (११) इति omitted in Reg.

अस्या यः सोमो बृहतोऽस्य पूर्व्य
उरु ज्योतिर्जात इमो वृधोऽन्यः॥ ५१ ॥

अस्या यः। सोमः। बृहतः। अस्य पूर्व्यः। उरु ज्योतिः। जातः। इमः। वृधः। अन्यः[1]। अस्या यः। दीर्घायुरस्या यः पतिः (ऋ० १० । ८५ । ३९)। अस्या इति किम्। यस्पतिर्वार्याणाम् (ऋ० १० । २४ । ३)। सोमः। सोमः पती रयीणाम् (ऋ० ९ । १०१ । ६)। बृहतः। ऋष्ववीरस्य बृहतः पतिर्भूः (ऋ० १ । ५२ । १३)। अस्य पूर्व्यः। उतो नो अस्य पूर्व्यः पतिर्दन् (ऋ० १ । १५३ । ४)। अस्येति किम्। अहं भुवं वसुनः पूर्व्यस्पतिः (ऋ० १० । ४८ । १)। उरु ज्योतिः। उरु ज्योतिः कृणुहि मत्सि[2] देवान् (ऋ० ९ । ९४ । ५ ।)। उर्विति किम्। ज्योतिष्कर्ता[3] यदुश्मसि (ऋ० १ । ८६ । १०)। जातः। भूतस्य जातः पतिरेक आसीत् (ऋ० १० । १२१ । १)। इमः। उप त्वेमः कृधि नो भागधेयम् (ऋ० ८ । ९६ । ८)। वृधः। इन्द्रासि सुन्वतो वृधः पतिर्दिवः (ऋ० ८ । ९८ । ५)। अन्यः। स्विष्टमद्यान्यः करदिषा[4] (प्रै० पृ० १४२)॥

ब्रह्मणो द्वे त्रातर्ऋतो विदुर्वसुः
पशुरेतानि कविशब्द उत्तरे ॥ ५२ ॥

ब्रह्मणः। त्रातर्ऋतः इति द्वे पदे। विदुः। वसुः। पशुः। एतान्युपाचारं लभन्ते कविशब्दे परभूते[5]। ब्रह्मणः। रक्षा णो ब्रह्मण-

(१) The Commentary from अस्या यः to अन्यः given in B^3I^2, omitted in B^2B^n. (२) मप्सि I^2. (३)-कार्त्ता I^2. (४) B^3, करदेषा I^2, करत् B^2B^n. अन्यः करत् (instead of the whole quotation) Reg. (५) कविशब्दे परभूते omitted in B^2.

स्कवे (ऋ० ६ । १६ । ३०)। द्वे त्रातर्ऋतः। अग्ने त्रातर्ऋतस्कविः (ऋ० ८ । ६० । ५)। द्वे इति किम्। पवमान ऋतः कविः (ऋ० ९ । ६२ । ३०)। विदुः । प्र मर्षिष्ठा अभि विदुष्कविः सन् (ऋ० १ । ७१ । १०)। वसुः। स इधानो वसुष्कविः (ऋ० १ । ७९ । ५)। पशुः। पशुष्कविरशयच्चायमानः (ऋ० ७ । १८ । ८)। शब्दग्रहणात्प्रातिपदिकमात्रं गृह्यते ॥

पथिशब्दे जिन्वथश्चेतथो महः ॥ ५३ ॥

पथिशब्दे प्रत्यये जिन्वथः चेतथः महः इत्येतानि पदान्युपाचारं लभन्ते । शब्दग्रहणात्प्रातिपदिकमुक्तार्थम्। जिन्वथः। आ वर्तनिं मधुना जिन्वथस्पथः (ऋ० ४ । ४५ । ३)। चेतथः। विश्वाँ अनु स्वधया चेतथस्पथः (ऋ० ४ । ४५ । ६)। महः। कदर्यम्णो मह[1]स्पथा (ऋ० १ । १०५ । ६) ॥

पृथुशब्दे विश्वतो वीळितो रजः ॥ ५४ ॥

पृथुशब्दे परभूते विश्वतः वीळितः रजः इत्येतेषां पदानां[2] विसर्जनीयः सकारमापद्यते। विश्वतः। गिरिर्न विश्वतस्पृथुः पतिर्दिवः (ऋ० ८ । ९८ । ४)। वीळितः। रध्रचोदः श्नथनो वीळितस्पृथुः (ऋ० २ । २१ । ४)। रजः। वि द्यामेषि रजस्पृथु (ऋ० १ । ५० । ७) ॥

कामपोषपूर्धिशब्देषु रायः ॥ ५५ ॥

काम पोष पूर्धि इत्येतेषु परभूतेषु रायः इत्येतत्पदमुपाचरति। कामः। रायस्कामो वज्रहस्तं सुदक्षिणम्[3] (ऋ० ७ । ३२ । ३)। पोषम्[4]। रायस्पोषं यजमानेषु धारय[5] (ऋ० १० । १२२ । ८)। पूर्धि। रायस्पूर्धि स्वधावोऽस्ति हि ते[6] (ऋ० १ । ३६ । १२) ॥

---

(१) महे I^2. (२) B^3I^2, पदानां omitted in B^2B^n. (३) B^2I^2, Reg., B^n (सुदक्षिणम् omitted in B^n); रायस्कामो जरितारं त आगन् B^3. (४) पोष B^3I^2. (५) धारय omitted in Reg. (६) स्वधावः B^2, स्वधावोस्ति B^n.

पादादिरन्तश्च दिवस्परीति च ॥ ५६ ॥

दिवस्परि इत्येतद् द्वैपदं निपात्यते पादादौ पादान्ते च वर्तमानम् । दिवस्परि सुग्रथितं तदादः (ऋ० १ । १२१ । १०) । अयं स यो दिवस्परि (ऋ० ९ । ३९ । ४) । पादादिरन्तश्चेति किम् । वृष्टिं दिवः परि स्रव (ऋ० ९ । ८ । ८) । नन्वकारपूर्वविसर्जनीयानुवृत्तौ सत्याम्—पादान्तगते परि (४ । ४४) इत्यनेनैव सिद्धत्वाद्यदिहान्तश्च दिवस्परीत्युच्यते तदतिरिक्तमिति । नातिरिक्तम् । तस्यावकाशः—दिवो अन्तेभ्यस्परि (ऋ० १ । ४९ । ३) इत्यादिष्वेव । इहान्तग्रहणेऽक्रियमाणे[1] पादादिग्रहणेनैवैतद् द्वैपदं निपातितं स्यात्पादादावेव । न त्वन्ते । तस्मान्नातिरिक्तम् ॥

दिवस्पृथिव्या अधमस्पदीष्ट पूर्वं पादादौ यदि ॥५७॥

दिवस्पृथिव्याः । अधमस्पदीष्ट । एतद् द्वैपदद्वयं[2] निपात्यते । अत्र[3] पूर्वं द्वैपदं[4] पादादौ यदि स्यात् । दिवस्पृथिव्याः पर्योज उद्भृतम् (ऋ० ६ । ४७ । २७) । विश्वस्य जन्तोरधमस्पदीष्ट (ऋ० ७ । १०४ । १६) । पूर्वं पादादाविति किम् । प्र ये दिवः पृथिव्या न बर्हणा (ऋ० १० । ७७ । ३) ॥

सस्पदीष्ट ॥५८॥

एतद् द्वैपदं निपात्यते । यो नो द्वेष्ट्यधरः सस्पदीष्ट (ऋ० ३ । ५३ । २१) ॥

शवसो महः सहस इळायाः
पात्वित्येकं पुत्रशब्दे पराणि ॥ ५९ ॥

---

(१) B[2], -दिष्वेवाऽसति इहांतग्रहणे क्रियमाणे B[3], -दिष्वेव । सति इहांतग्रहणे क्रियमाणे I[2], -दिष्वेव इहांतग्रहणेनैव B[n]. (२) B[3]I[2], एतद्द्वैपदं B[n], इति एतद्द्वैपदं B[2]. (३) अत्र B[2]B[n], अस्य द्वैपदद्वयस्य B[3]I[2]. (४) द्वैपदं omitted in B[2].

शवसः । महः । सहसः । इळायाः । इत्येतानि पदान्युपाचरन्ति । किमविशेषेण । नेत्याह । पातु इत्येतस्मिन्पदे परभूत एकं प्रथमं पदमुपाचरति । पुत्रशब्दे पराण्युपाचरन्ति । शवसः । वाजो नु ते शवसस्पात्वन्तम् (ऋ० ५ । १५ । ५) । महः । महस्पुत्रासो असुरस्य वीराः (ऋ० १० । १० । २) । सहसः । सहसस्पुत्रो अद्भुतः (ऋ० २ । ७ । ६) । इळायाः । इळायास्पुत्रो वयुनेऽजनिष्ट (ऋ० ३ । २९ । ३) ॥

रायस्खां महस्करथो महस्परं
निष्क्रव्यादं निष्कृथ निष्पिपर्तन ॥ ६० ॥

इत्येतानि द्विपदानि निपात्यन्ते[1] । रायस्खाम् । स रायस्खामुप सृजा गृणानः (ऋ० ६ । ३६ । ४) । महस्करथः । महस्करथो वरिवो यथा नः (ऋ० ६ । ५० । ३) । महस्परम् । क स्विदस्य रजसो महस्परम् (ऋ० १ । १६८ । ६) । निष्क्रव्यादम् । निष्क्रव्यादमनीनशत् (ऋ० १० । १६२ । २) । निष्कृथ । यद्यामयति निष्कृथ (ऋ० १० । ९७ । ९) । निष्पिपर्तन । विश्वस्मान्नो अंहसो निष्पिपर्तन (ऋ० १ । १०६ । १) ॥

कबन्धं पृथु कण्वासः पुत्रः पातु पथा पयः ।
पायुः पृष्ठं पदं तेषां प्रवादा उदये दिवः ॥ ६१ ॥

कबन्धम् । पृथु । कण्वासः । पुत्रः । पातु । पथा । पयः । पायुः । पृष्ठम् । पदम् । इत्येतेषां पदानां प्रवादा उदये वर्तमाना दिवः इत्येतस्य पदस्योपाचारं जनयन्ति । कबन्धम् । दिवस्कबन्धमव दर्षदुद्रिणम् । (ऋ० ९ । ७४ । ७) । पृथु । अरित्रं वां दिवस्पृथु (ऋ० १ । ४६ । ८) । कण्वासः । दिवस्कण्वास इन्दवः (ऋ० १ । ४६ । ९) ।

---

(१) इत्येतानि to -त्यन्ते omitted in B[2].

पुत्रः । दिवस्पुत्रा अङ्गिरसो भवेम (ऋ० ४ । २ । १५) । पातु । सूर्यो नो दिवस्पातु (ऋ० १० । १५८ । १) । पथा । दिवस्पथा वध्वो यन्त्यच्छ (ऋ० ५ । ४७ । ६) । पयः । दिवस्पयो दिधिषाणा अवेषन् (ऋ० १० । ११४ । १) । पायुः । दिवस्पायुर्दुरोणयुः (ऋ० ८ । ६० । १९) । पृष्ठम् । दिवस्पृष्ठं भन्दमानः सुमन्मभिः[1] (ऋ० ३ । २ । १२) । पदम् । अभि प्रिया दिवस्पदम् (ऋ० ९ । १० । ९) । अभि प्रिया दिवस्पदा (ऋ० ९ । १२ । ८) ॥

रजसस्पात्यन्तस्पथाः कस्काव्या चतुरस्कर ।
स्वादुष्किल निदस्पातु द्यौष्पितर्वसतिष्कृता ॥६२॥

रजसस्पाति । अन्तस्पथाः । कस्काव्या । चतुरस्कर । स्वादुष्किल । निदस्पातु । द्यौष्पितः । वसतिष्कृता[2] । एतानि पदानि यथागृहीतं निपात्यन्ते । रजसस्पाति । वि चक्रमे रजसस्पात्यन्तौ (ऋ० ५ । ४७ । ३) । अन्तस्पथाः । अरिफितस्य विसर्जनीयस्य यदुक्तम्—अन्तःपदं तु सर्वत्रैव (४ । ४१) इति[3] तदिह रिफितस्य दृश्यते । अतो निपात्यते । अन्तस्पथा अनुपथाः (ऋ० ५ । ५२ । १०) । कस्काव्या । कस्काव्या मरुतः को ह पौंस्या (ऋ० ५ । ५९ । ४) । चतुरस्कर । कनिष्ठ आह चतुरस्करेति (ऋ० ४ । ३३ । ५) । स्वादुष्किल । स्वादुष्किलायं मधुमाँ उतायम् (ऋ० ६ । ४७ । १) । निदस्पातु । सरस्वती निदस्पातु । (ऋ० ६ । ६१ । ११) । द्यौष्पितः । द्यौष्पितः पृथिवि मातरध्रुक्[4] (ऋ० ६ । ५१ । ५) । वसतिष्कृता । पर्यो वो वसतिष्कृता (ऋ० १० । ९७ । ५) ॥

---

(१) सुमन्मभिः omitted in B². (२) The Commentary रजसस्पाति to -कृता given in B³I², omitted in B²Bⁿ. (३) B²Bⁿ, इति omitted in B²I². (४) B³, मातः B², मातरध्रुक् omitted in I²Bⁿ.

तपोऽपवित्रं त्रिष्पूत्वी धीष्पीपाय विभिष्पतात् ।
द्यौष्पिता रजसस्पृष्टो ददुष्पज्राय नस्करः ॥ ६३ ॥

एतानि पदानि[1] निपात्यन्ते । तपोऽपवित्रम् । तपोऽपवित्रं विततं दिवस्पदे (ऋ० ६ । ८३ । २) । त्रिष्पूत्वी । अपालामिन्द्र त्रिष्पूत्वी. (ऋ० ८ । ९१ । ७) । धीष्पीपाय । धीष्पीपाय बृहद्दिवेषु मानुषा (ऋ० २ । २ । ९) । विभिष्पतात् । यद्वां रथो विभिष्पतात् (ऋ० १ । ४६ । ३) । द्यौष्पिता । द्यौष्पिता जनिता सत्यमुत्त्रन् (ऋ० ४ । १ । १०) । रजसस्पृष्टः । धर्ता दिवो रजसस्पृष्ट ऊर्ध्वः (ऋ० ३ । ४९ । ४) । ददुष्पज्राय । ददुष्पज्राय साम्ने (ऋ० ८ । ६ । ४७) । नस्करः । अधा त्वं हि नस्करः (ऋ० ८ । ८४ । ६) ॥

वसुष्कुविन्मनुष्पिता पितुष्पिता पितुष्परि ।
प्र णस्पुरो मयस्करन्नभस्पयस्त्रयस्परः ॥ ६४ ॥

एते चोपाचारा यथागृहीतं भवन्ति[2] । वसुष्कुवित् । वसुष्कुविद्वसुभिः काममावरत्[3] (ऋ० १ । १४३ । ६) । मनुष्पिता । यामथर्वा मनुष्पिता (ऋ० १ । ८० । १६) । पितुष्पिता । गर्भे मातुः पितुष्पिता (ऋ० ६ । १६ । ३५) । पितुष्परि । अहमिद्धि पितुष्परि (ऋ० ८ । ६ । १०) । प्र णस्पुरः । स त्वा देव प्र णस्पुरः (ऋ० १ । ४२ । १) । प्रेति किम् । भद्रं भवाति नः पुरः (ऋ० २ । ४१ । ११) । मयस्करन् । मयस्करन्परतरे चनाहन् (ऋ० १० । ९५ । १) । नभस्पयः । हरिरोपशं कृणुते नभस्पयः (ऋ० ९ । ७१ । १) । त्रयस्परः । ये त्रिंशति त्रयस्परः (ऋ० ८ । २८ । १) ॥

---

(१) पदानि omitted in B^2. (२) भवति I^2. (३) B^2B^n, आवरत् omitted in B^3I^2.

नकार आकारोपधः पद्यान्तोऽपि स्वरोदयः । लुप्यते ॥ ६५ ॥

इत उत्तरं[1] नकारविकारा उच्यन्ते—ईमित्यन्तलोप एपूद्धयेषु (४ । ८३) अस्मान्मकारलोपादा[2] । आकारोपधो नकारः पद्यान्तोऽपद्यान्तोऽपि च[3] । विग्रहाधिकारनिवृत्त्यर्थं पद्यान्तग्रहणम् । अन्तःपादाधिकारानुवृत्त्यर्थं च । स्वरोदयः सल्लुँप्यते । सर्गाँ इव सृजतं सुष्टुतीरुप (ऋ० ८ । ३५ । २०) । महाँ इन्द्रो नृवदा चर्षणिप्राः (ऋ० ६ । १९ । १) । आकारोपध इति किम् । केतुं कृण्वन्नकेतवे (ऋ० १ । ६ । ३) । स्वरोदय इति किम् । अयोदंष्ट्रान्विधावतो वराहून् (ऋ० १ । ८८ । ५) । अन्तःपादाधिकारानुवृत्तिः किम् । तयेह[4] विश्वाँ अवसे यजत्राना सादय (ऋ० ३ । ५७ । ५) ॥

अज्राञ्जग्रसानाञ्जघन्वान्देवहूतमान् । वद्धधानाँ इन्द्र सोमाँस्तृषाणान्नो देव देवान् । हन्त देवाँ इति च ॥ ६६ ॥

पादान्त एतेषु पदेषु नकारा लुप्यन्ते[5] । पादान्तीयार्थ आरम्भः । अज्रान् । आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु (ऋ० ४ । १ । १७) । जग्रसानान् । सृजः सिन्धूँरहिना जग्रसानाँ आत् (ऋ० १० । १११ । ९) । जघन्वान् । त्वमपो यद्ध वृत्रं जघन्वाँ अन्त्याँइव (ऋ० ३ । ३२ । ६) । देवहूतमान् । युक्ष्वा हि देवहूतमाँ अश्वान् (ऋ० ८ । ७५ । १) । वद्धधानान् । त्वमुत्साँ ऋतुभिर्वद्धधानाँ अरंहः

---

(१) $B^3I^2B^n$; ऊर्ध्वं (instead of उत्तरं) B^2, Reg. (२) B^3, Reg.; -लोपात् B^2I^2 (I^2 corrects लोपात् आ to लोपात्); -लोपाद्धाक् B^n. (३) पदान्तेपि च स्वरोदयः सन् लुप्यते (instead of ऽपद्यान्तोऽपि च) I^2. (४) तयेह omitted in Reg. (५) B^3B^n, पादान्त to लुप्यन्ते omitted in B^2I^2.

(ऋ० ५ । ३२ । २)। इन्द्र सोमान्। यथापिन्नः पूर्व्यां इन्द्र सोमाँ एव (ऋ० ३ । ३६ । ३)। इन्द्रेति किम्।[1] तृ[2]षाणान्। धन्वान्यज्राँ अपृणक्तृषाणाँ अधोक् (ऋ० ४ । १९ । ७)। नो देव देवान्। उत[3] नो देव देवाँ अच्छ[4] (ऋ० ८ । ७५ । २)। न[5] इति किम्। अच्छा नो मित्रमहो देव देवानग्ने (ऋ० ६ । २ । ११)। हन्त देवान्। यजामहै यज्ञियान्हन्त देवाँ ईळामहै (ऋ० १० । ५३ । २)। हन्तेति किम्। यथायज ऋतुभिर्देव देवानेव[6] (ऋ० १० । ७ । ६)। इति च॥

एता आन्पदाः पदवृत्तयः॥ ६७॥

एताश्च—अज्रान् (४ । ६६) इत्यादिका अधस्तनाश्च—नकार आकारोपधः (४ । ६५) इत्यादिका आन्पदाः पदवृत्तय उच्यन्ते[7]॥

विवृत्त्यभिप्रायेषु च पीवोअन्नाँ रयिवृधः।
दधन्वाँ यो जुजुर्वाँ यः स्ववाँ यातु दद्वाँ वेति॥६८॥

विवृत्त्यभिप्रायेषु च संधिषु नकार आकारोपधो लुप्यतेऽन्तः-स्थाव्यञ्जनोदय इत्येतेषु द्वैपदेषु। पीवोअन्नाँ रयिवृधः सुमेधाः (ऋ० ७ । ९१ । ३)। दधन्वाँ यो नर्यो अप्स्वन्तरा[8] (ऋ० ९ । १०७ । १)। जुजुर्वाँ यो मुहुरा युवा भूत् (ऋ० २ । ४ । ५)। सुमृळीकः स्ववाँ यात्वर्वाङ् (ऋ० १ । ११८ । १)। दद्वाँ वा यत्पुष्यति रेक्णः (ऋ० १० । १३२ । ३)॥

---

(१) Reg., मृग्यम् added in B², सुन्वंति सोमान्पिबसि त्वमेषां added in BⁿB³ (with marks of deletion in B³), सुन्वंति सोमान्पिब added in I² (on the margin in a different hand). (२) तनृ- B². (३) उतो I². (४) अच्छा Reg. (५) नो B². (६) B²Bⁿ, एवा Reg., एवा यजस्व B³I². (७) B³B²; I² adds नादिनिधानाः; Bⁿ adds नादिताः. (८) अप्स्व१तरा B².

हतं योनौ वचोभिर्यान्युवन्यूँर्वनिषीष्टेति ।
ईकारोकारोपहितो रेफमेषु ॥ ६९ ॥

हतम् । योनौ । वचोभिः । यान् । युवन्यून् । वनिषीष्ट । एतेषु पदेषु प्रत्यय[1]भूतेष्वीकारोपहित ऊकारोपहितश्च नकारो रेफमापद्यते । हतम् । उत्पथोँर्हतमूर्म्या मदन्ता (ऋ० १ । १८४ । २) । योनौ । वि दस्यूँर्योनावकृतः (ऋ० १ । ६३ । ४) । वचोभिः । पथो र्वचोभिरभि योधदिन्द्रः[2] (ऋ० ६ । ३९ । २) । यान् । सखीँर्यां इन्द्र चकृषे सुकृत्या[3] (ऋ० ४ । ३५ । ७) । युवन्यून् । रुद्रस्य सूनूँर्युवन्यूँरुदश्याः (ऋ० ५ । ४२ । १५) । वनिषीष्ट । प्रियाँ अपिधीँर्वनिषीष्ट (ऋ० १ । १२७ । ७) ॥

स्वरेषु च ॥ ७० ॥

स्वरेषु च[4] प्रत्ययेष्वीकारोकारोपहितो नकारो रेफमापद्यते । रश्मीँरिव यच्छतम् (ऋ० ८ । ३५ । २१) । अभीशूँरिव सारथिः[5] (ऋ० ६ । ५७ । ६) । परिधीँरति ताँ इहि (ऋ० ९ । १०७ । १९) । बन्धूँरिमाँ अवरान्[6] (ऋ० ९ । ९१ । १७) । अन्तःपादाधिकारानुवृत्तेरिह न भवति—अतो न आ नॄ[7]नतिथीनतः (ऋ० ५ । ५० । ३) ॥

दस्यूँरेको नॄँरभि च ॥ ७१ ॥

दस्यूँरेकः । नॄँरभि । च[8] अनयोश्च द्वेपदयोर्नकारो रेफमापद्यते । त्वं ह नु त्यददमायो दस्यूँरेकः (ऋ० ६ । १८ । ३) । पादान्तार्थे

---

(१) $B^3I^2B^n$; पर (instead of प्रत्यय) B^2, Reg. (२) इन्द्रः omitted in I^2, Reg. (३) B^3; सुकृत्या omitted in $B^2I^2B^n$,. Reg. (४) च omitted in B^2B^n. (५) सारथिः omitted in B^2. (६) च अवरान् B^2. (७) न्नॄ- B^2. (८) The Commentary दस्यूँ-to च omitted in B^2.

आरम्भः । नॄँरभि । येना स्वर्णं ततनाम नॄँरभि (ऋ० ५ । ५४ । १५) । ऋकारोपधत्वान्नकारस्य रेफ[1]विधानमेतत् ॥

ते स्पर्शरेफसंधयः ॥ ७२ ॥

त एते—हतं योनौ (४ । ६९) इत्याद्यारभ्य[2] स्पर्शरेफसंधयो वेदितव्याः । स्पर्शोष्मसंधीन्स्पर्शरेफसंधीनभिप्रायाँश्च परिपाद[3]यन्ति (१४ । ३७) इत्यादिभिः संज्ञाव्यवहारः ॥

नास्मानुपैतावान्स्फुरान्गच्छान्देवानयाड् वहान् ।
हिरण्यचक्रान्मायावान्घोषाँस्तानश्विनाविद्वान् ।
पयस्वान्पुत्राना धेह्यायजीयान्पतीनुरोः ॥ ७३ ॥

अस्मानुप । एतावान् । स्फुरान् । गच्छान् । देवानयाट् । वहान् । हिरण्यचक्रान् । मायावान् । घोषान् । तानश्विना । अविद्वान् । पयस्वान् । पुत्राना धेहि । आयजीयान् । पतीनुरोः । एते नकाराः प्रकृत्या भवन्ति । अस्मानुप । धेनुर्वागस्मानुप सुष्टुतैतु (ऋ० ८ । १०० । ११) । उपेति किम् । प्रास्माँ अव पृतनासु प्र विक्षु (ऋ० ६ । ४१ । ५) । एतावान् । एतावानस्य महिमा (ऋ० १० । ९० । ३) । स्फुरान् । अनु यद् गावः स्फुरानृजिप्यम् (ऋ० ६ । ६७ । ११) । गच्छान् । गच्छानिद्ददुषो रातिम्[4] (ऋ० ८ । ७९ । ५) । देवानयाट् । देवानयाड्याँ अपिप्रेर्ये ते होत्रे[5] (प्रै० पृ० १४५) । अयाडि[6]ति किम् । देवाँ आ वीतये वह (ऋ० ५ । २६ । २) । वहान् । कस्मै देवा आ वहानाशु होम (ऋ० १ । ८४ । १८) । हिरण्यचक्रान् । पश्यन्हिरण्यचक्रानयोदंष्ट्रान् (ऋ० १ । ८८ । ५) ।

---

(१) रेफरेफ- B^2. (२) B^2B^n, इत्यारभ्य B^3I^2. (३) -त-B^3 B^2B^n, omitted in I^2. (४) रातिम B^3B^n. (५) होत्रे अमत्सत B^2. (६) B^n,-ळि- B^3B^2,-लि- I^2.

मायावान्। नि मायावानब्रह्मा दस्युरर्त[1] (ऋ० ४ । १६ । ९)। घोषान्। आ यत्ते घोषानुत्तरा युगानि (ऋ० ३ । ३३ । ८)। तानश्विना[2]। तानश्विना सरस्वतीमिन्द्रं सुत्रामाणम्[3]। अश्विनेति किम्। ताँ इन्द्र सहसे पिब (ऋ० १ । १६ । ६)।[4] अविद्वान्। अविद्वानित्थापरो अचेताः (ऋ० १ । १२० । २)। पयस्वान्। पयस्वानग्न आ गहि (ऋ० १ । २३ । २३)। पुत्राना धेहि। दशास्यां पुत्राना धेहि (ऋ० १० । ८५ । ४५)। आ धेहीति किम्। पुंसः[5] पुत्राँ उत विश्वापुषं रयिम्[6] (ऋ० १।१६२। २२)। धेहीति किम्। मृग्यं प्रत्युदाहरणम्। आयजीयान्। होता होतुर्होतु[7]रायजीयानग्ने यान्[8] (प्रै० पृ० १४५) पतीनुरोः। प्रिय[9]धाम्नः प्रियव्रतान्महः[10] स्वसरस्य प[11]तीनुरोः (प्रै० पृ० १४६)। उरोरिति किम्। रिशादसः सत्पतीँरदब्धान् (ऋ० ६ । ५१ । ४)[12] ॥

चरति चक्रो चमसाँश्च चो चिच
चरसि च्यौत्नश्चतुरश्चिकित्वान्।
एतेषु सर्वत्र विसर्जनीयवद्दीर्घोपधः ॥ ७४ ॥

---

(१) B³Bⁿ; दस्युः B²I², Reg. (२) Bⁿ, a (M.M.) add प्रैषोऽनुमेयः; B³ has it as a marginal note. (३) B², a (M.M.) add सोमानां. (४) After पिब। B² adds प्रैषोनुमेयः. (५) स्वरव्यं पुंसः B³. (६) B²I², विश्वा——म् omitted in B³Bⁿ, रयिम् omitted in Reg. (७) B³; होतुर्होतु- B²Bⁿ; होताहोतु- I²; होता होतु- M.M. (८) B³B²; अग्ने यात् I², b (M.M.); अग्ने यान् omitted in Bⁿ. (९) प्रिया- B²Bⁿ. (१०) मह B²Bⁿ. (११) ससरस्य प-I², स्व सरस्य य- Bⁿ. (१२) After -दब्धान्। B² adds मृग्यं प्रत्युदाहरणं I² also has it, but with marks of deletion; Bⁿ has it after उरोरिति किम् (रिशादसः to-दब्धान् being omitted in Bⁿ).

चरति । चक्रे । चमसान् । च । चो । चित् । चरसि । च्यौत्नः । चतुरः । चिकित्वान् । एतेषु पदेषु परभूतेषु सर्वत्रान्तः-पादं पादान्ते च वर्तमानो दीर्घोपधो नकारो विसर्जनीयवत्प्रत्येतव्यः । विसर्जनीयधर्माल्लँभते नकार इत्यर्थः । कतमे त इति चेत् । अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे तत्स[1]स्थानम् (४ । ३१) इति ॥

चरति । अन्तर्महाँश्चरति रोचनेन (ऋ० ३ । ५५ । ९) । चक्रे । पशून्ताँश्चक्रे वायव्यान्[2] (ऋ० १० । ९० । ८) । चमसान् । विभ्राजमानाँश्चमसाँ अहेव[3] (ऋ० ४ । ३३ । ६) । च । अस्माञ्च ताँश्च प्र हि नेषि वस्य आ[4] (ऋ० २ । १ । १६) । चो । याँश्चो नु दाधृविर्भरध्यै (ऋ० ६ । ६६ । ३) चित् । ताँश्चिदेवापि गच्छतात् (ऋ० १० । १५४ । १) । चरसि । अन्तर्महाँश्चरसि रोचनेन[5] (ऋ० १० । ४ । २) । च्यौत्नः । भुवो नॄँश्च्यौत्नो विश्वस्मिन्भरे (ऋ० १० । ५० । ४) । चतुरः । रायः समुद्राँश्चतुरः (ऋ० ९ । ३३ । ६) । चिकित्वान् । विद्वाँश्चिकित्वान्हर्यश्व वर्धसे[6] (ऋ० ३ । ४४ । २) । दीर्घोपध इति किम् । अहञ्च वृत्रं नमुचिमुताहन् (ऋ० ७ । १९ । ५) ॥

अस्माञ्चमसान्पशून् ॥ ७५ ॥

अस्मान् । चमसान् । पशून् । नात्र नकारो विसर्जनीयवत्कार्यं लभते । अस्मान् । अस्माञ्च ताँश्च प्र हि (ऋ० २ । १ । १६) ।

---

(१) तत् I². (२) वायव्यान् omitted in B², Reg. (३) B², Reg.; अहेवावेनत् B³I²Bⁿ. (४) Bⁿ; हि० । B²; नेषि वस्य आ omitted in B³I², Reg.; (५) Reg., B² (रोचB²); I² corrects रोचनेन to स्योजसा in a different hand; महांश्चरस्योजसा (instead of अन्तर्म- to -नेन) B³Bⁿ. (६) हर्यश्व वर्धसे in B² and वर्धसे in Reg. omitted.

चमसान् । यदावाख्यच्चमसाञ्चतुरः (ऋ० १ । १६१ । ४) । पशून् । पशूञ्च स्थातॄञ्चरथं च पाहि[1] (ऋ० १ । ७२ । ६) ॥

ताँस्ते सर्वाँस्तान्देवाँस्त्वं ताँस्त्रायस्वावदँस्त्वं च ॥७६॥

एतेषां द्वैपदानां नकारो विसर्जनीयवद्भवति । ताँस्ते । ताँस्ते अश्याम पुरुकृत्पुरुक्षो (ऋ० ६ । ८१ । ५) । सर्वाँस्तान् । सर्वाँस्ताँ इन्द्र गच्छसि (ऋ० ८ । ९३ । ६) । देवाँस्त्वम् । देवाँस्त्वं परिभूरसि[2] (ऋ० ५ । १३ । ६) । ताँस्त्रायस्व । ताँस्त्रायस्व सहस्य (ऋ० ७ । १६ । ८) । आवदँस्त्वम् । आवदँस्त्वं शकुने भद्रमा वद[3] (ऋ० २ । ४३ । ३) ॥

विसर्जनीयं परेष्विति ते स्पर्शोष्मसंधयः ॥ ७७ ॥

येषु[4] परेषु संधिषु विसर्जनीयं वयं वक्ष्यामः । ये चैते—चरति चक्रे (४ । ७४) इत्यादयः । त उभयेऽपि स्पर्शोष्मसंधयो वेदितव्याः । एकत्र स्पर्श एकत्रोष्मेत्यन्वर्थसंज्ञा । एवमधस्तना अपि संज्ञा वेदितव्याः[5] । दिङ्मात्रं त्वेतत्प्रदर्शितम् ॥

**नॄँः पतिभ्यो नॄँः प्रणेत्रं नॄँः पात्रं स्वतवाँः पायुः ।
संधिर्विक्रान्त एवैषः ॥७८॥**

एवेत्यवधारणवचनम्[6] । नात्र[7] द्वितीयः पक्षः । नॄँः पतिभ्यः । नॄँः पतिभ्यो योनिं कृण्वाने (प्रै० पृ० १४२) । नॄँः प्रणेत्रम् । नराशंसं नृशस्तं[8] नॄँः प्रणेत्रम्[9] (प्रै० पृ० १४२) । नॄँः पात्रम् ।

---

(१) पाहि omitted in B³I². (२) परिभूः B². (३) B³, भद्रमा वद in B²I² and आ वद in Bⁿ omitted. (४) एषु B². (५) एकत्र to -तव्याः omitted in B². (६) B³I²Bⁿ; एवेत्यवधारणं Reg., B² (-ण B²). (७) B³I²Bⁿ; अन्यत्र B², Reg. (८) B³, नाराशंसं नृशस्तं Bⁿ, नराशंसं नृशस्त्रं B², नराशंसं नृशंसं M.M. (९) I² omits नृ- to -त्रम्.

कदित्था नॄँः पात्रं देवयताम्[1] (ऋ० १ । १२१ । १)। स्वतवाँः पायुः । भुवस्तस्य स्वतवाँः पायुरग्ने (ऋ० ४ । २ । ६) ॥

नॄँः पाहि शृणुधीति च ॥ ७९ ॥

नॄँः पाहि शृणुधी गिरः (ऋ० ८ । ८४ । ३) इत्ययं च विक्रान्तसंधिरेव । शृणुधीति किम् । रक्षा नॄन्पाह्यसुर त्वमस्मान् (ऋ० १ । १७४ । १) ॥

नकारस्य लोपरेफोष्मभावे पूर्वस्तत्स्थानादनुनासिकः स्वरः ॥ ८० ॥

नकारविकारानुक्त्वा अथेदानीं नकारसहचरितान्स्वरविकारानाह । यत्र यत्र[2] नकारस्य[3] लोपभाव उक्तो रेफभाव ऊष्मभावश्च तत्र तत्र पूर्वो[4] नकारस्थानादनुनासिकः स्वरो वेदितव्यः । स्वरग्रहणं व्यञ्जनानुनासिक्यपरिहारार्थम् । लोपभावे नकारस्य । सर्गाँ इव सृजतम्[5] (ऋ० ८ । ३५ । २०)। महाँ इन्द्रो नृवत् (ऋ० ६ । १९ । १)। पीवोअन्नाँ रयिवृधः (ऋ० ७ । ९१ । ३)। रेफभावः । रश्मीँरिव यच्छतम् (ऋ० ८ । ३५ । २१)। रुद्रस्य सूनूँर्युवन्यूँरुदश्याः[6] (ऋ० ५ । ४२ । १५) । ऊष्मभावः । महाँश्चरस्योजसा (ऋ० ८ । ३३ । ८) ।ताँस्ते अश्याम (ऋ० ९ । ९१ । ५)। नॄँः पतिभ्यो योनिम् (प्रै० पृ० १४२) ॥

आदिस्वरश्चोत्तरेषां पदेऽपि ॥ ८१ ॥

उत्तरेषां पदानामादिस्वरोऽनुनासिको वेदितव्यः । पदेऽपीत्यपिशब्दप्रयोगः संहितायामेतदविधानमिति[7] द्योतनार्थः[8] ॥

---

(१) B²Bⁿ, देववयताम् I², देवयताम् omitted in B³. (२) यत्र यत्र I²Bⁿ, यत्र तत्र B³, यत्र B². (३) नकार- B². (४) पूर्वे B². (५) सृजतीं I². (६) B²Bⁿ,-रुत् B³I². (७) एतदविधानमिति B², Reg.; एवैतदविधानमिति B³I² (-ध- I²); एवैतद्विधानमिति Bⁿ. (८) -र्थम् B².

माँस्पचन्या माँश्चत्वे मँश्चतोश्च ॥ ८२ ॥

माँस्पचन्याः । माँश्चत्वे । मँश्चतोः[१] । एतानि पदानि । माँस्पचन्याः[२] । यन्नीक्षणं माँस्पचन्या उखायाः (ऋ० १ । १६२ । १३)। माँश्चत्वे[३] । माँश्चत्वे वा पृशने वा वधत्रे[४] (ऋ० ६ । ६७ । ५४) । मँश्चतोः[५] । त्रध्नं मँ[६]श्चतोर्वरुणस्य बभ्रुम्[७] (ऋ० ७ । ४४ । ३) ॥

ईमित्यन्तलोप एषूदयेषु
गर्भं गावो वत्सं मृजन्ति पृच्यते ।
सखायो विव्याच पुना रिणन्ति
रथमित्यन्वक्षरसंधिरेव सः ॥ ८३ ॥

इदानीं वर्णलोप उच्यते । ईम् इत्यस्यान्तलोपो भवत्येषूदयेषु सत्सु। गर्भम् । गावः । वत्सम् । मृजन्ति । पृच्यते । सखायः । विव्याच । पुनः । रिणन्ति । रथम् । इतिकरणः समाप्तिवचनः । अन्वक्षरसंधिरेव सोऽयं वेदितव्यः । योऽधस्तात्प्रतिपादितः—एष स्य स च स्वराश्च पूर्वे[८] (२ । ८) इत्यादिकः ।

गर्भम् । यमी गर्भमृतावृधः (ऋ० ६ । १०२ । ६) । गावः । समी गावो मतयो यन्ति संयतः[६] (ऋ० ६ । ७२ । ६) । वत्सम् । समी वत्सं न मातृभिः (ऋ० ६ । १०४ । २) । मृजन्ति । तमी मृजन्त्यायवः (ऋ० ६ । ६३ । १७) । पृच्यते । समी पृच्यते समनेव

---

(१) $B^3I^2B^n$, B^2 omits the Commentary from मांस्पचन्याः to -तोः- (२) B^n, मांस्पचन्याः omitted in $B^3I^2B^2$. (३) B^n, मांश्चत्वे omitted in $B^3I^2B^2$. (४) B^2B^n; वधत्रे omitted in B^3I^2, Reg. (५) B^n, मँश्चतोः omitted in $B^3I^2B^2$. (६) B^2B^n, I^2 corrects मां- to मँ-, मां- B^3 as well as MSS. of Berlin and that of Paris (cp. Reg.). (७) बभ्रुम् omitted in B^3I^2. (८) पूर्वे omitted in B^2. (६) Reg., यन्ति संयतः in B^2 and संयतः in $B^3I^2B^n$ omitted.

केतुः[१] (ऋ० १ । १०३ । १) । सखायः । समी सखायो अस्वरन् (ऋ० ६ । ४५ । ५) । विव्याच । समी विव्याच सवना पुरूणि (ऋ० ३ । ३६ । ८) । पुनः । संवत्सरे वावृधे जग्धमी पुनः (ऋ० १ । १४० । २) । रिणन्ति : ए रिणन्ति बर्हिषि प्रियं गिरा (ऋ० ६ । ७१ । ६) । रथम् । समी रथं न भुरिजोरहेषत (ऋ० ६ । ७१ । ५) ॥

पुरु पृथ्वधि पूर्वेषु शकार उपजायते ।
ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्दे परेऽन्तरा ॥ ८४ ॥

पुरु । पृथु । अधि । एतेषु पूर्वपदेषु सत्सु । ह्रस्वे च पूर्व[२]पद्यस्यान्ते सति । चन्द्रशब्दे च परेऽन्तरा शकारागम उपजायते । पुरु । महि क्षेत्रं पुरु श्चन्द्रं विविद्वान् (ऋ० ३ । ३१ । १५) । पृथु । पृथु श्चन्द्रमवसे चर्षणिप्राः[३] (ऋ० ४ । २ । १३) । अधि । अधि श्चन्द्रं बृहत्पृथु (ऋ० ८ । ६५ । ११) । ह्रस्वे च पूर्वपद्यान्ते । हरिश्चन्द्रो मरुद्गणः (ऋ० ६ । ६६ । २६) । ह्रस्वग्रहणं विस्पष्टार्थं दीर्घात्परस्य पद्यस्य चन्द्रशब्दस्याभावात् । पूर्वपद्यान्त इति कस्मात् । अभि चन्द्रा भर्तवे नो हिरण्या (ऋ० ६ । ६७ । ५०) ॥

परीति पद्ये कृपरे षकारः ॥ ८५ ॥

परि इत्येतस्मिन्पूर्वपद्ये कृपरे सत्यन्तरा षकारागम उपजायते । परिष्कृण्वन्ननिष्कृतम् (ऋ० ६ । ३६ । २) ॥

वनेति रेफः सदशब्द उत्तरे ॥ ८६ ॥

वन इत्येतस्मिन्पूर्वपद्ये सदशब्द उत्तरेऽन्तरा रेफो जायते । तिष्ठद्रथं न धूर्षदं वनर्षदम् (ऋ० १० । १३२ । ७) ॥

परिष्कृण्वन्ति वेधसः ॥ ८७ ॥

---

(१) B²; केतुः omitted in B³I²Bⁿ, Reg. (२) B²Bⁿ, पूर्वस्य B³I². (३) B²Bⁿ; चर्षणिप्राः omitted in B³I², Reg.

परिष्कृण्वन्ति इति निपात्यते षकारागमः[1]। तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः[2] (ऋ० ९ । ६४ । २३)। अपद्यार्थं वचनम्। वेधस इति किम्। मृग्यं प्रत्युदाहरणम् ॥

अस्कृतोषसम् ॥ ८८ ॥

अस्कृत इति निपात्यते सकारोपजनः। निरु स्वसारमस्कृतोषसम् (ऋ० १० । १२७ । ३)। उषसमिति किम्। युजं ह्यन्यमकृत प्रवेपनी (ऋ० ५ । ३४ । ८) ॥

शौद्धाक्षराः संधय एत उक्ताः ॥ ८९ ॥

य एते पुरुपृथ्वादयः संधयस्ते[3] शौद्धाक्षरसंज्ञा वेदितव्याः। शौद्धाक्षरागमोऽपैति (१० । २१) इत्यादि संज्ञा[4]प्रयोजनम् ॥

मेधातिथौ वरुणान्तव्रतान्तौ
स्पर्शान्तस्थाप्रत्ययौ निर्ह्रसेते ॥ ९० ॥

मेधातिथावृषौ। अग्निं दूतं वृणीमहे (ऋ० १ । १२ । १) इत्यारभ्य—कस्य नूनम् (ऋ० १ । २४ । १) इति यावन्मेधातिथिः। वरुणोऽन्ते यस्य समासस्य स[5] वरुणान्तः। एवमेव व्रतान्तोऽपि गृह्यते। स्पर्शप्रत्यये[6]ऽन्तःस्थाप्रत्यये[7] निर्ह्रसेते। ह्रस्वौ भवतः। वरुणान्तः। इन्द्रावरुणा नू नु[8] वाम् (ऋ० १ । १७ । ८)। इन्द्रावरुणा यां हुवे (ऋ० १ । १७ । ९)। व्रतान्तः। युवं दक्षं धृतव्रत मित्रावरुणा

---

(१) B²Bⁿ, पकारः आगमः B³, पकारः I². (२) B², वेधस Bⁿ, वेधसः omitted in B³I². (३) संधयस्ते B², ते B³Bⁿ (B³ corrects एते to ते), एते I². (४) संज्ञायाः B³. (५) पदस्य (instead of समासस्य स) B². (६) -प्रत्यये or-प्रत्ययो corrected to -प्रत्ययौ I². (७)-प्रत्येयो I². (८) नु नू (for नू नु) I².

दूळभम् (ऋ० १ । १५ । ६)। मेधातिथाविति[1] किम् । इन्द्रावरुणा मदे अस्य मायिनः[2] (ऋ० ७ । ८२ । ३) । इन्द्रावरुणा युवमध्वराय नः (ऋ० ७ । ८२ । १)। स्पर्शान्तःस्थाप्रत्ययाविति किम् । ता मित्रावरुणा हुवे[3] (ऋ० १ । २३ । ५) ॥

आदित्या देवा वरुणासुरेति येत्यादिषु ॥ ८१ ॥

आदित्या । देवा । वरुणा । असुरा । एतानि पदानि ह्रस्वानि[4] भवन्ति या इत्यादिषु पदेषु परभूतेषु । तानि तूपरिष्टाद्वक्ष्यति । अत उपरिष्टादेवोदाहरिष्यामः ॥

वयमित्यत्र मित्रा ॥ ८२ ॥

वयम् इत्येतस्मिन्पदे परभूते मित्रा इत्ये[5]तत्पदं ह्रस्वी[6]भवति । मित्र वयं च सूरयः (ऋ० ५ । ६६ । ६) ॥

या सुप्रतीकं निष्कृतं पुरोहितिः क्षत्रं दाशति शवसा भिषज्यथः ॥ ८३ ॥

या । सुप्रतीकम् । निष्कृतम् । पुरोहितिः । क्षत्रम् । दाशति । शवसा । भिषज्यथः । एते ते यादयो येऽधस्तादुपदिष्टाः । या । प्र सा क्षितिरसुर या महि प्रिया[7] (ऋ० १ । १५१ । ४)। सुप्रतीकम् । उद्वां चक्षुर्वरुण सुप्रतीकम् (ऋ० ७ । ६१ । १)। निष्कृतम् । वळित्था देव निष्कृतमादित्या[8] (ऋ० ५।६७। १)। पुरोहितिः। इयं देव पुरोहितिर्युवभ्याम्[9] (ऋ० ७ । ६० । १२)। क्षत्रम् । युवं

---

(१)-थौ B². (२) Reg., अस्य० । B², मायिनः omitted in B³I² Bⁿ. (३) हुवे- । B². (४) ह्रस्वी-I². (५) इति omitted in B². (६) ह्रस्वं B². (७) प्रिया omitted in B³I². (८) B³I²Bⁿ; आदित्या omitted in B², Reg. (९) B²B³; पुरोहितिः I²Bⁿ, Reg.

नो येषु वरुण चत्रम् (ऋ० ५ । ६४। ६)। दाशति। इन्द्रा यो वां वरुण दाशति त्मन्[1] (ऋ० ६ । ६८ । ५)। शवसा। य आदित्य[2] शवसा वां नमस्वान् (ऋ० ७ । ८५ । ४)। भिषज्यथः। यद्वा देव भिषज्यथः (ऋ० ८ । ९ । ६)॥

सो चिन्न्वगस्त्ये दशमे च मण्डले ॥ ९४ ॥

सो चित् इति निपात्यत ओत्वं विसर्जनीयस्यागस्त्य ऋषौ दशमे मण्डले च। सो चिन्नु न मराति नो वयम् (ऋ० १ । १९१ । १०)। सो चिन्नु सख्या नर्य इन स्तुतः[3] (ऋ० १० । ५० । २)। अगस्त्ये दशमे च मण्डल इति किम्। स चिन्न्वासां पती रयीणाम् (ऋ० १ । ६८ । ४)। स चिद्विवेद निहितम् (ऋ० ९ । ८७ । ३)॥

सा न्वीयते ॥ ९५ ॥

सा न्वीयत इति विसर्जनीयस्य आत्वं निपात्यते। स चिकित्वाँ ईयते सा न्वीयते (ऋ० १ । १४५ । १)। ईयत इति किम्। प्रत्युदाहरणं प्रत्येष्यम्[4]॥

सः पलिक्नीः ॥ ९६ ॥

विसर्जनीयस्यालोपो निपातितः। न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीः (ऋ० ५ । २ । ४)॥

हि षस्तव ॥ ९७ ॥

अत्र विसर्जनीयस्यालोपो निपात्यते। नहि षस्तव नो मम (ऋ० ८ । ३३ । १६)। हीति किम्। स तवोती गोषु गन्ता

---

(१) Bⁿ; दाशति-। B²; त्मन् omitted in B³I², Reg. (२) आदित्यात्य I². (३) B²Bⁿ, इनः I², इन स्तुतः omitted in B³. (४) B³I², Reg.; प्रत्येतव्यं Bⁿ; मृग्यं B².

(ऋ० ८ । ७१ । ५)। नहीत्येतत्पदे हीति यत्पदावयवग्रहणं[1] तच्छन्दोभङ्गभयात् ॥

जुगुक्षतो दुदुक्षन्गा अदुक्षद्
दुक्षन्वृधेऽस्य दुक्षतानु दक्षि ।
दक्षन्न पत्मन्दक्षुषोऽभि दक्षत्
कृष्णासो दक्षि हियानस्य दक्षोः ॥ ६८ ॥

यथापठितान्येतानि[2] निपातितानि । जुगुक्षतः । सुमतिं न जुगुक्षतः (ऋ० ८ । ३१ । ७)। दुदुक्षन् । सहस्रधारां बृहतीं दुदुक्षन् (ऋ० १० । ७४ । ४)। गा अदुक्षत् । निर्ज्योतिषा तमसो गा अदुक्षत् (ऋ० १ । ३३ । १०)। गा इति किम् । अधुक्षत्पिप्युपीमिषम् (ऋ० ८ । ७२ । १६)। दुक्षन्वृधे । हरिं यत्ते मन्दिनं दुक्षन्वृधे (ऋ० १ । १२१ । ८) । वृध इति किम् । निर्धुक्षन्वक्षणाभ्यः (ऋ० ८ । १ । १७)। अस्य दुक्षत। विश्वाहा शुक्रं पयो अस्य दुक्षत (ऋ० १ । १६० । ३)। अस्येति किम् । भरद्वाजायाव धुक्षत द्विता (ऋ० ६ । ४८ । १३)। अनु दक्षि । त्वं वि भास्यनु दक्षि दावने (ऋ० २ । १ । १०)। अन्विति किम् । नीचा तं धक्ष्यतसं न शुष्कम् (ऋ० ४ । ४ । ४)। दक्षन्न । दक्षन्न विश्वं ततृषाणमोषति (ऋ० १ । १३० । ८)। नेति किम् । द्रविर्न द्रावयति दारु धक्षत् (ऋ० ६ । ३ । ४)। पत्मन्दक्षुपः । तस्य पत्मन्दक्षुषः (ऋ० १ । १४१ । ७)। पत्मन्निति किम् । प्रत्युदाहरणं मृग्यम्[3] । अभि दक्षत् । स यो व्यस्थादभि दक्षदुर्वीम् (ऋ० २ । ४ । ७)। अभीति किम् । द्रविर्न द्रावयति दारु धक्षत् (ऋ० ६ । ३ । ४)। कृष्णासो दक्षि ।

(१) B²Bⁿ, कृतं added in B³I². (२) यथोपदिष्टान्येतानि B². (३) प्रत्यु- to मृग्यम् omitted in I².

आदस्य ते कृष्णासो दक्षि सूरयः[१] (ऋ० १ । १४१ । ८)। कृष्णास इति किम्। नीचा तं धक्ष्यतसं न शुष्कम् (ऋ० ४ । ४ । ४)। हियानस्य दक्षोः। संदृष्टिरस्य हियानस्य दक्षोः (ऋ० २ । ४ । ४)। हियानस्येति किम्। धक्षोर्न वाताः परि स[२]न्त्यच्युताः (ऋ० १० । ११५ । ४)॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्य-
वज्रटपुत्र[३]उवट[४]कृतौ प्रातिशाख्य-
भाष्ये[५] चतुर्थं पटलम्[६] ॥

---

(१) $B^3 I^2$, सूरयः omitted in $B^2 B^n$. (२) प- I^2. (३) B^2 omits आनन्द-to -पुत्र-. (४) -पुत्रोव्वट-B^n. (५) प्रातिशाख्ये $I^2 B^n$. (६) सन्धिपटलम् B^n. B^3 adds समाप्तम्.

अन्तःपादं नाम्युपधः सकारः षकारमप्यूष्म-परैर्यथोक्तम् । अन्यैरेकारात् ॥ १ ॥

अन्तःपादमिति पादस्य मध्ये । नामिनो यस्योपधाभूताः स तथोक्तः सकारः । ऋकारादयो दश नामिनः स्वराः (१ । ६५) इत्युक्तम् । सकारः षकारमापद्यत इत्येतदधिकृतं वेदितव्यम् । ऊष्मपरैर्नामिभिरुपहितः । अप्यनूष्मपरैरित्यपिशब्दः । यथोक्तमित्यधिकारोपसंहारवचनम् । अन्यैरेकारादिति नामिसामान्यप्रसक्तावस्य निवृत्तिवचनम् ।

यच्च गोषु दुष्ष्व[1]प्न्यम् (ऋ० ८ । ४७ । १४) । अन्तःपादमिति किम् । तन्न इन्द्रस्तद्वरुणस्तदग्निस्तत (ऋ० १ । १०७ । ३) । नाम्युपध इति किम् । परः सो अस्तु[2] तन्वा तना च (ऋ० ७ । १०४ । ११) । यथोक्तग्रहणं किम् । ताभिर्याति स्वयुक्तिभिः (ऋ० १ । ५० । ९) । अन्यैरेकारादिति किम् । ये स्था मनोर्यज्ञियाः (ऋ० १० । ३६ । १०) ॥

नतिरत्र पूर्वा ततो व्यापत्तिर्भवतीति विद्यात् ॥ २ ॥

एकस्मिन्विषये यत्र कार्यद्वयं प्रवर्त्तते तत्रावश्यंभावी[3] क्रमस्तत्र यथा[4]योगं कार्यक्रमो भवतीत्येतद्दर्शनायाह—नतिरत्र पूर्वेति । यदि हि व्यापत्तिः पूर्वं क्रियेत[5] पश्चा[6]न्नतिस्तदा—तमेवोष्माणमूष्मणि (४ । ३२) इति सकारो नम्यस्य सकारस्य व्यवधायकः

(१) दुःष्व- B²Bⁿ, Reg., M.M.; दुष्व- B³I².
(२) अस्य B³. (३) -भावि B³. (४) तथा (for तत्र यथा-) B³.
(५) I² and Reg., क्रियते B³BⁿB². (६) तपश्चा- B², त before पश्चा- struck out in B³.

स्यान्नामिभिः सह । ततो न प्रवर्तेत नतिः[1] । अतः पूर्वमेव नतिः क्रियते पश्चात्—तमेवोष्माणमूष्मणि (४ । ३२) इति ॥

सूती नकिः स्वैर्व्युरु नह्यभि त्री नि हीति सः ॥३॥

सु । ऊती । नकिः । स्वैः । वि । उरु । नहि । अभि । त्री । नि । हि । इत्येतैर्नामिभिरुपहितः सः इति[2] सकारः षकार[3]मापद्यते । सु । प्र सु ष विभ्यो मरुतः (ऋ० ४ । २६ । ४) । ऊती । ऊती ष बृहतो दिवः (ऋ० ६ । २ । ४) । नकिः । नकिष्षो[4] अस्त्यरणो जहुर्हि तम् (ऋ० २ । २४ । ७) । स्वैः । स्वैष्ष एवै रिरिषीष्ट युर्जनः (ऋ० ८ । १८ । १३) । वि । ओभे अप्रा[5] रोदसी वि ष आवः (ऋ० ९ । ९७ । ३८) । उरु । उरु ष सरथं सारथये कः (ऋ० ६ । २० । ५) । नहि । नहि षस्तव नो मम (ऋ० ८ । ३३ । १६) । अभि । अभि ष द्युम्नैरुत[6] (ऋ० ८ । २० । १६) । त्री । त्री ष पवित्रा हृद्यन्तरा दधे (ऋ० ९ । ७३ । ८) । नि । नि ष हीयतां तन्वा तना च (ऋ० ७ । १०४ । १०) । हि । यूपादमुञ्चो अशमिष्ट हि षः (ऋ० ५ । २ । ७) ।

द्व्यक्षरेणैव सत्स्थः ॥ ४ ॥

द्व्यक्षरेणैव पदेन नाम्यन्तेनोपहितः सत् स्थः इत्येतयोः सकारः षकारमापद्यते । सत् । दिवि षद् भूम्या ददे (ऋ० ९ । ६१ । १०) । स्थः । यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्याम् (ऋ० १ । १०८ । ११) । द्व्यक्षरेणैवेति[7] किम् । युवं हि स्थः स्वर्पती (ऋ० ९ । १९ । २) ॥

---

(१) ततोऽनतिर् (for ततो to नतिः ।) Reg. (२) B³I², सः इति omitted in B²Bⁿ. (३) षस्व- B³. (४) I², नकिःष्षो B² B³, नकिः षो Bⁿ. (५) B²I²; उभे अप्रा B³, Reg.; omitted in Bⁿ. (६) Bⁿ adds वाजसातिभिः. (७) -णेति B³.

स्वबह्वक्षरेण ॥ ५ ॥

सु इत्ये[1]तत्पदं नम्यतेऽबह्वक्षरेण नामिनोपहितं चेत् । मो ष्वद्य दुर्हणावान् (ऋ० ८ । २ । २०)। अभी ष्वर्यः पौंस्यैर्भवेम (ऋ० १० । ५९ । ३)। अबह्वक्षरेणेति किम् । सुदीतिभिः सु दीदिहि (ऋ० ६ । ४८ । ३) ॥

पदादयश्च स्यिति स्किति स्निति ॥ ६ ॥

पदानामादिभूताः सकाराः षकारमा[2]पद्यन्ते यकारककार-नकारपराः सन्तः । इतिकरणः प्रकारार्थः । स्यिति । गोभिष्ष्याम सधमादः (ऋ० ५ । २० । ४)। स्किति । यज्ञु ष्कन्नं प्रथमं देव-यानम् (ऋ० १० । १८१ । ३)। स्निति । अधि ष्णुना धन्व सानो अव्ये (ऋ० ९ । ९७ । १६)। अबह्वक्षरेणैवेत्येव । तव प्रियासः सूरिषु स्याम (ऋ० ७ । १९ । ७)। उप द्यां स्कम्भथु स्कम्भनेन (ऋ० ६ । ७२ । २) ॥

अरेफस्य च स्मिति ॥ ७ ॥

अरेफस्य च[3] पदस्य स्मिति पदादिर्नम्यते । नहि ष्मा ते शतं चन (ऋ० ४ । ३१ । ९)। अरेफस्येति किम् । प्रति स्मरेथां तुजय-द्भिरेवैः (ऋ० ७ । १०४ । ७)। अबह्वक्षरेणैवेत्येव । वहामि स्म[4] पूषणमन्तरेण (ऋ० १० । ३३ । १) ॥

एकारेणापि स्विति नःपरं चेत् ॥ ८ ॥

एकारान्तेनापि नामिनोपहितं सु इत्येतत्पदं नम्यते नःपदं परं चेद्भवति । ते षु णो मरुतो मृळयन्तु[5] (ऋ० १ । १६९ । ५)।

---

(१) सु ए- B^2. (२) षकारान् B^n. (३) B^3B^n omit च. (४) वहास्मि B^2. (५) मरुतः B^2.

नःपरमिति किम् । त्वे सु पुत्र शवसः (ऋ० ८ । ९२ । १४) । अप्राप्तप्राप्ति[1] वचनोऽपिशब्दः ॥

दीर्घो न स्यिति ॥ ९ ॥

दीर्घो नाम्युपधाभूतोऽपि स्यिति[2] पदादिं[3] न नमति[4] । वीरैः स्याम सधमादः (ऋ० ५ । २० । ४) । दीर्घग्रहणं किम् । गोभिष्ष्याम सधमादः (ऋ० ५ । २० । ४) ॥

उ स्व नास्पर्शपूर्वम् ॥ १० ॥

उ इत्येतत्पदं पूर्वं स्यिति पदादिं न नमति स्पर्श[5]पूर्वं यदि न भवति । एष उ स्य पुरुव्रतः (ऋ० ९ । ३ । १०) । अस्पर्शपूर्वमिति किम् । उदु ष्य शरणे दिवः (ऋ० ८ । २५ । १९) ॥

तकारवर्गस्तु टकारवर्ग-
मन्तःपदस्थोऽपि षकारपूर्वः ॥ ११ ॥

तकारवर्गस्तु पुनष्टकारवर्गमापद्यते यथासंख्यम् । अन्तःपदस्थोऽपि नानापदस्थोपि[6] षकारपूर्वश्चेत्[7] । कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसः (ऋ० १ । १८२ । ७) । आपो हि ष्ठा मयोभुवः (ऋ० १० । ९ । १) ।[8] षकारपूर्व इति किम् । युवं हि स्थः स्वर्पती (ऋ० ९ । १९ । २) ॥

सितां सधस्थात्स्तनिहि स्तवाम
स्तवे स्तुवन्ति स्तुहि सीं स्तुत स्थ ।

---

(१) -प्राप्त- B². (२) स्यितिं I², corrected to स्यिति in B³. (३) B³I², Reg.; पदादिर् B²Bⁿ. (४) B², Reg.; नमते B³I², नम्यते Bⁿ. (५) उ स्पर्श- B². (६) नानापदस्थोपि omitted in B², supplied on the margin in I². (७) B², षकारपूर्वः सन् Bⁿ, षकारे पूर्वस्मिन् B³I². (८) नकिष्टं घ्नंत्यंतितो न दूरात् added in Reg., M.M.

साहि स्त स्तुप्सत्सि सत्सत्स्वनीति
स्तोभेत्यादिश्चापि बह्वक्षरान्त्यैः ॥१२॥

सिताम्। सधस्थात्। स्तनिहि। स्तवाम। स्तवे। स्तुवन्ति। स्तुहि। सीम्। स्तुतः। स्थ। साहि। स्तः। स्तुप्। सत्सि। सत्सत्। स्वनि। इत्येतेषां पदानामादिः। स्तोभ इत्येतस्य च पदस्य सप्रवादस्यादिर्नम्यते। अपि बह्वक्षरान्त्यैर्नामि[1]भिरुपहितः। अप्यबह्वक्षरान्त्यैरित्यपिशब्दः।

सिताम्। पदि षितामसुञ्चता यजत्राः (ऋ० ४। १२। ६)। सधस्थात्। निष्षीमद्भ्यो धमथो निष्षधस्थात् (ऋ०। ५। ३१। ९)। स्तनिहि। नि ष्टनिहि दुरिता बाधमानः (ऋ० ६। ४७। ३०)। स्तवाम। तमु ष्टवाम यं गिरः (ऋ० ८। ९५। ६)। स्तवे। विश्वा यद्गामनु ष्टवे (ऋ० ५। ७३। ४।)। स्तुवन्ति। अनु ष्टुवन्ति पूर्वथा (ऋ०। ८। ३। ८)। स्तुहि। तमु ष्टुहीन्द्रं यो ह सत्वा (ऋ० १। १७३। ५)। सीम्। निष्षीमद्भ्यो धमथो निष् षधस्थात्[2] (ऋ० ५। ३१। ९।)। स्तुतः। नू ष्टुत इन्द्र नू गृणानः (ऋ० ४। १६। २१।)। स्थ। आपो हि ष्ठा मयोभुवः (ऋ० १०। ९। १)। साहि। वि षाह्यग्ने गृणते मनीषाम् (ऋ० ४। ११। २)। स्तः। नास्य ते महिमानं परि ष्टः (ऋ० १। ६१। ८)। स्तुप्। सोमो विराजमनु राजति ष्टुप् (ऋ० ९। ९६। १८)। सत्सि। अग्ने नि षत्सि नमसाधि बर्हिषि (ऋ०। ८। २३। २६)। सत्सत्। नि हि षत्सदन्तरः पूर्वो अस्मत् (ऋ०। १०। ५३। १)। स्वनि। यदि क्लोशमनु ष्वणि (ऋ०। ६। ४६। १४)। स्तोभेत्यादिः[3]।

---

(१) नाम- B²Bⁿ. (२) धमथः B². (३) B², स्तोभेत्यादि B³Bⁿ, स्तोभेत्या I².

परि ष्टोभत विंशतिः (ऋ० १ । ८० । ९)। परि ष्टोभन्तु नो गिरः (ऋ० ८ । ९२ । १९)॥

नि परीति स्व सीत्यादी चकारवर्गीयोदयौ ॥ १३ ॥

नि परि इत्येतौ नामिनौ स्व सि इत्थंभूतौ पदादी नमतः। किमविशेषेण। नेत्याह। चकारवर्गीयोदयौ चेत्स्याताम्। चकारवर्गवर्ण[1]परावित्यर्थः। नि। महान्तं कोशमुदचा नि षिञ्च (ऋ० ५। ८३। ८)। परि। सहस्रधारः परि षिच्यते हरिः (ऋ० ९। ८६। ३३)। परि ष्वजध्वं दश कक्ष्याभिः (ऋ० १०। १०१। १०)। परि ष्वजन्ते जनयो यथा पतिम् (ऋ० १०। ४३। १)। चकारवर्गीयोदयाविति किम्। व्युच्छन्ती परि स्वसुः (ऋ० ४। ५२। १)॥

दकारे चोत्तरे परान्से स सीति स्वरोदये ॥ १४ ॥

दकारे चोत्तरे। चकारः समुच्चयार्थीयो निपरी समुच्चिनोति। परान्पदादीन्नमतः। कथंभूतान्पदादीन्[2]। अत आह से स सी। इतिकरणः प्र[3]दर्शनार्थः। स्वरोदये। दकारस्य विशेषणमेतत्। से स सी इति पदादीन्दकारं स्वरपरे निपरी[4] नमत इत्यर्थः।

से। परि यज्ञं नि षेदुः (ऋ० ४। ५६। ७)। स। नि षदा पीतये मधु (ऋ० । ८। ९७। ८)। शुनं नरः परि षदन्नुषासम् (ऋ० ४। ३। ११)। सी। नि षीद होत्रमृतुथा यजस्व (ऋ० १०। ९८। ४)। निपरी इति[5] किम्। इमं यम प्रस्तरमा हि सीद (ऋ० १०। १४। ४)। दकार इति किम्। नि[6] समना भूमिः। स्वरोदय इति किम्। दिवश्चरन्ति परि सद्यो अन्तान् (ऋ० ५। ४७। ४)॥

---

(१) B^3I^2, -वर्ण- omitted in B^2B^n. (२) B^2I^2, -दीनिति B^3B^n. (३) प्रकार- B^2. (४) B^2, दकारस्वरपरपरान् B^3I^2, दकारस्वरपरान् B^n. (५) निपरीति B^n. (६) नि B^3B^2, नि corrected to वि in I^2, वि B^n.

सेध स्वापय सस्वजे सस्वजाते ससाद च ॥ १५ ॥

सेध। स्वापय। सस्वजे। सस्वजाते। ससाद। चकारोच्चारणादेतान्पदादीन्निपरी नमतः। सेध। वाचस्पते नि षेधेमान् (ऋ० १०। १६६। ३)। स्वापय। नि ष्वापया मिथूदृशा (ऋ० १।२९।३)। सस्वजे। तमिन्दुः परि षस्वजे (ऋ० ९। १२। ५)। सस्वजाते। समानं वृक्षं परि षस्वजाते (ऋ० १। १६४। २०)। ससाद। नि षसाद धृतव्रतः (ऋ० १। २५। १०)॥

सन्तं सन्तः सन्ति पूर्वीः स्थु स्था स्थादिति चोत्तरः ॥१६॥

सन्तम्। सन्तः। सन्ति पूर्वीः। स्थुः। स्थाः। स्थात्। इति च पदादिसकारानुत्तरो नामी नमति। कश्चोत्तरः। पाठक्रमेण परीति। सन्तम्। अस्मे वत्सं परि षन्तं न विन्दन्[1] (ऋ० १। ७२। २)। सन्तः। नाद्रयः परि षन्तो वरन्त (ऋ० ३। ३२। १६)। सन्ति पूर्वीः। ता ईं विश्वतः परि षन्ति पूर्वीः (ऋ० ९। ८९। ५)। पूर्वीरिति किम्। धन्वोर्न वाताः परि सन्त्यच्युताः (ऋ० १०। ११५। ४)। स्थुः। अर्णो न द्वेषो धृषता परि ष्ठुः (ऋ० १। १६७। ९)। स्थाः। परि ष्ठा इन्द्र मायया (ऋ० ४। ३०। १२)। स्थात्। मा नो मर्तस्य दुर्मतिः परि ष्ठात् (ऋ० ३। १५। ६)॥

हि षिञ्च तू षिञ्च रजःसु षीद-
न्नितो षिञ्चताभि षतः किमु ष्वित्।
सूरभिष्ष्याम दिवि षन्तु के ष्ठ
प्रति ष्फुरन्नी षधस्था कमु ष्वित् ॥१७॥

हि षिञ्च। तू षिञ्च। रजःसु षीदन्। इतो षिञ्चत। अभि षतः। किमु ष्वित्। सूरभिष्ष्याम। दिवि षन्तु। के ष्ठ। प्रति

---

(१) I²Bⁿ omit न विन्दन्.

ष्फुर। त्री षधस्था। कमु ष्वित्[1]। एतानि यथागृहीतानि निपात्यन्ते। हि षिञ्च। अध्वर्यवा तु हि षिञ्च (ऋ० ८। ३२। २४)। तू षिञ्च। आ तू षिञ्च हरिमीं द्रोरुपस्थे[2] (ऋ० १०। १०१। १०)। रजःसु षीदन्। बुध्ने नदीनां रजःसु षीदन् (ऋ० ७। ३४। १६)। इतो षिञ्चत। परीतो षिञ्चता सुतम्[3] (ऋ० ६। १०७। १)। ओत्वं षत्वं च[4] निपात्यते[5]। अभि षतः। महो विश्वाँ अभि षतः (ऋ० ८। २३। २६)। अभी षतस्तदा भर (ऋ० ७। ३२। २४)।

नन्वभि षत इति निपातनं च यथाश्रुतमेव ग्र[6]हीतुं न्याय्यम्। अतः—अभी षतस्तदा भर (ऋ० ७। ३२। २४) इत्यत्र षत्वं न प्राप्नोत्यभिशब्दस्य दीर्घत्वात्। सत्यमेवमेतद् यदि नामाधस्तादेव परिभाषितं यथा सामवशाः संधयो नियतविषयापवादका भवन्ति। न तु सर्वत्र। सामवशा इति चैवापवादाञ्जानीयादनुलोमानामन्वक्षरसंधीनां नान्येषां केषाञ्चिदिति। तथा च ज्ञापकं भवति—नु ष प्र (५। १८) इति। भसन्नु ष प्र पूर्व्यः (ऋ० ६। १४। १) इत्युदाहरणम्। अत्र प्रेति यद्विशेषणं तत्—प्र नू स मर्तः शवसा (ऋ० १। ६४। १३) इत्यस्य निर्धारणार्थम्। यदि नुशब्दो दीर्घोऽपि विघातं षत्वस्य न कुर्यात्तदा प्रशब्दग्रहणं सार्थकं स्यादिति। तस्मात्सामवशाः संधयोऽपवादका अनुलोमानामन्वक्षरसंधीनां नान्यत्रेति[7] सिद्धम्।

किमु ष्वित्। किमु ष्विदस्मै निविदो भनन्त (ऋ० ४। १८। ७)। किमिति किम्। इन्द्रं क उ स्विदा चक्रे (ऋ० ८। ६४। ८)।

---

(१) The Comm. हि षिञ्च to ष्वित् omitted in I^2. (२) द्रोः B^2. (३) षिंचत B^2I^2. (४) च omitted in I^2. (५) ओत्वषत्वे निपात्येते B^n. (६) गृ० B^2B^n. (७) नान्यत्रेति $B^3 I^2 B^n$, नान्येषामिति B^2.

सूरिभिष्ष्याम । घ्नन्तो वृत्राणि सूरिभिष्ष्याम (ऋ० ७ । ६२ । ४)। दिवि षन्तु । उत स्वानासो दिवि षन्त्वग्नेः (ऋ० ५ । २ । १०)। के ष्ठ । के ष्ठा नरः श्रेष्ठतमाः (ऋ० ५ । ६१ । १)। प्रति ष्फुर । प्रति ष्फुर वि रुज वीड्वंहः (ऋ० ४ । ३ । १४)। त्री षधस्था । त्री षधस्था सिन्धवस्त्रिः (ऋ० ३ । ५६ । ५)। कमु ष्वित् । कमु ष्विदस्य सेनया (ऋ० ८ । ७५ । ७)। कमिति किम् । उक्थे क उ स्विदन्तमः (ऋ० ८ । ६४ । ६)॥

उ षुवाणो दिवि षन्त्सूरिभिष्ष्या-
मृच्छन्ति ष्मं नू ष्ठिरं वंसु षीदति ।
नु ष प्र हि ष्ठो यशसा मही षा
वि षा भूयामो षु यति ष्ठनेति च ॥ १८ ॥

उ षुवाणः । दिवि षन् । सूरिभिष्ष्याम् । ऋच्छन्ति ष्म । नू ष्ठिरम् । वंसु षीदति । नु ष प्र । हि ष्ठो यशसा । मही षा । वि षा । भूयामो षु । यति ष्ठन । इति च[1] यथागृहीतानि पदानि[2] भवन्ति । उ षुवाणः । सोम उ षुवाणः सोतृभिः (ऋ० ९ । १०७ । ८)। दिवि षन् । दिवि षञ्छुक्र आततः (ऋ० ६ । २ । ६)। सूरिभिष्ष्याम् । आ वां सुम्ने वरिमन्सूरिभिष्ष्याम (ऋ० ६ । ६३ । ११)। ऋच्छन्ति ष्म । ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् (ऋ० १० । १०२ । ६)। नू ष्ठिरम् । नू ष्ठिरं मरुतो वीरवन्तम् (ऋ० १ । ६४ । १५)। वंसु षीदति । श्येनो न वंसु षीदति (ऋ० ९ । ५७ । ३)। नु ष प्र । भसन्नु ष प्र पूर्व्यः (ऋ० ६ । १४ । १)। प्रेति किम् । प्र नू स मर्तः शवसा (ऋ० १ । ६४ । १३)। हि ष्ठो यशसा । दूतेव हि ष्ठो यशसा जनेषु (ऋ० १० । १०६ । २)। यशसेति

---

(१) B² omits च. (२) B² omits पदानि.

किम् । युवं हि स्थः स्वर्पती[1] (ऋ० ६ । १६ । २) । मही षा । विदे हि माता महो मही षा (ऋ० ६ । ६६ । ३) । वि षा । वि षा होत्रा विश्वमश्नोति (ऋ० १० । ६४ । १५) । भूयामो षु । भूयामो षु त्वावतः (ऋ० ४ । ३२ । ६) । यति ष्ठन । विश्वे देवासो मनुषो यति ष्ठन (ऋ० १० । ६३ । ६) ॥

वाजी स्तुतो वहन्ति सीं पतिः स्यां दित्ससि स्तुतः ।
अपो सु म्यक्ष श्रुधि सु त्रिः स्म स्तुहि स्तुहीति न ॥१८॥

वाजी स्तुतः । वहन्ति सीम् । पतिः स्याम् । दित्ससि स्तुतः । अपो सु म्यक्ष । श्रुधि सु । त्रिः स्म । स्तुहि स्तुहि[2] । इत्येतेषु पदेषु यथाप्राप्तं षत्वं प्रतिषिध्यते । वाजी स्तुतः[3] । वाजी स्तुतो विदथे दाति वाजम् (ऋ० ६ । २४ । २) । वहन्ति सीम्[4] । वहन्ति सीमरुणासो रुशन्तः (ऋ० ६ । ६४ । ३) । पतिः स्याम् । अस्य पतिः स्यां सुगवः सुवीरः (ऋ० १ । ११६ । २५) । दित्ससि स्तुतः । यद्दित्ससि स्तुतो मघम् (ऋ० ८ । १४ । ४) । अपो सु म्यक्ष । अपो सु म्यक्ष वरुण (ऋ० २ । २८ । ६) । म्यक्षेति किम् । अपो षु ण इयं शरुः (ऋ० ८ । ६७ । १५) । श्रुधि सु । इन्द्र श्रुधि सु मे हवम् (ऋ० ८ । ८२ । ६) । त्रिः स्म । त्रिः स्म माह्नः श्नथयो वैतसेन (ऋ० १० । ९५ । ५) । स्तुहि स्तुहि । स्तुहि स्तुहीदेते घा ते (ऋ० ८ । १ । ३०) ॥

७ सान्तस्थादन्तमूलीयपूर्वै-
रन्तःपदं नम्यतेऽन्तःपदस्थैः ॥ २० ॥

---

(१) B[2] adds इन्द्रः. (२) The Comm. वाजी to स्तुहि given after प्रतिषिध्यते in B[2], omitted in B[n]. (३) B[2] omits वाजी स्तुतः. (४) B[2] omits वहन्ति सीम्.

युग्मान्तःस्थापूर्वैर्नामिभिरुपहितः सकारः[१] । रेफवकारपूर्वैरित्यर्थः । दन्तमूलीयपूर्वैश्च नामिभिरुपहितः सकारो नम्यते । दन्तमूलीयाः[२] सकारस्तवर्गश्च । अन्तःपदमेकस्मिन्पदे । अन्तःपदस्थैः पदान्तवर्तिभिः[३] । युग्मान्तःस्थापूर्वैः । त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत (ऋ० १ । १६४ । २३) । विषितस्तुका रोदसी नृमणाः (ऋ० १ । १६७ । ५) । दन्तमूलीयपूर्वैः । सुषाव सोममद्रिभिः (ऋ० ९ । १०७ । १) । सुषुवुषो मनीषाम्[४] (ऋ० १० । ९४ । १४) । दुष्टरस्तरन्नरातीः (ऋ० ३ । २४ । १) । युग्मान्तःस्थादन्तमूलीयपूर्वैरिति किम् । इयं शुष्मेभिर्बिसखा इवारुजत् (ऋ० ६ । ६१ । २) । अन्तःपदमिति किम् । सना ज्योतिः सना स्वः (ऋ० ९ । ४ । २) । अन्तःपदस्थैरिति[५] किम् । पुरुहूत पुरूवसोऽसुरघ्नः (ऋ० ६ । २२ । ४) ॥

अन्यपूर्वैरपि पद्यादिभाक्सन् ॥ २१ ॥

अन्यपूर्वैरपि नामिभिरुपहितः सकारो नम्यते । युग्मान्तःस्थादन्तमूलीयपूर्वैरित्यपिशब्दः । पद्यादिं भजते यदि । अन्यपूर्वैः । चमूषच्छ्येनः शकुनः (ऋ० ९ । ९६ । १९) । ये त्वा मृजन्त्यृषिषाण वेधसः (ऋ० ९ । ८६ । ४) । युग्मान्तःस्थादन्तमूलीयपूर्वैः । इन्द्रस्य त्रिष्टुबिह भागो अह्नः (ऋ० १० । १३० । ५) । स संस्तिरो विष्टिरः सं गृभायति (ऋ० १ । १४० । ७) । वेदिषदे प्रियधामाय[६] (ऋ० १ । १४० । १) ॥

एकाररेफपृतनोपधश्च ॥ २२ ॥

---

(१) B² omits सकारः. (२) B³I², -मूलीयः B²Bⁿ. (३) B³B², पदान्तवर्त्तिभिः I²Bⁿ. (४) विस्पुमुंचा सुपु (instead of सुपु- to -पाम्) I² on the margin. (५) -पदैरिति B². (६) B² adds सुद्युते.

एकारोपधो रेफोपधः पृतनोपधः। चशब्दान्नम्यते पद्यादिः[1] सकारः। एकारोपधः। धियो रथेष्ठामजरं नवीयः (ऋ० ६ । २१ । १)। रेफोपधः। स्वर्षामप्सां वृजनस्य[2] (ऋ० १ । ९१ । २१)। पृतनोपधः। पृतनाषाह्याय च (ऋ० ३ । ३७ । १)॥

रेफऋकारर्कारपरः प्रकृत्या ॥ २३ ॥

इदानीमपवादः। रेफपर[3] ऋकारपर[4] ॠकारपरश्च सकारः प्रकृत्या भवति। रेफपरः। पुनाति ते परिस्रुतम् (ऋ० ९ । १ । ६)। ऋकारपरः। इन्द्रस्य यन्तु प्रसवे विसृष्टाः (ऋ० ८ । १०० । १२)। ॠकारपरः। तिसॄणां सप्ततीनाम् (ऋ० ८ । १९ । ३७)॥

सं स्पृक्स्वृ सस्वरिति चाक्षराणाम् ॥ २४ ॥

सम्। स्पृक्। स्वृ। सर्[5]। स्वर्[6]। एतेषां चाक्षराणां सकाराः प्रकृत्या भवन्ति पद्यादावपद्यादौ च सताम्। सम्। सुसमिद्धो न आ वह (ऋ० १ । १३ । १)। स्पृक्। दिविस्पृग्यात्यरुणानि (ऋ० १० । १६८ । १)। स्वृ। ते देवाः परिस्वृतेष्वेषु लोकेषु (कौ० ब्रा० ८।८)। शाङ्खायनब्राह्मणमेतत्। ननु नै[7]वैतदुदाहरणम्। ब्राह्मणं ह्येतत्। न च ब्राह्मणस्याप्युदाहरणं[8] श्रुतं प्लुतत्रयविधानात्[9]। एवं तर्हि यथोदकाहारस्य मत्स्याहरणं पुष्पाहारस्य फलाहरणमविरुद्धमेवमेतदपि[10]। सर्[11]। विसर्माणं कृणुहि (ऋ० ५ । ४२ । ९)। स्वर्[12]। मेषं विप्रा अभिस्वरा (ऋ० ८ । ९७ । १२)॥

---

(१) B² I², -दि- B³ Bⁿ. (२) B² adds गोपां. (३) B²Bⁿ, -परश्च B³I². (४) Bⁿ, ऋकार B², ऋकारपरश्च B³I². (५) सर B²Bⁿ. (६) स्वर B²Bⁿ. (७) मै- B². (८) B³I², एतल्लक्षणं (for उदाहरणं) Bⁿ. (९) न च to- नात् omitted in B². (१०) Bⁿ, Reg.; -द्ध एवमेवैतदपि B²; -द्धमेतदपि B³; -द्धमेतीतदपि I². (११) सर B². (१२) स्वरा B².

सेति चास्य परिपन्नोपधा चेत् ॥ २५ ॥

स इतीत्थं[1]भूतस्य चाक्षरस्यादिसकारः प्रकृत्या भवति। यदि[2] तदक्षरं सकाराद्यनुस्वारस्योपधाभूतं स्यात्। सुसंसन्मित्रो अतिथिः शिवो नः (ऋ० ७। ६। ३)। परिपन्नोपधा चेदिति किम्। नि षदा पीतये मधु (ऋ० ८। ६७। ८)॥

संयोगस्य चाप्यनुनासिकादेः ॥ २६ ॥

संयोगस्य चा[3]पि। कथंभूतस्य। अनुनासिको वर्ण आदिभूतो यस्य तस्य। यः सकारलक्षणोऽक्षरविशेष उपधाभूतः स[4] प्रकृत्या भवति। सुसन्दृशं सुप्रतीकम् (ऋ० ७। १०। ३)। सुसङ्काशा मातृमृष्टेव (ऋ० १। १२३। ११)। संयोगस्येति किम्। अभिस्वरा निषदा गाः[5] (ऋ० २। २१। ५)। अनुनासिकादेरिति किम्। यच्च गोषु दुष्ष्वप्न्यम्[6] (ऋ० ८। ४७। १४)॥

सहस्रं सनिता स्यात्रां सावित्रं सूवरी स्नुषे।
समुद्रं सदृशा सारे सायकः साधनी सह ॥
सनित स्पष्टः सदृशः सखायं
सप्तैरेते सानुशब्दश्च पद्याः ॥ २७ ॥

सहस्रम्। सनिता। स्थात्राम्। सावित्रम्। सूवरी। स्नुषे। समुद्रम्। सदृशा। सारे। सायकः। साधनी। सह। सनितः। स्पष्टः। सदृशः। सखायम्। सप्तैः। एते पद्याः सानुशब्दश्च सप्रवादः प्रकृत्या भवन्ति। सहस्रम्। चतुःसहस्रं गव्यस्य (ऋ०

---

(१) स इत्थं- B^2. (२) B^2 omits यदि. (३) B^2 omits च. (४) B^2omits स. (५) B^3 corrects this quotation to उत नो गोषणिं धियं on the margin. (६) B^3 corrects this quotation to परिपद्यं ह्यरणस्य रेक्णः on the margin.

५ । ३० । १५)। सनिता। सनेम तत्सुसनिता सनित्वभिः[1] (ऋ० १८ । ३६ । ९)। स्थात्राम्। भूरिस्थात्रां भूर्यावेशयन्तीम् (ऋ० १० । १२५ । ३)। सावित्रम्। सुसावित्रमासाविषत्[2] (प्रै०पृ० १४७) इति प्रैषैकदेशः। सूवरी। सुषूमा बहुसूवरी (ऋ० २ । ३२ । ७)। स्नुषे। सुपुत्र आदु सुस्नुषे (ऋ०१० । ८६ । १३)। समुद्रम्। चतुःसमुद्रं धरुणं रयीणाम् (ऋ० १० । ४७ । २)। सदृशा। विसदृशा जीविताभिप्रचक्षे (ऋ० १ । ११३ । ६)। सारे। हिरण्यकेशो रजसो विसारे (ऋ० १ । ७९ । १)। सायकः। द्युम्नी सुशिप्रो हरिमन्युसायकः (ऋ० १० । ९६ । ३)। साधनी। आघृणे पशुसाधनी (ऋ० ६ । ५३ । ९)। सह। यथा वः सुसहासति (ऋ० १० । १९१ । ४)। सनितः। सनितः सुसनितरुग्र (ऋ० ८ । ४६ । २०)। स्पष्टः। अनुस्पष्टो भवत्येषो अस्य (ऋ० १० । १६० । ४)। सदृशः। यमाइव सुसदृशः सुपेशसः[3] (ऋ० ५ । ५७ । ४)। सखायम्। तीव्रं सोमं पिबति गोसखायम् (ऋ० ५ । ३७ । ४)। सप्तैः। त्रिसप्तैः शूर सत्वभिः (ऋ० १ । १३३ । ६)। सानुशब्दः। पृदाकुसानुर्यजतो गवेषणः (ऋ० ८ । १७ । १५)। इदा हि त उषो अद्रिसानो (ऋ० ६ । ६५ । ५)[4] ॥

सुते सोमे वक्षणेऽप्रामि चर्षणि स्वभिष्टीत्येवमुपधाश्च सर्वे ॥ २८ ॥

सुते। सोमे। वक्षणे। अप्रामि। चर्षणि। स्वभिष्टि। इत्येवंशब्दोपधाभूताः सर्व एव पदादिसकाराः प्रकृत्या भवन्ति।

---

(१) सनित्वभिः omitted in B² Bⁿ, Reg. (२) B³, M.M., Reg.; -मासाधिपत् I²; -मासाधिप Bⁿ; -मसाविपत् B². (३) -पेशसः omitted in B². (४) Bⁿ adds शब्दग्रहणमुक्तप्रयोजनम्, on the margin in B³, omitted in B² I².

सुते[1] । सुतेसुते न्योकसे (ऋ० १ । ९ । १०) । सोमे[1] । यत्सोमेसोम आभवः (ऋ० ८ । ९३ । १७) । वच्चणे[1] । सुसंशिता वच्यो वच्चणेस्थाः (ऋ० ५ । १९ । ५) । अप्रामि[1] । अप्रामिसत्य मघवन् (ऋ० ८ । ६१ । ४) । चर्षणि[1] । हर्यश्वं सत्पतिं चर्षणीसहम् (ऋ० ८ । २१ । १०) । स्वभिष्टि[1] । तूतुजिमिन्द्रः स्वभिष्टिसुम्नः (ऋ० ६ । २० । ८) ॥

अभिसत्वा रयिस्थानो यासिसीष्ठाः सिसक्ति च ।
तिस्तिरे तिस्तिराणा च सिसिचे सिसिचुश्च न ॥२८॥

चकारः समुच्चयार्थीयः[2] । [3] एतेषु यथाप्राप्तं षत्वं प्रतिषिध्यते । अभिसत्वा । अभिवीरो अभिसत्वा सहोजाः (ऋ० १० । १०३ । ५) । रयिस्थानः । रयिस्थानो रयिमस्मासु धेहि (ऋ० ६ । ४७ । ६) । यासिसीष्ठाः । देवस्य हेळोऽव यासिसीष्ठाः (ऋ० ४ । १ । ४) । सिसक्ति । छायेव विश्वं भुवनं सिसक्ति (ऋ० १ । ७३ । ८) । तिस्तिरे । तिस्तिरे बर्हिरानुषक्[4] (ऋ० ३ । ४१ । २) । तिस्तिराणा । यतस्रुचा बर्हिरु तिस्तिराणा (ऋ० १ । १०८ । ४) । सिसिचे । सेक्तेव कोशं सिसिचे पिबध्यै (ऋ० ३ । ३२ । १५) । सिसिचुः । बहु साकं सिसिचुरुत्समुद्रिणम् (ऋ० २ । २४ । ४) ॥

गोष्ठादिव गोषतमा उपष्टुत्सप्रवादो नार्षदः पर्यषस्वजत् ।
स्वादुषंसदः पुरुषन्तिशब्दः सुषंसदं सुषमिधानुसेषिधत् ॥३०॥

---

(१) Words omitted in B². (२) B², -र्थः corrected to -र्थीयः in B³, -र्थः Bⁿ I². (३) I² adds अभिसत्वादयः. (४) बर्हिरा B².

एतेषु पदेषु षत्वं निपात्यते। गोष्ठादिव। गावो गोष्ठादिवेरते (ऋ० १०। ९७। ८)। गोषतमाः। दिवि व्याम पार्ये गोषतमाः (ऋ० ६। ३३। ५)। उपष्टुत्। शिक्षा शचीवस्तव ता उपष्टुत् (ऋ० ६। ८७। ६)। सप्रवादो नार्षदः सर्वविभक्त्यन्तः। यन्नार्षदाय श्रवः (ऋ० १। ११७। ८)। पुरू सदन्तो नार्षदम् (ऋ० १०। ६१। १३)। पर्यषस्वजत्। यं तौग्र्यो नाधितः पर्यषस्वजत् (ऋ० १। १८२। ७)। स्वादुषंसदः। स्वादुषंसदः पितरो वयोधाः (ऋ० ६। ७५। ९)। सेति चास्य परिपन्नोपधा चेत् (५। २५) इत्यस्य निषेधस्य प्रति[1]प्रसवः। पुरुषन्तिशब्दः सर्वविभक्त्यन्तः। याभिर्ध्वसन्ति पुरुषन्तिमावतम् (ऋ० १। ११२। २३)। ध्वस्रयोः पुरुषन्त्योः (ऋ० ९। ५८। ३)। संयोगस्य चाप्यनुनासिकादेः (५। २६) इत्यस्य[2] प्रतिप्रसवः। सुषंसदम्। परिप्रयन्तं वय्यं सुषंसदम् (ऋ० ९। ६८। ८)। सेति चास्य परिपन्नोपधा चेत् (५। २५) इत्यस्य निषेधस्य प्रतिप्रसवः। सुषमिधा। अग्ने भव सुषमिधा (ऋ० ७। १७। १)। समित्यक्षरनिषेधस्य प्रतिप्रसवः। अनुसेषिधत्। पद्यादेः सकारस्य षत्वे प्राप्ते परस्य षत्वं निपात्यते। षड् युक्ताँ अनुसेषिधत् (ऋ० १। २३। १५)। गोष्ठादिवेत्यादिपञ्चस्वप्राप्ते[3] षत्वे वचनम्॥

तकारे पूर्वपद्यान्तो व्यापन्नोऽरेफसंहिते।
नामिपूर्वः॥ ३१॥

तकारे परत्रावस्थिते पूर्व[4]पद्यस्यान्तः। कथंभूतः। व्यापन्नः सत्वं प्राप्तः। अरेफसंलग्ने तकारे। नामिपूर्व इति पूर्वपद्यान्तव्यापन्नविशेषणम्। षकारमापद्यते। प्र पाकं शास्सि प्र दिशो विदुष्टरः

(१) B^2 omits निषेधस्य प्रति-. (२) B^2 adds निषेधस्य. (३) पंचकस्याप्राप्ते I^2. (४) B^2B^n, पूर्वस्य B^3I^2.

(ऋ० १ । ३१ । १४)। आविष्ट्यो वर्धते चारुरासु (ऋ० १ । ९५ । ५)। तकार इति किम्। सचन्त इन्द्र निस्सृजः (ऋ० १ । १३१ । ३)। पूर्वपद्यान्त इति किम्। त्वमग्ने प्रमतिस्त्वं पितासि नः (ऋ० १ । ३१ । १०)। व्यापन्नोच्चारणं पदेऽदृष्टस्य सकारस्य षत्वं यथा स्यात्। अरेफसंहित इति किम्। चतुस्त्रिंशद्वाजिनो देवबन्धोः (ऋ० १ । १६२ । १८)। नामिपूर्वग्रहणं पुनः क्रियमाणमेकारस्य संग्रहं करोति। अग्नेष्ट्वास्येन प्राश्नामि (कौ० ब्रा० ६ । १४)॥

विग्रहे तु त्वा त इत्यनुदात्तयोः ॥ ३२ ॥

विग्रहे तु पुनः त्वा ते इत्येतयोः पदयोः परत्रावस्थितयोरनुदात्तयोर्व्यापन्नः षत्वमापद्यते। त्वा। हविष्ट्वा सन्तं हविषा यजाम (ऋ० १० । १२४ । ६)। ते। आभिष्टे अद्य गीर्भिर्गृणन्तः (ऋ० ४ । १० । ४)। अनुदात्तयोरिति किम्। य इत्तद्विदुस्ते अमृतत्वम् (ऋ० १ । १६४ । २३)॥

अग्निरेकाक्षरस्यादौ ॥ ३३ ॥

अग्निः इत्ययं विसर्जनीयो व्यापन्नस्तकारादेरेकाक्षरस्य पदस्यादौ वर्तमानो नम्यते। अग्निष्टं ब्रह्मणा सह (ऋ० १० । १६२ । २)। एकाक्षरस्यादाविति किम्। अग्निस्तुविश्रवस्तमम् (ऋ० ५ । २५ । ५)॥

नकिश्च ॥ ३४ ॥

नकिः इत्ययं विसर्जनीयो नम्यते। चकाराद्व्यापन्नस्तकारादावेकाक्षरे पदे परभूते। नकिष्टं कर्मणा नशत् (ऋ० ८ । ३१ । १७)॥

अथो तनूष्विति ॥ ३५ ॥

अपि च तनूषु इत्येतस्मिन्पदे परभूते[१] नकिः इत्ययं विसर्जनीयो व्यापन्नो[२] नम्यते। नकिष्टनूषु येतिरे (ऋ० ८ । २० । १२)[३] ॥

---

(१) B² Bⁿ, परतो B³I². (२) B³ adds -नेकाक्षरस्यादावपि. (३) अनेकाक्षरादित्वादप्राप्ते वचनं on the margin in I².

तत्ततन्युस्ततक्षुस्तं तौग्र्यमित्युत्तरेषु निः ॥ ३६ ॥

तत् । ततन्युः । ततक्षुः । तम् । तौग्र्यम्[1] । इत्येतेषूत्तरपदेषु सत्सु निः इत्ययं विसर्जनीयो व्यापन्नो नम्यते । तत् । निष्टज्जभार चमसं न वृक्षात् (ऋ० १० । ६८ । ८) । ततन्युः । मिहं न सूरो अति निष्टतन्युः (ऋ० १ । १४१ । १३) । ततक्षुः । वेनादेकं स्वधया निष्टतक्षुः (ऋ० ४ । ५८ । ४) । तम् । निष्टमूहथुः सुयुजा रथेन[2] (ऋ० १ । ११७ । १५) । तौग्र्यम् । निष्टौग्र्यं पारयथः समुद्रात्[3] (ऋ० १ । ११८ । ६) ॥

पायुभिः पर्तृभिस्त्रिभिर्ददिर्वेरस्मयुः शुचिः ।
उत्तरे त्वमिति ॥ ३७ ॥

इत्येतेषां पदानां विसर्जनीयो व्यापन्नः त्वम् इत्येतस्मिन्पद उत्तरे नम्यते । पायुभिः । अदब्धेभिः सवितः पायुभिष्ट्वम् (ऋ० ६ । ७१ । ३) । पर्तृभिः । पर्षि तोकं तनयं पर्तृभिष्ट्वम् (ऋ० ६ । ४८ । १०) । त्रिभिः । त्रिभिष्ट्वं देव सवितः (ऋ० ९ । ६७ । २६) । ददिः । ददिष्ट्वमिन्द्रापांसि वाजान् (ऋ० २ । १७ । ८) । सन्ति कामासो हरिवो ददिष्ट्वम् (ऋ० ८ । २१ । ६) । वेः । पावकशोचे वेष्ट्वम्[4] (ऋ० ६ । १५ । १४) । अस्मयुः । एतं शंसमिन्द्रास्मयुष्ट्वम् (ऋ० १० । ९३ । ११) । शुचिः । शुचिष्ट्वमसि प्रियो न मित्रः[5] (ऋ० १ । ९१ । ३) ॥

ईयुष्टे वावृधुष्टे सचिष्टव । गोभिष्टरेम क्रतुष्टस् ॥ ३८ ॥

---

(१) The Comm. तत् to तौग्र्यम् omitted in B² Bⁿ. (२) B² omits सुयुजा रथेन. (३) Bⁿ; समुद्रात् omitted in B³ I², Reg.; पारयथ० । B². (४) वेष्टवं हि B², वेष्ट्वं हि यज्वा Bⁿ. (५) B² omits प्रियो न मित्रः.

एते च द्वैपदा व्यापन्नोष्मकृतषत्वा निपात्यन्ते । ईयुष्टे । ईयुष्टे ये पूर्वतरामपश्यन् (ऋ० १ । ११३ । ११) । वावृधुष्टे । पुरू शंसेन वावृधुष्ट इन्द्रम् (ऋ० १० । ७३ । २) । सधिष्टव । अप्स्वग्ने सधिष्टव (ऋ० ८ । ४३ । ९) । गोभिष्टरेम । गोभिष्टरेमामतिं दुरेवाम् (ऋ० १० । ४२ । १०) । क्रतुष्टम् । इन्द्र क्रतुष्टमा भर (ऋ० ५ । ३५ । १) ॥

नाहुर्निष्षिध्वरीः प्रभोः ।
वन्दारुः षष्टिरावीस्त्रिर्बाह्वोरित्यनुदात्तयोः ॥३८॥

यदुक्तं त्वा ते इत्यनुदात्तयोस्तदेतेषां पदानां संबन्धिनो विसर्जनीयस्य न भवति । आहुः । आहुस्ते त्रीणि दिवि बन्धनानि (ऋ० १ । १६३ । ३) । निष्षिध्वरीः । निष्षिध्वरीस्त ओषधीः (ऋ० ३ । ५५ । २२) । प्रभोः । प्रभोस्ते सतः परि यन्ति केतवः (ऋ० ९ । ८६ । ५) । वन्दारुः । वन्दारुस्ते तन्वं वन्दे अग्ने (ऋ० १ । १४७ । २) । षष्टिः । त्रिः षष्टिस्त्वा मरुतो वावृधानाः (ऋ० ८ । ९६ । ८) । आविः । आविस्ते शुष्मो भवतु (ऋ० ९ । ७९ । ५) । त्रिः । त्रिस्ते अन्नं कृणवत्सस्मिन्नहन्[1] (ऋ० ४ । १२ । १) । बाह्वोः । बाह्वोस्ते बलं हितम् (ऋ० १ । ८० । ८)[2] ॥

ऋकाररेफषकारा नकारं समानपदेऽवगृह्ये नमन्ति ।
अन्तःपदस्थमककारपूर्वा अपि संध्याः ॥ ४० ॥

ऋकारश्च रेफश्च षकारश्च ऋकाररेफषकाराः नकारं नमन्ति । समानपद एकस्मिन्पदे वर्तमाना नकारेण सह । कथंभूते पदे । अवगृह्ये द्विखण्डे[3] । कथंभूतं नकारम् । अन्तःपदस्थं पदमध्ये वर्त-

---

(१) B³ I²; सस्मिन्नहन् omitted in B² Bⁿ, Reg. (२) अनुदात्तयोरिति किं । आविष्ट्या वर्द्धत या added on the margin in I². (३) Bⁿ, द्विपण्डे B³I², द्विखण्डने B², द्विखंडिते Reg.

मानम्। अकृकारपूर्वा इति ऋकारादीनां विशेषणम्। अपि संध्या अप्यसंध्याः[1] प्राकृताः।

ऋकारस्य। पन्थामनु प्रविद्वान्पितृयाणम् (ऋ० १० । २ । ७)। रेफस्य। प्रयाणे जातवेदसः (ऋ० ८ । ४३ । ६)। तदा रभस्व दुर्हणो (ऋ० १० । १५५ । ३)। षकारस्य। विदुर्विषाणं परिपानम् (ऋ० ५ । ४४ । ११)। समानपद इति किम्। त्रिरनुव्रते जने (ऋ० १ । ३४ । ४)। अवगृह्य इति किम्। उष्ट्रानां विंशतिं शता[2] (ऋ० ८ । ४६ । २२)। अन्तःपदस्थमिति किम्। जुहुराणश्चिन्मनसा परियन् (ऋ० १ । १७३ । ११)। अकृकारपूर्वा इति किम्। यमासा कृपनीळम् (ऋ० १० । २० । ३)। यो अग्निः क्रव्यवाहनः (ऋ० १० । १६ । ११)। अच्छानहो नह्यतनोत सोम्याः[3] (ऋ० १० । ५३ । ७)। अनुव्रते जने (ऋ० १ । ३४ । ४) इत्यत्र प्राप्नोति—पूर्वो नन्ता नतिषु नम्यमुत्तरम् (१ । ६६) इति वचनान्न भवति॥

संध्य ऊष्माप्यनिङ्ग्ये ॥ ४१ ॥

संधौ भवः संध्यः संधिज ऊष्माप्यनिङ्ग्ये पदे वर्तमानो नकारं नमति[4]। यदि क्रोशमनु ष्वणि (ऋ० ६ । ४६ । १४)। संध्य इति किम्। महीमे अस्य वृषनाम शूषे (ऋ० ९ । ९७ । ५४)॥

न मध्यमैः स्पर्शवर्गैर्व्यवेतम् ॥ ४२ ॥

न नमन्ति नकारमृकाररेफषकारा मध्यमैः स्पर्शवर्गैर्व्यवहितम्। चवर्गटवर्गतवर्गा मध्यमाः। ऋजुनीती नो वरुणः (ऋ० १ । ९० । १)।

---

(१) अपि असंध्याः B^2I^2, Reg.; अपि संध्याः B^3, संध्या अपि। संध्याः B^n. (२) B^2 omits शता. (३) नह्यतन B^2. (४) न भवति (for नमति) B^2.

आ निवर्तन वर्तय (ऋ० १० । १९ । ८)। अभिष्टने ते अद्रिवः (ऋ० १ । ८० । १४) ॥

परिप्रऋषीन्द्रादिषु चोत्तमेन ॥ ४३ ॥

परि प्र ऋषि इन्द्र इत्येवमादिषु पदेषूत्तमेनापि स्पर्शवर्गेण पकारादिना व्यवहितं नकारमृकाररेफषकारा न नमन्ति। परि। परिपानमन्ति ते (ऋ० ५ । ४४ । ११)। यमस्य माता पर्युह्यमाना (ऋ० १० । १७ । १)। प्र। प्रमिनती मनुष्या युगानि (ऋ० १ । १२४ । २)। ऋषि। ऋषिमना य ऋषिकृत्स्वर्षाः (ऋ० ९ । ९६ । १८)। इन्द्र। इदं त्यत्पात्रमिन्द्रपानम् (ऋ० ६ । ४४ । १६)। आदिग्रहणादिह न भवति निषेधः—सुप्रपाणं भवत्वघ्न्याभ्यः (ऋ० ५ । ८३ । ८)।

तथा शकारसकारव्यवेतं सर्वादिषु ॥ ४४ ॥

यथाधस्तनयोर्मध्यमोत्तमवर्गव्यवेतं नकारमृकाररेफषकारा न नमन्ति तथा शकारसकार[1]व्यवेतं नकारमृकाररेफषकारा न नमन्ति सर्वादिषु पदेषु। अहन्नहिं परिशयानमर्णः (ऋ० ३ । ३२ । ११)। इदा हि त उषो अद्रिसानो (ऋ० ६ । ६५ । ५)। सर्वादिग्रहणं परिप्रऋषीन्द्रादिष्वेवेति[2] निवृत्त्यर्थम् ॥

पूर्वपदान्तगं च ॥ ४५ ॥

पूर्वपदस्य चान्तगतं नकारमृकाररेफषकारा न नमन्ति। कर्मन्कर्मन्वृतमूतिः (ऋ० १ । १०२ । ६) ॥

नाभिनिर्णिक्प्रवादादी ॥ ४६ ॥

नाभिनिर्णिक्शब्दयोरादिभूतं नकारमृकाररेफषकारा न नमन्ति। नाभि। रथेन वृषनाभिना (ऋ० ८ । २० । १०)। निर्णिक्।

---

(१) B^3I^2, सकारशकार- B^2B^n. (२) B^2, -न्द्रादिष्वेव नेति B^3I^2, -न्द्रादि B^n.

अतः सहस्रनिर्णिजा (ऋ० ८। ८। ११)। एतरेव चचरा चन्द्रनिर्णिक् (ऋ० १०। १०६। ८)। आदिशब्दोच्चारणं परस्य णत्वं साधयति॥

यकारस्पर्शसंहितम् ॥ ४७ ॥

यकारसंलग्नं स्पर्शसंलग्नं नकारमृकाररेफषकारा न नमन्ति। यकारसंहितम्। द्युम्नी सुशिप्रो हरिमन्युसायकः (ऋ० १०। ९६। ३)। स्पर्शसंहितम्। वृत्रघ्ने परि षिच्यसे (ऋ० ९। ९८। १०)। सुषुम्नेपितत्वता (ऋ० १०। १३२। २)। यकारस्पर्शसंहितमिति किम्। प्रातर्याव्णः सहस्कृत (ऋ० १। ४५। ९)॥

कर्मनिष्ठां दीर्घनीथे ॥ ४८ ॥

इत्येतयोः पदयोर्नकारमृकाररेफषकारा न नमन्ति। कर्मनिष्ठाम्। अग्निर्वीरं श्रुत्यं कर्मनिष्ठाम् (ऋ० १०। ८०। १)। दीर्घनीथे। दीर्घनीथे दमूनसि (ऋ० ८। ५०। १०)॥

भानुशब्दे ॥ ४९ ॥

भानुशब्दस्य नकारमृकारादयो यथासंभवं न नमन्ति। स्वर्भानोरध[1] (ऋ० ५। ४०। ६)॥

हिनोमि च ॥ ५० ॥

हिनोमि इति च नकारमृकारादयो न नमन्ति। यां वां होत्रां परिहिनोमि मेधया (ऋ० ७। १०४। ६)॥

ह्रस्वोदयं त्वेषपुर्वेवमादिषु ॥ ५१ ॥

ह्रस्व उदयो यस्य[2] नकारस्य स तथोक्तः। तं ह्रस्वोदयं त्वेष पुरु इत्येवमादिषु पदेषु वर्तमानं[3] नकारं[4] रेफषकारौ न नमतः। त्वेष। यतो जज्ञ उग्रस्त्वेषनृम्णः (ऋ० १०। १२०। १)। पुरु। पुरु-[5]

---

(१) -रध०। B². (२) B³I², ह्रस्वोदयो यस्य B², ह्रस्व उदयमस्य Bⁿ. (३) B³ Bⁿ, -मानौ B²I². (४) Bⁿ, नकारं omitted in B³I²B². (५) B² omits पुरु-.

नृम्णाय[1] सत्वने (ऋ० ८ । ४५ । २१)। ह्रस्वोदयमिति किम् । पुरुणीथा जातवेदो जरस्व (ऋ० ७ । ९ । ६) ॥

त्रिशुभ्रयुष्मादिषु चोभयोदयम् ॥ ५२ ॥

त्रि शुभ्र युष्मा इत्येवमादिषु पदेषु । उभयोदयं ह्रस्वोदयं दीर्घोदयं च । नकारं रेफषकारौ न नमतः । त्रि[2] । त्रिनाके त्रिदिवे दिवः (ऋ० ९ । ११३ । ९)। त्रिनाभि चक्रमजरम् [3] (ऋ० १ । १६४ । २) इत्यस्य तु—नाभिनिर्णिक्प्रवादादी (१ । ५ । ४६) इत्यनेनापि सिद्धो नति[4]प्रतिषेधः । शुभ्र[5] । वहेथे शुभ्रयावाना (ऋ० ८ । २६ । १९)। युष्मा[5] । युष्मानीतो अभयम् [6] (ऋ० २ । २७ । ११) ॥

अहकारेष्वधिकत्र्यक्षरेषु च
पुरःपुनर्दुश्चतुर्ज्योतिरादिषु ॥ ५३ ॥

हकारवर्जितेषु । अधिकत्र्यक्षरेषु च पदेषु चतुरक्षरादिषु चेत्यर्थः । उभयविशेषणविशिष्टानि[7] पदानि गृह्यन्ते । पुरः । पुनः । दुः । चतुः । ज्योतिः । इत्यादिषु च नकारो वर्तमानो नतिं[8] न लभते । पुरः[5] । पुरोयावानमाजिषु (ऋ० ८ । ८४ । ८)। पुनः[5] । पुनरागाः पुनर्नव (ऋ० १० । १६१ । ५)। दुः[5] । दुर्नियन्तुः परिप्रीतो न मित्रः [9] (ऋ० १। १९० । ६)। चतुः। स जिह्वया चतु-

---

(१) परिप्रऋपी- (५।४४) to -नृम्णाय supplied on the margin in a different hand in I². (२) त्रि omitted in B³B². (३) B³Bⁿ, अजरम् omitted in B²I² and Reg. (४) न (for नति) B²Bⁿ. (५) Omitted in B². (६) अभयं-। B². (७) B² Bⁿ,-विशेषणविशेषणानि B³ I² and Reg. (८) रेफारेफनिमित्तात् नतिं Bⁿ, रेफनतिं Reg. (९) न मित्रः omitted in B³I².

रनीकः (ऋ० ५ । ४८ । ५) । ज्योतिः । शं नो अग्निर्ज्योतिरनीको अस्तु[1] (ऋ० ७ । ३५ । ४) । अहकारेष्विति किम् । कुमारदेष्णा जयतः पुनर्हणः (ऋ० १० । ३४ । ७) । अधिकत्र्यक्षरेष्विति किम् । दुर्णामा योनिमाशये (ऋ० १० । १६२ । १) ॥

उस्रयाम्णोऽनुस्रयाम्णो सुषाम्णो
वृषमण्यवोऽधिषवण्या प्रण्यः ॥ ५४ ॥

एतेषु षट्सु पदेषु णत्वं निपात्यते—यकारस्पर्शसंहितम् (५ । ४७) इत्यनेन निषिद्धं सत् । उस्रयाम्णो । अरं म उस्रयाम्णे (ऋ० ४ । ३२ । २४) । अनुस्रयाम्णो । अरमनुस्रयाम्णे (ऋ० ४ । ३२ । २४) । सुषाम्णो । युवं वरो सुषाम्णे (ऋ० ८ । २६ । २) । स्पर्शसंहितानि त्रीण्युदाहरणानि । वृषमण्यवः । समानमेकं वृषमण्यवः पृथक् (ऋ० १ । १३१ । २) । अधिषवण्या[2] । यत्र द्वाविव जघनाधिषवण्या[3] कृता (ऋ० १ । २८ । २) । प्रण्यः । इमा उ ते प्रण्यो वर्धमानाः (ऋ० ३ । ३८ । २) । एतानि त्रीणि यकारसंहितानि ॥

दूळ्यदूणाशदूळभप्रवादा
दुर्दूभूतमक्षरं तेषु नन्तृ ॥ ५५ ॥

दूळ्य[4] दूणाश[5] दूळभ एते प्रवादाः कृतदन्त्यमूर्धन्यभावा निपातिताः । न चाप्यत्र ऋकाररेफषकाराणामन्यतमोऽपि विद्यते । अतः कारणमपि दर्शयति । दुरित्येतदक्षरं मात्रिकं दूभूतं द्विमात्रिकं सदेतेषु नन्तृ धकारनकार[6]दकारेषु ।

---

(१)-नीकः B², Reg. (२) Omitted in B². (३) B³I²; अधिषवण्या (for यत्र to-वण्या) B², Reg.; जघनाधिषवण्या Bⁿ. (४) दूळ्यः B². (५) दूणाशम् B², (६) B² omits -नकार- ।

दूळ्य[1] । न दूढ्ये अनु ददासि वामम्[2] (ऋ० १ । १९० । ५)। मन्युं जनस्य दूळ्यः (ऋ० ८ । १९ । १५)। दूणाशम्[3] । दूणाशं सख्यं तव[4] (ऋ० ६ । ४५ । २६)। त्रिरुत्तमा दूणशा (ऋ० ३ । ५६ । ८)। दूळभ[5] । इमे मित्रो वरुणो दूळभासः (ऋ० ७ । ६० । ६)। परि ते दूळभो रथः (ऋ० ४ । ९ । ८)॥

अव्यवेतं विग्रहे विघ्नकृद्भी
रेफोष्माणौ सर्वपूर्वौ यथोक्तम् ॥ ५६ ॥

अव्यवेतमव्यवहितं नकारम्। विग्रहे नानापदे वर्तमानं नकारमेव। विघ्नकृद्भिर्विघ्नकर्तारस्त्रयो मध्यमा[6] वर्गास्तैरव्यवेतं नकारमेव। रेफोष्माणौ रेफषकारौ नकारं नमतः। सर्वपूर्वौ ऋकारपूर्वावपि। यथोक्तं येन प्रकारेणोक्तम् एतदधिकृतं वेदितव्यम्।

वक्ष्यति—नयत्यर्थं च प्र परीति पूर्वौ (५ । ५७) इति। अध्वरेषु प्र णीयते (ऋ० ३ । २७ । ८)। वाजी सन्परि णीयते (ऋ० ४ । १५ । १)। अव्यवेतमिति किम्। इह श्रवो वीरवत्तक्षता नः (ऋ० ४ । ३६ । ९)। प्लुताकारान्तं सपकारम् (५ । ५८) इति प्राप्तिः। सर्वपूर्वाविति किम्। शिक्षा णो अस्मिन्पुरुहूत (ऋ० ७ । ३२ । २६)। विग्रहग्रहणं समानपदाधिकारनिवृत्त्यर्थम्। रेफोष्मग्रहणमृकारनिवृत्त्यर्थम्। यथोक्त[7]ग्रहणादिह न भवति—बलं धेहि तनूषु नः (ऋ० ३ । ५३ । १८)॥

आनीन्नु त्यं नोनुवुर्नोनुमश्च
नयत्यर्थं च प्र परीति पूर्वौ ॥ ५७ ॥

---

(१) दूढ्यं Bⁿ, omitted in B². (२) B² omits वामम्. (३) दूणाशं B³I²Bⁿ, omitted in B². (४) B² omits तव. (५) B² omits दूळभ. (६) मध्यम- B² Bⁿ. (७) यथोक्तं I².

आनीत्। नु त्यम। नोनुवुः। नोनुमः। इत्येतानि च पदानि नयत्यर्थं च[1]। अर्थग्रहणान्नयतेः सर्वाणि रूपाणि गृह्यन्ते। प्र परि इत्येतौ पूर्वौ सन्तौ नमतः। आनीन्[2]। अचेदु प्राणीदममन् (ऋ० १०।३२।८)। नु त्यम्[2]। प्र णु त्यं विप्रमध्वरेषु (ऋ० ५।१।७)। त्यमिति किम्। प्र नू स मर्तः (ऋ० १।६४।१३)। नोनुवुः[2]। अभि प्र णोनुवुर्गिरः (ऋ० ६।४५।२५)। नोनुमः[2]। इमा अभि प्र णोनुमः (ऋ० ८।६।७)। नयत्यर्थं च।[3] वाजी सन्परि णीयते (ऋ० ४।१५।१)।[4] अध्वरेषु प्र णीयते[5] (ऋ० ३।२७।८)। पूर्व इति[6] वचनाद्व्यवहितस्य न भवति। प्र यं राये निनीषसि (ऋ० ८।१०३।४)॥

पुरुप्रिया ब्रह्म सुतेषु नेषि
प्लुताकारान्तं सषकारमिन्द्र।
नते सु स्मेति सवनेषु पर्षि
स्वरर्यमा प्रोरु परीति तैर्नः॥ ५८॥

पुरुप्रिया। ब्रह्म। सुतेषु। नेषि। प्लुताकारान्तं सषकारम्[7]। मात्रिकोऽकारः स लक्षणवशाद् द्विमात्रिकः सन्प्लुत उच्यते। प्लुतोऽकारोऽन्ते यस्य पदस्य तत्तथोक्तम्। सह षकारेण वर्तत इति सषकारं पदम्[8]। इन्द्र। नते सु स्मेति। नतिं प्राप्ते सु स्म इत्येते पदे। सवनेषु। पर्षि। स्वः। अर्यमा। प्र। उरु। परि। इत्येतैः पदैरुपहितं[9] सत् नः इत्येतत्पदं नम्यते।

---

(१) B³ omits च. (२) Words before quotations omitted in B². (३) Bⁿ adds परि।. (४) I² adds प्र।. (५) अध्वरेषु प्र णीयते omitted in B². (६) पूर्व इति B³I²B², पूर्वाविति Bⁿ. (७) B² adds पदं।. (८) मात्रिको to पदम् omitted in B². (९) -हितः B².

पुरुप्रिया[1] । पुरुप्रिया ण ऊतये (ऋ० ८ । ५ । ४) । ब्रह्म[1] । ब्रह्मा ण इन्द्रोप याहि विद्वान्[2] (ऋ० ७ । २८ । १) । सुतेषु[1] । शक्रो यथा सुतेषु णः (ऋ० १ । १० । ५) । नेषि[1] । नेषि णो यथा पुरा (ऋ० १ । १२९ । ५) । प्लुताकारान्तं सषकारम् । त्वरा णो अभि वार्यम्[3] (ऋ० ९ । ३५ । ३) । अर्षा णः सोम शं गवे (ऋ० ९ । ६१ । १५) । प्लुताकारान्तमिति किम् । तेन सोमाभि रक्ष नः (ऋ० ९ । ११४ । ४) । सषकारमिति किम् । यत्रा नश्चक्रा जरसं तनूनाम् (ऋ० १ । ८९ । ९) । पूषा नो यथा वेदसामसद् वृधे (ऋ० १ । ८९ । ५) । इन्द्र । समिन्द्र णो मनसा नेषि गोभिः[4] (ऋ० ५ । ४२ । ४) । नते सुस्मेति । अभी षु णः सखीनाम् (ऋ० ४ । ३१ । ३) । मो षु णः परापरा (ऋ० १ । ३८ । ६) । त ऊ षु णो महो यजत्राः (ऋ० १० । ६१ । २७) । आसु ष्मा णो मघवन्निन्द्र पृत्सु (ऋ० ६ । ४४ । १८) । नते इति किम् । प्र सू न आयुर्जीवसे तिरेतन (ऋ० ८ । १८ । २२) । इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् (ऋ० ६ । ४४ । १८) । सवनेषु । रारन्धि सवनेषु णः (ऋ० ३ । ४१ । ४) । पर्षि[1] । पर्षि णः पारमंहसः स्वस्ति (ऋ० २ । ३३ । ३) । स्वः[1] । ईशानासो ये दधते स्वर्णः (ऋ० ७ । ९० । ६) । अर्यमा[1] । अर्यमा णो अदितिः (ऋ० ३ । ५४ । १८) । प्र[1] । प्र ण स्पार्हाभिरूतिभिः (ऋ० ७ । ५८ । ३) । उरु[1] । उरु णो वाजसातये (ऋ० ५ । ६४ । ६) । परि[1] । परि णः शर्मयन्त्या (ऋ० ९ । ४१ । ६) ॥

---

(१) Words before quotations omitted in B^2. (२) I^2, Reg.; विद्वान् omitted in B^3 B^2 B^n. (३) B^2 omits वार्यम्. (४) B^2 omits नेषि गोभिः.

हेळो मुञ्चतं मित्राय राया पूषा गध्यविषच्छकारवत् ।
नव्येभिस्त्मने वाजान्कृणोत द्वे नय प्रतरं परेषु न ॥५८॥

हेळः । मुञ्चतम् । मित्राय । राया । पूषा । गधि । अविषत् । छकारवच्छकारसंयुक्तं पदम्[1] । नव्येभिः । त्मने । वाजान् । कृणोत । द्वे पदे[2] नय प्रतरम् । इत्येतेषु पदेषु[3] परभूतेषु नः इत्येतस्य पदस्य यदुक्तं पुरुप्रियादिभिरुपपदैर्णत्वं तन्न भवति ।

हेळः[4] । परि नो हेळो वरुणस्य (ऋ० ७ । ८४ । २) । मुञ्चतम्[4] । प्र नो मुञ्चतं वरुणस्य पाशात्[5] (ऋ० ६ । ७४ । ४) । मित्राय[4] । प्र नो मित्राय वरुणाय वोचः[6] (ऋ० ७ । ६२ । २) । राया[4] । प्र नो राया परीणसा (ऋ० ५ । १० । १) । पूषा[4] । प्र नः पूषा चरथम् (ऋ० १० । ९२ । १३) । गधि[4] । एन्द्र नो गधि प्रियः (ऋ० ८ । ९८ । ४) । अविषत्[4] । स वाजेषु प्र नोऽविषत् (ऋ० १ । ८१ । १) । छकारवत् । प्र नो यच्छत्वर्यमा (ऋ० १० । १४१ । २) । नव्येभिः[4] । प्र नो नव्येभिस्तिरतम्[7] (ऋ० ७ । ९३ । ४) । त्मने[4] । नू मित्रो वरुणो अर्यमा नस्त्मने[8] (ऋ० ७ । ६२ । ६) । वाजान्[4] । प्र नो वाजानश्व्यो अश्वबुध्यान् (ऋ० १ । १२१ । १४) । कृणोत[4] । देवीः षळुर्वीरुरु नः कृणोत[9] (ऋ० १० । १२८ । ५) । उर्वीति णत्वे प्राप्ते प्रतिषेधः[10] । द्वे नय प्रतरम् । प्र नो नय प्रतरं वस्यो

---

(१) छकारसंयुक्तं पदम् omitted in B². (२) I²Bⁿ, पदे omitted in B³B². (३) इत्येषु B². (४) Omitted in B². (५) B³I², पाशात् omitted in B²Bⁿ and Reg. (६) B² omits वरुणाय वोचः. (७) B² omits तिरतम्. (८) त्मने० । B². (९) कृणोत० । B². (१०) निषेधः B².

अच्छ[1] (ऋ० ६ । ४७ । ७)। द्वे इति किम्। प्र णो नय वस्यो अच्छ (ऋ० ८ । ७१ । ६) ॥

गोरोहेण निर्गमाणीन्द्र एणा इन्द्र एणं स्वर्ण परा णुदस्व। अग्नेरवेण वार्ण शक्र एणम् ॥ ६० ॥

इत्येतेषु नकारः संधिजैः[2] पूर्वपदस्थैर्निमित्तैर्नम्यते। गोरोहेण[3]। गोरोहेण तौग्र्यो न जिव्रिः (ऋ० १। १८० । ५)।[4] निर्गमाणि। तिरश्चता पार्श्वान्निर्गमाणि (ऋ० ४। १८ । २)। इन्द्र एणाः। इन्द्र एणा नि यच्छतु (ऋ० १० । १९ । २)। इन्द्र एणम्। इन्द्र एणं प्रथमो अध्यतिष्ठत्[5] (ऋ० १ । १६३ । २)। स्वर्ण। स्वर्ण वस्तोरुषसामरोचि[6] (ऋ० ७ । १० । २)। परा णुदस्व। परा णुदस्व मघवन्नमित्रान (ऋ० ७। ३२ । २५)। अग्नेरवेण। अग्नेरवेण मरुताम्[7] (ऋ० १ । १२८ । ५)। वार्ण। वार्ण पथा रथ्येव[8] (ऋ० २ । ४ । ६)। शक्र एणम्। शक्र एणं पीपयत् (ऋ० ८। १ । १९) ॥

एषा नतिर्दन्त्यमूर्धन्यभावः ॥ ६१ ॥

अंतःपादं नाम्युपधः सकारः (५ । १) इत्येवमादि यदुक्तं तन्नतिरिति[9] वेदितव्यम्। दन्त्यानां वर्णानां मूर्धन्यभावो नतिरि-

---

(१) B^2 omits वस्यो अच्छ. ।(२)-जैरपि B^n. (३) Omitted in B^2. (४) B^n, गोरिति किं। प्रत्युदाहरणं मृग्यं। added in $B^3B^2I^2$ (प्रत्युदाहरणं मृग्यं on the margin in a different hand in I^2). (५) B^3I^2 omit अध्यतिष्ठत्. (६) वस्तोः। B^2. (७) -तां०। B^2. (८) रथ्येव०। B^2, रथ्येव स्वानीत् B^n. (९) नतिरिच्यते B^2.

त्यभिधीयते । नतिसंज्ञायाः प्रयोजनम्—नतिं प्लुतोपाचरिते[1] (११। ३७–३८) इति ॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउ[2]वट[3]-
कृतौ प्रातिशाख्यभाष्ये[4] पञ्चमं पटलम्[5] ॥

---

(१) प्लुतोपाचरिते नतिः (for नतिं to -ते) B². (२) ऊ- I². (३) पुत्रोव्वट- Bⁿ. (४) -शाख्ये I²Bⁿ. (५) नतिपटलं पञ्चमम् Bⁿ. B³ adds समासम्.

**स्वरानुस्वारोपहितो द्विरुच्यते
संयोगादिः स क्रमोऽविक्रमे सन् ॥ १ ॥**

स्वरेणानुस्वारेण चोपहितः संयोगादिर्वर्णोऽविक्रमे वर्तमानः सन्द्विरुच्यते। स एष विधिः क्रमसंज्ञो वेदितव्यः। आ त्वा रथं यथोतये (ऋ० ८। ६८। १)। सोमानं स्वरणम् (ऋ० १। १८। १)। स्वरानुस्वारोपहित इति कस्मात्। त्वावतः पुरूवसो (ऋ० ८। ४६। १)। संयोगादिरिति कस्मात्। आ ते पितर्मरुताम् (ऋ० २। ३३। १)। अयं स यस्य शर्मन् (ऋ० १०। ६। १)। अविक्रम इति कस्मात्। यः प्राणतो निमिषतः (ऋ० १०। १२१। ३)॥

सोष्मा तु पूर्व्येण सहोच्यते सकृत्स्वेन ॥ २ ॥

सोष्मा तु वर्णः स्वेन पूर्व्येण स्ववर्गीयेण पूर्व्येण[१] सहोच्यते सकृत्[२]। वि ह्यक्ख्यं मनसा[३] (ऋ० १। १०९। १)। अभ्रातेव पुंसः (ऋ० १। १२४। ७)॥

असंयोगादिरपि च्छकारः ॥ ३ ॥

क्रामति। उप च्छायामिव घृणेः (ऋ० ६। १६। ३८)। तुच्छ्येनाभ्वपिहितं यदासीत्[४] (ऋ० १०। १२९। ३)॥

परं रेफात् ॥ ४ ॥

रेफात्परं[५] क्रामति। अर्द्धं वीरस्य[६] (ऋ० ७। १८। १६)। परं रेफादित्यविशेषेणोक्तत्वाद् राजा इत्यत्र आकारस्य प्राप्नोति। स्वरोपहिताधिकारान्न। एवमपि पुरोहितमित्योकारस्य प्राप्नोति। संयोगाद्यधि[७]कारान्न। तत्सिद्धं[८] स्वरोपहितात्[९] संयोगादे रेफात्परमिति॥

(१) B³ omits पूर्व्येण. (२) सह सकृदुच्यते Bⁿ. (३) मनसा०। B², मनसावस्य इच्छन् Bⁿ. (४) पिहितं। Reg.; पिहितं०। B². (५) B² adds व्यंजनं. (६) वीरस्य०। B². (७) B³ I², संयोगाधि- B²Bⁿ. (८) तत्सिद्धं B², सिद्धं B³I²Bⁿ. (९) स्वरोपहिताधिकारात् B².

स्पर्श एवं लकारात् ॥५॥

यथा रेफात्परं व्यञ्जनं क्रामति एवं लकारात्परः स्पर्शः क्रामति। मह्त्तदुल्ब्वं स्थविरम्[1] (ऋ० १० । ५१ । १)। स्वरोपहितात्संयोगादेरित्येव[2] । अललाभवन्तीः[3] (ऋ० ४ । १८ । ६) । स्पर्श इति किम्। शतवल्शः[4] (ऋ० ३ । ८ । ११) ॥

ऊष्मणो वा ॥ ६ ॥

ऊष्मणः परः स्पर्शो वा क्रामति। प्रासूत्तौद्द्व्यौजा ऋष्वेभिः (ऋ० १०।१०५।६)। आपो हि ष्ठा मयोभुवः (ऋ० १०। ९। १)। प्र व स्प्पळ्क्रन्सुविताय[5] (ऋ० ५ । ५९ । १)। अङ्गिरसां सामभि स्तूयमानाः (ऋ० १ । १०७ । २)। ऊष्मणः परेषां प्रथमद्वितीयानामेव स्पर्शानां द्विर्वचनमिष्यते। न सर्वेषाम्। तस्मात् स्म[6] इत्यूष्मण एव द्विर्वचनं भवति न परस्य। दशाना[7]मिष्टमिति कथमेतदध्यवसीयत इति चेत्। ऊष्मण्यघोषोदये लुप्यते[8] (४। ३६) इत्यत्र लघुना[9] स्पर्शग्रहणेन सिद्धेऽघोपस्पर्शोदय इति—त्रिः स्म माह्नः (ऋ० १० । ९५ । ५) इत्यत्र मकारस्य द्विर्वचन[10]प्रतिषेधार्थं यद[11]घोषग्रहणं करोति तज्ज्ञापयति न सर्वेषां स्पर्शानां द्विर्व-

---

(१) स्थविरं० । B^2, स्थविरम् omitted in I^2. (२)- देरेव I^2. (३) B^n; अललाभवन्तीः omitted in B^2; given with marks of deletion(= =) in B^3. (४) वनस्पते शतवल्शः B^2, शतवल्शो विरोहI^2. स्वरोपहितात् to शतवल्शो विरोह supplied on the margin in I^2 in a different hand. (५) सुविताय omitted in Reg., B^n. (६) स्म B^3I^2; त्रिः स्म B^2B^n, Reg. (७) B^3I^2; ईदशाना- B^2B^n, Reg. (८) लुप्यते पर B^2. (९) I^2 corrects अनेन to अत्र लघुना; अत्रानेन लघुना B^n. (१०) I^2 corrects मकारस्य द्विर्वचन - to विसर्गलोप- on the margin. (११) यद् B^n, omitted in $B^3I^2B^2$.

चनं भवतीति । शाखान्तरेष्वपि तथा दृश्यते । शरः खयः (पा० वा० ८ । ४ । ४७) इति शरः परेषां खयां द्विर्वचनं[1] भवतीति ।

हकारात्सर्वेषां विभाषा[2] द्विर्वचनमिष्यते । ब्रह्म । ब्रह्म्म । अह्वा (ऋ० ४ । १६ । ३) । अह्न्ना[3] । स्पर्श इति कस्मात् । अश्श्वः । बह्ह्वः । अह्ह्यः (ऋ० ६ । ७७ । ३) । प्रस्स्वः । कृणुष्ष्व ॥

नावसितम् ॥ ७ ॥

न खलु पदावसाने वर्तमानं रेफात्परं व्यञ्जनं क्रामति । दर्त् (ऋ० १ । १७४ । २) । वर्क् (ऋ० १० । ८ । ९ ।) ॥

न रेफः ॥ ८ ॥

रेफश्च न क्रामति । अर्द्धं वीरस्य (ऋ० ७ । १८ । १६) । नैतदुदाहरणं युक्तम् । न परक्रमोपधा (६ । ११) इत्यनेनैव सिद्धत्वात् । इदं तर्हि युक्तं यत्र परक्रमः प्रतिषिध्यते । दर्त् (ऋ० १ । १७४ । २) । वर्क् (ऋ० १० । ८ । ९) । इत्य[4]प्राप्तप्राप्त्यर्थम्[5] ॥

वोष्मा संयुक्तोऽनुपधः ॥ ९ ॥

अनुपधः संयुक्त ऊष्मा वा क्रामति । ह्ह्वयाम्यग्निम् (ऋ० १ । ३५ । १) । श्श्चोतन्ति कोशाः (ऋ० १ । ८७ । २) । स्स्यन्दन्तां कुल्याः (ऋ० ५ । ८३ । ८) । ऊष्मा संयुक्त इति किम् । सोमः[6] । अनुपध इति कस्मात् । मुहुरा ह्ह्वादुनीवृतः (ऋ० ५ । ५४ । ३) ॥

न तूष्मा स्वरोष्मपरः ॥ १० ॥

---

(१) B^3 omits -वचनं. (२) विभाषया B^2, Reg. (३) अह्वा । अह्न्ना । B^2, Reg.; omitted in $B^3I^2B^n$. (४) इति omitted in B^2B^n. (५) B^2B^n, Reg.; अप्राप्तप्राप्त्यर्थम् omitted in B^3; अप्राप्तप्राप्त्यर्थः (with marks of deletion) I^2. (६) ऊष्मा संयुक्त इति किम् । सोमः । B^2; cp. Reg. and M. M.; omitted in $B^3I^2B^n$.

न तु[1] खलूष्मा स्वरपरो वा ऊष्मपरो वा क्रामति । स्वरपरः[2] । प्रत्यु अदर्शि (ऋ० ७ । ८१ । १)। पर्षि (ऋ० ८ । ६७ । ११)। ऊष्मपरः । यस्सोम सख्ये तव (ऋ० १ । ९१ । १४)। किमर्थमिदमुच्यते । त्रयः सकारा मा भूवन्निति । स्वरोष्मपर इति कस्मात् । अदश्शर्यायती (ऋ० ७ । ८१ । १)। आविर्दूतान्कृणुते वर्ष्यॉं अह[3] (ऋ० ५ । ८३ । ३)॥

न परक्रमोपधा ॥ ११ ॥

न तु खलु परक्रमस्योपधा क्रामति । महत्तदुल्बम् (ऋ० १० । ५१ । १)। प्रास्तौदृष्वौजाः (ऋ० १० । १०५ । ६)॥

सहातिहाय पवमान यस्य
द्वे तने चेत्युपहितः पदादिः । छकारः ॥१२॥

सह अतिहाय पवमान यस्य द्वे तने च इत्येतैरुपहितः पदादिश्छकारो न क्रामति । सह । सहस्तोमाः सहछन्दस आवृतः (ऋ० १० । १३० । ७)। अतिहाय । अतिहाय छिद्रा गात्राणि (ऋ० १ । १६२ । २०)। पवमान । यत्र ब्रह्मा पवमान छन्दस्याम् (ऋ० ९ । ११३ । ६)। यस्य । यस्य छायामृतम् (ऋ० १० । १२१ । २)। द्वे तने च । अध स्मा यच्छ तन्वे तने च छर्दिः (ऋ० ६ । ४६ । १२)। पदादिग्रहणमुत्तरार्थम् । द्वे इति कस्मात् । इतो तदस्मै मध्विच्चच्छद्यात् (ऋ० १० । ७३ । ९) ॥

दीर्घेण च मेतिवर्जम् ॥ १३ ॥

दीर्घेण चोपहितः पदादिश्छकारो न क्रामति मा इत्येतद्दीर्घं वर्जयित्वा । मर्माणि ते वर्मणा छादयामि (ऋ० ६ । ७५ । १८)। दीर्घेणेति कस्मात् । उप च्छायामिव घृणेः (ऋ० ६ । १६ । ३८)।

---

(१) तु B³. (२) स्वरपरः B²; omitted in B³I²Bⁿ. (३) Reg., वर्ष्यान्० । B². वर्ष्यान् B³I².

मेतिवर्जमिति कस्मात् । मा च्छेद्म रश्मीँरिति[1] (ऋ० १ । १०९ । ३)। पदादिरिति किम् । ऐच्छाम त्वा बहुधा जातवेदः[2] (ऋ० १० । ५१ । ३)॥

संयुक्तं तु व्यञ्जनं शाकलेन ॥ १४ ॥

संयुक्तं[3] व्यञ्जनं दीर्घात्परं न क्रामति शाकलेन विधानेन । व्यञ्जनग्रहणं ङकाराधिकारनिवृत्त्यर्थम् । आ त्वा रथं यथोतये[4] (ऋ० ८ । ६८ । १)। शाकलेनेति कस्मात् । आ त्वा रथम् । पदादिरित्येवानुवर्तते । रा त्र्याश्चिदन्धो अति देव[5] (ऋ० १ । ९४ । ७)। संयुक्तमिति कस्मात् । मा च्छेद्म (ऋ० १ । १०९ । ३)। एवमेके ।

अपरे दीर्घग्रहणं पदादिग्रहणं च नानुवर्तयन्ति । अविशेषेण सर्वत्र शाकलमिच्छन्ति । आ त्वा रथम् । रात्र्याश्चिदन्धः । तव त्यत् (ऋ० ८ । १५ । ७)। यज्जायथा अपूर्व्य (ऋ० ८ । ८९ । ५)॥

पदान्तीयो ह्रस्वपूर्वो ङकारो
नकारश्च क्रामत उत्तरे स्वरे ॥ १५ ॥

पदान्तीयो ह्रस्वपूर्वो ङकारो नकारश्च क्रामत उत्तरे स्वरे सति । कीदृङ्ङिन्द्रः सरमे (ऋ० १० । १०८ । ३) । अहन्नहिं परिशयानम् (ऋ० ३ । ३२ । ११)। ह्रस्वपूर्व इति कस्मात् । अर्वाङेहि सोमकामं त्वाहुः[6] (ऋ० १ । १०४ । ९)। पशून्ताँश्चक्र[7]

---

(१) इति० । B². (२) जातवेदः omitted in I², Reg.; बहुधा जातवेदः omitted in B". (३) B² adds तु. (४) यथोतये omitted in B²B", Reg. (५) अन्धो अति देव B², Reg.; अन्धो अति B³I²; अंधः B". (६) सोमकामं त्वाहुः in Reg. and त्वाहुः in B"omitted. (७) पशून्तांश्चक्रे omitted in B², Reg.

वायव्यानारण्यान् (ऋ० १० । ९० । ८)। पदान्तीय इति किम्। सिनीवालि[1] (ऋ० २ । ३२ । ६)।

अनादेशे पटलेऽस्मिन्विधानं
सर्वत्र विद्यादपि वैकृतानाम् ॥ १६ ॥

अनादेशे। कस्य। पदान्तपदाद्योः। अस्मिन्पटले द्विर्वचनादि यद्विधानं तत्—पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टेषु (२। ५) इत्येतां परिभाषामुपमर्द्य सर्वत्र भवतीति विद्यात्। अपि वैकृतानां वर्णानां किं पुनः प्राकृतानाम्। के[2] पुनर्वैकृताः। ये पदेऽदृष्टाः। यथा प्रथमास्तृतीयभूता अन्तःपाताश्चेत्येवमादयः॥

अभिनिधानं कृतसंहितानां
स्पर्शान्तस्थानामपवाद्य रेफम्।
संधारणं संवरणं श्रुतेश्च
स्पर्शोदयानाम् ॥ १७ ॥

अभिनिधानमित्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः कृत-संहितानां संहिताकार्येषु कृतेषु[3] पश्चाद्भवतीत्यर्थः। केषामभिनिधा-नम्। स्पर्शानां च अन्तःस्थानां च[4] अपवाद्य रेफं स्पर्शोदयानां तद्भवति। किं पुनस्तदभिनिधानं नाम। संधारणं च वर्णस्य संवरणं च वर्णश्रुतेः। एतदभिनिधानमिति वेदितव्यम्। अर्वाग् देवा अस्य[5] (ऋ० १० । १२९ । ६)। उप मा षड् द्वाद्वा (ऋ० ८। ६८ । १४)। यद् देवा अदः सलिले[6] (ऋ० १० । ७२ । ६)। पुरू यो दग्धासि वना[7] (ऋ० ५ । ९ । ४)। अवद्या चित्

---

(१) सिनीवालि०। B², सिनीवाली Reg. (२) के omitted in B³. (३) B² omits कृतेषु. (४) I² omits च. (५) अस्य०। B². (६) B² omits सलिले. (७) वना omitted in B³I² and Reg.

(ऋ० ५ । ५४ । ३)। उलूकामिव (ऋ० १० । ६८ । ४)। दधिक्राव्णः (ऋ० ४ । ३९ । २)।

कृतसंहिता[1]ग्रहणम्—यद्यद् यामि (ऋ० ८ । ६१ । ६)। इत्यसंयुक्तेऽभिनिधाने तृतीयश्रवणार्थम् । स्पर्शान्तःस्थानामिति कस्मात् । ब्रह्म । विष्णुः । स्म । पृश्निः । अथवाद्य रेफमिति कस्मात् । अर्चन्त्यर्कमर्किणः (ऋ० १ । १० । १)। स्पर्शोदयानामिति कस्मात् । अद्याद्या श्वःश्वः (ऋ० ८ । ६१ । १७)। अध्वानयद्दुरिता[2] (ऋ० ६ । १८ । १०)। सिनीवाल्यै जुहोतन (ऋ० २ । ३२ । ७)। वव्रिवांसं महीरपः[3] (ऋ० ९ । ६१ । २२)॥

अपि चावसाने ॥ १८ ॥

अवसानेऽपि च[4] वर्तमानानामेतेषां[5] वर्णानामभिनिधानं वेदितव्यम् । वाक् । विट् । यत् । त्रिष्टुप् ॥

अन्तस्थाः स्वे स्वे च परेऽपि रक्ताः ॥ १९ ॥

अन्तःस्था अभिनिधीयन्ते स्वे स्वे च प्रत्यये । अरक्ता अपि रक्ता अपि । यय्ँयय्ँ युजम्[6] (ऋ० २ । २५ । २)। इमल्ँ लोगम्[7] (ऋ० १० । १८ । १३)। अङ्गादङ्गाल् लोम्नोलोम्नः (ऋ० १० । १६३ । ६) तव्ँ वो दस्ममृतीषहम (ऋ० ८ । ८८ । १)। तमर्व्ँवन्तम्[8] (ऋ० ४ । १५ । ६)। स्वे स्वे चेति किम् । सिनीवाल्यै[9] (ऋ० २ । ३२ । ७)॥

लकार ऊष्मस्वपि शाकलेन ॥ २० ॥

---

(१)-संहितानां B², -संहित- Reg. (२) दुरिता०। B². (३) महीः। B². (४) B² omits च. (५) एतेषां occurs after वर्णानाम् in B². (६) युजं०। B². (७) लोगं०। B². (८) B² adds न०। (९) सिनीवाल्यै०। B².

लकारोऽभिनिधीयत ऊष्मस्वपि प्रत्ययेषु शाकलेन विधानेन। नारायासो न जलूहवः (ऋ० ८। ६१। ११)। वनस्पते शतवलूशः (ऋ० ३। ८। ११)। शाकलेनेति कस्मात्। न[1] जल्हवः। शतवल्शः॥

खकारे चैवमुदये ककारः ख्यातेर्धातोः॥ २१॥

खकारे चोदये ख्यातेर्धातोः ककार एवम्। कथम्। शाकलेनाभिनिधीयते। अकूख्यद्देवः (ऋ० ४। १४। १)। शाकलेनेति कस्मात्[2]। अक्ख्यद्देवः॥

रप्शतेर्वा पकारः॥ २२॥

रप्शतेश्च पकारः शकार एवम्। कथम्। शाकलेनाभिनिधीयते। विरपूशी गोमती मही[3] (ऋ० १। ८। ८)। शाकलेनेति कस्मात्। विरप्शी गोमती मही॥

पदान्तीया यरवोष्मोदयाश्च
स्पर्शाः पदादिष्ववरे मकारात्॥ २३॥

पदान्तीयाः स्पर्शा मकारं वर्जयित्वा य र व ऊष्मा इत्येतेषु च[4] पदादिषु वर्तमानेषूदयेषु[5] शाकलेनाभिनिधीयन्ते। यद्यद् यामि तदा भर (ऋ० ८। ६१। ६)। तद् रासभो नासत्या (ऋ० १। ११६। २)। यान् वो नरो देवयन्तः (ऋ० ३। ८। ६)। ऊष्मा[6]। दध्यङ् ह मे[7] (ऋ० १। १३९। ९)। अर्वाक् शफाविव (ऋ० २। ३९। ३)। शर्मन् स्याम[8] (ऋ० ७। ३४। २५)।

स्पर्शग्रहणमन्तःस्थाधिकारनिवृत्त्यर्थम्। पदान्तीया इति कस्मात्। त्वं तांस्त्सं च (ऋ० २। १। १५) इत्यत्रान्तःपात-

---

(१) B² omits न. (२) किं Bⁿ. (३) मही omitted in B³I²Bⁿ. (४) B² omits च. (५) B³ omits उदयेषु. (६) B² omits ऊष्मा. (७) मे०। B². (८) स्याम०। B².

लक्षणस्य तकारस्य न भवत्यपदान्तत्वात्। पदादिष्विति कस्मात्। उद्वेति सुभगः (ऋ० ७। ६३। १) इत्यत्र उकारस्य पदादित्वात्पूर्वस्य न भवति। अवरे मकारादिति कस्मात्[1]। सम्राज्ञी श्वशुरे भव (ऋ० १०। ८५। ४६)॥

असंयुक्तं शाकलम् ॥ २४ ॥

लकार ऊष्मस्वपि शाकलेन (६। २०) इत्येवमादि यदनुक्रान्तं शाकलं तदसंयुक्तं भवतीति वेदितव्यम्। उक्तान्येवोदाहरणानि ॥

तन्न पद्ये स्वित्युत्तरे ॥ २५ ॥

न खलु शाकलं वेदितव्यं सु इत्येतस्मिन्नुत्तरे[2] पद्ये। अप्स्वग्ने सधिष्टव (ऋ० ८। ४३। ९)। स्वित्युत्तर इति कस्मात्। यद्-यद् यामि तदा भर (ऋ० ८। ६१। ६)॥

वा त्वनेकाक्षरान्त्याः ॥ २६ ॥

अनेकाक्षरान्त्यास्तु स्पर्शा वा शाकलमापद्यन्ते पद्ये स्वित्युत्तरे। वाजमर्वत्सु पय उस्रियासु (ऋ० ५। ८५। २)। अनेकाक्षरान्त्या इति कस्मात्। हृत्सु क्रतुं वरुणो अप्स्वग्निम् (ऋ० ५। ८५। २) इति[3] ॥

सर्वत्रैके करणस्थानभेदे वा शाकलम् ॥ २७ ॥

सर्वत्र पद्ये चापद्ये च। एक आचार्याः करणभेदे च स्थानभेदे च विभाषा शाकलमिच्छन्ति। करणभेदे। क्रियत इति करणं प्रयत्नो वर्णात्मगुणतत्त्वता। तस्य भेदे। सक्तत् सु नः (ऋ० १०। ३३। ३)। स्थानभेदे। अवृजाः[4] (ऋ० ४। ४०। ५)। यद् वंहिष्ठम् (ऋ० ५। ६२। ९)। उभयोर्भेदे। अप्स्वग्ने[5]

---

(१) किं B³. (२) उत्तर- B². (३) इति omitted in B²Bⁿ. (४) अब्जां Reg.; अदब्धाः Bⁿ. (५) अग्ने०। B².

(ऋ० ८ । ४३ । ९) । नृषद् वरसत (ऋ० ४ । ४० । ५) । करण-स्थानभेद इति कस्मात् । ततनदग्निः (ऋ० ८ । ३९ । ४) । यत् ते यमम्[1] (ऋ० १० । ५८ । १) । वा त्वनेकाक्षरान्त्याः (६ । २६) इति प्रकृते वाग्रहणे पुनर्वाग्रहणमनेकाक्षरा-धिकारनिवृत्त्य[2]र्थम्[3] ॥

प्रथमे स्पर्शवर्गे ॥ २८ ॥

प्रथमस्पर्शवर्गस्यैक आचार्याः शाकलमिच्छन्ति । सम्यक् स्रवन्ति (ऋ० ४ । ५८ । ६) । अर्वाग् रथं विश्ववारम्[4] (ऋ० ६ । ३७ । १) । प्रत्यङ् विश्वं स्वः (ऋ० १ । ५० । ५) ॥

स्पर्शा यमाननुनासिकाः स्वा-न्परेषु स्पर्शेष्वनुनासिकेषु ॥ २९ ॥

अननुनासिकाः स्पर्शाः स्वान्यमानापद्यन्तेऽनुनासिकेषु स्पर्शेषु परेषु । पलिक्नीरित्[5] (ऋ० ५ । २ । ४) । चक्नथुः[6] । परि ग्मन् (ऋ० ४ । ४३ । ६) । वृत्रघ्ने परि (ऋ० ९ । ९८ । १०) । निद्दो यत्र मुमुच्महे[7] (ऋ० ९ । २९ । ५) । परिज्मानमिव (ऋ० १ । १२७ । २) । आत्मा ते[8] वातः (ऋ० ७ । ८७ । २) । अमथ्नादन्यम् (ऋ० १ । ९३ । ६) । वद्मा सूनो[9] (ऋ० ६ । १३ । ६) । आ ते दारूणि दध्मसि (ऋ० ८ । १०२ । २०) । आप्नानं तीर्थम् (ऋ० १० । ११४ । ७) । गृभ्णामि ते[10]

---

(१) यमं० । B². (२) -धिकारनिवृत्त्य- omitted in I². (३)- निवृत्त्यै Reg. (४) विश्ववारम् omitted in Bⁿ, विश्ववारं० । B². (५) पलिक्नीः B² (-क्क्नीः), Reg., M. M. (६) B², Reg., M. M.; चक्नथुः omitted in B³I²Bⁿ. (७) B², Reg., M. M. This quotation omitted in I²Bⁿ, मुमुच्महे B³. (८) आत्मेव Reg. (९) सूनो० । B². (१०) ते० । B².

(ऋ०१० । ८५ । ३६)। स्पर्शा इति कस्मात्। स्त्री हि ब्रह्मा[1] (ऋ० ८ । ३३ । १९)। दधिक्राव्णः (ऋ० ४ । ४० । १)। अननुनासिका इति कस्मात्। अर्वाङ् नरा (ऋ० ७ । ८२ । ८)। समन्न्या यन्ति[2] (ऋ० २ । ३५ । ३)[3]।

स्वानिति किमर्थमुच्यते। संज्ञाप्रकरणे—चतस्रोऽन्तस्थाः (१ । ९) अष्टा ऊष्माणः (१ । १०) इति वर्णाः कृतसंख्या निर्दिश्यन्ते। न तथा यमाः। तस्मादिह[4] स्पर्शा यमाननुनासिका इत्यु[5]च्यमाने विंशतित्वात्स्थानिनामादेशानामपि यमानां विंशतित्वप्रसङ्गः। स मा भूत्। चतुर्णामेव यमानां प्रथमाः प्रथमं द्वितीया द्वितीयमेवमा पञ्चमाद्दापद्येर[6]न्नित्युच्यते। स्पर्शेष्विति कस्मात्। उपस्थाँ एका (ऋ० १ । ३५ । ६)। अनुनासिकेष्विति कस्मात्। यद्बृंहिष्ठम् (ऋ० ५ । ६२ । ९)॥

न स्पर्शस्योष्मप्रकृतेः प्रतीयाद्यमापत्तिम् ॥ ३० ॥

न खलु स्पर्शस्योष्मप्रकृतेर्यमापत्तिं जानीयात्। प्रदोधुवच्छ्मश्रुषु (ऋ० २ । ११ । १७)॥

नाभिनिधानभावम् ॥ ३१ ॥

अभिनिधानभावं चोष्मप्रकृतेः स्पर्शस्य न प्रतीयात्। घनेव वज्रिञ्छ्नथिहि (ऋ० १ । ६३ । ५)॥

यमः प्रकृत्यैव सदृक् ॥ ३२ ॥

---

(१) स्त्री हि ब्रह्मा B² (ब्रह्मा० ।), Reg., M. M.; ब्रह्म B³I² Bⁿ. (२) समन्या यंति B³I²B²Bⁿ; सम्मा तपन्ति Reg., M. M. (३) B³I² add इति। (४) इह B², Reg., M. M.; इदं B³I²Bⁿ. (५) Reg. omits इति. (६) पद्यंते supplied above the line instead of -पद्येर- in I².

यमः प्रकृत्यैव सदृग्भवति। यस्य यमापत्तिरुच्यते तत्स्वरूपो[1] भवतीत्यर्थः[2]। पलिक्नीः (ऋ० ५।२।४) इत्यत्र ककाररूपो यमो वेदितव्यः[3]। अग्मन्[4] (ऋ० १।१२२।७) इति गकाररूपः[5]। जघ्नथुः (ऋ० ७।९९।४) इति[6] घकाररूपः[7]। परिज्मानम् (ऋ० १।२०।३) इति जकाररूपः। अप्नस्वतीः[8]। इति पकाररूपः॥

श्रुतिर्वा यमेन मुख्यास्ति समानकाला॥ ३३॥

अथवा यमोच्चारणेन समानकाला मुखे भवा श्रुतिरस्ति यया यमस्तद्रूपो लक्ष्यते। पलिक्नीः (ऋ० ५।२।४)। यज्ञस्य (ऋ० १।१।१)। गृभ्णामि ते[9] (ऋ० १०।८५।३६)। यस्माद्यमा अनुनासिक(?)[10]स्थानाश्चत्वारः सन्तो विंशतिस्थानिनां सरूपा लक्ष्यन्ते। तस्मादिदमुच्यते॥

अनन्यस्तु प्रकृतेः प्रत्ययार्थे॥ ३४॥

अनन्यस्तु[11] प्रकृतेः। प्रत्ययार्थे[12] वेदितव्यः[13] प्रकृत्यर्थे[14]। किमुक्तं भवति। यमः प्रकृत्याश्रयाणि कार्याणि लभत इत्यर्थः।

---

(१) तत्स्वरूपो Reg., M.M. (२) वेदितव्यः (for भवतीत्यर्थः) B^n. (३) B^2 omits वेदितव्यः. (४) अगुग्मन् M.M. (५) -रूपो वेदितव्यः B^n. (६) इति I^2; इत्यत्र B^2, M. M., B^n. (७) जघ्नथुः to -रूपः omitted in B^3. (८) अप्नस्वतीर् $B^3 B^2$ $I^2 B^n$, Reg. (-तीः), M.M. (-पून-). (९) गृभ्णामि B^2, गृह्णामि B^n. (१०) अनुनासिक- $B^3 B^2$, Reg., M. M.; अनुनासि- I^2; अनुनासिका- B^n. See note. (११) $B^3 B^2$, अनन्यास्तु I^2 B^n. (१२) प्रत्ययार्थे is given with marks of deletion (= =) in B^3. (१३) वेदितव्यः $B^3 B^2$ (B^3 corrects -व्याः to -व्यः), वेदितव्याः I^2, यमा वेदितव्याः B^n. (१४) प्रकृत्यर्थे $B^3 I^2$ B^n, प्रत्ययार्थे (without any दण्ड after it) B^2.

तस्मात्—उप दृध्मातेव धमति (ऋ० ५ । ९ । ५) इत्यत्र—सोष्मा तु पूर्वेण सहोच्यते सकृत् (६ । २) इति दकारेण सहोच्यते यमः ॥

न संयोगं स्वरभक्तिर्विहन्ति ॥ ३५ ॥

न खलु संयोगकार्याणि स्वरभक्तिर्विहन्ति । या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुः (ऋ० १० । ९५ । ६) । स्वरभक्तिव्यवायेऽपि—परं रेफात् (६ । ४) इति[1] क्रामति ॥

यमान्नासिक्या स्वरभक्तिरुत्तरा गार्ग्यस्य ॥ ३६ ॥

यमादुत्तरा नासिकास्थाना[2] स्वरभक्तिरागमो भवति गार्ग्यस्य भगवतोऽभिप्रायेण । पलिक्नीरित् (ऋ० ५ । २ । ४) । परिज्मानमिव (ऋ० १ । १२७ । २) ॥

ऊष्मा सोष्मणः ॥ ३७ ॥

तस्यैवाभिप्रायेण सोष्मणो यमादुत्तरो नासिका[3]स्थान ऊष्मागमो भवति । अमथ्नादन्यम् (ऋ० १ । ९३ । ६) ॥

वर्जयेत्तम् ॥ ३८ ॥

तमूष्माणं वर्जयेत् । अमथ्नादन्यम् (ऋ० १ । ९३ । ६) ॥

नादः परोऽभिनिधानाद् ध्रुवं तत्तत्काल-स्थानम् ॥ ३९ ॥

घोषवतोऽभिनिधानात्परो नाद आगमो भवति । ध्रुवसंज्ञं च तद्भवति । तत्कालस्थानमभिनिधानकालस्थानमित्यर्थः । अर्वाग् देवाः (ऋ० १० । १२९ । ६) । यद् देवा अदः (ऋ० १० । ७२ । ६) । तत्रैक आहुः ।

ध्रुवकालमनिर्देश्यमल्पत्वात्कवयो विदुः ।
यद्धि[4] प्रागणुमात्रायाः[5] कालभेदेऽपि तत्समम्[6] ॥

---

(१) Reg. omits इति. (२) B^2I^2, नासिकास्थानः B^3 and Reg., नासिकस्थाना B^n. (३) नासिक- I^2. (४) यदि B^2. (५) -मात्रो यः B^2. (६) -समः B^2.

नादो ह्यभिनिधानेन पीड्यमानेन नश्यति[१] ।
तावन्नोच्चार्यते[२] तस्य[३] यावद्‌घोषात्मनः परम् ॥
एकान्तलोपं[४] कवयो वर्णयन्ति ध्रुवस्य[५] च ।
नासिकास्थानं रक्तस्य तथा[६] रूपेण[७] निर्दिशेत् ॥[८]
सप्तमीकालनिर्दिष्टे पूर्वस्य विधिरिष्यते ।
पञ्चम्यास्तूत्तरस्याहुस्तस्मात्कृच्छ्रस्त्वणुर्भवेत् ॥ इति ।

ध्रुवसंज्ञायाः प्रयोजनम् । सवर्णपूर्वस्य सहध्रुवस्य (६ । ४५) इति ॥

अश्रुति त्वघोषात् ॥ ४० ॥

अघोषादभिनिधानात्तु ध्रुवमश्रुति भवति । वाक् पतङ्गाय (ऋ० १० । १८९ । ३) । यत् ते यमम् (ऋ० १० । ५८ । १) ॥

नासिकास्थानमनुनासिकाच्चेत् ॥ ४१ ॥

नासिकास्थानं ध्रुवं वेदितव्यमनुनासिकादभिनिधानाद्यदि परं भवति । अर्वाङ्‌ नरा (ऋ० ७ । ८२ । ८) । तन् मे जुषस्व (ऋ० ७ । ९९ । ७)॥

अन्तस्थायाः पूर्वस्वरूपमेव ॥ ४२ ॥

---

(१) पीड्यमानश्च न पश्यति B[2]. (२) तावन्नोच्चार्यते B[3]B[2] I[2] (I[2] corrects तस्मादु- to तावन्नो-); तस्मादुच्चार्यते B[n], a (M. M.); तावदुच्चार्यते M. M. (३) तस्य B[3] B[2] I[2] (I[2] corrects यतस्य to तस्य); यस्य B[n], M. M., a (M. M.). (४) -लोपः B[2]. (५) ध्रुवस्य B[3] (-वाणि corrected to -वस्य) B[n], M. M.; ध्रुवाणि B[2]. (६) तथा B[3] B[2] (B[3] corrects यथा to तथा); यथा B[n], M. M. (७) रूपेण B[3] (रूपाणि corrected to रूपेण) B[2], रूपाणि B[n]. (८) I[2] writes this stanza as (sic) एकांत (after this सप्त is struck out) लोपं तु यो वर्णः संद्विद्ध्रुवाणि च । नासिकास्थानं च रक्तस्य यद्यथा रूपेण निद्दिशेत् ।. But on the margin is supplied एकान्तलोपकवयो वर्णयन्ति ध्रुवाणि च । नासिकास्थानरक्तस्य तथा रूपाणि निद्दिंशेत् ।.

अन्तःस्थाया ध्रुवं पूर्वस्वरूपमेव भवति[1] । यय्ँयय्ँ युजम् (ऋ० २।२५।२) । वयव्ँवयं ते (ऋ०१०। २२। १२) । तव्ँ वो दस्मम् (ऋ०८।८८। १) । पर्व्ँवतश्चित् (ऋ०५।६०।३) । इमल्ँ लोगम्[2] (ऋ०१०। १८। १३) ॥

व्याळेः सर्वत्राभिनिधानलोपः ॥ ४३ ॥

व्याळेराचार्यस्य सर्वत्राभिनिधानस्य लोपो भवति । उप द्ध्मातेव (ऋ०५।९।५) । अर्वाग्ग्देवाः (ऋ०१०।१२९।६) । सर्वत्रग्रहणमन्तःस्थाधिकारनिवृत्त्यर्थम् ॥

परक्रमस्वररेफोपधे न ॥ ४४ ॥

व्याळेराचार्यस्य परक्रमे च स्वरोपधे च रेफोपधे च न लोपो भवत्यभिनिधानस्य । परक्रमे महत्तदुल्ब्ँवम् (ऋ०१०।५१।१) । स्वरोपधे । अर्वाग्ग्देवाः (ऋ०१०। १२९। ६) । कथमिदमुभयत्रोदाह्रियते लोपे चालोपे च । द्वयोर्गकारयोरुत्तरस्मिन्नभिधानलोपः । पूर्वस्मिन्नलोपः[3] । तस्मादुभयत्रोदाह्रियते । रेफोपधे । परा वर्ग्ँ भारभृत् (ऋ० ८।७५। १२) ॥

सवर्णपूर्वस्य सहध्रुवस्य विपर्ययो ध्रुवशिष्टेऽपरेषाम् ॥ ४५ ॥

एतस्मिन्ध्रुवशिष्टे विधाने[4]ऽपरेषामाचार्याणां सवर्णपूर्वस्य ध्रुवसहितस्य विधानस्य[5] विपर्ययो वेदितव्यः । कश्च विपर्ययः । अलोप इति प्रकृतस्तस्य विपर्ययो लोपः । यद्देवा अदः (ऋ०१०।७२।६) । व्याळेः सर्वत्राभिनिधानलोपः (६।४३) इत्येवं[6] सिद्धे नियमार्थ-

---

(१) एवेति B². (२) लोगं० B². (३) B² omits पूर्वस्मिन्नलोपः. (४) विधाने I²Bⁿ, Reg.; ध्रुवविधाने B³B². (५) -स्य विधानस्य corrected to -स्याभिधानस्य in B². (६) एवं omitted in B², Reg.

मिदमुच्यते । सवर्णपूर्वस्यैव स्यात् । इह मा भूत् । अर्वाग् देवाः (ऋ० १० । १२९ । ६) इति । परक्रम[1]स्वररेफोपधे नेत्येवानुवर्तते । सहध्रुवस्येति कस्मात् । यत् ते यमम्[2] (ऋ० १० । ५८ । १) ॥

रेफात्स्वरोपहिताद्व्यञ्जनोदयादृकारवर्णा स्वरभक्तिरुत्तरा ॥ ४६ ॥

रेफात्स्वरोपहिताद्व्यञ्जनोदयादृकारवर्णा स्वरभक्तिरुत्तरोपजायते । यदद्य कर्हि कर्हि चित् (ऋ० ८ । ७३ । ५) । अर्चन्त्यर्कमर्किणः (ऋ० १ । १० । १) । स्वरोपहितादिति कस्मात् । आष्ट्रां पदं कृणुते अग्निधाने[3] (ऋ० १० । १६५ । ३) । व्यञ्जनोदयादिति कस्मात् । सुरूपकृत्नुम्[4] (ऋ० १ । ४ । १) ॥

विच्छेदात्स्पर्शोष्मपराच्च घोषिणः ॥ ४७ ॥

विच्छेदाद्घोषिणोऽभिनिधानात्स्पर्शपरादूष्मपराच्च[5] स्वरभक्तिरुत्तरोपजायते । अर्वाग् देवाः (ऋ० १० । १२९ । ६) । शतवल्शः (ऋ० ३ । ८ । ११) । विच्छेदादिति कस्मात् । अर्वाग्देवाः । शतवल्शः । स्पर्शोष्मपरादिति कस्मात् । यद्यद् यामि तदा भर[6] (ऋ० ८ । ६१ । ६) । घोषिण इति कस्मात् । सम्यक् स्रवन्ति (ऋ० ४ । ५८ । ६) ॥

द्राघीयसी तूष्मपरा ॥ ४८ ॥

ऊष्मपरा तु स्वरभक्तिर्द्राघीयसी वेदितव्या । यदद्य कर्हि कर्हि चित् (ऋ० ८ । ७३ । ५) । ऊष्मपरेति कस्मात् । अर्चन्त्यर्कमर्किणः (ऋ० १ । १० । १) ॥

इतरा क्रमे ॥ ४९ ॥

---

(१) -क्रमे Reg. (२) यमं० B². (३) I²Bⁿ omit अग्निधाने. (४) -कृत्नुं० B². (५) -परात् B². (६) तदा भर omitted in B³I², Reg.

इतरैव[1] स्वरभक्तिर्ह्रस्वयाः क्रमे वेदितव्या । इतरा कतरा । योष्म[2]-परा सा तु द्राघीयसी तस्या[3] अपेक्षयेतरा[4] ह्रस्वा । वर्ष्यान् (ऋ० ५ । ८३ । ३) । अदर्श्यायती (ऋ० ७ । ८१ । १) ॥

सर्वत्रैके स्वरभक्तेरभावम् ॥ ५० ॥

सर्वत्रान्तःपदं च नानापदे च[5] रेफाच्च विच्छेदाच्च स्वरभक्तेरभावमेक आचार्या मन्यन्ते । वर्ष्यान् (ऋ० ५ । ८३ । ३) । अग्निर्हत्यम्[6] (ऋ० १०।८०।३) । अर्वाग् देवाः (ऋ० १० । १२९ । ६) ॥

रेफोपधामपरे विद्यमानाम् ॥ ५१ ॥

रेफोपधां स्वरभक्तिमपर आचार्या विद्यमानां मन्यन्ते । कर्हि[7] अर्चन्ति । रेफोपधामिति कस्मात् । अर्वाग् देवाः (ऋ० १० । १२९ । ६)।

अक्रान्तोष्मप्रत्ययाभावमेके ॥ ५२ ॥

अ[8]क्रान्त ऊष्मा प्रत्ययो यस्याः स्वरभक्तेस्तस्या भावमेक आचार्या मन्यन्ते । वर्षम्[9] (ऋ० ५ । ५८ । ७) । कर्हि[10] (ऋ० ५ । ७४ । १०) । अदर्शि (ऋ० १ । ४६ । ११) । जलूहवः (ऋ० ८ । ६१ । ११) । अ[11]क्रान्त इति कस्मात् । वर्ष्यान् (ऋ० ५ । ८३ । ३) । अदर्श्यायती (ऋ० ७ । ८१ । १) ॥

पूर्वोत्तरस्वरसरूपतां च ॥ ५३ ॥

---

(१) इतरा च B^n, इतरा B^2. (२) I^2 corrects या ऊष्म- to या क्रांतोष्म-. (३) द्राघीयसीतो Reg. (४) द्राघीयसी to -तरा omitted in I^2. (५) Reg., नानापदे B^n, नानापदं च B^2, नानापदं $B^3 I^2$. (६) त्यं० B^2. (७) B^3 (वर्हि corrected to कर्हि) I^2, Reg.; चर्हि B^n; omitted in B^2. (८) आ- B^2. (९) वर्ष्यं I^2. (१०) B^n omits कर्हि. (११) आ- I^2.

पूर्वस्वरस[1]रूपतां चो[2]त्तरस्वरस[3]रूपतां च स्वरभक्तेरेक आचार्या मन्यन्ते। न केवलमृकाररूपां स्वरभक्तिर्भवतीत्यर्थः। धूर्षदम् (ऋ० १। १४३। ७) इत्यूकाररूपा स्वरभक्तिः। बर्हिषदः (ऋ० ६। ६८। १) इति इकाररूपा स्वरभक्तिः॥

ऊष्मोदयं प्रथमं स्पर्शमेके
द्वितीयमाहुरपदान्तभाजम्॥ ५४॥

ऊष्मोदयं प्रथमं स्पर्शमपदान्तभाजमेक आचार्या द्वितीयमाहुः। शशः खुरं प्रत्यञ्चं जगार[4] (ऋ० १०। २८। ६) प्रत्यङ् स्वमसुं यन्[5] (ऋ० १०। १२। १)। शतक्रतुः थ्सरत् (ऋ० ८। १। ११)। विरफ्शी गोमती मही[6] (ऋ० १। ८। ८)। अपदान्तभाजमिति कस्मात्। ऋक्सामाभ्याम् (ऋ० १०। ८५। ११)। विराट् सम्राट् (ऋ० १। १८८। ५)। यत्सोम[7] (ऋ० ६। १६। १)। अप्स्वग्ने[8] (ऋ० ८। ४३। ६)॥

क्शातौ खकारयकारा उ एके॥ ५५॥

क्शाते[9]र्धातोः ककारश[10]कारयोः स्थाने खकारयकारौ कर्तव्यौ मन्यन्त एक आचार्याः। अख्यद्देवः (ऋ० ४। १४। १)॥

तावेव ख्यातिसदृशेषु नामसु॥ ५६॥

---

(१) -स- B^2, Reg.; -स्व- $B^3I^2B^n$. (२) B^n omits च. (३) -स- B^2, Reg.; -स्व- $B^3I^2B^n$. (४) B^2 omits जगार. (५) B^2 omits यन्. (६) मही omitted in $B^3I^2B^n$. (७) B^3I^2, यत्सोमं० B^2, omitted in B^n. (८) अग्ने० B^2. (९) क्शाते- B^3B^n; क्साते- (ख्या- corrected to क्सा-) I^2; ख्याते- B^2, Reg., M. M. (१०) -स- I^2, M. M. -य- Reg.

तावेव खकारयकारौ ख्यातिसदृशेषु नामसु कर्तव्यौ मन्यन्त एक आचार्याः । अख्यद्देवः[१] (ऋ० ४ । १४ । १) । सख्ये सखाय-स्तन्वे तनूभिः (ऋ० १ । १६५ । ११) इति ॥

इति श्रीपार्षद्व्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र-
उवट[२]कृतौ प्रातिशाख्यभाष्ये[३] षष्ठं
पटलम्[४] ॥
॥ प्रथ[५]मोध्यायः ॥

(१) B^{n} omits अख्यद्देवः. (२) -पुत्रोवट- B^{2}, -पुत्रोव्वट- B^{n}, -पुत्रउवटस्तु I^{2}. (३) प्रतिसाख्ये I^{2}. (४) B^{n} adds समाप्तम्. (५) इति प्रथ- B^{n}.

दीर्घं ह्रस्वो व्यञ्जनेऽन्यस्त्वृकाराद्
यथादिष्टं सामवशः स सन्धिः ॥ १ ॥

ऋकारादन्यो ह्रस्वो दीर्घत्वमापद्यते व्यञ्जने प्रत्यय इत्येतदधिकृतं वेदितव्यम् । इत उत्तरं यत्र यत्र वक्ष्यामस्तत्र तत्रोदाहरिष्यामः । सामवशो नाम स[1] संधिर्वेदितव्यः । व्यञ्जनग्रहणं स्वरे दीर्घत्वप्रतिषेधार्थम् । नैतदस्ति प्रयोजनम् । स्वरेषु हि सर्वेषु संधयो विधीयन्ते तेऽस्य बाधका भविष्यन्ति । ऌकारेऽकारस्य न किञ्चिद्विधीयते । तत्र स्यात् । नैव ऌकारादिपदमस्ति । तस्मादन्तरेणापि व्यञ्जनग्रहणं व्यञ्जन एव भविष्यति । न सिध्यति । कथम् । मद्विवत्था (ऋ० १ । २ । ६) इत्यत्र प्रतिपदविधानाद्दीर्घत्वं प्रसज्येत । अस्तु कृतेऽपि दीर्घत्वे समानाक्षरत्वस्या[2] विघातादन्तःस्थापत्तिर्भविष्यति । तथा सति—पदे दृष्टेषु (२ । ५) इति[3] वचनान्न प्राप्नोति । तस्माद्व्यञ्जनग्रहणं क्रियते ।

एवमपि न कर्तव्यम् । प्रतिपदविधानस्य व्यञ्जने सावकाशत्वादिह[4] —मद्विवत्था इत्यत्रोभयप्रसङ्गे शास्त्रानुपूर्व्येण संधयो भवन्तीति पूर्वमेवान्तःस्थापत्तौ कृतायामुकाराभावादेव न दीर्घत्वं भविष्यति । तस्मान्नार्थो व्यञ्जनग्रहणेन[5] । इह तर्हि—अच्छ ऋषे मारुतम् (ऋ० ५ । ५२ । १४) इत्यत्र—ऋकार उदये कण्ठ्यावकारम् (२ । ३२) इति कृतेऽपि पदे[6] दृष्टो ह्रस्वोऽपि[7] विद्यत इति दीर्घत्वं प्राप्नोति । तत्प्रतिषेधार्थं व्यञ्जनग्रहणं क्रियते ।

नैकमुदाहरणं व्यञ्जनग्रहणं प्रयोजयति । यद्येतावत्प्रयोजनं स्यात्—नास्येति व्यञ्जनोपधः (७ । ८) इत्येतस्मिन्प्रतिषेधप्रकरणे

---

(१) B^3 omits स. (२) -चरस्या- B^3. (३) दृष्टेति I^2. (४) B^2 omits इह. (५) -ग्रहणे B^3. (६) पदेह I^2. (७) B^3 B^n, ह्रस्वो $B^2 I^2$.

एवास्य निपातनं कुर्यात् । अच्छ ऋष इति । तस्मात्सर्वस्मिन्दीर्घभावे व्यञ्जन एव प्लुतिः स्यात्स्वरे मा भूदित्येवमर्थं व्यञ्जनग्रहणं कृतं द्रष्टव्यम् । यदुक्तमधस्तात्प्रतिपदविधानस्य व्यञ्जने[1] सावकाशत्वान्मक्ष्वित्थेत्यत्रो[2]भयप्रसङ्गे शास्त्रानुपूर्व्येणैव पूर्वमेवान्तःस्थापत्तौ कृतायामुकाराभावादेव प्लुतेरप्राप्तेर्व्य[3]ञ्जनग्रहणानर्थक्यमिति । तदेतदसम्यगुक्तम् । कथम् । यत्रैकस्मिन्नुभे कार्ये[4] तुल्यबले युगपत्प्राप्नुतस्तत्र शास्त्रानुपूर्व्येण संधिर्भवति । यथा तवेमे इत्यत्र व इत्येतस्य पदावस्थायामेव—उदात्तपूर्वं स्वरितमनुदात्तम् (३ । ७) इत्यनुदात्तत्वे कृत उत्तरेण संधौ क्रियमाणे—उदात्तपूर्वं नियतं विवृत्त्या व्यञ्जनेन वा स्वर्यतेऽन्तर्हितम्[5] (३ । १७) इति स्वरितश्च प्राप्नोति । इकारोदय एकारमकारः (२ । १६) इति च संधिः । तयोः शास्त्रानुपूर्व्येण पूर्वः संधिर्भवति । अतोऽन्यत्र पूर्वानुत्सर्गान्बाधित्वा[6] तदुत्तरे[7]ऽपवादा भवन्ति[8] । यथा—भूतं देवानामवमे अवोभिः (ऋ० १ । १८५ । ११) इत्यत्र—अवीरतेऽवास्यवोऽरथाः(२ । ४०) इति प्रतिपदविधानम[9]प्यभिनिहितं बाधित्वापवादान्तरम्[10]—प्रकृत्येतिकरणादौ प्रगृह्याः । स्वरेषु चार्ष्याम् (२ । ५१—५२) इति प्रकृति[11] भावो भवति । एवं मक्ष्वित्थेत्येवमादिष्वप्यपवादाद्[12] दीर्घत्वं प्रसज्येत । तस्माद्व्यञ्जनग्रहणं क्रियते ।

---

(१) B^2 adds एव. (२) मक्ष्वित्थेति तत्रो- I^2. (३) प्लुते अप्राप्ते व्य- B^2. (४) B^n omits कार्ये. (५) B^2 adds न चेत्. (६) B^n, -र्गान् वाधितत्वाद् B^3, -र्गान् द्वाधित्वात् B^2. (७) तदुत्तरे B^2, उत्तरेषु B^3B^n. (८) इकारोदय to भवन्ति omitted in I^2. (९) I^2B^n, प्रतिपदविहितम् (-पा- B^3) B^3B^2. (१०) अपवादः I^2. (११) B^2, प्रकृतेर् $B^3I^2B^n$. (१२) -वादत्वात् B^n.

अन्यस्त्वृकारादित्यनर्थकम्। कथम्। पदान्तादिष्वेव विकारशास्त्रं विधीयते। नहि ऋकारान्तं पदमस्ति। क्व वा प्रयोजयति[1]। सर्वत्र पूर्वपदान्ताः पुवन्ते वसुमघयोः परयोः (९। १) इत्यत्र प्रयोजयति यद्यस्ति पितृवसुः मातृवसुः इति वा। यथादिष्ट[2]ग्रहणमनादिष्टानाम्—यज्ञस्य देवम् (ऋ० १। १। १) आदीनां प्रतिषेधार्थम्[3]। यदि सर्वेषां ह्रस्वानां सामान्येनैव दीर्घत्वं स्याद्उत्तरेषामनुक्रमणमनर्थकं स्यात्। नानर्थकम्। नियमार्थमेव स्यात्। अमुष्यामुष्मिन्नेवेति[4]॥

सैव प्लुतिः ॥ २ ॥

सैव प्लुतिरिति[5] वेदितव्या या ह्रस्वस्य दीर्घता। प्लुतिसंज्ञायाः प्रयोजनम्—प्लुतोपाचरिते नतिः (१०। २०) इति॥

या स्वरेषूपदिष्टा ॥ ३ ॥

या च स्वरसंधिषूपदिष्टा—एवाँ अग्निमत्रिषु सा प्लुतोपधा (२। ६६) इति सा च प्लुतिर्ह्रस्वस्य दीर्घता वेदितव्या॥

योनिमारैगादिषु चोदयादेः ॥ ४ ॥

योनिमारैक् (२। ७५) इत्येवमादिषु चोदयादेर्ह्रस्वस्य या[6] दीर्घता निपातिता सा च[7] प्लुतिरित्यत्र वेदितव्या। तस्मात्—प्लुतादीनि (१०। ३) इत्युच्यन्ते॥

मक्ष्वित्युकारः प्लवते सर्वत्राप्यपदान्तभाक् ॥५॥

---

(१) प्रयोजति B^2. (२) यथादिष्टं B^n. (३) $B^3 B^2$, प्रतिविशेषणार्थं $I^2 B^n$. (४) अमुष्याममुष्मिन्नेवेति B^n, अथाप्यमुष्मिन्नेवेति I^2. (५) B^2 omits इति. (६) या omitted in $B^2 B^n$. (७) I^2 B^n, च omitted in $B^3 B^2$. (८) B^2 omits इति.

मन्तु इत्यत्रोकारः प्लुवते सर्वत्र । अप्यपदान्तभाक् किं पुनः पदान्त[1]भाक् । मन्तू देववतो रथः (ऋ० ८ । ३१ । १५) । मन्तूमन्तू कृणुहि गोजितो नः[2] (ऋ० ३ । ३१ । २०) । मन्तूयुभिर्नरा हयेभिः (ऋ० ७ । ७४ । ४) । उकारग्रहणमकारस्याप्रसङ्गार्थम् । नैतत्प्रयोजनं पदान्तादिष्वेव विकारशास्त्रविधेः । अप्य[3]पदान्तभागिति प्राप्नोति तन्निवृत्त्यर्थमुकारग्रहणम् ।

सर्वत्रग्रहणं क्रियते—सर्वत्र पूर्वपदान्ताः प्लुवन्ते वसुमघयोः (६ । १) इति नियमात्[4] —मन्तूमन्तू कृणुहि (ऋ ० ३ । ३१ । २०) इत्यत्र पूर्वपदस्य दीर्घत्वं न स्यादिति । अन्तःपादाधिकारनिवृत्तिख्यापनार्थं वा । तस्मात्—प्र नव्यसा सहसः सूनुमच्छा यज्ञेन (ऋ० ६ । ६ । १) वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तः (ऋ० ३ । २६ । १) इत्येवमादिषु दीर्घत्वं सिद्धं भवति ॥

सुता याहीत्यतोऽन्येषु पदेष्वच्छेति विग्रहे ॥ ६ ॥

सुताः याहि इत्येताभ्यामन्येषु अच्छ इत्येतत्पदं विग्रहे वर्तमानं प्लुवते । अच्छा वद तवसम् (ऋ० ५ । ८३ । १) । सुता याहीत्यतोऽन्येष्विति कस्मात् । इन्द्रमच्छ सुता इमे (ऋ० ९ । १०६ । १) । अच्छ याह्या वह[5] (ऋ० १ । ३१ । १७) विग्रहग्रहणमपदान्तभागग्रहणादिनिवृत्त्यर्थम् । अधिकारार्थं च । निवृत्त्यर्थत्वात्—गोकामा मे अच्छदयन् (ऋ० १० । १०८ । १०) इति न प्लुवते[6] । अधिकारार्थत्वात्—पुरुहुतं पुरुष्टुतम् (ऋ० ८ । १५ । १) इत्यत्र—साधंमद्यादिभिः प्लुतैः[7] पादादौ (७ । ३३) इति न भवति । तथा[8] —

---

(१) अपदान्त- B². (२) B³I², गोजितो नः omitted in B²Bⁿ. (३) अप्य- B³B², अथ I², अथा- Bⁿ. (४) B², इति added in B³ I² Bⁿ. (५) वहा दे० । B². (६) प्लुवते B², भवति B³I²Bⁿ. (७) प्लुवतैः I². (८) B³B², यथा I²Bⁿ.

यद्वा पुरू पुरुभुजा (ऋ० ५।७३।१) इति—षष्ठं चाष्टाक्षरेऽक्षरम्[1] (८। ३९) इति न भवति। यद्ययं विग्रहाधिकारस्तत्राप्यनुवर्तते—अन्तःपादं विग्रह एष्वपृक्तः (८।१) इति किमर्थम्। तस्य प्रयोजनं तत्रैव वक्ष्यामः ॥

अनाकारोपधश्चान्त्यो येत्युत्तरपदस्य यः।
उदात्तादेर्द्व्यक्षरस्य ॥ ७ ॥

अनाकारोपधो य इत्युदात्तादेर्द्व्यक्षरस्योत्तर[2]पदस्य योऽन्त्यः स च प्लवते। आयूया धृष्णो अभिगूर्या त्वम् (ऋ० २।३७।३)। अनाकारोपध इति कस्मात्। परिदाय रसं दुहे[3] (ऋ० १।१०५।२)। अनाकारोपधो येति[4] कस्मात्। वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तः (ऋ० ३।२६।१) इत्यत्रान्त्यो[5] यकार आकारोपधो न भवति। य इति किम्। इमां समेत पश्यत (ऋ० १०।८५।३३)। उत्तरपदस्येति कस्मात्। मर्यश्री स्पृहयद्वर्णः (ऋ० २।१०।५)। उदात्तादेरिति कस्मात्। अप्रामिसत्य मघवन् (ऋ० ८।६१।४)। द्व्यक्षरस्येति कस्मात्। सुवीर्यस्य[6] पतयः स्याम (ऋ० ६।४७।१२) नैतदुदाहरणं युक्तं—नास्येति व्यञ्जनोपधः (७।८) इत्येवं[7] सिद्धत्वात्। अतिथिग्वस्य वीरान् (ऋ० २।१४।७) इति यथा। तस्मात्—आसूरज प्रत्यावर्तय (ऋ० ६।४७।३१) इत्येवंविधमन्यद्व्यञ्जनोदयं मृग्यम् ॥

नास्येति व्यञ्जनोपधः ॥ ८ ॥

---

(१) चाष्टाक्षरम् I^2. (२) -स्योत्तरस्य B^n. (३) B^2 omits दुहे. (४) अनाकारोपधो य इति I^2; अनाकारोपधश्चान्त्यो येत्यु त्तर इति B^2 B^n; B^3 corrects the reading of I^2 to that of B^2. (५) यत्र अंत्यो B^2, इत्यत्रांतो यो B^n. (६) सुवीर्य्य I^2. (७) B^2 B^n, इत्येव $B^3 I^2$.

न खलु अस्य इत्ययमन्तः[1] प्लवते व्यञ्जनोपधः सन्। राजामि कृष्टेरुपमस्य वव्रेः (ऋ० ४।४२।१)। तेजिष्ठयातितिग्वस्य वर्तनी (ऋ० १।५३।८)। व्यञ्जनोपध इति कस्मात्। अवास्या शिशुमतीरदीदेः (ऋ० १।१४०।१०)॥

निरूय पिष्टतमयाभिपद्य
प्रास्य संगत्यानुदृश्याभिवृत्य।
आरभ्य संमील्य मक्षुंगमाभि-
रभिव्लग्य यत्र निषद्य वीति च॥ ९॥

इत्येतानि च पूर्वलक्षणप्राप्तानि न प्लवन्ते।[2] निरूय पिष्टतमया। वनस्पते रशनया निरूय पिष्टतमया वयुनानि विद्वान् (प्रै० पृ० १४४)। पिष्टतमयेति कस्मात्। वनस्पते रशनया निरूया देवानाम्[3] (ऋ० १०।७०।१०)। अभिपद्य। त एते वाचमभिपद्य पापया (ऋ० १०।७१।९)। प्रास्य। प्रास्य पारं नवतिम्[4] (ऋ० १।१२१।१३)। संगत्य। सर्वाः संगत्य वीरुधः (ऋ० १०।९७।२१)। अनुदृश्य। पूर्वेषां पन्थामनुदृश्य धीराः (ऋ० १०।१३०।७)। अभिवृत्य। अभिवृत्य सपत्नान् (ऋ० १०।१७४।२)। आरभ्य। ये त्वारभ्य चरामसि (ऋ० १।५७।४)। संमील्य। संमील्य यद्भुवना[5] (ऋ० १।१६१।१२)। मक्षुंगमाभिः। मक्षुंगमाभिरूतिभिः (ऋ० ८।२२।१६)। अभिव्लग्य यत्र। अभिव्लग्य यत्र हता अमित्राः (ऋ० १।१३३।१)। यत्रेति कस्मात्[6]। अभिव्लग्या चिदद्रिवः (ऋ० १।१३३।२)। निषद्य वि। पिबा निषद्य वि मुचा हरी

---

(१) इत्येवमंतः B². (२) B³I² add निरूय पिष्टतमया। अभिपद्य। प्रास्य। संगत्य। अनुदृश्य। अभिवृत्य। आरभ्य। संमील्य। मक्षुंगमाभिः। अभिव्लग्य यत्र। निषद्य वि।. (३) देवानां०। B². (४) नवतिं०। B². (५) भुवना०। B². (६) किं B³.

इह (ऋ० १। १७७। ४)। वीति कस्मात्[1]। ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः (ऋ० १। १०८। ३)। चकार एकैकस्य समुच्चयार्थः ॥

नहि जह्यभि वीर्येण कृधीति कृणुथेति च।
एतान्येकाक्षरे पदे स्वैप्रीभाव्ये ॥ १० ॥

नहि जहि अभि वीर्येण कृधि कृणुथ इत्ये[2]तानि च पदानि प्लुवन्त एकाक्षरे पदे परे स्वैप्रसंधि[3]भूते प्रत्यये। नहि। नही न्वस्य प्रतिमानम्[4] (ऋ० ४। १८। ४)। जहि। जही न्यत्रिणम्[5] (ऋ० ६। ५१। १४)। अभि। अभी ष्वर्यः पौंस्यैर्भवेम[6] (ऋ० १०। ५९। ३)। वीर्येण। इन्द्रं माता वीर्येणा न्यृष्टम् (ऋ० ४। १८। ५)। कृधि। कृधी ष्वस्माँ अदितेः (ऋ० ४। १२। ४)। कृणुथ। अत्रे चिदस्मै कृणुथा न्यञ्चनम् (ऋ० ८। २७। १८)। एतानीति कस्मात्। उतो नो अस्या उषसो जुषेत[7] ह्यर्कस्य (ऋ० १। १३१। ६)। एकाक्षर इति कस्मात्। तमर्यमाभि रक्षत्यृजूयन्तम्[8] (ऋ० १। १३६। ५)। स्वैप्रीभाव्य इति कस्मात्[9]। नहि नु ते महिमनः समस्य (ऋ० ६। २७। ३)[10] ॥

पराणि च ॥ ११ ॥

---

(१) किं B^3. (२) The Comm. नहि to इति omitted in B^2. (३)-सन्धी-B^n. (४) -मानं०। B^2. (५) -त्रिणं०। B^2. (६) B^2 B^n omit भवेम. (७) जुषत B^2. (८) I^2, रक्षति०। B^2, रक्षति B^3 I^2. (९) किं B^3. (१०) B^2 adds यत्तु भाव्यग्रहणादिह न युक्तेनाभिन्यरुणो गृ०(-णो० B^3)। इति वृत्तिः। तदशुद्धं। शेषे चापठिते सतीति श्रीति संयोगत्वादेवात्र न। with marks of deletion; B^3 reads it on the margin.

पराणि च[1] यानि[2] वक्ष्यामस्तानि च[3] प्लुवन्ते चैप्रीभाव्ये। तान्युत्तरत्रोदाहरिष्यामः। चैप्रीभाव्य इति कस्मात्। मनोवाता अध नु धर्मणि ग्मन् (ऋ० ३। ३८। २)॥

युक्ष्व मन्दस्व विद्मेति हीति॥ १२॥

युक्ष्व मन्दस्व विद्म[4] इत्येतानि प्लुवन्ते हि इत्येतस्मिन्प्रत्यये। युक्ष्व। युक्ष्वा ह्यरुषी रथे (ऋ० १। १४। १२)। साधंमद्यादिभिः प्लुतैः (७। ३३) इति सिद्धे संयोगपरार्थं ग्रहणम्। मन्दस्व। स मन्दस्वा ह्यन्धसः (ऋ० ३। ४१। ६)। विद्म। विद्मा ह्यस्य वीरस्य (ऋ० ८। २। २१)। संयोगपरार्थं ग्रहणम्॥

विद्धि पिब त्विति॥ १३॥

विद्धि पिब इत्ये[5]ते प्लुवेते[6] तु इत्ये[7]तस्मिन्प्रत्यये। विद्धि[8]। विद्धी त्वस्य नो वसो (ऋ० ७। ३१। ४)। पिब। पिबा त्वस्य गिर्वणः (ऋ० ८। १। २६)। संयोगपरार्थं ग्रहणम्॥

जुहोत यज धासथ शिशीत भरेति स्विति॥१४॥

जुहोत यज धासथ शिशीत भर[9] इत्येतानि सु इत्येतस्मिन्प्रत्यये प्लवन्ते। जुहोत। आ जुहोता स्वध्वरम् (ऋ० ३। ९। ८)। यज। यजा स्वध्वरं जनम् (ऋ० १। ४५। १)। संयोगपरार्थं ग्रहणम्। धासथ। तन्नः शर्धाय धासथा स्विन्द्रियम् (ऋ० १। १११। २)। शिशीत। तं शिशीता स्वध्वरम् (ऋ० ८। ४०। ११)। यथोदयानि

---

(१) B^n, पराणि च omitted in B³B²I². (२) B² adds च. (३) B² omits च. (४) युक्ष्व मन्दस्व विद्म omitted in B². (५) विद्धि पिब इति omitted in B². (६) प्लुवंते B². (७) इति omitted in B²I². (८) B², विद्धि omitted in B³ I² B^n. (९) The Comm. जुहोत to भर omitted in B².

(८ । १५) इति सिद्धे[1] संयोगपरार्थं ग्रहणम् । भर । त्वं पुरूण्या भरा स्वश्व्या (ऋ० १० । ११३ । १०) ॥

सु नु हीत्येतेषु परेऽधेति ॥ १५ ॥

सु नु हि[2] इत्येतेषु परेषु[3] अध इत्येतत्प्लवते[4] । सु । रुद्रस्य मर्या अधा स्वश्वाः (ऋ० ७ । ५६ । १) । नु । अधा न्वस्य संदृशम् (ऋ० ७ । ८८ । २) । हि । अधा ह्यग्ने क्रतोः (ऋ० ४ । १० । २) । संयोगपरार्थं ग्रहणम् ॥

तृम्पर्तेन मुञ्चताद्येति वीति ॥ १६ ॥

तृम्प ऋतेन मुञ्चत अद्य[5] इत्येतानि वि इत्येतस्मिन्प्रत्यये प्लवन्ते । तृम्प । तृम्पा व्यश्नुही मदम् (ऋ० ८ । ४५ । २२) । ऋतेन । ददृशुषीस्तदृतेना व्यायन् (ऋ० १० । १३९ । ४) । मुञ्चत । एवो ष्वस्मन्मुञ्चता व्यंहः (ऋ० ४ । १२ । ६) । अद्य । संवत्सर इदमद्या व्यख्यत् (ऋ० । १ । १६१ । १३) ॥

सु न्वित्यनर्यपरयोरुकारः पदम् ॥ १७ ॥

सु नु इत्येतयोरनर्यपरयोरुकारः पदं प्लवते[6] । सु । इमामू ष्वासुरस्य श्रुतस्य[7] (ऋ० ५ । ८५ । ५) । नु । कदू न्वस्याकृतम् । (ऋ० ८ । ६६ । ९) । अनर्यपरयोरिति कस्मात् । यस्मा इरस्यसीदु न्वर्यः (ऋ० १० । ८६ । ३) । संयोगपरार्थं ग्रहणम् । पदमिति कस्मात् । वहस्वा सु स्वश्व्यम् । (ऋ० ८ । २६ । २३) ॥

तयोरुत्तरे योज घेति ॥ १८ ॥

तयोः सु नु इत्येतयोरुत्तरे नु इत्येतस्मिन्प्रत्यये योज घ इत्येते प्लवेते । योज । योजा न्विन्द्र ते हरी (ऋ० १ । ८२ । १) । घ ।

---

(१) सिद्धं B^3. (२) सु नु हि omitted in B^2. (३) परे B^2. (४) प्लवंते B^3. (५) The Comm. तृम्प to अद्य omitted in B^2. (६) प्लवंते B^2. (७) B^2B^n, श्रुतस्य omitted in B^3I^2.

प्र घा न्वस्य महतः (ऋ० २ । १५ । १) । यथोदये[1] सिद्धे संयोग-परार्थं ग्रहणम् ॥

इति[2] क्षैप्रीभाव्याधिकारः ॥

मृळयद्भ्यां वसुवित्तमं यत्सोमं जातवेदसम् । भरतेत्येतेषु ॥ १८ ॥

मृळयद्भ्याम् वसुवित्तमम् यत् सोमम् जातवेदसम्[3] इत्येतेषु भरत इत्येतत्प्लवते । मृळयद्भ्याम् । हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठम्[4] (ऋ० १ । १३६ । १)। वसुवित्तमम् । प्र देवं देववीतये भरता वसुवित्तमम् (ऋ० ६ । १६ । ४१) । यत् । भरता यज्जुजोषति (ऋ० ८ । ६२ । १) सोमम् । अपावपद्भरता सोममस्मै (ऋ० २ । १४ । ६) । जातवेदसम् । प्र देवं देव्या धिया भरता जातवेदसम् (ऋ० १० । १७६ । २) ॥

अपादान्तः ॥ २० ॥

अपादान्त इत्येतदधिकृतं[5] वेदितव्यमित उत्तरं यद्वक्ष्यामः । वक्ष्यति—चिन्महित्वंगीर्गृणानःसतेपरं न्विति (७ । २६) इति । प्र नू महित्वं वृषभस्य वोचम् (ऋ० १ । ५९ । ६) । अपादान्त[6] इति कस्मात् । महाँ इन्द्रः परश्च नु महित्वम्[7] (ऋ० १ । ८ । ५) ॥

अद्येति करणादिषु ॥ २१ ॥

अद्य इत्येतत्प्लवते करणादिषु प्रत्ययेषु[8] । करणादीनु[9]त्तरत्रोदाहरिष्यामः ॥

---

(१) यथोदयेति B^n. (२) एतावान् B^n. (३) The Comm. मृळयद्भ्याम् to -वेदसम् omitted in B^2. (४) स्वादिष्ठम् omitted in $B^2 B^n$. (५) इत्यधिकृतं B^3. (६) अपाद B^2. (७) B^2 omits महित्वम्. (८) अद्य इत्येतत् to प्रत्ययेषु omitted in I^2. (९) -न्यु- B^n.

करणं च चित्करते वृणीमहे
भवतं कृणोतु भवत स्वस्तये ॥ २२ ॥

त इमे करणादयो ये पूर्वसूत्रे निर्दिष्टाः। करणम् च चित् करते वृणीमहे भवतम् कृणोतु भवत स्वस्तये इत्ये[1]तेषु अद्य इत्येतत्प्लवते[2]। करणम्। प्र तत्ते अद्या करणम्[3] (ऋ० ६। १८। १३)। च। अद्या च नो मृळयत[4] (ऋ० २। २९। २)। नैतदुदाहरणम्[5] — सार्धमद्यादिभिः प्लुतैः पादादौ (७। ३३) इति सिद्धत्वात्। इदं तर्हि। इवमद्या च मृळय (ऋ० १। २५। १९)। एवमन्यान्यपि पादमध्यस्थान्युदाहरणानि। चित्। तदद्या चित्त उक्थिनः (ऋ० ८। १५। ६)। करते। को वामद्या करते[6] (ऋ० ४। ४४। ३)। वृणीमहे। सूक्तैरद्या वृणीमहे (ऋ० ५। ८२। ७)। भवतम्। त्रिश्चिन्नो अद्या भवतम्[7] (ऋ० १। ३४। १)। कृणोतु। भद्रं सोमः सुवानो अद्या कृणोतु नः (ऋ० १०। ३५। २)। भवत। अर्वाञ्चो अद्या भवता यजत्राः (ऋ० २। २९। ६)। स्वस्तये। विश्वे देवा नो अद्या स्वस्तये (ऋ० ५। ५१। १३)॥

पुर्विति चित्पुरुहूतो नृषूतः
सहस्राणि पुरुभुजा धियायते ॥ २३ ॥

पुरु इत्येतत्प्लवते चित पुरुहूतः नृषूतः सहस्राणि पुरुभुजा धियायते[8] इत्येतेषु प्रत्ययेषु। चित। तिरः पुरू चिदर्णवं जगन्वान्[9] (ऋ० १०। १०। १)। पुरुहूतः। इन्द्रः पुरू पुरुहूतः (ऋ० ८।

---

(१) The Comm. करणम् to इति omitted in B². (२) एतेषु to प्लवते omitted in I². (३) करणं०। B², करणं कृतं Bⁿ. (४) मृळयता०। B². (५) B² adds युक्तम्।. (६) करते०। B², करते रातव्यः Bⁿ. (७) भवतं०। B². (८) The Comm. चित् to -यते omitted in B². (९) B³Bⁿ, जगन्वान् omitted in I²B².

२ । ३२) । नृषूतः । सिमा पुरू नृषूतो अस्यानवे (ऋ० ८ । ४ । १) । सहस्राणि । त्वं पुरू[1] सहस्राणि शतानि च (ऋ० ८ । ६१ । ८) । पुरुभुजा । यद्वा पुरू पुरुभुजा (ऋ० ५ । ७३ । १) । धियायते । एष पुरू धियायते (ऋ० ९ । १५ । २) ॥

वहेति त्वंदुहितर्दैव्यमुत्तरम् ॥ २४ ॥

वह इत्येतत्प्लवते त्वम् दुहितः दैव्यम्[2] इत्येवमुत्तरम् । त्वम् । आ दाशुषे जातवेदो वहा त्वम् (ऋ० १ । ४४ । १) । दुहितः । आ वहा दुहितर्दिवः (ऋ० ५ । ७९ । ८) । दैव्यम् । आ वहा दैव्यं जनम् (ऋ० १ । ३१ । १७) ॥

द्युम्नं रुद्रं नव्यमेतेषु वर्धय ॥ २५ ॥

द्युम्नम् रुद्रम् नव्यम्[3] इत्येतेषु प्रत्ययेषु वर्धय इत्येतत्प्लवते । द्युम्नम् । आर्यं सहो वर्धया द्युम्नमिन्द्र (ऋ० १ । १०३ । ३) । रुद्रम् । रुद्रं दिवा वर्धया रुद्रम्[4] (ऋ० ६ । ४९ । १०) । नव्यम् । बृहस्पतिं वर्धया नव्यमर्कैः (ऋ० १ । १९० । १) ॥

चिन्महित्वंगीर्गृणानःसतेपरं
न्वित्यन्त्ये चेन्मर्तशब्दाद्रिवःपरे ॥ २६ ॥

चित् महित्वम् गीः गृणानः सः ते[5] इत्येवंपरं नु इत्येतत् प्लवते । अन्त्ये चेत्पदे मर्तशब्दपरे अद्रिवःपरे वा भवतः । चित् । अद्या चिन्नू चित्[6] (ऋ० ६ । ३० । ३) । महित्वम् । प्र नू महित्वं

---

(१) सहस्राणि । त्वं पुरू omitted in I². (२) त्वम् दुहितः दैव्यम् omitted in B². (३) द्युम्नम् रुद्रम् नव्यम् omitted in B². (४) रुद्रमर्कौ B². (५) चित् to सः ते omitted in B². (६) चित्तदपो नदीनां B².

वृषभस्य (ऋ० १ । ५९ । ६) । गीः । इन्द्रं वेपी वक्वरी यस्य नू गीः (ऋ० ६ । २२ । ५) । गृणानः । नू ष्टुत इन्द्र नू गृणानः (ऋ० ४ । १६ । २१) । सः । प्र नू स मर्तः[1] (ऋ० १ । ६४ । १३) । ते । ये चाकनन्त चाकनन्त नू ते मर्ताः (ऋ० ५ । ३१ । १३) । ऊती[2] अभूम नहि नू ते अद्रिवः (ऋ० ८ । २१ । ७) । अन्त्ये चेन्मर्तशब्दाद्रिवःपरे[3] इति कस्मात् । भसन्तु ष प्र पूर्व्यः (ऋ० ६ । १४ । १) । नहि नु ते महिमनः[4] (ऋ० ६ । २७ । ३) ॥

तूतुजानो मतिभिर्भोजनानि नो दद्धि स्तोमं भूरि योनिं त्वमेषु । भरेत्येतत् ॥ २७ ॥

तूतुजानः मतिभिः भोजनानि नः दद्धि स्तोमम् भूरि योनिम् त्वम्[5] इत्येतेषु प्रत्ययेषु भर इत्येतत्प्लुवते । तूतुजानः । अस्मा इदु प्र भरा तूतुजानः (ऋ० १ । ६१ । १२) । मतिभिः । भूर्तिं न भरा मतिभिः[6] (ऋ० ९ । १०३ । १) । भोजनानि । शत्रूयतामा भरा भोजनानि (ऋ० ५ । ४ । ५) । नः । सुपेशसं वाजमा भरा नः (ऋ० १ । ६३ । ९) । दद्धि । मा नो मर्धीरा भरा दद्धि तन्नः[7] (ऋ० ४ । २० । १०) । स्तोमम् । भूषन्निव प्र भरा स्तोममस्मै (ऋ० १० । ४२ । १) । भूरि । संगृभ्या न आ भरा भूरि पश्वः (ऋ० ३ । ५४ । १५) । योनिम् । धासिमिव प्र भरा योनिम्[8]

---

(१) मर्त्तः शवसा० । B², मर्त्तः शवसा Bⁿ. (२) अद्रिवः ऊती B². (३) -परे B², -परे omitted in B³. (४) महिमनः स० । B². (५) The Comm. तूतुजानः to त्वम् omitted in B². (६) मतिभिर्जुजोषते B². (७) B²Bⁿ omit तन्नः. (८) योनिमस्मै B², योनिं मग्नये (*sic*) Bⁿ.

(ऋ० १ । १४० । १) । त्वम् । विश्वा वसून्या भरा त्वं नः (ऋ० १० । ८३ । ३) ॥

न नु चिद्यः ॥ २८ ॥

नु इत्येतत् चिद्यः इत्येवमुत्तरं न प्लवते । उतो नु चिद्य ओजसा (ऋ० ८ । ४० । १०) । य इति कस्मात् । अद्या चिन्नू चित् [1] (ऋ० ६ । ३० । ३) ॥

भवेति स्तोतृभ्यो द्युम्नी शत मे परेषु ॥ २९ ॥

भव इत्येतत्प्लवते स्तोतृभ्यः द्युम्नी शत मे इत्येतेषु परेषु । स्तोतृभ्यः[2] । भवा स्तोतृभ्यो अन्तमः स्वस्तये[3] (ऋ० ३ । १० । ८) । द्युम्नी[2] । भवा द्युम्नी वाध्र्यश्व (ऋ० १० । ६९ । ५) । शत[2] । पूर्भवा शतभुजिः (ऋ० ७ । १५ । १४) । मे[2] । अभि प्रेहि दक्षिणतो भवा मे (ऋ० १० । ८३ । ७) ॥

शोचा यविष्ठ्यैवा यथा कर्ता यत्सादया सप्त ।
अर्चा मरुद्भ्यस्तिष्ठा नः सना स्वः पारया नव्यः॥३०॥

शोचा यविष्ठ्य । एवा यथा । कर्ता यत् । सादया सप्त । अर्चा मरुद्भ्यः। तिष्ठा नः । सना स्वः । पारया नव्यः[4] । इत्येतेषां द्वैपदानां पूर्वपदान्ताः प्लवन्ते । शोचा यविष्ठ्य। बृहच्छोचा यविष्ठ्य (ऋ० ६ । १६ । ११) । एवा यथा । नकिरेवा यथा त्वम् (ऋ० ४।३०।१) । कर्ता यत् । ज्योतिष्कर्ता यदुश्मसि (ऋ० १ । ८६ । १०) । सादया सप्त । देवाँ ईळे सादया सप्त होतॄन् (ऋ० १० । ३५ । १०) । अर्चा

---

(१) चित्तदपो० । B². (२) Omitted in B². (३) स्वस्तये omitted in B³I². (४) The Comm. शोचा to नव्यः omitted in B².

मरुद्भ्यः । दिवो अर्चा मरुद्भ्यः (ऋ० ५ । ५२ । ५) । तिष्ठा नः । ऊर्ध्वस्तिष्ठा न ऊतये (ऋ० १ । ३० । ६) । सना स्वः । सना ज्योतिः सना स्वः (ऋ० ९ । ४ । २) । पारया नव्यः । अग्ने त्वं पारया नव्यो अस्मान् (ऋ० १ । १८९ । २) ॥

बोधा स्तोत्रे चकृमा ब्रह्मवाहः
शंसा गोषूच्छा दुहितर्वदा तना ।
अजा नष्टं जम्भया ता अधा महो
गन्ता मा युक्ष्वा हि सृजा वनस्पते ॥३१॥

बोधा स्तोत्रे । चकृमा ब्रह्मवाहः । शंसा गोषु । उच्छा दुहितः । वदा तना । अजा नष्टम् । जम्भया ताः । अधा महः । गन्ता मा । युक्ष्वा हि । सृजा वनस्पते[1] । इत्येतेषां च प्लवन्ते[2] पूर्वपदान्ताः । बोधा स्तोत्रे । बोधा स्तोत्रे वयो दधत् (ऋ० १० । १५६ । ५) । चकृमा ब्रह्मवाहः । त्वाया हविश्चकृमा ब्रह्मवाहः (ऋ० १ । १०१ । ९) । शंसा गोषु । प्र शंसा गोष्वघ्न्यम्[3] (ऋ० १ । ३७ । ५) । उच्छा दुहितः । व्युच्छा दुहितर्दिवः (ऋ० ५ । ७९ । ९) । वदा तना । अच्छा वदा तना गिरा (ऋ० १ । ३८ । १३) । अजा नष्टम् । आजा नष्टं यथा पशुम् (ऋ० १ । २३ । १३) । जम्भया ताः । अभि सन्ति जम्भया ताः[4] (ऋ० २ । २३ । ९) । अधा महः । मरुतामधा महो दिवि[5] (ऋ० ५ । ५२ । ३) । गन्ता मा । आ गन्ता मा रिषण्यत (ऋ० ८ । २० । १) । युक्ष्वा हि । अग्ने युक्ष्वा हि ये तव (ऋ० ६ । १६ । ४३) । सृजा वनस्पते । अव सृजा वनस्पते (ऋ० १ । १३ । ११)॥

---

(१) The Comm. बोधा to -पते omitted in B². (२) प्लवन्ते occurs after पूर्वपदान्ताः in B². (३) गोष्वघ्न्यं० । B². (४) ता अन० । B², ता अनभ्रसः Bⁿ. (५) महः B² Bⁿ.

अग्ने रक्षा णस्तिष्ठा हिरण्ययं
सोता वरेण्यं शोचा मरुद्वृधः ।
शिक्षा स्तोतृभ्यो भूमा त्रिवन्धुरः
पिबा मधूनां सोता परीति च ॥ ३२ ॥

अग्ने रक्षा णः । तिष्ठा हिरण्ययम् । सोता वरेण्यम् । शोचा मरुद्वृधः । शिक्षा स्तोतृभ्यः । भूमा त्रिवन्धुरः । पिबा मधूनाम् । सोता परि[1] । इत्येतेषां च पूर्वपदान्ताः प्लवन्ते । अग्ने रक्षा णः । अग्ने रक्षा णो अंहसः (ऋ० ७ । १५ । १३) । अग्न इति कस्मात् [2] । तेन सोमाभि रक्ष नः (ऋ० ९ । ११४ । ४) । तिष्ठा हिरण्ययम् । रथं तिष्ठा हिरण्ययम् (ऋ० ८ । ६९ । १६) । सोता वरेण्यम् । सोमं सोता वरेण्यम् (ऋ० ८ । १ । १९) । शोचा मरुद्वृधः । शं नः शोचा मरुद्वृधः (ऋ० ३ । १३ । ६) । शिक्षा स्तोतृभ्यः । शिक्षा स्तोतृभ्यो माति धक् (ऋ० २ । ११ । २१) । भूमा त्रिवन्धुरः । स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरः (ऋ० ७ । ६९ । २) । आव्य भूम (८ । ४८) इति सिद्धे[3] संयोगपरार्थं ग्रहणम् । पिबा मधूनाम् । अग्रं पिबा मधूनाम् (ऋ० ४ । ४६ । १) । सोता परि । आ सोता परि षिञ्चत (ऋ० ९ । १०८ । ७) ॥

सक्ष्व मिमिक्ष्व दधिष्व वसिष्व
ओत सुनोत हिनोत पुनात ।
विद्म जगृभ्म ररभ्म ववन्म
क्षाम सुपप्तनि मन्थत मत्स्व ॥

---

(१) The Comm. अग्ने to परि omitted in B² Bⁿ. (२) किं B³. (३) Bⁿ, सिद्धं B³ I³ B².

सर रद रण जिन्व धारयार्ष
क्षर यज यच्छ दशस्य साध सेध ।
तप रुज मृळ वर्ध यावयात्र
अवय नमस्य विदाष्ट कृष्व जोष ॥
शृणुधि शृणुत यन्त यच्छत
स्तव सिम गूहत कुत्र मोषथ ।
दिधृत पचत वृश्च विध्यताथ
मदथात्त यदीत पाथन ॥
उपागत्याख्खलीकृत्य वव्राजाविष्टनोरुष्य ।
इष्कर्तेळिष्व मर्मृज्म बिभयेयर्त तच्छतम् ॥
सार्धमद्यादिभिः प्लुतैः पादादौ व्यञ्जनोदयम् ।
न्वेववर्जं न संयोगे शेषे चापठिते सति ॥ ३३ ॥

सक्ष्व मिमिक्ष्व दधिष्व वसिष्व श्रोत सुनोत हिनोत पुनात विद्म जगृभ्मे ररभ्म ववन्म चाम सुपप्तनि मन्थत मत्स्व सर रद रण जिन्व धारय अर्ष क्षर यज यच्छ दशस्य साध सेध तप रुज मृळ वर्ध यावय अत्र अवय नमस्य विद अष्ट कृष्व जोष शृणुधि शृणुत यन्त यच्छत स्तव सिम गूहत कुत्र मोषथ दिधृत पचत वृश्च विध्यत अथ मदथ अत्त यदि इत पाथन उपागत्य अख्खलीकृत्य वव्राज अविष्टन उरुष्य इष्कर्त ईळिष्व मर्मृज्म बिभय[1] इयर्त इत्यन्तमेकान्न[2]सप्ततिसंख्यं

---

(१) सक्ष्वेत्यादि (instead of the Comm. सक्ष्व to बिभय) B². (२) B² I², एकोन- B³ Bⁿ.

पदं यदनुक्रान्तम् अद्य इत्येवमादिभिः प्लुतै[1]रपादाद्यर्थमनुक्रान्तैः पादादौ च संयोगपरार्थं शोच तिष्ठ सोत[2] इत्येतैस्त्रिभिः पुनरुक्तैर्विनैकत्रिंशता सार्धं तच्छतं पादादौ[3] प्लवते व्यञ्जने प्रत्यये। व्यञ्जनाधिकारे तु[4] पुनर्व्यञ्जनग्रहणस्य प्रयोजनमुक्तम्। नू ष्टुत इन्द्र (ऋ० ४ । १६ । २१) रक्षा णो ब्रह्मणस्पते (ऋ० १ । १८ । ३) इत्येवमादिषु षत्वणत्वयोः कृतयोः पदेऽदृष्टेऽपि[5] व्यञ्जनमात्रे स्यादिति।

सद्व। सद्वा देव प्र णस्पुरः (ऋ० १ । ४२ । १)। मिमिद्व। मिमिद्वा समिळाभिरा (ऋ० १ । ४८ । १६)। दधिष्व। दधिष्वा जठरे सुतम् (ऋ० ३ । ४० । ५)। वसिष्व। वसिष्वा हि मियेध्य (ऋ० १ । २६ । १)। श्रोत। श्रोता हवं जरितुरेवयामरुत् (ऋ० ५ । ८७ । ८)। सुनोत। सुनोता सोमपाव्ने (ऋ० ७ । ३२ । ८)। हिनोत[6]। हिनोता नो अध्वरम्[7] (ऋ० १० । ३० । ११)। पुनात। पुनाता दक्षसाधनम् (ऋ० ९ । १०४ । ३)। विद्म। विद्मा ते अग्ने त्रेधा त्रयाणि (ऋ० १० । ४५ । २)। जगृभ्म। जगृभ्मा ते दक्षिणमिन्द्र हस्तम् (ऋ० १० । ४७ । १)। ररभ्म। ररभ्मा शवसस्पते (ऋ० ८ । ४५ । २०)। ववन्म। ववन्मा नु ते युज्याभिः[8] (ऋ० ७ । ३७ । ५)। चाम। चामा ये विश्वधायसः (ऋ० १० । १७६ । १)। सुपत्मनि। सुपत्मनी पेतथुः क्षोदसो महः

---

(१) भव (-वः B³) 'बोध (बोधः B³) शिक्षेत्यादिभिरनुक्रांतैः सहेति शेषः added in Bⁿ, B³ reads it on the margin to be supplied after संयोगपरार्थम्. (२) सोता B³. (३) I² adds वा. (४) B² omits तु. (५) -ष्टम अपि I². (६) BⁿI² omit हिनोत. (७) अध्वरं० B², अध्वरं देवगज्या Bⁿ. (८) युज्याभिरूती B²Bⁿ.

(ऋ० १ । १८२ । ५)। मन्थत। मन्थता नरः कविमद्वयन्तम् (ऋ० ३। २९ । ५)। मत्स्व। मत्स्वा सुशिप्र मन्दिभिः (ऋ० १ । ९। ३)।

सर। सरा रसेव विष्टपम् (ऋ० ९ । ४१ । ६)। रद। रदा पूषेव नः सनिम् (ऋ० ६ । ६१ । ६)। रण। रणा यो अस्य धर्मभिः (ऋ० ९ । ७ । ७)। जिन्व। जिन्वा धियो वसुविदः (ऋ० ८ । ६० । १२)। धारय। धारया चमसाँ इव (ऋ० १० । २५ । ४)। अर्ष। अर्षा सोम द्युमत्तमः (ऋ० ९ । ६५ । १९)। क्षर। क्षरा गो अभि वार्यम् (ऋ० ९। ३५ । ३)। यज। यजा नो मित्रावरुणा (ऋ० १ । ७५ । ५)। यच्छ। यच्छा नः शर्म सप्रथः (ऋ० १ । २२ । १५)। दशस्य। दशस्या नः पुर्वणीक[१] (ऋ० ६ । ११ । ६)। साध। साधा दिवो जातवेदः (ऋ० ४ । ३ । ८)। सेध। द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानाम्[२] (ऋ० ६ । ४४ । ९)। तप। तपा तपिष्ठ तपसा[३] (ऋ० ६ । ५ । ४)। रुज। रुजा दृळ्हा चिद्रक्षसः[४] (ऋ० ८ । ९१ । ४)। मृळ। मृळा नो रुद्रोत नः[५] (ऋ० १ । ११४ । २)। वर्ध। वर्धा नो अमवच्छवः (ऋ० ८ । ७५ । १३)। यावय। यावया वृक्यं वृकम् (ऋ० १० । १२७ । ६)। अत्र। अत्रा ते रूपमुत्तमम्[६] (ऋ० १ । १६३ । ७)। अवय[७]। आवया वाचं कुविदङ्ग वेदत्[८] (ऋ० ८ । ९६ । १२)। नमस्य। नमस्या कल्मलीकिनम्। (ऋ० २ । ३३ । ८)। विद। विदा चिन्नु महान्तः[९] (ऋ० ५ । ४१ । १३)। अष्ट। अष्टा परः

---

(१) होतः added in B² Bⁿ. (२) सेधा जनानां० । (instead of द्युमत्तमं to जनानाम्) B². (३) तपसा० । B². (४) चित् B². (५) नो० । B². (६) उत्तमं० । B², उत्तममपश्य Bⁿ. (७) आवय Bⁿ. (८) वेदत् omitted in I² Bⁿ; कुवि० । B². (९) महान्तो०। B².

सहस्रा (ऋ० ८ । २ । ४१) । कृष्व । कृष्वा कृत्नो अकृतम् (ऋ० ६ । १८ । १५) । जोष । जोषा सवितर्यस्य ते (ऋ० १० । १५८ । २) ।

शृणुधि । शृणुधी जरितुर्हवम् (ऋ० ८ । १३ । ७) । शृणुत । शृणुता म इमं हवम् (ऋ० २ । ४१ । १३) । यन्त । यन्ता नोऽवृकं छर्दिः (ऋ० ८ । २७ । ४) । यच्छत । यच्छता नो दुष्परिहन्तु शर्म (ऋ० २ । २७ । ६) । स्तव । स्तवा नु त इन्द्र पूर्व्या[1] (ऋ० २ । ११ । ६) । सिम । सिमा पुरू नृषूतः[2] (ऋ० ८ । ४ । १) । गूहत । गूहता गुह्यं तमः (ऋ० १ । ८६ । १०) । कुत्र । कुत्रा चिद्यस्य समृतौ (ऋ० ५ । ७ । २) । मोषथ । मोषथा वृक्षं कपनेव वेधसः (ऋ० ५ । ५४ । ६) । दिधृत । दिधृता यच्च दुष्टरम्[3] (ऋ० १ । १३९ । ८) । पचत । पचता पक्तीरवसे[4] (ऋ० ७ । ३२ । ८) । वृश्च । वृश्चा मध्यं प्रत्यग्रम्[5] (ऋ० ३ । ३० । १७) । विध्यत । विध्यता विद्युता रक्षः (ऋ० १ । ८६ । ९) । अथ । अथा ते अन्तमानाम्[6] (ऋ० १ । ४ । ३) । मदथ । मदथा वृक्तबर्हिषः (ऋ० ८ । ७ । २०) । अत्त । अत्ता हवींषि प्रयतानि[7] (ऋ० १० । १५ । ११) । यदि । यदी मन्थन्ति बाहुभिः[8] (ऋ० ३ । २९ । ६) । इत । इता मरुतो अश्विना (ऋ० ८ । ८३ । ७) । पाथन । पाथना शंसात्तनयस्य (ऋ० १ । १६६ । ८) ।

---

(१) B^2 omits पूर्व्यां. (२) नृषूतो० B^2. (३) दिधृता यच्च दुष्टरम् B^n, M.M.; अस्मासु तनू० दिधृता यच्च० । (*sic*) B^2; अस्माकमिन्मरुतो यच्च दुष्टरं दिधृता यच्च $B^3 I^2$. (४) अवसे० । B^2, अवसे कृणुध्वमित् B^n. (५) प्रत्यग्रं० । B^2, प्रत्यग्रं शृणीहि B^3. (६) अथा ते अंगिरस्तम B^n. (७) B^3; I^2 adds । वर्हिषि; हवींषि० । B^2; हवींषि । B^n. (८) यदी गोभिर्वसायते B^n.

उपागत्य। उपागत्येति संहितायां न दृश्यते। वृत्ताविदमुदाहरणं दृष्टम्[1]। उपागत्या सोम्यासः[2] इति। तस्माल्लिखितम्[3]। अख्ख[4]लीकृत्य। अख्ख[4]लीकृत्या पितरं न पुत्रः (ऋ० ७। १०३। ३)। वव्राज। वव्राजा सीमनदतीः (ऋ० ३। १। ६)। अविष्टन। अविष्टना पैजवनस्य केतम्[5] (ऋ० ७। १८। २५)। उरुष्य। उरुष्या णो अघायतः[6] (ऋ० ५। २४। ३)। इष्कर्त। इष्कर्ता विह्रुतं पुनः (ऋ० ८। १। १२)। ईळिष्व। ईळिष्वा हि प्रतीव्यम् (ऋ० ८। २३। १)। ममृग्ध्म। ममृग्ध्मा ते तन्वम्[7] (ऋ० ३। १८। ४)। बिभय। बिभया हि त्वावतः (ऋ० ८। ४५। ३५)। इयर्त। इयर्ता मरुतो दिवः (ऋ० ८। ७। १३)। इमे सत्त्वादय उदाहृताः।

अद्यादीनिदानीमुदाहरिष्यामः। अद्य। अद्या देवासः पिपृत[8] (ऋ० १०। ६३। ८)। पुरु। पुरू च वृत्रा हनति[9] (ऋ० ६। २९। ६)। वह। वहा नो हव्यं प्रथमः (ऋ० १०। १२। २)। वर्धय। वर्धया वाचं जनया पुरंधिम् (ऋ० ९। ९७। ३६)। नु। नू च पुरा च सदनम्[10] (ऋ० १। ९६। ७)। भर। भरा पिबन्नर्याय (ऋ० ८। २। २३)। भव। भवा मित्रो न शेव्यः (ऋ० १। १५६। १)। शोच। शोचा शोचिष्ठ दीदिहि[11] (ऋ० ८। ६०। ६)। एव। एवा हि ते विभूतयः (ऋ० १। ८। ९)। कर्त।

---

(१) द्रष्टव्यं B². (२) सोम्या सोम्यास (for सोम्यासः) Bⁿ. (३) Bⁿ omits इति। तस्माल्लिखितम्. (४) B², -क्ख- B³I²Bⁿ. (५) B², केतु Bⁿ, केतम् omitted in B³I². (६) B²Bⁿ, अभिशस्तेः (for अघायतः) B³I². (७) तन्वं०। B². (८) पिपृता०। B². (९) हनति०। B². (१०) सदनं०। B². (११) दीदिहि०। B².

कर्ता नः स्वस्तिमतः (ऋ० १ । ९० । ५) । सादय । सादया योनिषु त्रिषु (ऋ० १ । १५ । ४) । अर्च । अर्चा देवायाग्नये (ऋ० ५ । १६ । १) । तिष्ठ । तिष्ठा हरी रथ आ युज्यमाना (ऋ० ३ । ३५ । १) । सन । सना च सोम जेषि च (ऋ० ९ । ४ । १) । पारय । पारया तुर्वशं यदुं स्वस्ति (ऋ० १ । १७४ । ९) । बोध । बोधा सु मे मघवन् (ऋ० ७ । २२ । ३) । चक्रम । चक्रमा सत्यराधसे (ऋ० ७ । ३१ । २) । शंस । शंसा महामिन्द्रं यस्मिन्[1] (ऋ० ३ । ४९ । १) । उच्छ । उच्छा दिवो दुहितः (ऋ० ६ । ६५ । ६) । वद[2] । मृग्यमुदाहरणम्[3] । अज । अजा वृत इन्द्र शूरपत्नीः (ऋ० १ । १७४ । ३) । जम्भय । जम्भया कृकदाश्वम् (ऋ० १ । २९ । ७) । अध । अधा ते विष्णो विदुषा (ऋ० १ । १५६ । १) । गन्त । गन्ता नो यज्ञं यज्ञियाः (ऋ० ५ । ८७ । ९) । युक्ष्व । युक्ष्वा रथं न शुचयद्भिरङ्गैः (ऋ० १० । ४ । ६) । सृज । सृजा वत्सं न दाम्नः (ऋ० ७ । ८६ । ५) । रक्ष । रक्षा णो ब्रह्मणस्पते (ऋ० १ । १८ । ३) । सोत । सोता हि सोममद्रिभिः[4] (ऋ० ८ । १ । १७) । शिक्ष । शिक्षा णो अस्मिन्पुरुहूत (ऋ० ७ । ३२ । २६) । भूम । भूमा पृष्ठेव रुरुहुः (ऋ० ५ । ७ । ५) । पिब । पिबा सोममिन्द्र मन्दतु[5] (ऋ० ७ । २२ । १) ।

पादादाविति कस्मात् । द्यावा नो अद्य पृथिवी अनागसः (ऋ० १० । ३५ । ३) । अत्रैव वोऽपि नह्यामि (ऋ० १० । १६६ । ३) ।

---

(१) यस्मिन् omitted in B³, इन्द्रं० । B². (२) अछ (instead of वद) B². (३) मृग्यमुदाहरणम् B³ Bⁿ, अछा वदा तना गिरा० । B², omitted in I². (४) सोम । B². (५) मन्दतु० B².

नू चिद्दधिष्व मे गिरः (ऋ० १ । १० । ९) । न्वेववर्जं न संयोग इति[१] । नु एव इत्येते पदे वर्जयित्वा यच्छ्रुतं तत्संयोगे न प्लवते। अद्य त्वा वन्वन्त्सुरेक्णाः (ऋ० ६ । १६ । २६) । पुरु त्वा दाश्वान्वोचे (ऋ० १ । १५० । १) । अध त्वमिन्द्र विद्ध्यस्मान् (ऋ० १० । ६१ । २२) । पिब स्वधैनवानाम् (ऋ० ८ । ३२ । २०) । न्वेव-वर्जमिति कस्मात् । नू ष्टुत इन्द्र नू गृणानः (ऋ० ४ । १६ । २१) । एवा त्वामिन्द्र वज्रिन्[२] (ऋ० ४ । १९ । १) । शेषे चापठिते सति । शेषे च दीर्घीभाव[३]विधाने न संयोग इत्यधिकृतं वेदितव्यम् । न्वेववर्जमिति च[४] निवृत्तं वेदितव्यम् । किमविशेषेणासंयोगाधिकारः । नेत्याह । अपठिते सति । स्वस्तय[५]उत्तराणि (८ । १४) न घा त्वद्रिक् (८ । २८) इत्येवं यत्र पाठो नास्ति तत्राधिकारो द्रष्टव्यः । वक्ष्यति—यथोदयानि (८ । १५) इति । तत्संयोगे न भवति । स पिस्पृशति तन्वि श्रुतस्य (ऋ० ६ । ४९ । १२) । प्र तु द्रव परि (ऋ० ९ । ८७ । १) । यथा वा वक्ष्यति—एकादशिद्वादशिनोर्लघौ (८ । ३६) इति । तत्संयोगे न भवति । व्रता देवानामुप नु प्रभूषन् (ऋ० ३ । ५५ । १) । तिरः पवित्रं परियन्नुरु ज्रयः (ऋ० ९ । ६८ । २) । इहेन्द्राग्नी उप ह्वये (ऋ० १ । २१ । १) । अपठित इति कस्मात्[६] । त्यं सु मेषं महया स्वर्विदम् (ऋ० १ । ५२ । १) । ताँ आदित्याँ अनु मदा स्वस्तये (ऋ० १० । ६३ । ३) । न घा त्वद्रिगप वेति (ऋ० १० । ४३ । २) । त्वं हि ष्मा च्यावयन्नच्यु-तानि[७] (ऋ० ३ । ३० । ४) ॥

---

(१) B², कस्मात् added in B³I² Bⁿ. (२) B² Bⁿ वज्रि-न्नत्र B³I². (३) दीर्घाभावे B². (४) B² omits च. (५) B³ adds स्व. (६) इति० । (for इति कस्मात्) B². (७) च्यावयन् B².

वर्ध शुभ्रे रुज यः सेध राजन्
वह हव्यानि यदि मेऽध यामनि।
विघ्न दातारमध धारयाध य-
दध ते विश्वं पुरु वार्च गाय॥
वह वायो पिब मध्वः पुरु विद्वान्
पुरु विश्वान्यध वायुं पुरु शस्त।
यदि मृत्योरध जिह्वा पुरु विश्वा
पिब शुद्धं पिब राये वह कुत्सम्॥
भरद्वाजेऽर्च देवाय यदि वा पुरु दाशुषे।
वह शुष्णायाध बह्वध यत्पुरु हीति न॥३४॥

वर्ध शुभ्रे। रुज यः। सेध राजन्। वह हव्यानि। यदि मे। अध यामनि। विघ्न दातारम्। अध धारया। अध यत्[1]। अध ते विश्वम्। पुरु वा। अर्च गाय। वह वायो। पिब मध्वः। पुरु विद्वान्। पुरु विश्वानि। अध वायुम्। पुरु शस्त। यदि मृत्योः। अध जिह्वा। पुरु विश्वा। पिब शुद्धम्। पिब राये। वह कुत्सम्। भरद्वाजे अर्च देवाय। यदि वा। पुरु दाशुषे। वह शुष्णाय। अध बहु। अध यत्। पुरु हि। इति न[2]। इत्येतेषु यथाप्राप्ता प्लुतिर्न भवति।

वर्ध शुभ्रे। वर्ध शुभ्रे स्तुवते[3] (ऋ० ७। ६५। ६)। रुज यः। रुज यस्त्वा पृतन्यति (ऋ० ६। ५३। ३)। सेध राजन्।

---

(१) अध यत् in the Comm. as well as in the text omitted in Bⁿ; B³ has two short horizontal strokes (=)on it in the Comm., probably a mark of doubt as to its genuineness. (२) B³I², न omitted in Bⁿ. The Comm. वर्ध शुभ्रे to इति न omitted in B². (३) स्तुवते०। B².

सेध राजन्नप स्त्रिधः (ऋ० १० । २५ । ७) । वह हव्यानि । वह हव्यानि सुमनस्यमानः (ऋ० १० । ५१ । ५) । यदि मे । यदि मे सख्यमावरः (ऋ० ८ । १३ । २१) । अध यामनि । अध यामनि प्रसितस्य तद्वेः (ऋ० ४ । २७ । ४) । विद्म दातारम् । विद्म दातारमिषाम् (ऋ० ८ । ४६ । २) । अध धारया । अध धारया मध्वा पृचानः[१] (ऋ० ९ । ९७ । ११) । अध यत्[२] । अध यद्राजाना गविष्टौ[३] (ऋ० १० । ६१ । २३) । अध ते विश्वम् । अध ते विश्वमनु हासदिष्टये[४] (ऋ० १ । ५७ । २) । विश्वमिति कस्मात्[५] । अधा ते विष्णो विदुषा (ऋ० १ । १५६ । १) । पुरु वा । पुरु वारं पुरु त्मना (ऋ० १ । १४२ । १०) । अर्च गाय । अर्च गाय च वेधसे (ऋ० ६ । १६ । २२) ।

वह वायो । वह वायो नियुतो याहि (ऋ० ७ । ९० । १) । पिब मध्वः । पिब मध्वस्तृपदिन्द्रा वृषस्व[६] (ऋ० १० । ११६ । १) । पुरु विद्वान् । पुरु विद्वाँ ऋचीषम (ऋ० ८ । ९२ । ९) । पुरु विश्वानि । पुरु विश्वानि जूर्वन् (ऋ० १ । १९१ । ९) । अध वायुम् । अध वायुं नियुतः सश्चत स्वाः (ऋ० ७ । ९० । ३) । पुरु शस्त । पुरु शस्त मघत्तये (ऋ० ४ । ३७ । ८) । यदि मृत्योः । यदि मृत्योरन्तिकं नीत एव[७] (ऋ० १० । १६१ । २) । अध जिह्वा । अध जिह्वा पापतीति[८] (ऋ० ६ । ६ । ५) । पुरु विश्वा । पुरु विश्वा जनिम मानुषाणाम् (ऋ० ७ । ६२ । १) । पिब शुद्धम् ।

---

(१) $B^2 I^2$ omit पृचानः. (२) अध यत् B^2; B^3 has two short horizontal lines (=) on it; omitted in I^2 B^n. (३) This quotation is given in M.M., B^2 (राजाना० । B^2); omitted in $I^2 B^n$; अध यदि मे पवमान B^3. (४) इष्टये० । B^2. (५) किं B^n. (६) इन्द्र I^2. (७) I^2 omits नीत एव. (८) पातीति I^2, पापतीति० । B^2.

पिब शुद्धमुदकमाचरन्ती (ऋ० १ । १६४ । ४०)। पिब राये। पिब राये शवसे हूयमानः (ऋ० १० । ११६ । १)। वह कुत्सम्। वह कुत्समिन्द्र यस्मिन् (ऋ० १ । १७४ । ५)।

भरद्वाजे अर्च देवाय। अर्च देवाय वरुणाय सप्रथः (ऋ० ६ । ६८ । ९)। भरद्वाज इति कस्मात्[1] । अर्चा देवायाग्नये (ऋ० ५ । १६ । १)। यदि वा। यदि वा दधे यदि वा न (ऋ० १० । १२९ । ७)। पुरु दाशुषे। पुरु दाशुषे विचयिष्ठो[2] अंहः (ऋ० ४ । २० । ९)। वह शुष्णाय। वह शुष्णाय वधं कुत्सम्[3] (ऋ० १ । १७५।४)। अध बहु। अध बहु चित्तमः[4] (ऋ० ६ । १० । ४)। अध यत्। अध यदेषां नियुतः[5] (ऋ० १ । १६७ । २)। पुरु हि। पुरु हि वां पुरुभुजा देष्णम् (ऋ० ६ । ६३ । ८)॥

कृधीति परेषु सहस्रसां धियं जरित्रे न इति ॥३५॥

कृधि इत्येतत्पदं[6] प्लुवते सहस्रसाम् धियम् जरित्रे नः इत्येतेषु परेषु[7] । सहस्रसाम्[8] । कृधी सहस्रसामृषिम् (ऋ० १ । १० । ११)। धियम्[8] । कृधी धियं जरित्रे वाजरत्नाम् (ऋ० १० । ४२ । ७)। जरित्रे[8] । कृधी जरित्रे मघवन् (ऋ० ८ । ९७। ८)। नः[8] । कृधी न ऊर्ध्वाञ्चरथाय[9] (ऋ० १ । ३६ । १४)॥

तत्रेति चान्त्ये ॥३६॥

इत्येतेषां प्रत्ययानामन्त्ये नः इत्येतस्मिन्प्रत्यये तत्र इत्येतत्पदं प्लुवते। तत्रा नो ब्रह्मणस्पतिः (ऋ० ६ । ७५ । १७)॥

---

(१) किं B^3. (२) B^2 I^2 B^n; -ष्ठो B^3, M.M. (३) B^2 omits कुत्सम्. (४) B^3, वित्तमः I^2B^n, चित्तम० B^2. (५) B^2 adds परमाः ।. (६) एतत्पदं B^3I^2, एतत् B^2, पदं B^n. (७) I^2 omits परेषु. (८) Omitted in B^2. (९) चरथाय० । B^2, चरथाय जीवसे B^n.

सहस्येन सुश्रवसं पवस्व द्वे नो अधीत्येषु परेषु तेन ॥३७॥

सहस्येन । सुश्रवसम् । पवस्व । द्वे नो अधि । इत्येतेषु परेषु तेन इत्येतत्प्लुवते । सहस्येन[1] । तेना सहस्येना वयम् (ऋ० ७ । ५५ । ७) । सुश्रवसम्[1] । तेना सुश्रवसं जनम् (ऋ० १ । ४९ । २) । पवस्व[1] । तेना पवस्वान्धसा (ऋ० ९ । ६१ । १९) । द्वे नो अधि । तेना नो अधि वोचत (ऋ० ८ । २० । २६) । द्वे इति कस्मात् । तेन नो मृळ जीवसे (ऋ० ९ । ६६ । ३०) ॥

देवं वेनं केतमित्युत्तरेषु दधातेति ॥३८॥

देवम् वेनम् केतम् इत्येतेषु[2] दधात इति प्लुवते । देवम्[1] । दधाता देवमृत्विजम् (ऋ० ५ । २२ । २) । वेनम्[1] । दधाता वेनमादिशे (ऋ० ९ । २१ । ५) । केतम्[1] । दधाता केतमादिशे (ऋ० ९ । २१ । ६) ॥

श्रुधि वंस्वेति नः परे ॥ ३९ ॥

श्रुधि वंस्व इत्येते नः प्रत्यये[3] प्लुवेते । श्रुधि[1] । श्रुधी न इन्द्र ह्वयामसि त्वा (ऋ० ६ । २६ । १) । वंस्व[1] । वंस्वा नो वार्या पुरु (ऋ० ८ । २३ । २७) ॥

वेदेति विश्वस्यभृमंमउत्तरम् ॥ ४० ॥

वेद इत्येतत्प्लुवते विश्वस्य भृमम् मे इत्येवमुत्तरम् । विश्वस्य[1] । वेदा विश्वस्य मेधिरः (ऋ० ६ । ४२ । २) । भृमम्[1] । वेदा भृमं चित्[4] (ऋ० ८ । ६१ । १२) । मे[1] । वेदा मे देव ऋतुपा ऋतूनाम् (ऋ० ५ । १२ । ३) ॥

---

(१) Omitted in B². (२) B³I², इत्येतेषु परेषु Bⁿ, इत्युत्तरेषु B². (३) Bⁿ adds परे ।. (४) B³I², चित्स० । B², चित् इन्द्र ह्वयामसि Bⁿ.

शुनःशेपे च प्लवते यकारे ॥ ४१ ॥

शुनःशेपे च ऋषौ वेद इत्येतत्प्लुवते यकारे प्रत्यये। वेदा यो वीनां पदम् (ऋ० १ । २५ । ७)। शुनःशेप इति कस्मात्। वेद यस्त्रीणि विदथानि (ऋ० ६ । ५१ । २)। यकार इति कस्मात्[1] । वेद नावः समुद्रियः (ऋ० १ । २५ । ७) ॥

ब्रह्मेति नो द्वे च गिरः कृणोति ते कृणोत तूतोदिति चोत्तरेषु ॥ ४२ ॥

ब्रह्म इत्येतत्प्लुवते। नः[2] । द्वे च गिरः। कृणोति। ते। कृणोत। तूतोत्। इत्येतेषु[3] । नः। ब्रह्मा ण इन्द्रोप याहि[4] (ऋ० । ७ । २८ । १)। द्वे च गिरः। ब्रह्मा च गिरो दधिरे (ऋ० ६ । ३८ । ३)। द्वे इति कस्मात्। ब्रह्म च ते जातवेदः (ऋ० १० । ४ । ७)। कृणोति। ब्रह्मा कृणोति वरुणः (ऋ० १ । १०५ । १५) । ते। ब्रह्मा त इन्द्र गिर्वणः (ऋ० ८ । ९० । ३)। कृणोत। ब्रह्मा कृणोत पन्य इत् (ऋ० ८ । ३२ । १७) । तूतोत्। ब्रह्मा तूतोदिन्द्रो गातुम् (ऋ० २ । २० । ५) ॥

अभीति नो नु नवन्ते सतो नरं द्वा सत्स्वति ॥ ४३ ॥

अभि इत्येतत्प्लुवते नः नु नवन्ते सतः नरम् द्वा सत् सु इत्येतेषु[3] । नः[5] । अभी न आ ववृत्स्व (ऋ० ४ । ३१ । ४)। नु[5] । अभी नु मा वृषभ चक्षमीथाः (ऋ० २ । ३३ । ७)। नवन्ते[5] । अभी नवन्ते अद्रुहः (ऋ० ९ । १०० । १)। सतः[5] । अभी षतस्तदा भर (ऋ० ७ । ३२ । २४)। नरम्[5] । अभी

---

(१) किं B³. (२) B² omits नः. (३) Bⁿ adds परेषु. (४) याहि०। B². (५) Omitted in B².

नरं धोजवनम् (ऋ० ६। ६७। ४६)। द्वा[1] । अभी द्वा किमु त्रयः करन्ति[2] (ऋ० १०। ४८। ७)। सत्[1] । अभी षदप चुच्यवत् (ऋ० २ । ४१। १०)। सु[1] । अभी षु णः सखीनाम् (ऋ० ४। ३१। ३)॥

आग्नेऽर्षपरे तु मुख्ये ॥ ४४ ॥

इत्येतेषां[3] प्रत्ययानां मुख्ये नः इत्येतस्मिन्प्रत्यये आ अग्ने अर्ष इत्येवंपर एव अभि पदं[4] प्लवते। आ। अभी न आ ववृत्स्व (ऋ० ४। ३१। ४) अग्ने। अभी नो अग्न उक्थमित् (ऋ० १। १४०। १३)। अर्ष। अभी नो अर्ष दिव्या[5] (ऋ० ९। ९७। ५१)। आग्नेऽर्षपर इति कस्मात्। अभि नो वाजसातमम् (ऋ० ९। ९८। १)॥

चक्रुर्वदेते दशस्यन्समुद्रो
रथेन नः सप्तऋषीन्मदन्ति।
ते वो भयन्ते नियुद्भिः कृपीटं
रथस्य सोमस्य मती रणन्ति ॥ ४५ ॥

चक्रुः वदेते दशस्यन् समुद्रः रथेन नः सप्तऋषीन् मदन्ति ते वः भयन्ते नियुद्भिः कृपीटम् रथस्य सोमस्य मतिः रणन्ति[6] इत्येते चक्रुरादयः। वक्ष्यति। यत्रेति चक्रुरादिषु नरः सुपर्णा इति च

---

(१) Omitted in B². (२) Bⁿ, M. M.; त्रयः०। B²; त्रयः B³I². (३) इत्येषां I². (४) पदं B², इति पदं Bⁿ, अग्ने I², omitted in B³. (५) दिव्या०। B². (६) The Comm. चक्रुः to रणन्ति omitted in B².

(७ । ४७) इति[१] । यत्र इत्येतत्प्लुवते चक्रुरादिषु नरः सुपर्णाः[२] इत्येतयोश्च[३] ।

चक्रुः । यत्रा चक्रुरमृता गातुम् (ऋ० ७ । ६३ । ५) । वदेते । यत्रा वदेते अवरः परश्च[४] (ऋ० १० । ८८ । १७) । दशस्यन् । यत्रा दशस्यन्नुषसः (ऋ० १० । १३८ । १) । समुद्रः । यत्रा समुद्र स्कभितः[५] (ऋ० १० । १४९ । २) । रथेन । यत्रा रथेन गच्छथः (ऋ० १ । २२ । ४) । नः[६] । यत्रा नश्चक्रा जरसं तनूनाम् (ऋ० १ । ८९ । ९) । सप्तऋषीन् । यत्रा सप्तऋषीन्परः (ऋ० १० । ८२ । २) । मदन्ति । यत्रा मदन्ति धूतयः (ऋ० ५ । ६१ । १४) । ते[७] । यत्र त आहुः परमम्[८] (ऋ० १ । १६३ । ४) । वः । यत्रा वो दिद्युद्रदति[९] (ऋ० १ । १६६ । ६) । भयन्ते । यत्रा भयन्ते भुवना[१०](ऋ० ७ । ८३ । २) । नियुद्भिः । यत्रा नियुद्भिः सचसे शिवाभिः[११](ऋ० १० । ८ । ६) । कृपीटम् । यत्रा कृपीटमनु तत् (ऋ० १० । २८ । ८) । रथस्य । यत्रा रथस्य बृहतः[१२](ऋ० ३ । ५३ । ५) । सोमस्य । यत्रा सोमस्य तृम्पसि[१३](ऋ० ८ । ४ । १२) । मतिः । यत्रा मतिर्विद्यते पूतबन्धनी (ऋ० ५ । ४४ । ९) । रणन्ति । यत्रा रणन्ति धीतयः[१४] (ऋ० ९ । १११ । २) । नरः ।

---

(१) इति चेति B^3I^2, इति च B^2, इत्युक्तं B^n. (२) यत्र इत्येतत् to सुपर्णाः omitted in B^2. (३) इत्येतयोः B^2. (४) M. M.; B^n omits च; B^3I^2 omit परश्च; B^2 वदेते० ।. (५) समुद्रः । B^2. (६) चनः B^2. (७) यत्रा मदन्ति to ते omitted in B^2. (८) B^2 omits परमम्. (९) रदति० । B^2. (१०) भुवना० । B^2. (११) सचसे० । B^2; शिवाभिः omitted in I^2. (१२) बृहतोः B^n, बृहतः omitted in B^2. (१३) B^2 omits तृम्पसि. (१४) I^2B^2, धृतयः B^3B^n.

यत्रा नरः सं च वि च द्रवन्ति (ऋ० ६ । ७५ । ११) । सुपर्णाः ।
यत्रा सुपर्णा अमृतस्य[1] (ऋ० १ । १६४ । २१) ॥

समुद्रं द्वे स्वर्णं नवग्वशब्दो
दशग्वं दंसिष्ठ वसूनि नो वसु ।
वृत्रं निर्द्वे नु यतिभ्यः सहन्तः
पृथिव्यां निर्हंसि समत्सु पावक ॥४६॥

समुद्रम् । द्वे स्वर्णं । नवग्वशब्दः । दशग्वम् । दंसिष्ठ । वसूनि । नः । वसु । वृत्रं निर्द्वे । नु । यतिभ्यः । सहन्तः । पृथिव्याम् । निः । हंसि । समत्सु । पावक[2] । इत्येते समुद्रादयः । वक्ष्यति । समुद्रादिषु येनेति (७ । ४८) । येन इत्येतत्प्लवते समुद्रादिषु प्रत्ययेषु[3] ।

समुद्रम् । येना समुद्रमसृजः (ऋ० ८ । ३ । १०) । द्वे स्वर्णं । येना स्वर्णं ततनाम[4] (ऋ० ५ । ५४ । १५) । द्वे इति कस्मात्[5] । येन स्व स्तभितं येन[6] (ऋ० १० । १२१ । ५) । नवग्वशब्दः । येना नवग्वो दध्यङ्[7] (ऋ० ९ । १०८ । ४) । येना नवग्वे अङ्गिरे (ऋ० ४ । ५१ । ४) । दशग्वम् । येना दशग्वमध्रिगुम् (ऋ० ८ । १२ । २) । दंसिष्ठ । येना दंसिष्ठ कृत्वने (ऋ० ८ । २४ । २५) । वसूनि । येना वसून्याभृता (ऋ० ६ । १६ । ४८) । नः । येना नः पूर्वे पितरः (ऋ० १ । ६२ । २) । वसु । येना वसु प्रयच्छसि[8] (ऋ० ८ । १७ । १०) । वृत्रं निर्द्वे । येना वृत्रं निरद्भ्यः (ऋ० १ । ८० । २) । द्वे इति कस्मात् । येन वृत्रं चिकेतथः[9] (ऋ० ८ । ९ । ४) ।

---

(१) B² omits अमृतस्य. (२) The Comm. समुद्रम् to पावक omitted in B². (३) समुद्रादिषु प्रत्ययेषु omitted in B². (४) -नामः I². (५) किं B³. (६) B² omits येन. (७) दध्यङ्० । B². (८) -ति B³. (९) -तथाः I².

नु। येना नु सद्य ओजसा (ऋ० ८ । १२ । ४)। यतिभ्यः। येना यतिभ्यो भृगवे (ऋ० ८ । ३ । ६)। सहन्तः। येना सहन्त ऋञ्जत[1] (ऋ० ५ । ८७ । ५)। पृथिव्याम्। येना पृथिव्यां नि क्रिविम (ऋ० २ । १७ । ६) । निः। येना निरंहसो यूयम् (ऋ० १० । १२६ । २)। हंसि। येना हंसि न्यत्रिणम् (ऋ० ८ । १२ । १)। समत्सु। येना समत्सु सासहः (ऋ० ८ । १६ । २०)। पावक। येना पावक चक्षसा[2] (ऋ० १ । ५० । ६)॥

यत्रेति चक्रुरादिषु नरः सुपर्णा इति च ॥ ४७ ॥

समुद्रादिषु येनेति ॥ ४८ ॥[3]

इत्युक्तम् ॥[4]

तत्रेति मे सदो रथम् ॥ ४९ ॥

तत्र इत्येतत्प्लवते मे सदः रथम् इत्येतेषु परेषु[5] । मे। तत्रा मे नाभिरातता (ऋ० १ । १०५ । ९)। सदः। तत्रा सदः कृणवसे (ऋ० ६ । १६ । १७)। रथम्। तत्रा रथमुप शग्मं सदेम (ऋ० ६ । ७५ । ८)॥

अवेति नो नु कल्पेषु नूनं वाजेषु पृत्सुषु ॥ ५० ॥

अव इत्येतत्प्लवते नः नु कल्पेषु नूनम् वाजेषु पृत्सुषु इत्येतेषु।[6] नः। अवा नो वाजयुं रथम्[7] (ऋ० ८ । ८० । ६)। नु। अवा नु

---

(१) ऋञ्जत०। B^2. (२) चक्षसा०। B^2. (३) B^n (without numbers), यत्रेति चक्रुर् (instead of यत्रेति to येनेति ॥ ४८ ॥) B^3B^2, यत्रेति च I^2. (४) $B^3I^2B^2$; इत्युक्तम् omitted in B^n. (५) इत्येतेषु परेषु तत्रेत्येतत्प्लवते (instead of the Comm. तत्र to परेषु) B^2. (६) इत्येतेषु अवेत्येतत् प्लवते (instead of the Comm. अव to इत्येतेषु) B^2. (७) वाजयुं०। B^2, वोजयुं। B^n.

कं ज्यायान्[1] (ऋ० १० । ५० । ५)। कल्पेषु। अवा कल्पेषु नः पुमः (ऋ० ९ । ९ । ७) । नूनम् । अवा नूनं यथा पुरा[2] (ऋ० ६ । ४८ । १९)। वाजेषु। अवा वाजेषु वाजिनि (ऋ० ६ । ६१ । ६)। पृत्सुषु। अवा पृत्सुषु कासु चित्[3] (ऋ० १ । १२९ । ४)॥

आद्ये चेद्वाजयुंपार्येकमग्नेमघवन्परे ॥ ५१ ॥

एषां प्रत्ययानामाद्ये नः नु इत्येते वाजयुम् पार्ये कम् अग्ने मघवन् इत्येवंपरे यदि भवतः[4] अव इति प्लवते[5] । वाजयुम् । अवा नो वाजयुं रथम्[6] (ऋ० ८ । ८० । ६)। पार्ये । अवा नः पार्ये धने (ऋ० ८ । ९२ । ९)। कम्। अवा नु कं ज्यायान्[7] (ऋ० १० । ५० । ५)। अग्ने। अवा नो अग्न ऊतिभिः (ऋ० १ । ७९ । ७) । मघवन्। अवा नो मघवन्वाजसातौ (ऋ० ६ । १५ । १५)। आद्ये चेद्वाजयुंपार्येकमग्नेमघवन्परं इति कस्मात्[8] । अव नो वृजिना शिशीहि[9] (ऋ० १० । १०५ । ८)॥

रास्वा पितः शतेना नो वर्धस्वा सु श्रुधी हवम् । मन्दस्वा सु वहस्वा सु वनेमा ते नही नु वः ॥५२॥

इत्येतेषां पूर्वपदान्ताः प्लवन्ते। रास्वा पितः। रास्वा पितर्मरुताम् (ऋ० १ । ११४ । ९) । शतेना नः। शतेना नो अभिष्टिभिः (ऋ० ४ । ४६ । २)। वर्धस्वा सु। वर्धस्वा सु पुरुष्टुत (ऋ० ८ । १३ । २५)। श्रुधी हवम्। श्रुधी हवमिन्द्र मा रिषण्यः (ऋ० २ ।

---

(१) यज्ञवनसः added in B^3I^2. (२) B^2 omits पुरा. (३) B^2 omits कासु चित्. (४) B^n adds तर्हि. (५) यदि to प्लवते omitted in I^2. (६) B^2 omits रथम्. (७) B^n adds यज्ञवनसः. (८) -पर इति कस्मात् $B^2I^2B^n$, -पर इति किं B^3. (९) शिशीहि० । B^2.

११ । १) । मन्दस्वा सु । मन्दस्वा सु स्वर्णरे (ऋ० ८ । ६ । ३९) । वहस्वा सु । वहस्वा सु स्वश्व्यम् (ऋ० ८ । २६ । २३) । वनेमा ते । वनेमा ते अभिष्टिभिः (ऋ० ८ । १९ । २०) । नही नु वः । नही नु वो मरुतो अन्ति (ऋ० १ । १६७ । ९) । व इति कस्मात्[1] । नहि नु ते महिमनः (ऋ० ६ । २७ । ३) ॥

पाथा दिवो धाता रयिं सृजता गयसाधनम् ।
रास्वा चोरू न शग्धी नः सृजता मधुमत्तमम् ॥५३॥

पाथा दिवः इत्येवमादीनां पूर्वपदान्ताः प्लवन्ते । पाथा दिवः । पाथा दिवो विमहसः (ऋ० १ । ८६ । १) । धाता रयिम् । धाता रयिं सहवीरं तुरासः (ऋ० ३ । ५४ । १३) । सृजता गयसाधनम् । समी वत्सं न मातृभिः सृजता गयसाधनम (ऋ० ९ । १०४ । २) । रास्वा च । रास्वा च नो अमृत मर्तभोजनम् (ऋ० १ । ११४ । ६) । उरू न । उरू न राधः सवना[2] (ऋ० ६ । ४७ । १४) । शग्धी नः । शग्धी न इन्द्र यत्त्वा[3] (ऋ० ८ । ३ । ११) । सृजता मधुमत्तमम् । आ नः सोमं पवित्र आ सृजता मधुमत्तमम् (ऋ० ९ । ६२ । २१) ॥

जही चिकित्वो वेत्था हि रक्षथा न हता मखम् ।
युयोता शरुं स्वेना हि वनेमा ररिमा वयम् ॥५४॥

जही चिकित्वः । वेत्था हि । रक्षथा न । हता मखम् । युयोता शरुम् । स्वेना हि । वनेमा ररिमा वयम् । इत्येतेषां च पूर्वपदान्ताः प्लवन्ते । जही चिकित्वः । जही चिकित्वो अभिशस्तिम् (ऋ० ५ । ३ । ७) । वेत्था हि । वेत्था हि वेधो अध्वनः (ऋ० ६ । १६ । ३)।

---

(१) किं B[3]. (२) सवना० । B[2], सवना पुरूणि । B[n]. (३) यत्त्वा० । B[2].

रत्नथा न । रत्नथा नेमघं नशत् (ऋ० ८ । ४७ । १) । हता मखम् । हता मखं न भृगवः (ऋ० ९ । १०१ । १३) । युयोता शरुम् । युयोता शरुमस्मदा (ऋ० ८ । १८ । ११) । स्वेना हि । स्वेना हि वृत्रं शवसा[1] (ऋ० ७ । २१ । ६) । वनेमा ररिमा वयम् । स्तोमं यज्ञं चादरं वनेमा ररिमा वयम् (ऋ० २ । ५ । ७) । वयमिति कस्मात्[2] । मृग्यम्[3] ॥

प्रप्रा वो अस्मे धामा ह सना ज्योतिरपा वृधि ।
ऋध्यामा ते वामदेवे जुहोता मधुमत्तमम् ॥ ५५ ॥

प्रप्रा वो अस्मे । धामा ह । सना ज्योतिः । अपा वृधि । ऋध्यामा ते वामदेवे[4] । जुहोता मधुमत्तमम् । इत्येतेषां च पूर्वपदान्ताः प्लवन्ते । प्रप्रा वो अस्मे[5] । प्रप्रा वो अस्मे स्वयशोभिरूती (ऋ० १ । १२९ । ८) । अस्मे इति किम् । प्रप्र वस्त्रिष्टुभमिषम् (ऋ० ८ । ६९ । १) । धामा ह । धामा ह यत्ते अजर (ऋ० ६ । २ । ९) । सना ज्योतिः । सना ज्योतिः सना स्वः (ऋ० ९ । ४ । २) । अपा वृधि । अपा वृधि परिवृतं न राधः (ऋ० ७ । २७ । २) । ऋध्यामा ते वामदेव[6] ऋषौ । ऋध्यामा त ओहैः (ऋ० ४ । १० । १) । वामदेव इति कस्मात् । ऋध्याम ते वरुण खाम् (ऋ० २ । २८ । ५) । जुहोता मधुमत्तमम् । तस्मा इदास्ये हविर्जुहोता मधुमत्तमम् (ऋ० ७ । १०२ । ३) ॥

यद्दवा महे धिष्वा शवो जनिष्वा देववीतये ।
अधा त्वं ह्यद्याद्या श्वःश्वः सचस्वा नः स्वस्तये ॥५६॥

---

(१) शवसा० । B², शवसा जघंथ Bⁿ. (२) Bⁿ omits वयमिति कस्मात्. (३) मृग्यं B², omitted in B³I²Bⁿ. (४) वामदेवे० । B². (५) B² omits प्रप्रा वो अस्मे. (६) वामदेवे I²Bⁿ, वामदेवे । वामदेवे B³B².

यद्वा महे । धिष्वा शवः । जनिष्वा देववीतये । अधा त्वं हि । अद्याद्या श्वःश्वः । सचस्वा नः स्वस्तये[1] । इत्येतेषां च पूर्वपदान्ताः प्लवन्ते । यद्वा महे । यद्वा महे सौमनसाय (ऋ० ५ । ४२ । ११) । धिष्वा शवः । धिष्वा शवः शूर येन (ऋ० २ । ११ । १८) । जनिष्वा देववीतये । जनिष्वा देववीतये सर्वताता स्वस्तये (ऋ० ६ । १५ । १८) । अधा त्वं हि । अधा त्वं हि नस्करः (ऋ० ८ । ८४ । ६) । हीति कस्मात्[2] । अध त्वमिन्द्र विद्धि (ऋ० १० । ६१ । २२) । अद्याद्या श्वःश्वः । अद्याद्या श्वःश्व इन्द्र (ऋ० ८ । ६१ । १७) । सचस्वा नः स्वस्तये । अग्ने सूपायनो भव सचस्वा नः स्वस्तये (ऋ० १ । १ । ६) । स्वस्तय इति कस्मात्[3] । सचस्व नः पराक आ (ऋ० १ । १२९ । ९) ॥

इति श्रीपार्षद्व्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र-
उवट[4]कृतौ प्रातिशाख्यभाष्ये[5] सप्तमं
पटलम्[6] ॥

---

(१) The Comm. यद्वा to स्वस्तये given in B³I², omitted in B²Bⁿ. (२) किं B³. (३) किं B³. (४) -पुत्रोव्वट- Bⁿ. (५) प्रातिसाख्ये I², प्रातिशाप्ये corrected to प्रातिशाख्यभाष्ये in B³. (६) B² adds समाप्तं.

अन्तःपादं विग्रह एष्वपृक्त
उकारो व्रजस्य सु धा नमोभिः ।
शुचिं पवित्रं तु महीर्नु चाप्लुतं
सुतस्येति ॥ १ ॥

अन्तःपादं विधिर्भविष्यति यदित ऊर्ध्वमनुक्रमिष्यामः । विग्रहे च भविष्यति । अपृक्तोऽव्यञ्जन उकारः प्लवते व्रजस्य सु धाः नमोभिः शुचिम् पवित्रम् तु महीः नु चाप्लुतम् सुतस्य इत्येतेषु परेषु । व्रजस्य । व्यू व्रजस्य तमसः (ऋ० ४ । ५१ । २) । सु । अस्या ऊ षु ण उप सातये (ऋ० १ । १३८ । ४) । धाः । शंसात्युक्थं यजते व्यू धाः (ऋ० ४ । ६ । ११) । नमोभिः । होता तमू नमोभिः (ऋ० १ । ७७ । २) । शुचिम् । तमू शुचिं शुचयो दीदिवांसम् (ऋ० २ । ३५ । ३) । पवित्रम् । अत्यू पवित्रमक्रमीत् (ऋ० ९ । ४५ । ४) । तु । मायामू तु यज्ञियानामेताम्[१] (ऋ० १० । ८८ । ६) । महीः । कदू महीरधृष्टा अस्य[२] (ऋ० ८ । ६६ । १०) । नु चाप्लुतम् । समू नु पत्नीर्वृषभिः (ऋ० १ । १७९ । २) । अप्लुतमिति कस्मात्[३] । किं स्विद्वक्ष्यामि किमु नू मनिष्ये (ऋ० ६ । ९ । ६) । सुतस्य । त ऊ सुतस्य सोम्यस्य (ऋ० १० । ९४ । ८) । अन्तःपादमिति कस्मात्[४] । किं नोदुदु हर्षसे दातवा[५] उ[६] (ऋ० ४ । २१ । ९) । ये देवासो दिव्येकादश स्थ पृथिव्याम्[७] (ऋ० १ । १३९ । ११) ।

अच्छेति विग्रहे (७ । ६) इति प्रकृते विग्रहाधिकारे पुनर्विग्रहग्रहणमुदयविशेषणार्थं क्रियते । तस्मात्—सुपुत्र आदु सुस्नुषे

---

(१) एताम् omitted in $B^2 B^n$. (२) अधृष्टाः । B^2. (३) किं B^3. (४) किं B^3. (५) हर्षस्ते हातवा B^n. (६) $B^2 B^n$, किं नो- to उ omitted in $B^3 I^2$. (७) B^n omits पृथिव्याम्.

(ऋ० १० । ८६ । १३) इत्यत्रोकारस्य दीर्घत्वं न भवति । यद्युदय-विशेषणार्थं विग्रहग्रहणम्—त्वं सु मेषं महया स्वर्विदम् (ऋ० १ । ५२ । १) इत्येवमादिषु न सिध्यति । अत्रापि वचनप्रामाण्यात्सिद्धम् । अथापि क्वचिदपि वचनस्यावकाशान्न सिद्धमिति तथापि न दोषः । उदयविशेषणार्थमिह निवृत्तमिति व्याख्यास्यामः । एष्विति कस्मात् । अस्मा इदु सप्तिमिव (ऋ० १ । ६१ । ५)। अपृक्तः[1] कस्मात् । सह्यो नः सोम पृत्सु धाः (ऋ० ९ । ८ । ८) ॥

यद्युदयोदया न ।

सोमसुतिं चर्किराम स्तवाम
स्तवाना गृभाय रथं श्रुधीति ॥ २ ॥

यदि व्रजस्य इत्येवमादीनामेत उदया न भवन्त्यथ उकारः प्लुवते[2] । सोमसुतिम् चर्किराम स्तवाम स्तवाना गृभाय रथम् श्रुधि इति[3] । सोमसुतिम् । इमामु षु सोमसुतिम्[4] (ऋ० ७ । ९३ । ६) । चर्किराम । दधिक्राव्ण इदु नु चर्किराम (ऋ० ४ । ४० । १)। स्तवाम । आशुं दधिक्रां तमु नु ष्टवाम (ऋ० ४ । ३९ । १)। स्तवाना । इन्द्राविष्णू नृवदु षु स्तवाना (ऋ० ४ । ५५ । ४)। गृभाय । अववर्पीर्वर्पमुदू षू गृभाय (ऋ० ५ । ८३ । १०)। रथम् । युवोरु षू रथं हुवे (ऋ० ८ । २६ । १)। श्रुधि । इमा उ षु श्रुधी गिरः (ऋ० १ । २६ । ५) ॥

ते अस्ति ते महिमनः प्र वोचत
प्र वोचं नः सुमना द्रुपदाश्च ॥ ३ ॥

---

(१) अपृक्त इति Bⁿ. (२) Bⁿ adds एषु प्रत्ययेषु न प्लवते ।. (३) B³B²; the Comm. सोमसुतिम् to इति omitted in I²Bⁿ. (४) I² adds उप नः ।.

ते अस्ति । ते महिमनः । प्र वोचत । प्र वोचम् । नः सुमनाः । इमे द्वैपदा उदयोदया यदि चेन्न भवन्त्यथ उकारः प्लुवते । ते अस्ति । इन्द्र य उ नु ते अस्ति (ऋ० ८ । ८१ । ८) । अस्तीति कस्मात् । आदू नु ते अनु क्रतुम् (ऋ० ८ । ६३ । ५) । ते महिमनः । क उ नु ते महिमनः समस्य (ऋ० १० । ५४ । ३) । महिमन इति कस्मात् । आदू नु ते अनु क्रतुम् (ऋ० ८ । ६३ । ५) । प्र वोचत । न तस्य विद्म तदु षु प्र वोचत (ऋ० १० । ४० । ११) । वोचतेति कस्मात् । पर्यू षु प्र धन्व वाजसातये (ऋ० ९ । ११० । १) । प्र वोचम् । अभीद्धो घर्मस्तदु षु प्र वोचम् (ऋ० १ । १६४ । २६) । वोचमिति कस्मात् । पर्यू षु प्र धन्व (ऋ० ९ । ११० । १) । नः सुमनाः । उशन्नु षु णः सुमनाः (ऋ० ४ । २० । ४) । सुमना इति कस्मात् । अस्या ऊ षु ण उप[1] (ऋ० १ । १३८ । ४) ॥

महे दधिध्वं तिर मुञ्च नो मृध-
श्चर नमध्वं नम ते नयन्त ।
स्वित्येतेषु ॥ ४ ॥

महे दधिध्वम् तिर मुञ्च नः मृधः चर नमध्वम् नम ते नयन्त इत्येतेषु प्रत्ययेषु सु इत्येतत्प्लुवते । महे । प्र सू महे सुशरणाय (ऋ० ५ । ४२ । १३) । दधिध्वम् । नि षू दधिध्वमखनन्त उत्सम् (ऋ० १० । १०१ । ११) । तिर । प्र सू तिरा शचीभिर्ये त उक्थिनः[2] (ऋ० ८ । ५३ । ६) । मुञ्च । वि षू मुञ्चा सुषुवुषः (ऋ० १० । ९४ । १४) । नः । अध प्र सू न उप यन्तु (ऋ० १ । १३९ । १) । मृधः । वि षू मृधः शिश्रथः[3] (ऋ० २ । २८ । ७) ।

---

(१) उप० । B². (२) B³I², शचीभिः । B²Bⁿ. (३) शिश्रथो० । B².

चर। वि षू चर स्वधा अनु (ऋ० ८ । ३२ । १९) । नमध्वम्। नि पू नमध्वं भवता सुपाराः (ऋ० ३ । ३३ । ९)। नम। नि षू नमातिमतिं कयस्य (ऋ० १ । १२९ । ५)। ते। प्र सू त इन्द्र प्रवता[1] (ऋ० ३ । ३० । ६)। नयन्त । प्र सू नयन्त गृभयन्त इष्टौ[2] (ऋ० १ । १४८ । ३)॥

एकाक्षरयोः पराणि चे-
दुपेन्द्राग्नेऽत्राध्वरमायुरेत्त्विति ॥ ५ ॥

एषु प्रत्ययेषु यावेकाक्षरौ नः ते[3] इति तयोः पराणि उप इन्द्र अग्ने अत्र अध्वरम् आयुः एतु इति यदीमानि भवन्त्यथ सु[4] प्लवते। उप। अध प्र सू न उप यन्तु (ऋ० १ । १३९ । १)। इन्द्र। मो षू ण इन्द्रात्र (ऋ० १ । १७३ । १२) । प्र सू त इन्द्र प्रवता[5] (ऋ० ३ । ३० । ६)। अग्ने। ओ षू णो अग्ने शृणुहि[6] (ऋ० १ । १३९ । ७)। अत्र। मो षू णो अत्र जुहुरन्त[7] (ऋ० ३ । ५५ । २)। अध्वरम्। जुषस्व सू नो अध्वरम् (ऋ० ३ । २४ । २)। आयुः। प्र सू न आयुर्जीवसे[8] (ऋ० ८ । १८ । २२)। एतु। प्र सू न एत्वध्वरः (ऋ० ८ । २७ । ३)। एकाक्षरयोः पराणि चेदिति[9] कस्मात्[10]। मो षु णः परापरा (ऋ० १ । ३८ । ६)। तां सु ते कीर्त्तिम् (ऋ० १० । ५४ । १)॥

सदेत्येतद्योनिषुपीतयेपरम् ॥ ६ ॥

---

(१) प्रवता० । B², प्रवता परिभ्यां Bⁿ. (२) I²B³, गृभयंतः B² Bⁿ. (३) च ते । नः (for नः ते) B². (४) सु इत्येतत् Bⁿ, उकासु I². (५) प्रवता० । B². (६) शृणुहि० । B², शृणुहि त्वमी Bⁿ. (७) B² omits जुहुरन्त. (८) जीवसे० । B². (९) चेदिति B³I², चेति Bⁿ, चेदुपेंद्राग्नेत्राध्वरमायुरेत्त्विति B². (१०) किं B³.

सद इत्येतत्प्लवते योनिषु पीतये इत्येवंपरं सत् । योनिषु । उशन् होतर्नि षदा योनिषु त्रिषु (ऋ० २ । ३६ । ४) । पीतये । नि षदा पीतये मधु (ऋ० ८ । ६७ । ८) ॥

धन्वेत्येतत्सोम राट् पूयमानः ॥ ७ ॥

धन्व इत्येतत्प्लवते सोम राट् पूयमानः इत्येतेषु परेषु । सोम । प्र धन्वा सोम जागृविः (ऋ० ६ । १०६ । ४) । राट् । ऋणा न तायुरति धन्वा राट् (ऋ० ६ । १२ । ५) । पूयमानः । अभि स्वर धन्वा पूयमानः (ऋ० ६ । ६७ । ३) ॥

यदीति कृथो मनसः कवीनां
सबन्धवो गोः सरमेति तेषु ॥ ८ ॥

यदि इत्येतत्प्लवते कृथः मनसः कवीनाम् सबन्धवः गोः सरमा इत्येतेषु प्रत्ययेषु[1] । कृथः । युवा यदी कृथः पुनः[2] (ऋ० ५ । ७४ । ५) । मनसः । तत्तद्यदी मनसः (ऋ० ६ । ६७ । २२) । कवीनाम् । गुहा यदी कवीनाम् (ऋ० १० । २२ । १०) । सबन्धवः । गिरा यदी सबन्धवः (ऋ० ६ । १४ । २) । गोः । स्वावृग्देवस्यामृतं यदी गोः (ऋ० १० । १२ । ३) । सरमा । विदद्यदी सरमा[3] (ऋ० ३ । ३१ । ६) ॥

चरेति पुष्टिं सोम चर्षणिप्राः ॥ ६ ॥

चर इत्येतत्प्लवते पुष्टिम् सोम चर्षणिप्राः इत्येतेषु परेषु[4] । पुष्टिम् । रेवाँ इव प्र चरा पुष्टिमच्छ (ऋ० ८ । ४८ । ६) । सोम । अवीरहा

---

(१) प्रत्ययेषु I^2B^3, परेषु। B^2B^n. (२) B^2 omits पुनः ।. (३) सरमा० । B^2. सरमा रुणमद्रेः B^n. (४) B^2 omits परेषु .

प्र चरा सोम दुर्यान् (ऋ० १ । ९१ । १९) । चर्षणिप्राः । विशः पूर्वीः प्र चरा चर्षणिप्राः (ऋ० ७ । ३१ । १०) ॥

जनिमेति हन्ति सं जातवेदाः ॥ १० ॥

जनिम इत्येतत्प्लवते हन्ति सम् जातवेदाः इत्येतेषु परेषु । हन्ति । विश्वा वेद जनिमा हन्ति शुष्णम्[1] (ऋ० ३ । ३१ । ८) । सम् । विश्वेदेते जनिमा सं विविक्तः (ऋ० ३ । ५४ । ८) । जातवेदाः । विश्वा वेद जनिमा जातवेदाः (ऋ० ६ । १५ । १३) ॥

रन्धयेति येषुकंशासदुत्तरम् ॥ ११ ॥

रन्धय इत्येतत्प्लवते येषु कम् शासत् इत्येवमुत्तरम् । येषु । एभ्यो नृभ्यो रन्धया येष्वस्मि (ऋ० ६ । १९ । १२) । कम् । सुन्वद्भ्यो रन्धया कं चिदव्रतम् (ऋ० १ । १३२ । ४) । शासत् । बर्हिष्मते रन्धया शासदव्रतान् (ऋ० १ । ५१ । ८) ॥

न नःकारे स्वित्युपसातयेपरे ॥ १२ ॥

न खलु सु इत्येतत्प्लवते नःकारे प्रत्यये उप सातये इत्येवंपरे सति । उप सातये । अस्या ऊ षु ण उप सातये (ऋ० १ । १३८ । ४) । सातय इति किम् । अध प्र सू न उप यन्तु (ऋ० १ । १३९ । १) ॥

सहयात्र जय काव्येन गूर्धय भरेति स्वरिति प्रत्यये षट् ॥ १३ ॥

महय अत्र जय काव्येन गूर्धय भर इति षडेतानि[2] प्लवन्ते स्वः इत्येतस्मिन्प्रत्यये । महय । त्यं सु मेषं महया स्वर्विदम् (ऋ० १ । ५२ । १) । अत्र । अस्माकेभिर्नृभिरत्रा स्वर्जय (ऋ० ८ । १५ ।

---

(१) B², शुष्णम् omitted in B³I²Bⁿ. (२) एतानि षट् (for षडेतानि) B².

१२)। जय । हनो वृत्रं जया स्वः (ऋ० ८।८९।४)। काव्येन। विप्रः कविः काव्येना स्वर्चनाः (ऋ० ९।८४।५)। गूर्धय। तं गूर्धया स्वर्णरम् (ऋ० ८।१९।१)। भर। द्युमन्तं शुष्ममा भरा स्वर्विदम् (ऋ० ९।१०६।४)॥

मद पर्ष पिपृत धन्व यच्छत
रुहेमेति स्वस्तयउत्तराणि॥ १४ ॥

मद पर्ष पिपृत धन्व यच्छत रुहेम इत्येतानि प्लुवन्ते स्वस्तये इत्येवमुत्तराणि। मद। ताँ आदित्याँ अनु मदा स्वस्तये (ऋ० १०।६३।३)। पर्ष। अति पर्षा स्वस्तये (ऋ० १।९७।८)। पिपृत। अद्या देवासः पिपृता स्वस्तये (ऋ० १०।६३।८)। धन्व। परि सोम प्र धन्वा स्वस्तये (ऋ० ९।७५।५)। यच्छत। उरु णः शर्म यच्छता स्वस्तये (ऋ० १०।६३।१२)। रुहेम। अरिष्यन्तमा रुहेमा स्वस्तये (ऋ० १०।६३।१४)॥

दधिम मदत तन्वि सिञ्चत
स्तव वदतानज रक्षतोक्षत।
पिपृत पृणत पृच्छत प्रुष
स्थ घ हिनवाय जुहोत पश्यत॥
चकृमाकुत्र भूम स्म शिशीत स्तोत पप्रत।
यथोदयानि सर्वाणि॥ १५ ॥

दधिम मदत तन्वि सिञ्चत स्तव वदत अनज रक्षत उक्षत पिपृत पृणत पृच्छत प्रुष स्थ घ हिनव अय जुहोत पश्यत चकृम अकुत्र भूम स्म शिशीत स्तोत पप्रत इत्येतानि सर्वाणि यथोदयानि प्लुवन्ते।

दधिम। यस्मिन्वयं दधिमा शंसम् (ऋ० १०।४२।६)। मदत। इन्द्रं गीर्भिर्मदता वस्वः[1] (ऋ० १।५१।१)। तन्वि। न

(१) वस्वो०। B².

ध्वस्मानस्तन्वी रेपः[1] (ऋ० ४ । ६ । ६) । सिश्चत । आमत्रेभिः सिश्चता मद्यमन्धः (ऋ० २ । १४ । १) । स्तव । इन्द्रं स्तवा नृतमम्[2] (ऋ० १० । ८९ । १) । वदत । रोदसी आ वदता गण-श्रियः (ऋ० १ । ६४ । ९) । अनज । इमां वाचमनजा पर्वतच्युते (ऋ० ५ । ५४ । १) । रक्षत । पूर्भी रक्षता मरुतः[3] (ऋ० १ । १६६ । ८) । उक्षत । घृतमुक्षता मधुवर्णम्[4] (ऋ० १ । ८७ । २) । पिपृत । निरंहसः पिपृता निरवद्यात् (ऋ० १ । ११५ । ६) । पृणत । सो[5]मेभिरीं पृणता भोजमिन्द्रम् (ऋ० २ । १४ । १०) । पृच्छत । तं पृच्छता स जगाम[6] (ऋ० १ । १४५ । १) । प्रुष । अभ्रप्रुषो न वाचा प्रुषा वसु (ऋ० १०।७७ । १) स्थ । के ष्ठा नरः श्रेष्ठतमाः (ऋ० ५ । ६१ । १) । घ । न घा स मामप जोषम्[7] (ऋ० ४ । २७ । २) । हिनव । प्र तत्ते हिनवा यत्ते[8] (ऋ० १०।९५ । १३) । अय । नाहमतो निरया दुर्गहैतत् (ऋ० ४ । १८ । २) । जुहोत । आ जुहोता दुवस्यत (ऋ० ५।२८। ६) । पश्यत । तदस्येदं पश्यता भूरि[9] (ऋ० १ । १०३ । ५) ।

चकृम । वयं हि ते चकृमा भूरि[10] (ऋ० ८ । ४६ । २५) । अकुत्र । माकुत्रा नो गृहेभ्यः[11] (ऋ० १ । १२० । ८) । भूम । द्यावा च भूमा जनुषः (ऋ० १ । ६१ । १४) । स्म । उत स्मा सद्य इत्परि (ऋ० ४ । ३१ । ८) । शिशीत । तं शिशीता सुवृक्तिभिः[12]

---

(१) रेप आधुः B^2, रेप आ B^n. (२) नृतमं० । B^2, नृतमं यस्य B^n. (३) मरुतो यं० । B^2, मरुतो यमावता B^n. (४) मधु० । B^2, मधुवर्णमर्चते B^n. (५) स्तो- I^2B^n. (६) जगामा० । B^2, जगामा स वेद B^n. (७) जोषं० । B^2. (८) ते० । B^2, ते अस्मे B^n. (९) पश्यता० । B^2; भूरि पुष्टं B^n. (१०) भूरि० । B^2, भूरि दावने B^n. (११) गृहेभ्यो० । B^2. (१२) स्वध्वरं (for सुवृक्तिभिः) B^n.

(ऋ० ८। ४०। १०)। स्तोत। इन्द्रं स्तोता नव्यं गार्भिः[1] (ऋ० ८। १६। १)। पप्तत। वयो न पप्तता सुमायाः (ऋ० १। ८८। १)॥

त्विति चैकाक्षरोपधम्॥ १६॥

तु इत्येतच्चैकाक्षरोपधं प्लुवते। आ तू न उप गन्तन (ऋ० ८। ७। ११)। एकाक्षरोपधमिति कस्मात्[2]। पिबा तु सोमं गोऋजीकम्[3] (ऋ० ६। २३। ७)॥

कदा हरिवो वरुणस्य चक्रतुः
सूर्य्यस्य निष्ट्या इव भूम तेषु न॥ १७॥

कदा हरिवः वरुणस्य चक्रतुः सूर्यस्य निष्ट्या इव इत्येतेषु प्रत्ययेषु भूम इत्येतन्न प्लुवते। कदा। शूने भूम कदा चन (ऋ० १। १०५। ३)। हरिवः। अघाय भूम हरिवः (ऋ० ७। १९। ७)। वरुणस्य। मा हेळे भूम वरुणस्य (ऋ० ७। ६२। ४) चक्रतुः। सुरेतसा पितरा भूम चक्रतुः (ऋ० १। १५९। २)। सूर्यस्य। मा शूने भूम सूर्यस्य संदृशि[4] (ऋ० १०। ३७। ६)। निष्ट्या इव। मा भूम निष्ट्या इव (ऋ० ८। १। १३)॥

वस्त्राणि हि बाबधे यज्ञियानां
ते दंसो द्रूं नः स च शक्र तेषु तु॥ १८॥

वस्त्राणि। हि। बाबधे। यज्ञियानाम्। ते दंसो द्रू। नः स च[5]। शक्र। इत्येतेषु प्रत्ययेषु तु इत्येतन्न प्लुवते। वस्त्राणि। स तु वस्त्राण्यध पेशनानि (ऋ० १०। १। ६)। हि। अध्वर्यवा तु हि षिञ्च (ऋ० ८। ३२। २४)। बाबधे। वि तु बाबधे रोदसी (ऋ०

---

(१) B[3] omits गीर्भिः. (२) किं B[3]. (३) गोऋजीकं०। B[2], गोऋजीकमिंद्र B[n]. (४) B[2] omits संदृशि. (५) I[2]B[3], च B[2]B[n].

६ । २९ । ५)। यज्ञियानाम्। मायामू तु यज्ञियानाम (ऋ० १० । ८८ । ६)। ते दंसो द्वे। तत्तु ते दंसो यदहन् (ऋ० १ । ६९ । ४)। द्वे इति कस्मात्। ता तु ते सत्या तुविनृम्ण[1] (ऋ० ४ । २२ । ६)। नः स च[2]। आ तु नः स वयति गव्यम्[3] (ऋ० ८ । २१ । १०)। स इति[4] कस्मात्[5]। आ तु न इन्द्र वृत्रहन् (ऋ० ४ । ३२ । १)। शक्र। स्तोर्णं बर्हिरा तु शक्र प्र याहि (ऋ० १ । १७७ । ४)॥

चकृमेति द्वैपदे भूरि दुष्कृतं
वर्धतां विप्रवचसो जिह्वयेति॥ १९ ॥

चकृम इत्येतन्न प्लवते। द्वैपदे भूरि दुष्कृतम्। वर्धताम्। विप्रवचसः। जिह्वया। इत्येतेषु परेषु[6]। भूरि दुष्कृतम्। न वो गुहा चकृम भूरि दुष्कृतम् (ऋ० १० । १०० । ७)। दुष्कृतमिति कस्मात्। वयं हि ते चकृमा भूरि दावने (ऋ० ८ । ४६ । २५)। वर्धताम्। प्राञ्चं यज्ञं चकृम वर्धताम् (ऋ० ३ । १ । २)। विप्रवचसः। आ पुरंदरं चकृम विप्रवचसः (ऋ० ८ । ६१ । ८)। जिह्वया। यद्वो देवाश्चकृम जिह्वया गुरु (ऋ० १० । ३७ । १२)॥

काण्वायना निष्कृतीरेतयोः स्थ॥ २० ॥

काण्वायनाः निष्कृतीः इत्येतयोः स्थ इत्येतत्पदं[7] न प्लवते। काण्वायनाः। सुदेवा स्थ काण्वायनाः (ऋ० ८ । ५५ । ४)। निष्कृतीः। अथो यूयं स्थ निष्कृतीः (ऋ० १० । ९७ । ९)॥

---

(१) नृम्ण०। B². ता तू त इंद्र महतो महानि (instead of ता तू to -नृम्ण) Bⁿ. (२) च B³, व B²Bⁿ, च or व (?) I². (३) गव्यं०। B². (४) स इति B³I², स व इति B², नः सवेति. द्वे इति Bⁿ. (५) किं B³, कस्मात्। उक्तं। Bⁿ. (६) The Comm. भूरि to परेषु omitted in B³. (७) B² omits पदं.

जाताः सुरथा हवनश्रुतश्च ॥ २१ ॥

जाताः सुरथाः हवनश्रुतः इत्येतेषु[1] प्रत्ययेषु स्थ इत्येतन्न प्लवते। जाताः। ये स्थ जाता अदितेः (ऋ० १० । ६३ । २)। सुरथाः। स्वश्वा स्थ सुरथाः (ऋ० ५ । ५७ । २)। हवनश्रुतः। कद्ध स्थ हवनश्रुतः (ऋ० ८ । ६७ । ५)॥

सवापरं घेति न कौत्सवैमदम् ॥ २२ ॥

सः वा इत्येवंपरं घ इत्येतत्पदं, कुत्सस्य विमदस्य वार्षे वर्तमानं न प्लवते। सः। अयं घ स तुरो मदः (ऋ० १० । २५ । १०)। वा। आ घ वा याभिररुणीः (ऋ० १ । ११२ । १९)। कौत्सवैमदमिति कस्मात्[2]। सुनीथो घा स मर्त्यः (ऋ० ८ । ४६ । ४)। प्रकृतेऽपि प्रतिषेधे नकारः श्लोकपूरणार्थो द्रष्टव्यः॥

स्म राशिमित्यादिषु न ॥ २३ ॥

स्म इत्येतन्न प्लवते राशिम् इत्येवमादिषु प्रत्ययेषु। राशिमादीनुत्तरत्रोदाहरिष्यामः॥

प्रति ष्म च ॥ २४ ॥

प्रतिपूर्वं च[3] सत् स्म इत्येतन्न प्लवते। प्रति ष्म। प्रति ष्म रिषतो दह (ऋ० १ । १२ । ५)। प्रतीति कस्मात्[4]। नहि ष्मा ते शतम् (ऋ० ४ । ३१ । ९)॥

स्म ते परेषु व्रजनं वनस्पते शुभे परुष्ण्याम् ॥ २५ ॥

स्म ते इत्येतस्मिन्द्वैपदे पूर्वं न प्लवते व्रजनम् वनस्पते शुभे परुष्ण्याम् इत्येतेषु परेषु। व्रजनम्[5]। अध स्म ते व्रजनं कृष्णम् (ऋ० ७ । ३ । २)। वनस्पते। उत स्म ते वनस्पते (ऋ० १ । २८ ।

---

(१) B^n adds च. (२) किं B^3. (३) B^2 omits च. (४) किं B^2I^2. (५) स्म (for व्रजनम्) B^2.

६)। शुभे। उत स्म ते शुभे नरः (ऋ० ५। ५२। ८)। परुष्ण्याम्। उत स्म ते परुष्ण्याम् (ऋ० ५। ५२। ९)। व्रजनमित्यादि[1] कस्मात्। नहि ष्मा ते शतं चन (ऋ० ४। ३१। ९)॥

स्म पुरा वृषाकपौ॥ २६॥

स्म पुरा इत्येतन्न प्लवते वृषाकपौ। स्म पुरा। संहोत्रं स्म पुरा नारी (ऋ० १०। ८६। १०)। वृषाकपाविति कस्मात्। ये स्मा पुरा गातूयन्तीव[2] (ऋ० १। १६९। ५)॥

राशिं वाजेषु मे सद्म पूषणं
तं तृंहद्धायि मा दुर्हणायतः।
यस्मै यद् वृत्रहत्येषु मावते
वातो यं यस्य मद् दुर्गृभीयसे॥ २७॥

त इमे राशिमादयो ये पूर्वसूत्रे निर्दिष्टाः। राशिम् वाजेषु मे सद्म पूषणम् तम् तृंहत धायि मा दुर्हणायतः यस्मै यत् वृत्रहत्येषु मावते वातः यम् यस्य मत् दुर्गृभीयसे। राशिम्। उत स्म राशिं परि यासि[3] (ऋ० ९। ८७। ९)। वाजेषु। प्र स्म वाजेषु नोऽव (ऋ० ८। ६०। १०)। मे। उत स्म मेऽव्यत्यै (ऋ० १०। ९५। ५)। सद्म। उत स्म सद्म हर्यतस्य (ऋ० १०। ९६। १०)। पूषणम्। वहामि स्म पूषणमन्तरेण[4] (ऋ०१०। ३३। १)। तम्। अप स्म तं पथो जहि (ऋ० १। ४२। २)। तृंहत्। कूटं स्म तृंहदभिमातिम् (ऋ० १०। १०२। ४)। धायि। इह स्म धायि दर्शतः (ऋ० ५। ५६। ७)। मा। त्रिः स्म माह्नः श्नथयः (ऋ० १०। ९५। ५)। दुर्हणायतः। अव स्म दुर्हणायतः

---

(१) B^n adds परेष्विति. (२) B^2 adds देवाः. (३) B^3, परि। B^2, परि०। I^2, परि यासि गोनां B^n. (४) पूषणं। B^2.

(ऋ० १० । १३४ । २)। यस्मै। शुचिः ष्म यस्मा अत्रिवत् (ऋ० ५ । ७ । ८)। यत्। नहि ष्म यद्ध वः पुरा (ऋ० ८ । ७ । २१)। वृत्रहत्येषु। मघोनः स्म वृत्रहत्येषु (ऋ० ७ । ३२ । १५)। मावते। नि ष्म मावते वहथ[1] (ऋ० ६ । ६५ । ४)। वातः। उत्स्म वातो वहति[2] (ऋ० १० । १०२ । २)। यम्। उत स्म यं शिशुम[3] (ऋ० ५ । ९ । ३)। यस्य। अध स्म यस्यार्चयः (ऋ० ५ । ९ । ५)। मत्। अप स्म मत्तरसन्ती (ऋ० १० । ९५ । ८)। दुर्गृभीयसे। उत स्म दुर्गृभीयसे (ऋ० ५ । ९ । ४)॥

अत ऊर्ध्वम्—एकादशिद्वादशिनोः (८ । ३६) इत्येतत्पर्यन्तं द्वैपदग्रहणं कृतं द्रष्टव्यम्। तेषां द्वैपदानां पूर्वपदान्ताः प्लवन्ते॥

पृच्छा विपश्चितमवा पुरंध्या
घा त्वद्रिग्वीरान्वनुयामा त्वोताः।
जनया दैव्यं भुजेमा तनूभि-
र्हा वहतो वासया मन्मना च ॥ २८ ॥

इत्येतेषां पूर्वपदान्ताः प्लवन्ते। पृच्छा विपश्चितम्। इन्द्रं पृच्छा विपश्चितम् (ऋ० १ । ४ । ४)। अवा पुरंध्या। रथमवा पुरंध्या (ऋ० ५ । ३५ । ८)। घा त्वद्रिक्। न घा त्वद्रिगप वेति[4] (ऋ० १० । ४३ । २)। वीरान्वनुयामा त्वोताः। वीरैर्वीरान्वनुयामा त्वोताः (ऋ० १ । ७३ । ९)। वीरानिति कस्मात्[5]। वयमग्ने वनुयाम त्वोताः (ऋ० ५ । ३ । ६)। जनया दैव्यम्। मनु-

---

(१) वहथा०। B². (२) वहति०। B². स्मा अत्रिवत् to वहति omitted in I². (३) शिशुं०। B². (४) B²Bⁿ add मे मनः. (५) किं B³.

र्भव जनया दैव्यं जनम् (ऋ० १० । ५३ । ६) । भुजेमा तनूभिः । यत्तं भुजेमा तनूभिः (ऋ० ५ । ७० । ४) । द्दा वहतः । आ द्दा वहतो मर्त्याय[1] (ऋ० ५ । ४१ । ७) । वासया मन्मना । वस्त्रेणेव वासया मन्मना शुचिम् (ऋ० १ । १४० । १) ॥

वेदा वसुधितिं रेमा पृथिव्या
वोचा सुतेषु धावता सुहस्त्यः ।
मुच्चा सुषुवुषः स्वाद्मा पितूना-
मिहा वृणीष्व बोधया पुरंधिम् ॥ २८ ॥

इत्येतेषां पूर्वपदान्ताः प्लवन्ते । वेदा वसुधितिम् । स हि वेदा वसुधितिम् (ऋ० ४ । ८ । २) । रेमा पृथिव्याः । अग्निर्हि दाति रेमा पृथिव्याः (ऋ० १ । ६५ । ४) । वोचः सुतेषु । प्र नु वोचा सुतेषु वाम् (ऋ० ६ । ५९ । १) । धावता सुहस्त्यः । आ धावता सुहस्त्यः (ऋ० ९ । ४६ । ४) । मुच्चा सुषुवुषः । वि पू मुच्चा सुषुवुषः[2] (ऋ० १० । ९४ । १४) । स्वाद्मा पितूनाम् । ऊधर्न गोनां स्वाद्मा पितूनाम् (ऋ० १ । ६९ । २) । इहा वृणीष्व । अस्माँ इहा वृणीष्व (ऋ० ४ । ३१ । ११) । बोधया पुरंधिम् । प्र बोधया पुरंधिम् (ऋ० १ । १३४ । ३) ॥

अवथा स कृणुथा सुप्रतीकं
तिरा शचीभिः कृणुता सुरत्नान् ।
गमन्ता नहुषोऽनयता चियन्तः
स्मा च्यावयन्नीरया वृष्णिमन्तम् ॥३०॥

इत्येतेषां च पूर्वपदान्ताः प्लवन्ते । अवथा सः । यं देवासोऽवथा स विचर्षणिः (ऋ० ४ । ३६ । ५) । कृणुथा सुप्रतीकम् ।

---

(१) मर्त्याय० । B², मर्त्यायज्ञं यज्ञं Bⁿ. (२) सुषुवुषो० । B².

अशीरं चित्कृणुथा सुप्रतीकम् (ऋ० ६ । २८ । ६)। तिरा शचीभिः। प्र सू तिरा शचीभिर्ये त उक्थिनः[१] (ऋ० ८ । ५३ । ६)। कृणुता सुरत्नान्। सुभागान्नो देवाः कृणुता सुरत्नान् (ऋ० १० । ७८ । ८)। गमन्ता नहुषः। अध गमन्ता नहुषः (ऋ० १ । १२२ । ११)। अनयता वियन्तः। ये वाजाँ अनयता वियन्तः (ऋ० १० । ६१ । २७)। स्मा च्यावयन्। त्वं हि ष्मा च्यावयन्नच्युतानि (ऋ० ३ । ३० । ४)। ईरया वृष्टिमन्तम्। प्र पर्जन्यमीरया वृष्टिमन्तम् (ऋ० १० । ९८ । ८)॥

असृजता मातरं सू रथं हुवे
नयता बद्धं स्वापया मिथूदृशा।
इता जयता गता सर्वतातय
ईरयथा मरुतो नेषथा सुगम् ॥ ३१ ॥

इत्येतेषां च पूर्वपदान्ताः प्लुवन्ते। असृजता मातरम्। सं वत्सेनासृजता मातरम्[२] (ऋ० १ । ११० । ८)। सू रथं हुवे। युवोरु षू रथं हुवे (ऋ० ८ । २६ । १)। हुव इति कस्मात्[३]। अस्माकं सु रथं पुरः (ऋ० ८ । ४५ । ९)। नयता बद्धम्। न जानीमो नयता बद्धमेतम् (ऋ० १० । ३४ । ४)। स्वापया मिथूदृशा। नि ष्वापया मिथूदृशा (ऋ० १ । २९ । ३)। इता जयत। प्रेता जयता नरः (ऋ० १० । १०३ । १३)। आ गता सर्वतातये। त आदित्या आ गता सर्वतातये (ऋ० १ । १०६ । २)। आ गतेति कस्मात्[४]। ईरयथा मरुतः। उदीरयथा मरुतः समुद्रतः[५] (ऋ०

---

(१) शचीभिः। B^2. (२) B^2B^n add पुनः. (३) B^2, किं $B^3I^2B^n$. (४) कस्मात् B^2, किं B^3. आ गतेति कस्मात् omitted in B^n. (५) B^2 omits समुद्रतः.

५।५५।५)। नेषथा-सुगम्। चक्षुरिव यन्तमनु नेषथा सुगम् (ऋ० ५।५४।६)॥

अन्यत्रा चित्पिबता मुञ्जनेजनं
घा स्या वोचेमा विदथेष्विता धियम्।
इता नि यत्रा वि दशस्यथा क्रविं
चा बोधाति द्रावया त्वं किरा वसु॥ ३२॥

इत्येतेषां च पूर्वपदान्ताः प्लुवन्ते। अन्यत्रा चित्। नू अन्यत्रा चिदद्रिवः (ऋ० ८।२४।११)। पिबता मुञ्जनेजनम्। इदं वा घा पिबता मुञ्जनेजनम् (ऋ० १।१६१।८)। घा स्याः। त्वं त्वं वा घा स्या अहम् (ऋ० ८।४४।२३)। वोचेमा विदथेषु। तमिद्वोचेमा विदथेषु शंभुवम् (ऋ० १।४०।६)। इता धियम्। एता धियं कृणवामा सखायः[१] (ऋ० ५।४५।६)। इता नि। आ त्वेता नि षीदत (ऋ० १।५।१)। यत्रा वि। मनो यत्रा वि तद्दधुर्विचेतसः[२] (ऋ० ८।१३।२०)। दशस्यथा कविम्। याभिर्दशस्यथा कविम् (ऋ० ८।२०।२४)। चा बोधाति। स चा बोधाति मनसा यजाति (ऋ० १।७७।२)। द्रावया त्वम्। अध्वर्यो द्रावया त्वम् (ऋ० ८।४।११)। किरा वसु। आ नः सोम पवमानः किरा वसु (ऋ० ९।८१।३)॥

हा पदेव कर्तना श्रुष्टिं
योधया च जग्रभा वाचम्।
पायया च तर्पया कामं
गातुया च मन्दया गोभिः॥ ३३॥

इत्येतेषां च पूर्वपदान्ताः प्लुवन्ते। हा पदेव। आ हा पदेव गच्छसि (ऋ० ४।३१।५)। कर्तना श्रुष्टिम्। अध्वर्यवः कर्तना

(१) B², कृणवाम B³Bⁿ (-वामः Bⁿ). (२) दधुः। B².

श्रुष्टिमस्मै (ऋ० २ । १४ । ९) । योधया च । स योधया च क्षयया च[1] (ऋ० ३ । ४६ । २) । जग्रभा वाचम् । प्रतीचीं जग्रभा वाचम् (ऋ० १० । १८ । १४) । पायया च । आ सादय पायया चा मधूनि (ऋ० ३ । ५७ । ५) । तर्पया कामम् । व्यश्नुहि तर्पया काममेषाम्[2] (ऋ० १ । ५४ । ९) । गातुया च । दशस्या च गातुया च (ऋ० ८ । १६ । १२) । मन्दया गोभिः । इमं कामं मन्दया गोभिरश्वैः (ऋ० ३ । ३० । २०) ॥

घा स्यालादेना सुमतिं
वोचा नु व्यथया मन्युम् ।
नेथा च चक्रा जरसं
भवता मृळयन्तश्च ॥ ३४ ॥

इत्येतेषां च पूर्वपदान्ताः प्लुवन्ते । घा स्यालात् । विजामातुरुत वा घा स्यालात् (ऋ० १ । १०९ । २) । एना सुमतिम् । विद्वाँ एना सुमतिं यात्यच्छ (ऋ० ९ । ९६ । २) । वोचा नु । अधि वोचा नु सुन्वते (ऋ० १ । १३२ । १)[3] । व्यथया मन्युम् । अमित्रस्य व्यथया मन्युमिन्द्र (ऋ० ६ । २५ । २) । नेथा च । पाथ नेथा च मर्त्यम्[4] (ऋ० १० । १२६ । २) । चक्रा जरसम् । यत्रा नश्चक्रा जरसं तनूनाम्[5] (ऋ० १ । ८९ । ९) । भवता मृळयन्तः । आदित्यासो भवता मृळयन्तः (ऋ० १ । १०७ । १) ॥

एवा चन भजा राये रश्मिा ते भजा भूरि ।
श्रुधी न उभयत्रा ते भजा त्वं मृळया नश्च ॥ ३५ ॥

---

(१) च० । B², च जनान् । Bⁿ. (२) कामं । B²Bⁿ. (३) स्वापया मिथूदृशा । नि ष्वापया (in the Comm. on Sūtra 31) to सुन्वते omitted in I². (४) मर्त्यं० B². (५) तनूनाम् omitted in B².

इत्येतेषां च पूर्वपदान्ताः प्लुवन्ते। एवा चन। मोत सूरो अह एवा चन (ऋ० ६। ४८। १७)। भजा राये। अभक्ते चिदा भजा राये अस्मान् (ऋ० १०। ११२। १०)। ररिमा ते। पिबा सोमं ररिमा ते मदाय (ऋ० ३। ३२। २)। भजा भूरि। वि भजा भूरि ते वसु (ऋ० १। ८१। ६)। श्रुधी नः। अवर्मह इन्द्र दादृहि श्रुधी नः (ऋ० १। १३३। ६)। उभयत्रा ते। इन्द्र आतरुभयत्रा ते अर्थम् (ऋ० ३। ५३। ५)। गुरूदयार्थं ग्रहणम्[1]। भजा त्वम्। आ गोमति व्रजे भजा त्वं नः (ऋ० ७। २७। १)। मृळया नः। सोम राजन्मृळया नः स्वस्ति (ऋ० ८। ४८। ८)।

एकादशिद्वादशिनोर्लघावष्टममक्षरम्। उदये संहिताकाले॥ ३६॥

एकादशाक्षरद्वादशाक्षरयोः पादयोरष्टममक्षरं प्लुवते संहिताकाले लघावुदये सति। एकादशिनः। तादीत्ना शत्रुं न किला विवित्से (ऋ० १। ३२। ४)। द्वादशिनः। अग्ने सख्ये मा रिषामा वयं तव (ऋ० १। ९४। १)। एकादशिद्वादशिनोरिति कस्मात्। भद्रं नो अपि वातय मनः (ऋ० १०। २०। १)। लघाविति कस्मात्[2]। वृषा समत्सु दासस्य नाम चित् (ऋ० ५। ३३। ४)। प्र ऋभुभ्यो दूतमिव वाचमिष्ये (ऋ० ४। ३३। १)। संहिताकाल इति कस्मात्। आदित्यासस्ते अक्रा न वावृधुः (ऋ० १०। ७७। २)। इदं त एकं पर ऊ त एकम् (ऋ० १०। ५६। १)॥

नःकारे च गुरावपि॥ ३७॥

नःकार उदये गुरावपि चैकादशिद्वादशिनोरष्टममक्षरं प्लुवते। द्युभिर्हितो जरिमा सू नो अस्तु (ऋ० १०। ५९। ४)॥

---

(१) B^3B^2, गुरूदयार्थं ग्रहणम् omitted in I^2B^n.
(२) किं B^3.

दशमं चैतयोरेवम् ॥ ३८ ॥

दशमं चाक्षरं प्लवत एतयो[1]रेकादशिद्वादशिनोर्लघावुदये संहिताकाले । नःकारे च गुरावपि । अद्दा विश्वा सुमना दीदिही नः (ऋ० ३ । ५४ । २२) । अव रुद्रा अशसो हन्तना वधः (ऋ० २ । ३४ । ९) । एकादशिद्वादशिनोरिति[2] कस्मात् । प्र सुवानासो बृहद्दिवेषु हरयः (ऋ० ९ । ७९ । १) । लघाविति कस्मात् । राय एषेऽवसे दधीत धीः (ऋ० ५ । ४१ । ५) । तन्म ऋतमिन्द्र शूर चित्र पातु (ऋ० ८ । ९७ । १५) । नःकारे च गुरौ । नू देवासो वरिवः कर्तना नो भूत नः (ऋ० ७ । ४८ । ४) ॥

षष्ठं चाष्टाक्षरेऽक्षरम् ॥ ३९ ॥

अष्टाक्षरे च पादे षष्ठमक्षरं प्लवत एवम् । कथम् । यथैकादशिद्वादशि[3]नोरष्टममक्षरं दशमं च । ईशानो यवया वधम् (ऋ० १ । ५ । १०) । अष्टाक्षर इति कस्मात्[4] । पिबा सोममभि यमुग्र तर्दः (ऋ० ६ । १७ । १) । लघाविति कस्मात् । आ पवस्व देव सोम (ऋ० ९ । ६७ । ३०) । संहिताकाल इति कस्मात् । नेमिं तष्टेव सुद्रूवम् (ऋ० ७ । ३२ । २०) ॥

व्यूहैः संपत्समीक्ष्योने क्षैप्रवर्णैकभाविनाम् ॥ ४० ॥

ऊने पादे क्षैप्रवर्णानां[5] च[6] संधीनामेकीभाविनां च व्यूहैः पादस्य संपत्समीक्षितव्या । उद्वृत्स्वस्मा अकृणोतना तृणम् (ऋ० १ । १६१ । ११) इति क्षैप्रसंधिव्यूहाद् द्वादशाक्षरस्य पादस्य दशममक्षरं प्लवते । क्षैप्रैकभाविनामित्येव[7] सिद्धे वर्णग्रहणसामर्थ्यात्—गोर्न

---

(१) एवं कथं (instead of एतयोर्) B². (२) -द्वादशिनोः दशमं चेति B². (३) द्वादशि- omitted in B². (४) किं B³. (५) B² adds अक्षैप्रवर्णानां. (६) च omitted in B². (७) एवं B².

पर्व वि रद्वा तिरश्चा (ऋ० १ । ६१ । १२) इति वर्णव्यूहाद[1]द्वादशाक्षरस्याष्टममक्षरं प्लवते । प्रेता जयता नरः (ऋ० १० । १०३ । १३) इत्येकीभावव्यूहादष्टाक्षरस्य षष्ठमक्षरं प्लवते । एवं संपत्सर्वत्र समीक्ष्या । ऊन इति वचनात्पूर्णे व्यूहो न भवति । प्रत्यग्रभीष्म नृतमस्य नृणाम् (ऋ० ५ । ३० । १२) ॥

न वावृधन्त वातस्यावद्यानि जिघांससि ।
सासह्याम ववृत्याम दीदिहचष्टममूर्णुहि ॥ ४१ ॥

न तु खल्वेकादशिद्वादशिनोरष्टाक्षरे[2] चै[3]वमादीनि प्लवन्ते यानि वक्ष्यामः[4] । वावृधन्त । वातस्य । अवद्यानि । जिघांससि । सासह्याम । ववृत्याम । दीदिहि अष्टमम् । ऊर्णुहि । इति[5] । वावृधन्त । द्युतद्यामानं वावृधन्त नृणाम् (ऋ० १० । ९३ । १२) । वातस्य । युजानो अश्वा वातस्य धुनी (ऋ० १० । २२ । ४) ।

प्रतिषेधाधिकारे वातस्येति ग्रहणमनर्थकं दशाक्षरत्वात्पादस्य । नानर्थकम् । व्यूहेन द्वादशाक्षरं[6] लिङ्गं भवति । नास्य व्यूह इष्यते । कस्मात्[7] । सर्वा[8]नुक्रमण्यामनुष्टुभस्ताः स्वराजो बृहत्यो वा विराजोऽव्यूह इत्यनूहः[9] । तस्मादुभयोरपि दशाक्षर

---

(१) वर्णव्यूहाद् I^2 B^n, वर्णव्यूहः । व्यूहवर्णे च B^2, व्यूहावर्णस्य च B^3. (२) -त्तरेण B^2. (३) B^2 omits च. (४) एवमादीनि to वक्ष्यामः omitted in I^2. (५) वावृधन्त to इति omitted in B^2 I^2. (६) -क्षरं $B^3B^2B^n$, a (M. M.); corrected to -क्षरत्वे in I^2; -क्षर- M. M. (७) a (M. M.) omits कस्मात्. (८) सर्वा- $B^2I^2B^n$, a (M. M.); corrected to छंदो- on the margin in B^3. (९) स्वराजो बृहत्यो वा विराजो व्यूहे इत्यनूहः B^3; स्वराजः । बृहत्यो विराज इत्युक्तत्वात् । व्यूहे इत्यनूहः B^2; स्वराजो बृहत्यो वा विराजोऽव्यूह त्यनूहः इति उक्तत्वात् । व्यूहेन सतो विराजो बृहत्यः I^2; स्वराज इत्युक्तत्वात् । व्यूहेन सता विराजो बृहत्यः B^n, a (M.M.).

एवायं[1] पादो भवति। अत एव वातस्येति ग्रहणमनर्थकं भवतीति मर्तस्येति तस्य स्थाने पठन्ति। यज्ञं मर्तस्य रिपोः (ऋ० ८। ११। ४)।

अवद्यानि। सन्तो[2]ऽवद्यानि पुनानाः (ऋ० ६। ६६। ४)। जिघांससि। यत् स्तोतारं जिघांससि सखायम् (ऋ० ७। ८६। ४)। सासह्याम। इन्द्रत्वोताः सासह्याम पृतन्यतः (ऋ० १। १३२। १)। ववृत्याम। आ ते मनो ववृत्याम मघाय (ऋ० ७। २७। ५)। दीदिहि अष्टमम्। शोचा शोचिष्ठ दीदिहि विशे मयः (ऋ० ८। ६०। ६)। अष्टममिति कस्मात्। अहा विश्वा सुमना दीदिही नः (ऋ० ३। ५४। २२)। ऊर्णुहि। पुनान इन्द्र ऊर्णुहि वि वाजान् (ऋ० ९। ९१। ४) ॥

पुरुप्रजातस्याभि नः
कृणुहि द्व्यक्षरोपधम्।
हर्यश्वोत भवन्त्विन्द्र
सदनायास्ति नाम चित् ॥ ४२ ॥

इत्येतानि चै[3]कादशिद्वादशिनोरष्टाक्षरे च न प्लुवन्ते। पुरुप्रजातस्य। विदत्पुरुप्रजातस्य गुहा यत् (ऋ० १०। ६१। १३)। अभि नः। पतिरिव जायामभि नो न्येतु (ऋ० १०। १४९। ४)। न इति कस्मात्। तं दुरोषमभी नरः (ऋ० ९। १०१। ३)। कृणुहि द्व्यक्षरोपधम्। वर्षीयो वयः कृणुहि शचीभिः (ऋ० ६। ४४। ९)। द्व्यक्षरोपधमिति कस्मात्[4]। जहि वृष्ण्यानि कृणुही पराचः (ऋ० ६। २५। ३)। हर्यश्व। स नः प्रजायै हर्यश्व

---

(१) एव B². (२) अंतः संतो (अंतः marginal) I². (३) B² omits च. (४) किं B³.

मृळय (ऋ० १० । १२८ । ८)। उत। अदिते मित्र वरुणोत मृळ (ऋ० २ । २७ । १४) । भवन्तु । स्वस्तय आदित्यासो भवन्तु नः (ऋ० ५ । ५१ । १२) । इन्द्र । यथा त्रिते छन्द इन्द्र जुजोषसि (ऋ० ८ । ५२ । १)। सदनाय । सूर्यामासा सदनाय सधन्या (ऋ० १० । ९३ । ५)। अस्ति। रायस्पूर्धि स्वधावोऽस्ति हि ते (ऋ० १ । ३६ । १२)। नाम चित्। वृषा समत्सु दासस्य नाम चित् (ऋ० ५ । ३३ । ४)। चिदिति कस्मात्[1] । दिवेदिवे अधि नामा दधाना (ऋ० १ । १२३ । ४) ॥

चमसाँइवात्रि वसवान
द्वादशिनः सृजास्य विमदस्य।
सुमखाय धारय ददातु
रक्ष धिया दधातु दिधिषेय ॥ ४३ ॥

इत्येतानि चैकादशिद्वादशिनोरष्टाक्षरे च न प्लवन्ते । चमसाँ इव । धारया चमसाँ इव विवक्षसे (ऋ० १० । २५ । ४) । अत्रि । देवस्य त्रातुरत्रि भगस्य (ऋ० ४ । ५५ । ५)। वसवान। मा रिषण्यो वसवान वसुः सन् (ऋ० १० । २२ । १५) । द्वादशिनः सृज । सं राया भूयसा सृज मयोभुना (ऋ० ३ । १६ । ६)। द्वादशिन इति कस्मात्[1] । स्वादोः स्वादीयः स्वादुना सृजा सम् (ऋ० १० । १२० । ३)।

अस्य । सम्वारन्नकिरस्य मघानि (ऋ० १० । १३२ । ३)। विमदस्य । तव चेन्द्र विमदस्य च ऋषेः (ऋ० १० । २३ । ७)। सुमखाय । कद्रुद्राय सुमखाय हविर्दे (ऋ० ४ । ३ । ७) । धारय। अस्मे रयिं नि धारय वि वो मदे (ऋ० १० । २४ । १)। ददातु। अग्निरिषां सख्ये ददातु नः (ऋ० ८ । ७१ । १३)। रक्ष धिया।

(१) किं B³.

ज्योतिष्मतः पथो रक्ष धिया कृतान् (ऋ० १० । ५३ । ६)। धियेति कस्मात् ।[1] दधातु। स्वस्ति पूषा असुरो दधातु नः (ऋ० ५ । ५१ । ११)। दिधिषेय। स्तोतारमिद्दिधिषेय रदावसो (ऋ० ७ । ३२ । १८) ॥

अङ्ग सरस्वति पञ्च चरन्ति
ग्नाभिरिहेन्वसि रण्यसि धाव।
विद्धि षु णोऽभि षतः सुविताय
त्वा समिधान दधीमहि देव ॥४४॥

इत्येतानि[2] च षष्ठमष्टमं[3] दशममष्टाक्षर[4] एकादशे[5] द्वादशे च[6] न प्लवन्ते[7] । अङ्ग। इन्द्रासोमा युवमङ्ग तरुत्रम् (ऋ० ६ । ७२ । ५)। सरस्वति। अयमु ते सरस्वति वसिष्ठः (ऋ० ७ । ९५ । ६)। पञ्च। विश्वे देवा अदितिः पञ्च जनाः (ऋ० १ । ८९ । १०)। वृत्तात्प्रायबलीयस्त्वान्नैतदुदाहरणम्। इदं तर्ह्युदाहरणम्—ये युक्त्वाय पञ्च शतास्मयु[8] (ऋ० १० । ९३ । १४)। चरन्ति। समश्वपर्णाश्चरन्ति नो नरः (ऋ० ६ । ४७ । ३१)। ग्नाभिरिह। शं नस्त्वष्टा ग्नाभिरिह शृणोतु[9] (ऋ० ७ । ३५ । ६)। ग्नाभिरिति कस्मात्[10]। अधा ते अग्ने किमिहा वदन्ति (ऋ० ४ । ५ । १४)। इन्वसि। वृषा यज्ञो यमिन्वसि वृषा हवः (ऋ० ८ । १३ । ३२)। रण्यसि। उक्थे वा यस्य रण्यसि समिन्दुभिः (ऋ० ८ । १२ । १८)। धाव। अन्यो वारे परि धाव

(१) रक्षा णो अग्ने Bⁿ (as a footnote). (२) इत्येतेषां B². (३) अष्टम- Bⁿ. (४) -क्षरे च Bⁿ. (५) एकादश- Bⁿ. (६) एकादशद्वादशिनोर् (for एकादशे to च) B². (७) इत्येतानि to प्लवन्ते (with variants noted before) given as a footnote in Bⁿ. (८) शता। B³. (९) B² omits शृणोतु। (१०) किं B³.

मधु प्रियम् (ऋ० ९। ८६। ४८)। विद्धि षु णः। वयं ते वय इन्द्र विद्धि षु णः (ऋ० २। २०। १)। विद्धीति कस्मात्[1]। द्युभिर्हितो जरिमा सू नो अस्तु (ऋ० १०। ५९। ४)। अभि षतः। महो विश्वाँ अभि षतः (ऋ० ८। २३। २६)। सत इति कस्मात्[1]। तं दुरोषमभी नरः (ऋ० ९। १०१। ३)। सुविताय। इन्द्रा याहि सुविताय महे नः (ऋ० ६। ४०। ३)। त्वा समिधान। मर्तासस्त्वा समिधान हवामहे (ऋ० १०। १५०। २)। दधीमहि। प्रति स्तोमं दधीमहि तुराणाम् (ऋ० ७। ४०। १)। देव। कृधी नो अह्रयो देव सवितः (ऋ० १०। ९३। ९)॥

जामिषु जासु चिकेत किरासि
स्मस्युप पात्यसि सोम शतस्य।
आयुषि चेतति विष्टपि मास्व
प्रोश्मसि मूर्धनि सद्म वरन्त ॥४५॥

जामिषु जासु चिकेत किरासि स्मसि उप पाति असि सोम शतस्य आयुषि चेतति विष्टपि मास्व प्र उश्मसि मूर्धनि सद्म वरन्त[2] इत्येतानि चैकादशिद्वादशिनोरष्टाक्षरे[3] च न प्लुवन्ते। जामिषु। गर्भं दधासि जामिषु विवक्षसे (ऋ० १०। २१। ८)। जासु। अनमीवो रुद्र जासु नो भव (ऋ० ७। ४६। २)। चिकेत। अयं ध्रुवो रयीणां चिकेत यत् (ऋ० ९। १०२। ४)। किरासि। आ यथा मन्दसानः किरासि नः (ऋ० ८। ४९। ४)। स्मसि। युष्मे इद्वो अपि ष्मसि सजात्ये (ऋ० ८। १८। १९))। उप। इमामु षु सोमसुतिमुप नः (ऋ० ७। ९३। ६)। पाति। जातो बृहन्नभि पाति तृतीयम् (ऋ० १०। १। ३)। असि।

(१) किं B[3]. (२) The Comm. जामिषु to वरन्त omitted in B[2]. (३) B[2], अष्टके B[3] I[2] B[n].

पुरू यो दग्धासि वना (ऋ० ५ । ६ । ४) । सोम । अनु हि त्वा सुतं सोम मदामसि (ऋ० ६ । ११० । २) । शतस्य । नि धेहि शतस्य नृणाम् (ऋ० १ । ४३ । ७) । आयुषि । पिप्रीषति स्व आयुषि दुरोणे (ऋ० ४ । ४ । ७) । चेतति । सोमो जैत्रस्य चेतति यथा विदे[१] (ऋ० १० । १०६ । २) । विष्टपि । समुद्रस्याधि विष्टपि मनीषिणः (ऋ० ६ । १०७ । १४) । मास्व । नू नो रयिमुप मास्व नृवन्तम् (ऋ० ६ । ६३ । ५) । प्र । अभि सव्येन प्र मृश (ऋ० ८ । ८१ । ६) । उश्मसि । ता वां वास्तून्युश्मसि गमध्यै (ऋ० १ । १५४ । ६) । मूर्धनि । नि पर्वतस्य मूर्धनि सदन्ता (ऋ० ७ । ७० । ३) । सद्म । नक्षद्धोता परि सद्म मिता यन् (ऋ० १ । १७३ । ३) । वरन्त । माद्भिः शरद्भिर्दुरो वरन्त वः (ऋ० २ । २४ । ५) ॥

प्रदिवि वरुण तमसि तिरसि
घृतमिव दिवि मम हि नु विशः ।
उषसि पृथिवि रजसि वहसि
हनति पितरि वि विहि नि मधु ॥४६॥

प्रदिवि वरुण तमसि तिरसि घृतमिव दिवि मम हि । नु[२] विशः । उषसि पृथिवि रजसि वहसि हनति पितरि वि विहि नि मधु[३] इत्येतानि चैकादशि[४]द्वादशिनोरष्टाक्षरे च न प्लुवन्ते । प्रदिवि । इन्द्रं सोमासः प्रदिवि सुतासः (ऋ० ३ । ४६ । ४) । वरुण । अव ते हेळो वरुण नमोभिः (ऋ० १ । २४ । १४) । तमसि । यो अपाचीने तमसि मदन्तीः (ऋ० ७ । ६ । ४) । तिरसि । प्र

(१) B[2] omits यथाविदे. (२) The Comm. प्रदिवि to नु omitted in B[2]B[n]. (३) विशः to मधु omitted in B[2]B[n]. (४) -दृश- B[2]

वेधसश्चित्तिरसि मनीषाम् (ऋ० ४ । ६ । १) । घृतमिव । मधुश्चुतं घृतमिव सुपूतम्[1] (ऋ० ४ । ५७ । २) । दिवि । श्येना इवेदधि दिवि निषेद (ऋ० ४ । ३५ । ८) । मम । अधा कामा इमे मम वि वो मदे (ऋ० १० । २५ । २) । हि । यूपादमुच्चो अशमिष्ट हि षः (ऋ० ५ । २ । ७) । नु विशः । तृ[2]णस्कन्दस्य नु विशः (ऋ० १ । १७२ । ३) । विश इति कस्मात्[3] । तूर्वन्न यामन्नेतशस्य नू रणे (ऋ० ६ । १५ । ५) । उषसि । तमिद्दोषा तमुषसि यविष्ठम् (ऋ० ७ । ३ । ५) । पृथिवि । वहतं पृथिवि बृहत् (ऋ० ५ । ६६ । ५) । रजसि । असूर्ते सूर्ते रजसि निषत्ते (ऋ० १० । ८२ । ४) । वहसि । अतन्द्रो हव्या वहसि हविष्कृतः (ऋ० ८ । ६० । १५) । हनति । पुरू च वृत्रा हनति नि दस्यून् (ऋ० ६ । २९ । ६) । पितरि । कामं कृण्वाने पितरि युवत्याम् (ऋ० १० । ६१ । ६) । वि । ओभे[4] अप्रा रोदसी वि ष आवः (ऋ० ९ । ९७ । ३८) । विहि । यजस्व वीर प्र विहि मनायतः (ऋ० २ । २६ । २) । नि । पराजितासो अप नि लयन्ताम् (ऋ० १० । ८४ । ७) । मधु । आग्नो वायो मधु पिब (ऋ० ८ । २६ । २०) ॥

सहस्राणि ओमतेनासनास
च्छायामिवेषण्यसि सस्तु पाहि ।
गोपीथ्याय पवमानो वसन्ता-
न्सख्याय वोचेमहि मानुषस्य ॥४७॥

सहस्राणि ओमतेन असनाम छायामिव इषण्यसि सस्तु पाहि गोपीथ्याय पवमान । उ वसन्तान् । सख्याय वोचेमहि मानु-

---

(१) वरुण । अव to सुपूतम् omitted in B². (२) ऋ- B³, तृ- Bⁿ. (३) कि B³. (४) उभे Bⁿ.

षस्य[1] इत्येतानि चैका[2]दशिद्वादशिनोरष्टाक्षरे च न प्लुवन्ते। सहस्राणि। त्वं पुरू सहस्राणि शतानि च (ऋ० ८। ६१। ८)। ओमतेन। केनो नु कं ओमतेन न शुश्रुवे (ऋ० ८। ६६। ९)। असनाम। रथं युक्तमसनाम सुषामणि (ऋ० ८। २५। २२)। छायामिव। उप च्छायामिव घृणेः (ऋ० ६। १६। ३८)। इषण्यसि। कं नश्चित्रमिषण्यसि चिकित्वान् (ऋ० १०। ९९। १)। सस्तु। सस्तु माता सस्तु पिता[3] (ऋ० ७। ५५। ५)। पाहि। इन्द्र त्वं रथिरः पाहि नो रिषः (ऋ० ३। ३१। २०)। गोपीथ्याय। जज्ञिष इत्था गोपीथ्याय हि (ऋ० १०। ९५। ११)। पवमान। सोम जहि पवमान दुराध्यः (ऋ० ९। ७९। ३)। उ वसन्तान्। शतं हेमन्ताञ्छतमु वसन्तान् (ऋ० १०। १६१। ४)। वसन्तानिति कस्मात्। इदं त एकं पर ऊ त एकम् (ऋ० १०। ५६। १)। सख्याय। मरुत्वन्तं सख्याय हवामहे (ऋ० १। १०१। १)। वोचेमहि। वयं श्वो वोचेमहि समर्ये (ऋ० १। १६७। १०)। मानुषस्य। अप द्रुहो मानुषस्य दुरो वः (ऋ० १। १२१। ४)॥

आव्य भूमेति पादान्तौ व्यञ्जनेषु ॥ ४८ ॥

आव्य भूम इत्येतौ पादान्तौ व्यञ्जनेषु[4] प्लुवेते। आव्य। अया धिया मनवे श्रुष्टिमाव्या साकम् (ऋ० १। १६६। १३)। भूम। सं विव्य इन्द्रो वृजनं न भूमा भर्ति (ऋ० १। १७३। ६)। तपन्ति शत्रुं स्वर्ण भूमा महासेनासः (ऋ० ७। ३४। १९)। व्यञ्जनाधिकारे पुनर्व्यञ्जनग्रहणं लघावित्यधिकारनिवृत्त्यर्थम्। पादान्ताविति[5] कस्मात्। शूने भूम कदा चन (ऋ० १। १०५। ३)[6]॥

---

(१) B^3, the Comm. सहस्राणि to मानुषस्य omitted in B^2 I^{2}B^n. (२) चैका- B^n, एका- B^{3}B^{2}I^2. (३) पिता०। B^2. (४) व्यंजने B^2. (५) पदांत इति B^2. (६) पादान्ताविति to चन omitted in I^{2}B^n; supplied on the margin in B^3.

श्रुधी हवम् ॥ ४९ ॥

श्रुधि इत्ययं पादान्तो[1] हवम् इत्येतस्मिन्प्लवते। श्रुधी हवम्। इमं मे वरुण श्रुधी हवम् (ऋ० १। २५। १९)। हवमिति कस्मात्। उत्तरेष्वप्येवं योजना॥

सद्मा होता क्ष्मा सनेमि धर्मा सं भूषता रथः ॥५०॥

इत्येते च पा[2]दान्ता यथागृहीतं प्लवन्ते। सद्मा होता। स दूतो विश्वेदभि वष्टि सद्मा होता (ऋ० ४। १। ८)। क्ष्मा सनेमि। कृतं चिद्धि ष्मा सनेमि (ऋ० ४। १०। ७)। धर्मा सम्। समिध्यमानः प्रथमानु धर्मा सम् (ऋ० ३। १७। १)। भूषता रथः। अभूदिदं वयुनमो षु भूषता रथः (ऋ० १। १८२। १)॥

इति श्री[3]पार्षदव्याख्यायामानन्दपुरवास्तव्य-
वज्रटपुत्रउवट[4]कृतौ[5] प्रातिशाख्य-
भाष्येऽष्टमं पटलम्[6] ॥

---

(१) पादांते B². (२) प- B². (३) I² omits श्री-. (४) -पुत्रोव्वट- Bⁿ. (५) -कृते Bⁿ. (६) Bⁿ adds समाप्तम्.

सर्वत्र पूर्वपदान्ताः प्लवन्ते वसुमघयोः परयोः ॥ १ ॥

इत्येतयोः परयोः सतोः । वसु । पुरूवसुर्हि मघवन् (ऋ० ७ । ३२ । २४) ।[1] विश्वावसुं सोम गन्धर्वमापः (ऋ० १० । १३९ । ४) । मघ । अश्वामघा गोमघा वां हुवेम (ऋ० ७ । ७१ । १) । तुविद्देष्णं तुवीमघम् (ऋ० ८ । ८१ । २) ।

सर्वत्रग्रहणं पादान्ताधिकारनिवृत्त्यर्थम् । नैतदस्ति प्रयोजनम् । पूर्वपदान्ता इत्येव सिद्धम् । नहि पूर्वपदान्तस्य[2] पादान्ते[3] संभवोऽस्ति । वक्ष्यति हि—पदाभेदेन पादानां विभागः (१७ । २४) इति । तस्मान्नार्थः सर्वत्रग्रहणेन[4] । यदि न[5] क्रियेत पादान्ते वर्तमानयोरेव वसुमघयोः पूर्वपदान्ताः प्लवन्त इति विज्ञायेत । तदे[6]हैव स्यात्—त्वावतः पुरूवसो (ऋ० ८ । ४६ । १) तुविद्देष्णं तुवीमघम् (ऋ० ८ । ८१ । २) इति । इह न स्यात्—पुरूवसुर्हि मघवन्[7] (ऋ० ७ । ३२ । २४) अश्वामघा गोमघा[8] (ऋ० ७ । ७१ । १) इति । नैष दोषः । नैवं हि शक्यं विज्ञातुं प्रथमानिर्दिष्टत्वात्पादान्तग्रहणस्य ।

अन्तःपादाधिकारनिवृत्त्यर्थं तर्हि सर्वत्रग्रहणं क्रियते । ननु चैतदपि पूर्वपदान्ता इत्येव सिद्धम् । नहि पूर्वपदान्ता अनन्तः[9]पादं संभवन्ति । न सिध्यति । नहि पादादि[10]स्थस्यान्तःपाद[11]कार्यार्थी-

(१) B^n adds वसुं. (२) पूर्वपदांते M. M. (a). (३) पदाते B^3, पादांत- M. M. (a). (४) -ग्रहणे । न M. M., -ग्रहणे न B^3. (५) B^n omits न. (६) I^2 omits इति विज्ञायेत । तदा; B^2 and M. M. (a) omit तदा; विज्ञायते (for विज्ञायेत) M. M. (a). (७) M. M. (a) adds सनादसि. (८) M. M. (a) adds वां हुवेम. (९) B^3I^2, M. M.; अंतः- B^2B^n. (१०) पादादि- पादांत- B^2. (११) B^2B^n; -पादं B^3I^2, M. M.

ष्यन्ते । कस्मात्[१] । यदयं[२] दधिमादिषु यथोद्दयेषु स्तवशब्दस्य पाठे सति[३] —शृणुधि शृणुत यन्व यच्छत स्तव (७ । ३३) इति पादादिप्लुत्यर्थं शते च पठति तज्ज्ञापयति न पादादिस्थस्यान्तःपाद-[४] कार्याणि भवन्तीति । यद्येतज्ज्ञाप्यते[५] पूर्वस्मिन्नन्तःपादाधिकारे—महाँ इन्द्रः परश्च (ऋ० १ । ८ । ५) इति नकारस्य लोपो न प्राप्नोति । नैष दोषः । नात्र पदं[६] गृहीत्वा कार्यमुच्यते किं तर्हि नकारम् । नकारः पुनरन्तःपादं भवति । यत्र तर्हि पदं गृहीत्वा कार्यमुच्यते तत्र दोषो भवत्येव । यथा—वास्तोरित्येतत्पतिशब्द उत्तरे (४ । ४६) इति—वास्तोष्पते प्रति जानीह्यस्मान् (ऋ० ७ । ५४ । १) इति पादादिस्थस्य न स्यात् । अमीवहा वास्तोष्पते (ऋ० ७ । ५५ । १) इत्येतत्पादान्तःस्थस्यैव[७] स्यात् । तथा—शवसो महः सहस इळायाः पात्वित्येकं पुत्रशब्दे पराणि (४ । ५९) इतीहैव स्यात्—पिपर्षि यत्सहसस्पुत्र देवान् (ऋ० ५ । ४ । ६) इति । इह न स्यात्—सहसस्पुत्रो अद्भुतः (ऋ० २ । ७ । ६) इति । एवं तर्हि दीर्घभाव एवैतज्ज्ञापकं भविष्यतीति प्रकरणात् । अन्यत्र त्वन्तःपादाधिकारे वर्तमाने षत्वसत्वयोर्वर्णविशेषणत्वात्—वास्तोष्पते प्रति जानीह्यस्मान् (ऋ० ७ । ५४ । १) सहसस्पुत्रो अद्भुतः[८] (ऋ० २ । ७ । ६) इति सिद्धं भवति । तज्ज्ञापकादिहैव स्यात्—वाजेषु प्रासहं युजम् (ऋ० १ । १२९ । ४) इत्येवमादिषु । इह न स्यात्—

---

(१) B² omits कस्मात्. (२) Bⁿ, M. M. (a); तदयं B³ B², M. M. (३) न सिध्यति to सति omitted in I². ( ) B² Bⁿ; -पादं B³ I², M. M. (५) ज्ञाप्येत M. M. (६) पदांत (for पदं) B². (७) M. M.; इत्येतत्पादांतस्थस्यैव B³ Bⁿ (-स्येव Bⁿ), इत्येतततत्पादांतस्यास्यैवत्स्यात् (*sic*) I²; इत्यंतःपादस्थस्यैव B², M. M. (a). (८) पुत्र M. M.

प्रासहा सम्राट् (ऋ० ८ । ४६ । २०) इत्येवमादिषु । तस्मात्सर्वत्रग्रहणं क्रियते । वसुमघयोरिति कस्मात् । हरी विपक्षसा रथे (ऋ० १ । ६ । २)॥

रवे तुवि ॥ २ ॥

रवे प्रत्यये तुवि इत्यर्थं[1] पूर्वपदान्तः प्लवते । स इदासं तुवीरवम् (ऋ० १० । ९९ । ६) । कथा कविस्तुवीरवान् (ऋ० १० । ६४ । ४) । रव इति कस्मात्[2] । तुविदेष्णं तुवीमघम् (ऋ० ८ । ८१ । २) ॥

विश्व विभ्व धन्व रथर्ति
शत्रु द्युम्न यज्ञेति सहतौ ॥ ३ ॥

विश्व विभ्व धन्व रथ ऋति शत्रु द्युम्न यज्ञ[3] इत्येते पूर्वपदान्ताः सहतौ प्रत्यये प्लवन्ते । विश्व । विश्वासाहमवसे (ऋ० ३ । ४७ । ५) । विभ्व । होतर्विभ्वासहं रयिम्[4] (ऋ० ५ । १० । ७) । धन्व । धन्वासहा नायते (ऋ० १ । १२७ । ३) । रथ । युद्धा हि त्वं रथासहा[5] (ऋ०८ । २६ । २०) । ऋति । तं वो दस्ममृतीषहम् (ऋ० ८ । ८८ । १) । शत्रु । शत्रूषाहः स्वग्नयः (ऋ० ८ । ६० । ६) । द्युम्न । द्युम्नासाहमभि योधान उत्सम् (ऋ० १ । १७१ । ८) । यज्ञ । यज्ञासाहं दुव इषे (ऋ० १० । २० । ७) ॥

प्र चाप्लुते ॥ ४ ॥

प्र इत्येदं[6] च पूर्वपदान्तः प्लवतेऽप्लुते सहतौ प्रत्यये ।[7] अचेति[8] प्रासहस्पतिस्तुविष्मान् (ऋ० १० । ७४ । ६) । अप्लुत इति कस्मात् । मत्सरासो जहृषन्त प्रसाहम् (ऋ० ६ । १७ । ४) ॥

---

(१) इत्येवं B^n. (२) किं B^3B^2. (३) The Comm. विश्व to यज्ञ omitted in B^2. (४) B^2 omits रयिम्. (५) -सहा B^2I^2, -सह B^3B^n. (६) इत्ययं B^n. (७) B^2 adds प्र ।. (८) प्रचेति B^n.

सहप्रवादा उदयास्तमान्ताः ॥ ५ ॥

वसु मघ रव सहति[1] वृति[2] वर्त[3] यवस तम इत्येते च तमान्ता उदयाः सहप्रवादा वेदितव्याः। एतेषामाद्यानां चतुर्णां सहप्रवादानामुक्तान्युदाहरणानि। अवशिष्टानामुत्तरत्रोदाहरिष्यामः॥

पर्यभ्यपापीति वृतावृवर्णे ॥ ६ ॥

परि अभि अप अपि[4] इत्येते च पूर्वपदान्ताः प्लवन्ते वृतौ तु ऋवर्णे प्रत्यये। परि। अपो बिभ्रतं तमसा परीवृतम् (ऋ० १०। ११३। ६)। अभि। घृतेन द्यावापृथिवी अभीवृते (ऋ० ६। ७०। ४)। अभीवृतं कृशनैर्विश्वरूपम्[5] (ऋ० १। ३५। ४)। अप। राधो विश्वायु शवसे अपावृतम् (ऋ० १। ५७। १)। अपि। अपीवृतो अधयन्मातुरूधः (ऋ० १०। ३२। ८)। ऋवर्ण इति कस्मात्[6]। उत व्रजमपवर्तासि गोनाम् (ऋ० ४। २०। ८)॥

अभीवर्तः सूयवसो रथीतमः
पुरूतमोऽनन्तरर्धर्चे उत्तमः ॥ ७ ॥

अभीवर्तः सूयवसः रथीतमः पुरूतमः[7] इत्येतेषां च पूर्वपदान्ताः प्लवन्ते। उत्तमस्तु पुरूतम इत्यर्धर्चस्यादावन्ते वा[8] वर्तमानः प्लवते। अभीवर्तः। अभीवर्तेन हविषा (ऋ० १०। १७४। १)। अभीवर्तो यथाससि (ऋ० १०। १७४। ३।) सूयवसः। प्रजावतीः सूयवसं रिशन्तीः (ऋ० ६। २८। ७)। धेनुं न त्वा सूयवसे[9] (ऋ० ७। १८। ४)। रथीतमः। रथीतमं रथीनाम् (ऋ० १। ११। १) पवमानो रथी-

---

(१) Bⁿ, सहतिः B³B² I². (२) वृतिः B². (३) B² adds सूयवसः. (४) The Comm. परि to अपि omitted in B². (५) कृशनैः। B². (६) किं B³. (७) The Comm. अभीवर्तः to पुरूतमः omitted in B². (८) वा B³I², च B², omitted in B². (९) दुदुचन् added in B²Bⁿ.

तमः (ऋ० ६ । ६६ । २६)। पुरूतमः[1] । पुरूतमं पुरूणाम् (ऋ० ६ । ४५ । २९) । अध्वराणां पुरूतमम् (ऋ० ८ । १०२ । ७)। अनन्तरर्धर्च इति कस्मात्[2] । मरुतां पुरुतममपूर्व्यम् (ऋ० ५ । ५६ । ५)॥

**कवर्दु धान्य मिथु चर्षणि स्तन
पिबेति सर्वत्र यथोदयं च ॥ ८ ॥**

कव ऋदु धान्य मिथु चर्षणि स्तन पिब[3] इत्येते च पूर्वपदान्ताः प्लवन्ते । यथोदयं च यस्मिन्कस्मिन्[4] वा प्रत्यये । कव । तनूशुभ्रं मघवा यः कवासखः (ऋ० ५ । ३४ । ३)। ऋदु । ऋदूपे चिदृदूवृधा (ऋ० ८ । ७७ । ११) । धान्य । वपन्तो बीजमिव धान्याकृतः (ऋ० १० । ९४ । १३) । मिथु । नि ष्वापया मिथूदृशा (ऋ० १ । २९ । ३) । चर्षणि । गां न चर्षणीसहम् (ऋ० ८ । १ । २)। चर्षणीधृतं मघवानमुक्थ्यम् (ऋ० ३ । ५१ । १)। स्तन । स्तनाभुजो अशिश्वोः (ऋ० १ । १२० । ८)। पिब । पिबापिबेदिन्द्र शूर सोमम् (ऋ० २ । ११ । ११) । सर्वत्रग्रहणमनन्तरर्धर्च इत्यधिकारनिवृत्त्यर्थम् ॥

त्विष्युक्थेत्येता उदये मकारे ॥ ९ ॥

त्विषि उक्थ[5] इत्येतौ पूर्वपदान्तौ प्लवेते मकार उदये । त्विषि । त्विषीमन्तो अध्वरस्येव[6] (ऋ० ६ । ६६ । १०)। उक्थ । बृहस्पतिरुक्थामदानि शंसिषत् (ऐ० ब्रा० २ । ३८ । ९)। मकार इति कस्मात्[7] । उक्थभृतं सामभृतम् (ऋ० ७ । ३३ । १४)॥

पर्युवर्क्षेत्यमकारेऽनुनासिके ॥ १० ॥

---

(१) पुरूतमं Bn. (२) किं B3. (३) The Comm. कव to पिब omitted in B2. (४) I2 omits कस्मिन्. (५) B2 omits त्विषि उक्थ. (६) -स्येव० । B2, -स्येव दिद्युत् Bn. (७) किं B3

परि उरु अच्छ[1] इत्येते पूर्वपदान्ताः प्लुवन्तेऽनुनासिके प्रत्यये मकारं वर्जयित्वा। परि। चक्राणासः परीणहं पृथिव्याः (ऋ० १। ३३। ८)। उरु। उरूणसावसुतृपौ[2] (ऋ० १०। १४। १२)। अच्छ। अच्छानहो नह्यतनोत सोम्याः[3] (ऋ० १०। ५३। ७)। अमकार इति कस्मात्[4]। विप्रासः परिमामृशुः (ऋ० ८। ९। ३)॥

पित्र्य माहिनाकृषि भङ्गुराश्व
विश्वदेव्य भेषज तुग्र्य पस्त्य।
सुम्नर्तरातीत्युदये वकारे॥ ११॥

पित्र्य माहिन अकृषि भङ्गुर अश्व विश्वदेव्य भेषज तुग्र्य पस्त्य सुम्न ऋत अराति[5] इत्येते च पूर्वपदान्ताः प्लुवन्ते वकारे प्रत्यये। पित्र्य। योषेव पित्र्यावती (ऋ० ९। ४६। २)। माहिन। त्र्यनीकः पत्यते माहिनावान् (ऋ० ३। ५६। ३)। अकृषि। बह्वन्नामकृषी-वलाम् (ऋ० १० १४६। ६)। भङ्गुर। अप हत रक्षसो भङ्गुरावतः (ऋ० १०। ७६। ४)। अश्व। अश्वावतीं सोमा-वतीम् (ऋ० १०। ९७। ७)। विश्वदेव्य। विश्वकर्मणा विश्वदेव्यावता (ऋ० १०। १७०। ४)। भेषज। भेषजावान्[6]। तुग्र्य। मन्दन्तु तुग्र्यावृधः (ऋ० ८। १। १५)। पस्त्य। मर्यो देव धन्व पस्त्यावान् (ऋ० ९। ९७। १८)। सुम्न। सुम्नावरी सूनृता ईरयन्ती (ऋ० १। ११३। १२)। ऋत। ऋतावा यस्य रोदसी (ऋ० ३। १३। २)। अराति। अरातीवा मा नस्तारीत्[7] (ऋ० ९। ११४। ४)। वकार इति कस्मात्। ये अश्वदा उत (ऋ० ५। ४२। ८)॥

---

(१) परि उरु अच्छ omitted in B². (२) -तृपो०। B², -तृप उदंवलो Bⁿ. (३) नह्यतन। B². (४) किं B³. (५) The Comm. पित्र्य to अराति omitted in B². (६) भेषजा भेषजावान् (for भेषजावान्) M. M. (७) नः। B².

वैभ्वादयश्च ॥ १२ ॥

वैभ्वादयश्च पूर्वपदान्ताः प्लवन्ते वकारे प्रत्यये । वैभ्वादीनुत्तरत्रोदाहरिष्यामः ॥

पृशनादयस्तु यकारे ॥ १३ ॥

पृशनादयस्तु पूर्वपदान्ताः प्लवन्ते यकारे प्रत्यये । पृशनादींश्चोत्तरत्रोदाहरिष्यामः ॥

अराति कवि सुक्रतु श्रुधि
पितु सुम्न रय्यृताश्वेति चैते ॥ १४ ॥

इत्येते च पूर्वपदान्ताः प्लवन्ते यकारे प्रत्यये । अराति । अरातीयतो नि दहाति वेदः[1] (ऋ० १ ; ९९ । १) । कवि । कवीयमानः क इह प्र वोचत् (ऋ० १ । १६४ । १८) । सुक्रतु । वि यो ममे रजसी सुक्रतूयया (ऋ० १ । १६० । ४) । श्रुधि । श्रुधीयतश्चियतथः[2] (ऋ० ६ । ६७ । ३) । पितु । प्रवत्ते अग्ने जनिमा पितूयतः (ऋ० १० । १४२ । २) । सुम्न । सुम्नायव ईमहे देवयन्तः (ऋ० ६ । १ । ७) । रयि । अयमु वां पुरुतमो रयीयन् (ऋ० ३ । ६२ । २) । ऋत । ऋतायिनी मायिनी[3] (ऋ० १० । ५ । ३) । अश्व । अश्वायन्तो गव्यन्तः[4] (ऋ० १० । १६० । ५) । यकार इति कस्मात्[5] । ये अश्वदा उत[6] (ऋ० ५ । ४२ । ८) ॥

न त्वश्व सुम्नर्त वृषेति पद्या
एकाक्षरादा उदये यकारे ॥ १५ ॥

न तु[7] खलु प्लवन्ते अश्व सुम्न ऋत वृष[8] इत्येते पद्या एकाक्षरादौ यकारे प्रत्यये । अश्व । अश्वयुर्गव्यू रथयुः[9] (ऋ० १ । ५१ । १४) ।

---

(१) दहाति । B². (२) यत० । B², ययतोः महित्वा Bⁿ. (३) मायिनी० । B². (४) गव्यंतो० । B². (५) किं B³. (६) उत वा सं० । B². (७) B² omits तु. (८) The Comm. अश्व to वृष omitted in B². (९) रथयुर्न० । B², रथयुर्वसूयुः Bⁿ.

सुम्न । तं वः शर्धं मारुतं सुम्नयुः[1] (ऋ० २ । ३० । ११) । ऋत । त्वं न इन्द्र ऋतयुः (ऋ० ८ । ७० । १०) । वृष । अत्यो न यूथे वृषयुः[2] (ऋ० ९ । ७७ । ५) । एकाक्षरादाविति कस्मात् । अश्वायन्तो गव्यन्तः[3] (ऋ० १० । १६० । ५) । सुम्नायव ईमहे[4] (ऋ० ६ । १ । ७) । ऋतायिनी मायिनी[5] (ऋ० १० । ५ । ३) । वृषायमाणोऽवृणीत (ऋ० १ । ३२ । ३) । यकार इति कस्मात्[6] । ऋतावा यस्य रोदसी (ऋ० ३ । १३ । २) ॥

पृशनाजिरर्जु मधु पुत्रि जनि
क्रतु वल्गु वन्धुर वृकाङ्कु दम ।
वृजिनाध्वरीषु वृष मध्य सखि
स्तभु दुच्छुनाघ यवि शत्रु वसु ॥ १६ ॥

पृशन अजिर ऋजु मधु पुत्रि जनि क्रतु वल्गु वन्धुर वृक अङ्कु दम वृजिन अध्वरि इषु वृष मध्य सखि स्तभु दुच्छुन अघ यवि शत्रु वसु[7] इतीमे पृशनादयो ये पूर्वसूत्रे निर्दिष्टाः । पृशन । ता अस्य पृशनायुवः (ऋ० १ । ८४ । ११) । अजिर । स्तोम[8] इन्द्राजिरायते (ऋ० ८ । १४ । १०) । ऋजु । ऋजूयन्तमनु व्रतम् (ऋ० १ । १३६ । ५) । मधु । शमू षु वां मधूयुवा (ऋ० ५ । ७४ । ९) । पुत्रि । पुत्रीयन्तः सुदानवः (ऋ० ७ । ९६ । ४) । जनि । जनीयन्तो न्वग्रवः (ऋ० ७ । ९६ । ४) । क्रतु । क्रतूयन्ति क्रतवः (ऋ० १० । ६४ । २) ।

---

(१) सुम्नयुर्गिरा । B². (२) वृषयुः कनि० । B², वृषयुः कनिक्रदत् Bⁿ. (३) गव्यन्तो० । B². (४) ईमहे० । B², ईमहे देवयन्तः Bⁿ. (५) Bⁿ. मायिनी० । B², मायिनी omitted in B³I². (६) किं B³ (७) The Comm. पृशन to वसु omitted in B²Bⁿ. (८) M. M.; I² corrects स्तोमम् to स्तोम; स्तोमम् B³B²Bⁿ.

वल्गु । वल्गूयति वन्दते[1] (ऋ० ४ । ५० । ७) । वन्धुर । यः सूर्यां वहति वन्धुरायुः (ऋ० ४ । ४४ । १) । वृक । वृकायुरादिदेशति (ऋ० १० । १३२ । ४) । अङ्कु । यमङ्कूयन्तमानयन् (ऋ० ६ । १५ । १७) । दम । शृण्वे वीर उग्रमुग्रं दमायन् (ऋ० ६ । ४७ । १६) ।

वृजिन । सत्यध्वृतं वृजिनायन्तम्[2] (ऋ० १० । २७ । १) । अध्वरि । जामयो अध्वरीयताम् (ऋ० १ । २३ । १६) । इषु । क्रत्वा वेधा इषूयते (ऋ० १ । १२८ । ४) । वृष । वृषायमाण उप[3] (ऋ० ३ । ५२ । ५) । मध्य । मध्यायुव उप शिक्षन्ति[4] (ऋ० १ । १७३ । १०) । सखि । विश्वश्रुष्टिः सखीयते (ऋ० १ । १२८ । १) । स्तभु । स्तभूयमानं वहतो वहन्ति (ऋ० ३ । ७ । ४) । दुच्छुन । किमस्मान्दुच्छुनायसे[5] (ऋ० ७ । ५५ । ३) । अघ । अघायते जातवेदः (ऋ० ८ । ७१ । ७) । यवि । स धर्ता जज्ञे सहसा यवीयुत् (ऋ० १० । ६१ । ९) । शत्रु । शत्रूयन्तो अभि[6] (ऋ० १ । ८९ । १५) । वसु । अश्वयुर्गव्यू रथयुर्वसूयुः (ऋ० १ । ५१ । १४) ॥

वैभु ह्रादुनि पुष्ट पर्वताहुति
शुभ्र हृदयामति सह वृष्ण्य शक्ति ।
सप्ति स्वधिति कृशन वयुनर्ण
घृणि हित धित विषु सुतत्विय नीथ ॥१७॥

वैभु ह्रादुनि पुष्ट पर्वत आहुति शुभ्र हृदय अमति सह वृष्ण्य शक्ति सप्ति स्वधिति कृशन वयुन ऋण घृणि हित धित विषु सुत

---

(१) वंदते० । B^2, वंदते पूर्वभाजं B^n. (२) -यन्तं० । B^2, -यन्तमाभुं B^n. (३) B^3I^2, वृषायमाण उप० । B^2, वृषायमाणो वृणीत सोम B^n. (४) शिक्षंति० । B^2, शिक्षंति यज्ञैः B^n. (५) -यसे० । B^2. (६) अभि येन । B^2.

ऋत्विय नीथ[1] इतीमे वैभ्वादयो ये पूर्वसूत्रे निर्दिष्टाः। वैभु। वैभूवसो मूर्धन्यध्न्यायाः (ऋ० १०। ४६। ३)। ह्रादुनि। अभ्रया चिन्मुहुरा ह्रादुनीवृतः (ऋ० ५। ५४। ३)। पुष्ट। पुष्टावन्तो यथा पशुम् (ऋ० ८। ४५। १६)। पर्वत। चरन्तः पर्वतावृधः (ऋ० ९। ४६। १)। आहुति। युवानमाहुतीवृधम् (ऋ० ९। ६७। २९)। शुभ्र। अन्तः शुभ्रावता पथा (ऋ० ९। १५। ३)। हृदय। उतापवक्ता हृदयाविधश्चित्[2] (ऋ० १। २४। ८)। अमति। न मे स्तोतामतीवा न[3] (ऋ० ८। १९। २६)। सह। सहावाँ इन्द्र सानसिः (ऋ० १। १७५। २)। वृष्ण्य। यः पत्यते वृषभो वृष्ण्यावान् (ऋ० ६। २२। १)। शक्ति। शक्तीवो यद्विभरा रोदसी[4] (ऋ० ५। ३१। ६)।

सप्ति। सप्तीवन्ता सपर्यवः (ऋ० ७। ९४। १०)। स्वधिति। रुक्मो न चित्रः स्वधितीवान् (ऋ० १। ८८। २)। कृशन। मद-च्युतः कृशनावतः[5] (ऋ० १। १२६। ४)। वयुन। वि होत्रा दधे वयुनाविदेक इत् (ऋ० ५। ८१। १)। ऋण। ऋणावा बिभ्यद्धन-मिच्छमानः[6] (ऋ० १०। ३४। १०)। घृणि। घृणीवाञ्चेतति त्मना[7] (ऋ० १०। १७६। ३)। हित। विपन्यामहे वि पणिर्हि-तावान् (ऋ० १। १८०। ७)। धित। श्रुष्टीवानं धितावानम् (ऋ० ३। २७। २)। विषु। विषूवृदिन्द्रो अमतेः[8] (ऋ० १०। ४३। ३)। सुत। सुतावन्तस्त्वा वयम् (ऋ० ८। ६५। ६)। ऋत्विय।

---

(१) वैभु to नीथ omitted in B² Bⁿ. (२) -विधः। B². पर्वत। चरन्तः to चित् omitted in I². (३) B³, -मतीवा०। B², -मतीवा। Bⁿ I². (४) विभरा०। B², विभरा रोदसी उभे Bⁿ. (५) -वतो०। B². (६) धनम्। B². (७) चेतति B². (८) अमतेरुत। Bⁿ, अमतेरुत क्षुधः। B².

इयं त ऋत्वियावती (ऋ० ८ । १२ । १०) । नीथ । नीथाविदो जरितारः (ऋ० ३ । १२ । ५) ॥

नर्तवाकेनाश्ववित्सुम्नयन्ता
वसुवसु प्रसहानोऽभिवावृते ।
परिवृतं नाभिवृत्य ॥ १८ ॥

ऋतवाकेन अश्ववित् सुम्नयन्ता वसुवसु प्रसहानः अभिवावृते परिवृतं न अभिवृत्य[1] इत्येते पूर्वपदान्ताः पूर्वलक्षणप्राप्ता न प्लवन्ते । ऋतवाकेन । ऋतवाकेन सत्येन (ऋ० ९ । ११३ । २) । अश्ववित् । परि णो अश्वमश्ववित् (ऋ० ९ । ६१ । ३) । सुम्नयन्ता । गीर्भिर्मित्रावरुणा सुम्नयन्ता (ऋ० ६ । ४९ । १) । वसुवसु । वसुवसु वः पार्थिवाय[2] (ऋ० १० । ७६ । ८) । प्रसहानः । स सनीळेभिः प्रसहानो अस्य[3] (ऋ० १० । ९९ । २) । प्र चाप्लुते (९ । ४) इति प्राप्ते । अभिवावृते । येनेन्द्रो अभिवावृते[4] (ऋ० १० । १७४ । १) । पर्यभ्यपापीति वृतावृवर्णे[5] (९ । ६) इति प्राप्ते । अत्रोच्यते । वकारेण व्यवधानात्प्राप्तिरेव नास्ति । तस्मान्नार्थः प्रतिषेधनिपातनेन[6] । एवं सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यः व्यवहितेऽपि निमित्ते क्वचित्कार्यं भविष्यतीति । किमेतस्य ज्ञापनेन प्रयोजनम् । उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम् (३ । ७) इति इन्द्रः इत्यत्र नकारदकाररेफव्यवहितस्यापि स्वरितस्याकारस्यानुदात्तत्वं

---

(१) ऋतवाकेन to अभिवृत्य omitted in B^2B^n. (२) पार्थिवाय० । B^2, पार्थिवा सुन्वते B^n. (३) B^3, सहानः । $B^2B^nI^2$. (४) -वावृते० । B^2. (५) पर्यभ्य- to -वर्णे omitted in I^2. (६) B^2B^n, प्रतिषेधनिपातेन B^3, प्रतिपातेन corrected to प्रतिषेधेन in I^2.

भवतीति। स्यान्मतं[1] वचनाद्भविष्यतीति। अस्ति वचनस्यावकाशः। प्रउगम् (ऋ० १०। १३०। ३) इति। परिवृतं न। अपा वृधि परिवृतं न राधः (ऋ० ७। २७। २)। नेति कस्मात्[2]। अपो बिभ्रतं तमसा परीवृतम् (ऋ० १०। ११३। ६)। अभिवृत्य। अभिवृत्य सपत्नान् (ऋ० १०। १७४। २)॥

अश्ववच्च पादान्ते॥ १९॥

अश्ववत् इत्येतस्मिन्पूर्वपदान्तः[3] पादान्ते[4] न तु[5] प्लवते। अश्ववत्। दधानो गोमदश्ववत् (ऋ० ८। ४६। ५)। पादान्त इति कस्मात्[2]। अश्वावद्गोमद्यवमत् (ऋ० ८। ९३। ३)॥

सर्वत्र परे मघस्य॥ २०॥

मघस्य[6] इति षष्ठ्यन्ते परे सति वसुमघयोरिति प्राप्ते पूर्वपदान्तो[7] न प्लुवते। मघस्य। प्रार्य स्तुषे तुविमघस्य दानम् (ऋ० ५। ३३। ६)। षष्ठ्यन्तादन्यत्र प्लुवते। श्रुधि चित्रामघे हवम् (ऋ० १। ४८। १०)। सर्वत्रग्रहणं पादान्ताधिकारनिवृत्त्यर्थम्॥

अश्वयूपायाश्वयुजोऽश्वयोगाः
सहवाहः सुम्नयन्तर्तयन्त।
सहवसुं सहवत्सर्तयुक्तिं
सहवीरं वयुनवच्चकार॥ २१॥

इत्येतेषां च पूर्वपदान्ताः पूर्वलक्षणप्राप्ता न प्लुवन्ते। अश्वयूपाय। चषालं ये अश्वयूपाय तक्षति (ऋ० १। १६२। ६)। अश्वयुजः।

---

(१) B[3] gives on the margin त्वत्र (for -न्मतं) either as a correction or as a different reading. (२) किं B[3]. (३) -पदान्ताः B[2]. (४) पादान्ते struck out in I[2]. (५) तु struck out in I[2]. (६) मघ corrected to मघस्य in I[2], मघ B[3]B[2]B[n]. (७) B[2], पूर्वपदान्तो omitted in B[3]I[2]B[n].

वयोवृधो अश्वयुजः परिज्रयः (ऋ० ५ । ५४ । २)। अश्वयोगाः। उत न ईं मतयोऽश्वयोगाः (ऋ० १। १८६ । ७)। सहवाहः। बृहस्पतिं सहवाहो वहन्ति (ऋ० ७ । ६७ । ६)। सुम्नयन्ता। गोभिर्मित्रावरुणा सुम्नयन्ता (ऋ० ६ । ४६। १)। ऋतयन्त। कदु स्तुवन्त ऋतयन्त[1] (ऋ० ८ । ३ । १४)। सहवसुम्। यो नार्मरं सहवसुम्[2] (ऋ० २ । १३ । ८)। सहवत्सा। दानुः शये सहवत्सा न[3] (ऋ १। ३२ । ६)। ऋतयुक्तिम्। ऋतं वदन्त ऋतयुक्तिमग्मन् (ऋ० १० । ६१ । १०)। सहवीरम्। धाता रयिं सहवीरं तुरासः (ऋ० ३ । ५४ । १३)। वयुनवच्चकार। सूर्येण वयुनवच्चकार[4] (ऋ० ६ । २१ । ३)। चकारेति कस्मात्[5]। ज्योतिस्तमसो वयुनावदस्थात् (ऋ० ४ । ५१ । १)॥

सुम्नायुर्जुह्व ऋतायन्नृतायु-
मुग्रादेवं दक्षिणावानृतायोः।
वृषारवाय सूमयं शताव-
न्नपीजुवापरीवृतोऽनपावृत्॥ २२॥

सुम्नायुर्जुह्वे ऋतायन् ऋतायुम् उग्रादेवम् दक्षिणावान् ऋतायोः वृषारवाय सूमयम् शतावन् अपीजुवा अपरीवृतः अनपावृत्[6] इत्येतेषां पूर्वपदान्ताः प्लवन्ते। सुम्नायुर्जुह्वे। सुम्नायुर्जुह्वे अध्वरे (ऋ० ६ । २ । ३)। जुह्व इति कस्मात्[7]। देवाञ्जिगाति सुम्नयुः (ऋ० ३ । २७ । १) ऋतायन्। सर्गो न सृष्टो अर्वतीर्ऋतायन् (ऋ० ७ । ८७ । १)। ऋतायुम्। उदीमृतायुमीरयत्[8] (ऋ० ८ । ७६ । ६)।

---

(१) B² adds देवता०।. (२) सहवसुं नि०। B². (३) न०। B², न धेनुः Bⁿ. (४) सूर्येण to चकार omitted in B³. (५) किं B³B². (६) The Comm. सुम्नायुर् to -वृत् omitted in B²Bⁿ. (७) किं B³. (८) -युमीमृत। B².

एतेषां त्रयाणाम्—एकाक्षराद्वा उदये यकारे (९। १५) इति प्रतिषेधे प्राप्ते निपातनम्। उग्रादेवम्। उग्रादेवं हवामहे (ऋ० १। ३६। १८)। दक्षिणावान्। हस्ते दधे दक्षिणे दक्षिणावान् (ऋ० ३। ३९। ६) ऋतायोः। प्रणेतारः कस्य चिदृतायोः (ऋ० १। १६९। ५)। अस्यापि[1] प्रतिषेधे प्राप्ते निपातनम्। वृषारवाय। वृषारवाय वदते (ऋ० १०। १४६। २)। सूमयम्। तुविक्षं ते सुकृतं सूमयं धनुः (ऋ० ८। ७७। ११)। शतावन्। वहिष्ठयोः शतावन्नश्वयोरा (ऋ० ६। ४७। ९)। अपीजुवा। उषासानक्ता जगतामपीजुवा (ऋ० २। ३१। ५)। अपरीवृतः। अपरीवृतो वसति प्रचेताः[2] (ऋ० २। १०। ३)। अनपावृत्। इत्था सृजाना अनपावृदर्थम् (ऋ० ६। ३२। ५)॥

इन्द्रावतः सोमावतीमवायती
दीर्घाधियोऽमित्रायुधो रथीतरः।
अन्नावृधं विश्वापुषं वसूजुवं
विश्वाभुवे यज्ञायते घृतावृधा॥ २३॥

इन्द्रावतः सोमावतीम् अवायती दीर्घाधियः अमित्रायुधः रथीतरः अन्नावृधम् विश्वापुषम् वसूजुवम् विश्वाभुवे यज्ञायते घृतावृधा[3] इत्येतेषां पूर्वपदान्ताः प्लवन्ते[4]। इन्द्रावतः। ऋजिप्य ईमिन्द्रावतो न भुज्युम् (ऋ० ४। २७। ४)। सोमावतीम्। अश्वावतीं सोमावतीम् (ऋ० १०। ९७। ७)। अवायती। कन्या वारवायती (ऋ० ८। ९१। १)। दीर्घाधियः[5]। दीर्घाधियो रक्षमाणा असुर्यम्[6]

(१) B³I² add तथैव. (२) B² omits प्रचेताः. (३) The Comm. इन्द्रावतः to -वृधा omitted in B². (४) इन्द्रावतः (Sūtra) to प्लुवन्ते omitted on f. 133, but given on f. 133b in I². (५) दीर्घाधियः omitted in B³. (६) रक्षमाणाः। B³.

(ऋ० २ । २७ । ४)। अमित्रायुधः। अमित्रायुधो मरुतामिव प्रयाः (ऋ० ३ । २६ । १५)। रथीतरः। नकिष्ट्वद्रथीतरः (ऋ० १ । ८४ । ६)। अन्नावृधम्। अन्नावृधं प्रति चरन्त्यन्नैः (ऋ० १० । १ । ४)। विश्वापुषम्। पुंसः पुत्राँ उत विश्वापुषं रयिम् (ऋ० १ । १६२ । २२)। वसूजुवम्। वसवानं वसूजुवम् (ऋ० ८ । ६६ । ८ ।)। विश्वाभुवे। अर्चा विश्वानराय विश्वाभुवे (ऋ० १० । ५० । १)। यज्ञायते। यज्ञायते वा पशुषः[1] (ऋ० ५ । ४१ । १)। घृतावृधा। घृतश्रिया घृतपृचा घृतावृधा (ऋ० ६ । ७० । ४) ॥

सुम्नायन्निन्मित्रायुव ऋषीवो देवावान्दिवः ।
एवावदस्य क्षेत्रासामृताव्ने सदनासदे ॥ २४ ॥

सुम्नायन्नित् मित्रायुवः ऋषीवः देवावान्दिवः एवावदस्य क्षेत्रासाम् ऋताव्ने सदनासदे[2] इत्येतेषां पूर्वपदान्ताः प्लवन्ते। सुम्नायन्नित्। सुम्नायन्निद्विशो अस्माकम् (ऋ० १ । ११४ । ३)। इदिति कस्मात्[3]। अर्चामि सुम्नयन्नहम् (ऋ० १ । १३८ । १)। मित्रायुवः[4]। मित्रायुवो न पूर्पतिम् (ऋ० १ । १७३ । १०)। ऋषीवः[5]। शिप्रिन्नृषीवः शचीवः (ऋ० ८ । २ । २८)। देवा[6]वान्दिवः। सोमं भरद्दादृहाणो देवावान्दिवः (ऋ० ४ । २६ । ६)। दिव इति कस्मात्। स गृणानो अद्भिर्देववानिति (ऋ० १० । ६१ । २६)। एवा[7]वदस्य। एवावदस्य यजतस्य[8] (ऋ० ५ । ४४ । १०)। क्षेत्रासाम्[9]। क्षेत्रासां ददथुरुर्वरासाम्[10] (ऋ० ४ । ३८ । १)।

---

(१) प०। B², पशुपो न Bⁿ. (२) सुम्नायन्नित् (Comm.) to -सदे omitted in B². (३) किं B³. (४) मित्रयुवः B². (५) ऋषिवः B². (६) देव० B². (७) एव० B². (८) यजतस्य०। B²; यजतस्य सध्रेः Bⁿ. (९) क्षेत्रसाम् B², omitted in B³. (१०) ददथुः ।B².

ऋताग्ने[1] । ऋताग्ने बृहते शुक्रशोचिषे (ऋ० ८ । १०३ । ८)।
सदना[2]सदे । देवाय सदनासदे (ऋ० ६ । ६८ । १०) ॥

पदेष्वन्तरनिङ्ग्येषु प्लुतिः पद्येषु चोत्तरा ॥ २५ ॥

अनिङ्ग्येषु पदेषु चान्तः पद्येषु चान्तरुत्तरा प्लुतिर्भविष्यति यदित ऊर्ध्वमनुक्रमिष्यामः । उत्तरत्रोदाहरिष्यामः ॥

वृषस्व वन्थ वृध्वांसं वाता वातुर्वनो वृतुः ॥
वृते वृषाणा वृषाणो वृजे वन्धि मृजुर्मृशुः ।
मृजे मृजीत वानैषां व मेति सदृशादिषु ॥ २६ ॥

वृषस्व वन्थ वृध्वांसम् वाता वातुः वनः वृतुः वृते वृषाणाः वृषाणः वृजे वन्धि मृजुः मृशुः मृजे मृजीत वान्[3] इत्येतेषामुदयानां सदृशादिषूदयेषु वकारमकारौ प्लवेते । वृषस्व । उद्वावृषस्व मघवन् (ऋ० ८ । ६१ । ७) । वन्थ । यद्वावन्थ पुरुष्टुत (ऋ० ८ । ६६ । ५) । वृध्वांसमिति ग्रहणमनर्थकं श्रावयादिषु वावृधेति[4] पाठात्[5] । नानर्थकम्[6] । श्रावयादिषु वावृधेति धकारान्तस्य ग्रहणम् । इह तु [7]दकारान्तग्रहणम्—सोष्मा तु पूर्व्येण सहोच्यते सकृत्स्नेन (६ । २) इति दकारभावात् । वृद्ध्वांसम् । वावृद्ध्वांसं चिदद्रिवः[8] (ऋ० ८ । ६८ । ८) । वाता । उप ग्रध्नं वावाता वृषणा (ऋ० ८ । ४ । १४) । वातुः । वावातुः सख्युरा गहि

(1) ऋतग्ने B², omitted in B³. (2) सदन० B². (3) वृषस्व to वान् omitted in B². (4) B³B², द्रावयदादहवावृधेति पाठात् I², वावृधेति omitted in Bⁿ. (5) पठितत्वात् । द्रावयदादहवावृधेति पाठात् (for पठात्) Bⁿ. (6) नार्थकं BⁿI². (7) द - B³, M. M.; दृध- Bⁿ; ध्व - B²; द- or द्ध - (?) I². (8) अद्रिवो ० । B².

(ऋ० ८ । १ । १६) । वनः । विश्वेभिर्येद्वावनः शुक्र[1] (ऋ० ४ । ११ । २) । वृतुः । विश्वा चक्रेव वावृतुः (ऋ० ४ । ३० । २) ।

वृते । येनेन्द्रो अभिवावृते (ऋ० १० । १७४ । १) । वृषाणाः । महो वाजस्य सातौ वावृषाणाः (ऋ० ६ । २६ । १) । वृषाणः । उद्वावृषाणो राधसे[2] (ऋ० ४ । २९ । ३) । वृजे । प्र वावृजे सुप्रया बर्हिः[3] (ऋ० ७ । ३९ । २) । वन्धि । वावन्धि यज्यूँरुत तेषु धेहि[4] (ऋ० ५ । ३१ । १३) । मृजुः । वशं देवासस्तन्वी नि मामृजुः (ऋ० १० । ६६ । ९) । मृशुः । विप्रासः परिमामृशुः (ऋ० ८ । ९ । ३) । मृजे । नि मामृजे पुर इन्द्रः सु सर्वाः (ऋ० ७ । २६ । ३) । मृजीत । वि स्रातये तन्वं मामृजीत (ऋ० ७ । ९५ । ३) । वान । यद्वावान पुरुतमं पुराषाट् (ऋ० १० । ७४ । ६) ।

पदेष्वन्तरिति पूर्वपदान्ताधिकारनिवृत्त्यर्थम्[5] । अन्तरनिङ्ग्येष्विति कस्मात् । सं ते शस्तिर्देववाता जरेत (ऋ० ४ । ३ । १५) । सदृशादिष्विति कस्मात् । वकारस्य मकारादिषु मा भूत् । मकारस्य वकारादिषु[6] ॥

सहेत्यादिः पूर्वपदोपधः स-
न्नेकाक्षरचर्षणिधन्ववर्जम् ॥ २७ ॥

सह इत्यादिः पूर्वपदोपधः सन्प्लुवत एकाक्षरं च पूर्वपदं चर्षणि धन्व इत्येते च[7] वर्जयित्वा । विश्वासाहमवसे नूतनायोग्रम् (ऋ० ३ । ४७ । ५) । शत्रूषाहः स्वग्नयः (ऋ० ८ । ६० । ६) । पूर्व-

---

(१) शुक्र० । B². (२) राधसे० । B². (३) सुप्रयाः । B² Bⁿ. (४) उत । B². (५) B², -र्थः B³I²Bⁿ. (६) B² adds मा भूत्. (७) Bⁿ, च omitted in B³B²I².

पदोपधः सन्निति कस्मात्[1] । अषाळ्हाय सहमानाय वेधसे (ऋ० २ । २१ । २)। एकाक्षर[2]चर्षणिधन्ववर्जमिति कस्मात् । एकाक्षरम् । प्रासहा सम्राट् सहुरिम्[3] (ऋ० ८ । ४६ । २०) । चर्षणि । गां न चर्षणीसहम् (ऋ० ८ । १ । २)। धन्व । धन्वासहा नायते (ऋ० १ । १२७ । ३)। सहेत्यादिरिति[4] धातुग्रहणात्—चतुःसहस्रम् (ऋ० ५ । ३० । १५) इत्यत्र न भवति ॥

न तु पादस्याष्टिनोऽन्तं गतस्य ॥ २८ ॥

न तु खल्वस्याष्टाक्षरस्य पादस्यान्तं गतस्य सह इत्यादिः प्लुवते । तं वो दस्ममृतीषहम् (ऋ० ८ । ८८ । १)। अष्टिन इति कस्मात्[5] । सहस्रवाजमभिमातिषाहम् (ऋ० १० । १०४ । ७)। अन्तं गतस्येति कस्मात् । यज्ञासाहं दुव इषे (ऋ० १० । २० । ७)॥

न द्वादशिनोऽनभिमातिपूर्वः ॥ २९ ॥

न तु खलु द्वादशाक्षरस्य पादस्यान्ते वर्तमानस्योत्तरपदस्य सहतेरादिरनभिमातिपूर्वः सन्[6] प्लुवते । सत्रासाहो जनभक्षो जनंसहः (ऋ० २ । २१ । ३)। द्वादशिन इति कस्मात्[1] । सतोवीरा उरवो व्रातसाहाः (ऋ० ६ । ७५ । ९)। अन्तं गतस्येति कस्मात् । सत्रासाहे नम इन्द्राय वोचत (ऋ० २ । २१ । २)। अनभिमातिपूर्व इति कस्मात् । तमृषिमुग्रमभिमातिषाहम् (ऋ० १० । ४७ । ३)॥

अभिमातिनृपृतनोपधस्तु सर्वत्र परे प्लवते यकारे ॥ ३० ॥

---

(१) किं B[3]. (२) एकाक्षरं B[n]. (३) B[2]B[n] add सहंतं. (४) B[3] omits -रिति. (५) किं B[3]B[2]. (६) सन्न B[2].

अभिमाति नृ पृतना इत्येवमुपधस्तु सहतेरादिः सर्वत्र यकारे परे प्लवते। अभिमाति। इन्द्राभिमातिषाह्ये (ऋ० ३। ३७। ३)। नृ। नृषाह्ये सासह्वाँ अमित्रान् (ऋ० १। १००। ५)। अस्मभ्यं तद्रिरीहि सं नृषाह्ये (ऋ० ६। ४६। ८)। पृतना। पृतनाषाह्याय च (ऋ० ३। ३७। १)। किमर्थं सहतेर्यकारे परे पुनरेव[1] विधीयते ननु पूर्वेणैव सिद्धम्। न सिध्यति। कथम्। शेषे चापठिते सति (७। ३३) इत्यधिकारात्पूर्वेण[2] संयोगे न प्राप्नोति। तस्मात्संयोगपरार्थं पुनर्विधीयते। यकार इति कस्मात्। तमग्ने पृतनाषहम् (ऋ० ५। २३। २)। सर्वत्रेति कस्मात्। अष्टिद्वादशिनोः पादान्तगतस्येत्यधिकारात्—नृषाह्ये सासह्वाँ अमित्रान् (ऋ० १। १००। ५) पृतनाषाह्याय च (ऋ० ३। ३७। १) इत्यत्र न स्यादिति तस्मात्सर्वत्रग्रहणम्[3]॥

आवयादीनामुदयास्त्रिवर्णाः
पदैकदेशा इति तान्प्रतीयात्॥ ३१॥

आवय इत्येवमादीनां प्लुतानामुदयास्त्रिवर्णा एव वेदितव्याः। अकार उच्चारणार्थो द्रष्टव्यः। पदानामेकदेशा इति तान्श्रावयादीन्प्रतीयात्। तस्माच्छ्रावयेति गृहीते[4]—आ[5]श्रावयन्तइव (ऋ० १। १३९। ३) इत्यत्रापि भवति। तानुत्तरत्रोदाहरिष्यामः॥

आवय यावय च्यावय
यामय रामय मामह वावस।
द्रावय दादृह वावृध

---

(१) एवं B². (२) B² adds वा. (३) B³B², तस्मात्सर्वत्रग्रहणम् omitted in I²Bⁿ. (४) गृहीति corrected to ग्रहणात् in I². (५) अ-B².

तातृष सासह रारप।
आद्यक्षरं प्लुतं तेषाम् ॥ ३२ ॥

आवय यावय च्यावय यामय रामय मामह वावस द्रावय दाहह वावृध तातृष साहस रारप[1] इत्येते आवयादयः। तेषामाद्यक्षरं प्लुतं भवति। आवय। आवया वाचम्[2] (ऋ० ८ । ९६ । १२)। आश्रावयन्तइव श्लोकम् (ऋ० १ । १३९ । ३)। यावय। यावया वृक्यं वृकम् (ऋ० १० । १२७ । ६)। च्यावय। आ च्यावयस्यूतये[3] (ऋ० ८ । ९२ । ७)। यामय। आ नः सुम्नेषु यामय (ऋ० ८ । ३ । २)। रामय। नि रामय जरितः सोमे (ऋ० १० । ४२ । १)। मामह। तन्नो मित्रो वरुणो मामहन्ताम् (ऋ० १ । ९४ । १६)। को न्वत्र मरुतो मामहे वः (ऋ० १ । १६५ । १३)। वावस। वावसाना विवस्वति (ऋ० १ । ४६ । १३)। स०यामनु स्फिग्यं वावसे[4] (ऋ० ८ । ४ । ८)। द्रावय। अध्वर्यो द्रावया त्वम् (ऋ० ८ । ४ । ११)। सूर्यस्येव रश्मयो द्रावयित्नवः (ऋ० ९ । ६९ । ६)। दाहह। दाहहाणो वज्रमिन्द्रो गभस्त्योः (ऋ० १ । १३० । ४)। वावृध। वावृधाना शुभस्पती (ऋ० ८ । ५ । ११)। वावृधीथा अहोभिरिव द्यौः (ऋ० १ । १३० । १०)। तातृष। तीर्थे नाच्छा तातृषाणमोकः (ऋ० १ । १७३ । ११)। यस्तातृषाण उभयाय[5] (ऋ० १ । ३१ । ७) । सासह। येना समत्सु सासहः (ऋ० ८ । १९ । २०)। सुप्रकेतेभिः सासहिर्दधानः[6]

---

(१) आवय (Comm.) to रारप omitted in B². (२) वाचं० । B². (३) -त्तये० । B². (४) वावसे वृषा० B², वावसे वृषा Bⁿ. (५) उभ० । B², उभयाय जन्मने Bⁿ. (६) सासहिः । B² Bⁿ.

(ऋ० १ । १७१ । ६)। रारप। शोचिषा रारपीति मित्रमहाः (ऋ० ६ । ३ । ६) ॥

अनन्वित्यस्य मध्यमम् ॥ ३३ ॥

अननु इत्येतस्य मध्यममक्षरं प्लुतं भवति। अननु[1]। अनानुदो वृषभो जग्मिः (ऋ० २ । २३ । ११) ॥

द्विवर्णः प्रत्ययोऽन्त्यस्य ॥ ३४ ॥

तेषां आवयादीनामन्त्यस्य रारप इत्येतस्य[2] द्विवर्णं एव प्रत्ययो वेदितव्यः। सोम रारन्धि नो हृदि (ऋ० १ । ९१ । १३) ॥

प्रवादाः षळितः परे ॥ ३५ ॥

परे[3] ये वक्ष्यन्ते ते प्रवादा इति षडेवेति च[4] वेदितव्याः। तानुत्तरत्रोदाहरिष्यामः ॥

दूणाशः ॥ ३६ ॥

दूणाशः[5] इत्ययं प्लवते। दूणाशः[5]। दूणाशं सख्यं तव (ऋ० ६ । ४५ । २६)। दूणाशेयं दक्षिणा[6] (ऋ० ६ । २७ । ८) ॥

उक्थशासश्च ॥ ३७ ॥

उक्थशास इत्ययं प्लवते। उक्थशासः। असुतृप उक्थशासश्चरन्ति (ऋ० १० । ८२ । ७)। यज्ञन्यं सामगामुक्थशासम् (ऋ० १० । १०७ । ६) ॥

इकारान्तश्च दाधृषिः ॥ ३८ ॥

दाधृषिरित्ययं प्लवत इकारान्तः सन्। दाधृषिः। ब्रह्मणा यामि सवनेषु दाधृषिः (ऋ० २ । १६ । ७)। सत्राहणं दाधृषिं

---

(१) I² omits अननु. (२) इत्यस्य B³. (३) इतः परे B². (४) B³B², षडेवेति I², षट् Bⁿ. (५) दूणाशम् Bⁿ. (६) दक्षिणा० । B², दक्षिणा पार्थिवानां Bⁿ.

तुम्रमिन्द्रम् (ऋ० ४ । १७ । ८) । इकारान्त इति कस्मात् । वाजेषु दधृषं[1] कवे (ऋ० ३ । ४२ । ६) ॥

पादान्तेऽपद्यः सादनम् ॥ ३९ ॥

पादान्ते वर्तमानोऽपद्यः सन्सादनमित्ययं[2] प्लवते । सादनम् । धारा ऋतस्य सादने (ऋ० १ । ८४ । ४) । ध्रुवं मित्रस्य सादनम् (ऋ० १ । १३६ । २) । पादान्त इति कस्मात् । योनिष्ट इन्द्र सदने अकारि (ऋ० ७ । २४ । १) । अपद्य इति कस्मात् । रण्वा नरो नृषदने (ऋ० ५ । ७ । २) ॥

अर्धर्चान्ते तु पूरुषः ॥ ४० ॥

पू[3]रुष इत्ययं त्वर्धर्चान्ते वर्तमानः प्लवते । पू[4]रुषः । विराजो अधि पूरुषः (ऋ० १० । ९० । ५) । आत्मानं तव पूरुष (ऋ० १० । ९७ । ८) । अर्धर्चान्त इति कस्मात् । सहस्रशीर्षा पुरुषः (ऋ० १० । ९० । १) ॥

दोषामस्मै राजतोऽक्रन्वनस्पतीन्
महीयमानां कति तुभ्यमेभ्यः ।
उषासमित्युत्तरं सर्वदेश्यम् ॥ ४१ ॥

दोषाम् अस्मै राजतः अक्रन् वनस्पतीन् महीयमानाम् कति तुभ्यम् एभ्य[5] उत्तरमुषासमि[6]ति प्लवते सर्वदेश्यं सर्वत्रेत्यर्थः । दोषाम् । दोषामुषासमीमहे (ऋ० ५ । ५ । ६) । अस्मै । अस्मा उषास आतिरन्त यामम्[7] (ऋ० ८ । ९६ । १) । राजतः ।

---

(१) -षिं B², -षिं corrected to -षं in B³. (२) Bⁿ, इत्ययं omitted in B³B²I². (३) Bⁿ, पु- B³I²B². (४) B²Bⁿ, पु- B³I². (५) दोषाम् (Comm.) to एभ्य omitted in B². (६) B², उपसमि- Bⁿ, उपास इ- B³I². (७) B² omits यामम्. आतिरं । Bⁿ.

अधि श्रिया विराजतः। उषासावेह सीदताम् (ऋ० १। १८८। ६)। अक्रन्। अक्रन्नुषासो वयुनानि[1] (ऋ० १। ९२। २)। वनस्पतीन्। आ पशुं गासि पृथिवीं वनस्पतीनुषासा (ऋ० ८। २७। २)। महीयमानाम्। महान् महीयमानाम्। उषासमिन्द्र सं पिणक्[2] (ऋ० ४। ३०। ९)। कति। कत्युषासः कत्यु स्विदापः (ऋ० १०। ८८। १८)। तुभ्यम्। तुभ्यमुषासः शुचयः परावति[3] (ऋ० १। १३४। ४)। सर्वदेश्यग्रहणमर्धर्चान्ताधिकारनिवृत्त्यर्थम्। सर्वत्रेति सिद्धे सर्वदेश्यग्रहणं नानार्धर्चस्थादपि निमित्तात्प्राप्त्यर्थम् ॥

पादस्य चैकादशिनो यदन्ते ॥ ४२ ॥

एकादशाक्षरस्य पादस्यान्ते वर्तमानं यदुषासमिति तच्च प्लवते। रेवदुच्छन्तु सुदिना उषासः (ऋ० १। १२४। ९)। एकादशिन इति कस्मात्। अग्ने विवस्वदुषसः (ऋ० १। ४४। १)। अन्त इति कस्मात्। अग्ने बृहन्नुषसामूर्ध्वो अस्थात् (ऋ०। १०। १। १)॥

इति षट्प्रवादाः समाप्ताः ॥

यवयुररमयः ससाहिषे
ववृधन्तो रमया गिरा रभ्म।
यवयसि ततृषाणमोषति
अवयन्तोऽददृहन्त ते नृषह्ये॥ ४३ ॥

यवयुः। अरमयः। ससाहिषे। ववृधन्तः। रमया गिरा। ररभ्म। यवयसि। ततृषाणमोषति। अवयन्तः। अददृहन्त। ते नृषह्ये[4]। इत्येतानि च[5] पूर्वलक्षण[6]प्राप्तानि न प्लवन्ते। यवयुः। त्वामिध्यवयुर्मम

---

(१) वयुनानि०। B². (२) इन्द्र। B². (३) शुचयः। B². (४) यवयुः (Comm.) to -हये omitted in B². (५) च struck out in B². (६) B², -लक्षणोक्तानि B³I²Bⁿ.

(ऋ० ८। ७८। ९)। अरमयः। अरमयः सरपसस्तराय कम् (ऋ० २। १३। १२)। ससाहिषे। प्र ससाहिषे पुरुहूत[1] (ऋ० १०। १८०। १)। वावृधन्तः। शुचन्तो अग्निं वावृधन्तः[2] (ऋ० ४। २। १७)। रमया गिरा। नमस्या रमया गिरा (ऋ० ५। ५२। १३)। गिरेति कस्मात्[3]। नि रामय जरितः सोमे[4] (ऋ० १०। ४२। १)। ररभ्म। ररभ्मा शवसस्पते (ऋ० ८। ४५। २०)। यवयसि। सस्थावाना यवयसि (ऋ० ८। ३७। ४)। ततृषाणमोषति। इच्चन्न विश्वं ततृषाणमोषति (ऋ० १। १३०। ८)। ओषतीति कस्मात्[5]। तीर्थे नाच्छा तातृषाणमोकः (ऋ० १। १७३। ११)। अवयन्तः। अगोह्यं यच्चवयन्त ऐतन[6] (ऋ० १। ११०। ३)। अददहन्त। यदेदन्ता अददहन्त[7] (ऋ० १०। ८२। १)। ते नृषह्य इति—अभिमातिनृपृतनोपधस्तु (६। ३०) इति[8] प्राप्ते। ते नृषह्ये[9]। इन्द्र देवेभिरनु ते नृषह्ये (ऋ० ६। २५। ८)। त इति कस्मात्[5]। नृषाह्ये सासह्वाँ अमित्रान् (ऋ० १। १००। ५)॥

अवयतं वाजसातौ नृषह्ये
विभ्वासहं दूणशा रोचनानि।
न ततृषाणो यमयो ररप्शे
पुरुषीणां यवयन्त्विन्दवश्च॥ ४४॥

अवयतम्। वाजसातौ नृषह्ये। विभ्वासहम्। दूणशा रोचनानि। न ततृषाणः। यमयोः। ररप्शे। पुरुषीणाम्। यवयन्त्विन्दवः[10]। इत्ये-

---

(१) पुरुहूत॰ B², पुरुहूत शत्रून् Bⁿ. (२) वावृधंत इन्द्रं। B² Bⁿ. (३) किं B³. (४) सोम B², सोमे omitted in Bⁿ. (५) किं B³. (६) ॰यन्तः। B³I². (७) B²Bⁿ add पूर्वे. (८) B² adds दीर्घे. (९) ते नृषह्ये omitted in B². (१०) अवयतं (Comm.) to - न्दवः omitted in B².

तानि पूर्वलक्षणप्राप्तानि न प्लवन्ते। अवयतम्। आ नो जने अवयतं युवाना[1] (ऋ० ७। ६२। ५)। वाजसातौ नृषह्य इति—अभिमातिनृपृतनोपधस्तु (६। ३०) इति प्राप्ते। परि स्रव वाजसातौ नृषह्ये (ऋ ९। ९७। १९)। वाजसाताविति कस्मात्[12]। नृषाह्ये सासह्वाँ अमित्रान्[2] (ऋ० १। १००। ५)। विभ्वासहमिति—सहेत्यादिः (६। २७) इति प्राप्ते। विभ्वासहम्[3]। होतर्विभ्वासहं रयिम् (ऋ० ५। १०। ७)। दूणशा रोचनानीति[4] —प्रवादाः षळितः[5] परे (६। ३५) इति प्राप्ते[6]।[7] त्रिरुत्तमा दूणशा रोचनानि (ऋ० ३। ५६। ८)। रोचनानीति कस्मात्[12]। दूणाशेयं दक्षिणा[8] (ऋ० ६। २७। ८)। न ततृषाणः। आ यो घृणे न ततृषाणो अजरः (ऋ० ६। १५। ५)। नेति कस्मात्। यस्तातृषाण उभयाय[9] (ऋ० १। ३१। ७)। यमयोः। यमयोश्चित्र समा वीर्याणि (ऋ० १०। ११७। ९)। ररप्शे। वि यो ररप्श ऋषिभिः (ऋ० ४। २०। ५)। पुरुषीणामिति—अर्धर्चान्ते तु पूरुषः (६। ४०) इति प्राप्तौ[10]। पुरुषीणाम्[11]। पर्जन्यः पुरुषीणाम् (ऋ० ७। १०२। २)। यवयन्त्विन्दवः। उत मा स्नामाद्यवयन्त्विन्दवः (ऋ० ८। ४८। ५)। इन्दव इति कस्मात्[12]। ते विश्वासमद्दुरिता यावयन्तु (ऋ० ७। ४४। ३)॥

---

(१) युवाना०। B^2. (२) सासह्वान्। B^2. (३) B^2 omits विभ्वासहम्. (४) इति omitted in B^2B^n (B^n reads दूणशा रोचनानि after प्राप्ते). (५) षळिति B^3. (६) B^2B^n, प्राप्तौ B^3I^2. (७) I^2 adds दूणशा।, B^3 strikes it out. (८) दक्षिणा०। B^2, दक्षिणा पाथवानां (*sic*) B^n. (९) उभयाय०। B^2, उभयाय जन्मने B^n. (१०) प्राप्ते B^n. (११) B^2 omits पुरुषीणाम्. (१२) किं B^3.

ररक्ष यवय स्तेनं ससाहे यवया वधम् ।
परमया द्रवयन्त अवयन्ररते च न ॥ ४५ ॥

ररक्ष । यवय स्तेनम् । ससाहे । यवया वधम् । परमया । द्रवयन्त । अवयन् । ररते[1] । इत्येतानि पूर्व[2]लक्षणप्राप्तानि न प्लवन्ते । ररक्ष । ररक्ष तान्सुकृतो विश्ववेदाः (ऋ० १। १४७ । ३)। यवय स्तेनम् । यवय स्तेनमूर्म्ये (ऋ० १० । १२७ । ६) । स्तेनमिति कस्मात् । यावया वृक्यं वृकम् (ऋ० १० । १२७ । ६)। ससाहे । बृहस्पतिना युजेन्द्रः ससाहे[3] (ऋ० ८ । ९६ । १५)। ससाहे शक्रः पृतनाः[4] (ऋ० १० । १०४ । १०) । यवया वधम् । वरीयो यवया वधम् (ऋ० १० । १५२ । ५) । वधमिति किम् । यावया दिद्युमेभ्यः[5] (ऋ० ६ । ४६ । ९)। परमया । तं वो धिया परमया[6] (ऋ० ६ । ३८ । ३)। द्रवयन्त । ऊर्मिर्न निम्नैर्द्रवयन्त वक्राः (ऋ० १० । १४८ । ५)। अवयन् । प्रान्धं श्रोणं अवयन्[7] (ऋ० २ । १३ । १२)। ररते[8] । चनिष्ठं पित्वो ररते विभागे (ऋ० ५ । ७७ । ४) ॥

साह्वांसो वः सत्रासाहं सादन्यं सत्यं ताताम ।
नानाम श्रूयाः शुश्रूया रीषन्तं गातूयन्तीव ॥ ४६ ॥

साह्वांसः । वः सत्रासाहम । सादन्यम् । सत्यं तातान । नानाम । श्रूयाः । शुश्रूयाः । रीषन्तम् । गातूयन्तीव[9] । इत्येतानि प्लवन्ते ।

---

(१) ररक्ष (Comm.) to ररते omitted in B². (२) Bⁿ, पूर्व- omitted in B³I²B². (३) This quotation omitted in Bⁿ; given before ससाहे in I². (४) B² omits पृतनाः. (५) वधमिति to -भ्यः omitted in I²; वृक्यं वृकं (instead of दिद्युमेभ्यः) Bⁿ. (६) परमया० । B², परमया पुराजं Bⁿ. (७) त्सास्यु० । Added in B². (८) I² adds चिनेश (?). (९) साह्वांसः (Comm.) to -व omitted in B².

साह्वांसः । साह्वांसो दस्युमव्रतम् (ऋ० ६ । ४१ । २) । वः सत्रा-साहमिति—न तु पादस्याद्दिनः (६ । २८) इति निषेधप्राप्तौ[1] । वः सत्रासाहम्[2] । त्यमु वः सत्रासाहम् (ऋ० ८ । ९२ । ७) । व इति कस्मात्[3] ।[4] सादन्यम् । सादन्यं विदथ्यम् (ऋ० १ । ९१ । २०) । सत्यं तातान । सत्यं तातान सूर्यः (ऋ० १ । १०५ । १२) । सत्यमिति कस्मात्[5] । आ यस्ततान रोदसी (ऋ० ५ । १ । ७) । नानाम । प्रति नानाम रुद्रोपयन्तम् (ऋ० २ । ३३ । १२) । शूयाः । शूया अभिश्चित्रभानुः (ऋ० २ । १० । २) । शुशूयाः । यच्छुशूया इमं हवम् (ऋ० ८ । ४५ । १८) । रीषन्तम् । द्रुहो रीषन्तं परि धेहि राजन् (ऋ० २ । ३० । ६) । गातूयन्तीव । ये स्मा पुरा गातूयन्तीव देवाः (ऋ० १ । १६९ । ५) ॥

वावर्त येषां रीषतोऽदकारे
सान्त्यभि नृषाहमपूरुषघ्नः ।
सान्ति गुहा तन्वं रीरिषीष्ट
जानि पूर्व्योऽभीवृतेव श्रथाय ॥ ४७ ॥

वावर्त येषाम् । रीषतोऽदकारे । सान्त्यभि । नृषाहम् । अपूरुषघ्नः । सान्ति गुहा । तन्वं रीरिषीष्ट । जानि पूर्व्यः । अभीवृतेव । श्रथाय[6] इत्येतानि प्लवन्ते । वावर्त येषाम् । वावर्त येषां राया (ऋ० १० । ९३ । १३) । येषामिति कस्मात्[5] । को अध्वरे मरुत आ ववर्त (ऋ० १ । १६५ । २) । रीषतोऽदकारे । पाहि रीषत उत वा (ऋ० १ । ३६ । १५) । अदकार इति कस्मात्[5] । प्रति ष्म रिषतो दह (ऋ० १ ।

---

(१) B^3I^2, प्रतिषेधे प्राप्ते B^2, प्राप्ते B^n. (२) वः सत्रासाहम् omitted in B^2B^n. (३) B^2, व. इति किं B^3; omitted in I^2 B^n. (४) B^2 adds सून्यं ।. (५) किं B^3. (६) वावर्त (Comm.) to श्रथाय omitted in B^2.

१२ । ५)। सान्त्यभि। विश्वानि सान्त्यभ्यस्तु मह्वा[1] (ऋ० २ । २८ । १)। अभोति कस्मात्[2] । सन्ति कामासो हरिवः (ऋ० ८ । २१ । ६)। नृषाहमिति—एकाच्चरच[3]र्षणिधन्ववर्जम् (६ । २७) इति निषेधप्राप्तौ । नृषाहम्[4] । नरं नृषाहं मंहिष्ठम्[5] (ऋ० ८ । १६ । १)। अपूरुषघ्नः । अपूरुषघ्नो अप्रतीत[6] (ऋ० १ । १३३ । ६)। सान्ति गुह्वा । आविः सान्ति गुह्वा परः (ऋ० ८ । ८ । २३)। गुहेति कस्मात्[7] । सन्ति कामासो हरिवः[8] (ऋ० ८ । २१ । ६)। तन्वं रीरिषोष्ट । स्वयं रिपुस्तन्वं रीरिषोष्ट (ऋ० ६ । ५१ । ७)। तन्वमिति कस्मात्[7] । स्वैः ष एवै रिरिषोष्ट[9] (ऋ० ८ । १८ । १३)। जानि पूर्व्यः । अग्निर्हि जानि पूर्व्यः (ऋ० ८ । ७ । ३६) । पूर्व्य इति कस्मात्[7] । देवस्य भर्गः सहसो यतो जनि (ऋ० १ । १४१ । १)। अभीवृतेव । अभीवृतेव ता महापदेन (ऋ० १० । ७३ । २)। श्रथाय । वि मच्छ्रथाय रशनामिवागः (ऋ० २ । २८ । ५)॥

साहन्साह्वा जर्हृषन्त प्रसाहं
नक्तोषासा सूर्यमुषासमग्निम् ।
परिराप: सूनृते जारयन्ती
शुश्रूयातं यूयुविः सादना ते ॥ ४८ ॥

साहन् । साह्वाः । जर्हृषन्त प्रसाहम् । नक्तोषासा । सूर्यमुषासमग्निम् । परिरापः । सूनृते जारयन्ती । शुश्रूयातम् । यूयुविः । सादना ते[10]। इत्येतानि च प्लवन्ते । साहन् । जयञ्छत्रूँरमित्रान्पृत्सु साहन् (ऋ० ६ । ७३ । २)। साह्वाः । साह्वा ये सन्ति मुष्टिहेव

---

(१) मह्वा० । B². (२) किं B³. (३) - श्च - Bⁿ. (४) B² omits नृषाहम्. (५) - ष्ठम् B². (६) B² adds शूर ।. (७) किं B³. (८) कामासः । B². (९) B²Bⁿ add युः ।. (१०) साहन् (Comm.) to ते omitted in B².

(ऋ० ८ । २० । २०)। जर्हृषन्त प्रसाहमिति—एकाक्षर[1]वर्ष-
णिधन्ववर्जम् (९ । २७) इति निषेधप्राप्तिः[2] । [3] मत्सरासो जर्हृषन्त
प्रसाहम् (ऋ० ६ । १७ । ४) । जर्हृषन्तेति[4] कस्मात् । वाजेषु
प्रासहं युजम् (ऋ० १ । १२९ । ४) । नक्तोषासा । नक्तोषासा
सुपेशसा (ऋ० १ । १३ । ७)। सूर्यमुषासमग्निम् । जनयन्ता
सूर्यमुषासमग्निम् (ऋ० ७ । ९९ । ४) । सूर्यमिति कस्मात्[5] ।
दधिक्रां वः प्रथममश्विनोषसमग्निम् (ऋ० ७ । ४४ । १)। अग्निमिति
कस्मात्[5] । येभिः सूर्यमुषसं मन्दसानः (ऋ० ६ । १७ । ५) । परि-
रापः । बृहस्पते वि परिरापो अर्दय[6] (ऋ० २ । २३ । १४)। सूनृते
जारयन्ती । रेवत्स्तोत्रे सूनृते जारयन्ती (ऋ० १ । १२४ । १०) ।
सूनृत इति कस्मात्[7] । जरयन्ती वृजनं पद्वत् (ऋ० १ । ४८ । ५) ।
शुश्रूयातम् । शुश्रूयातमिमं हवम् (ऋ० ५ । ७४ । १०) । यूयुविः ।
द्विषो युयोतु यूयुविः (ऋ० ५ । ५० । ३)। सादना ते । तेऽत्रा यमः
सादना ते मिनोतु (ऋ० १० । १८ । १३) । त इति कस्मात्[8] ।
पितृभ्य आ सदने जोहुवाना[9] (ऋ० ५ । ४७ । १) ॥

करन्त्सुषाहा घृतवान्ति साह्वा-
नृजूयेव सूयवसाद् वृषाय ।
उषासानक्ता पृथुजाघने च
राध्येभी रीरिषत ग्लापयन्ति ॥ ४९ ॥

---

(१) -रं Bⁿ. (२) B²I², निषेधे प्राप्तिः B³, प्राप्तेः Bⁿ. (३) जर्हृषंत प्रसाहं । added in B³I². (४) B², जर्हृषंत प्रसाहमिति B³I²Bⁿ. (५) किं B³. (६) -रापो० । B², -रापो अर्हयति Bⁿ.(७) I², किं B³B²Bⁿ. (८) किं B³ Bⁿ. (९) B²I²; instead of this quotation B³Bⁿ, M.M. have देवाय सदनासदे.

करन्सुषाह्वा घृतवान्ति साह्वान् ऋजूयेव सूयवसात् वृषाय उषासानक्ता पृथुजाघने च[1] । राथ्येभिः रीरिषत ग्लापयन्ति[2] इत्येते च[3] प्लुवन्ते[4] । करन्सुषाहेति—एकाक्षर[5]चर्षणिधन्ववर्जमिति निषेधे प्राप्ते । करन्सुषाह्वा[6] । करन्सुषाह्वा विथुरं न शवः (ऋ० १ । १८६ । २)। करन्निति कस्मात्[7] । सुषह्वा सोम तानि ते (ऋ० ९ । २९ । ३)। घृतवान्ति । अव द्रोणानि घृतवान्ति सीद (ऋ० ९ । ९६ । १३)। साह्वान् । साह्वान्विश्वा अभियुजः (ऋ० ३ । ११ । ६) । ऋजूयेव । दिशं न दिष्टामृजूयेव यन्ता (ऋ० १ । १८३ । ५) । सूयवसात् । सूयवसाद्भगवती हि भूयाः[8] (ऋ० १ । १६४ । ४०) । वृषाय । स[9] पर्जन्यं शंतनवे वृषाय (ऋ० १० । ९८ । १) । उषासानक्ता । उषासानक्ता बृहती सुपेशसा (ऋ० १० । ३६ । १) । पृथुजाघने च[10] । पृथुष्टो पृथुजाघने (ऋ० १० । ८६ । ८) । चकारः समुच्चयार्थः । राथ्येभिः । अथो ह रथो रथ्या राथ्येभिः (ऋ० १ । १५७ । ६) । रीरिषत । मा नो मध्या रीरिषतायुर्गन्तोः[11] (ऋ० १ । ८९ । ९) । ग्लापयन्ति । ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति (ऋ० १ । १६४ । १०) ॥

अध्वानयद्रीरिषत्प्रावणेभी
रथीयन्तीवाद्मायः ससाहे ।
सासाह यूयुधिरिवाश्वथायः
पूरुषघ्नं रीरिषः पूरुषादः ॥ ५० ॥

---

(१) B^n omits च. (२) करन् (Comm.) to -न्ति omitted in B^2. (३) इत्येते च B^3, एते च B^n, एतानि B^2, omitted in I^2. (४) I^2 omits प्लुवन्ते. (५) -रम् B^n. (६) करन्सुषाह्वा omitted in B^2. (७) किं B^3. (८) हि । B^2. (९) स B^3I^2, वि B^n, omitted in B^2. (१०) B^n omits च. (११) B^2 omits गन्तोः.

अध्वानयत् रीरिषत् प्रावणेभिः रथीयन्तीव अदमायः ससाह्वे सासाह्व यूयुधिरिव अश्रथायः पूरुषघ्नम् रीरिषः पूरुषादः[1] इत्येतानि प्लवन्ते। अध्वानयत्[2]। अध्वानयद्दुरिता दम्भयच्च (ऋ० ६।१८। १०)। रीरिषत्। मा च हन मा च रीरिषत् (ऋ० ३।५३।२०)। प्रावणेभिः। प्रावणेभिः सजोपसः (ऋ० ३।२२।४)। रथीयन्तीव। रथीयन्तीव प्र जिहीत ओषधिः (ऋ० १।१६६।५)। अदमायः। त्वं ह नु त्यददमायो दस्यून् (ऋ० ६।१८।३)। ससाह्व इतीह च[3] —ससाह्वे यवया वधम् (६।४५) इत्यत्र च[4] द्विः कस्मान्निपात्यते। आवयादिप्लुतेः प्रतिषेधार्थं तत्र। द्वितीयस्य प्लुतिविधानार्थमिह। ससाह्वे[5]। ससाह्वे शक्रः पृतना अभिष्टिः[6] (ऋ० १०।१०४।१०)। सासाह्व। सासाह्व यो युधा नृभिः (ऋ० ५।२५।६)। यूयुधिरिव। गावइव ग्रामं यूयुधिरिवाश्वान्[7] (ऋ० १०।१४६।४)। अश्रथायः। सतीनमन्युरश्रथायः[8] (ऋ० १०।११२।८)। पूरुषघ्नम्। आरे ते गोघ्नमुत पूरुषघ्नम् (ऋ० १।११४।१०)। रीरिषः। मा नो गोषु मा नो अश्वेषु रीरिषः (ऋ० १।११४।८)। पूरुषादः। ततो वयः प्र पतान्पूरुषादः (ऋ० १०।२७।२२)॥

अपूरुषं जाहृषाणेन रीषत
ऋतायुभी रथीनां साहिषीमहि।
पवीतारः कियात्ये पूरुषत्वत
ऋतावरीरिव हव्यानि गामय ॥ ५१ ॥

---

(१) अध्वानयत् to -पादः omitted in B². (२) अध्वानयत् omitted in B³. (३) इति Bⁿ. (४) इत्यत्र I², इत्यत्रेह च Bⁿ. (५) ससाह्वे omitted in B²I². (६) पृतनाः। B². (७) -श्वान्० B². (८) -थायो०। B², -थायो अद्रिं Bⁿ.

अपूरुषम् जाहृषाणेन रीषते ऋतायुभिः रथीनाम् साहिषीमहि पवीतारः कियात्या ई पूरुषत्वता ऋतावरीरिव हव्यानि गामय[1] इत्येतानि च प्लवन्ते। अपूरुषम्। सिन्धोः पारे[2] अपूरुषम् (ऋ० १०। १५५। ३)। जाहृषाणेन। यो व्यंसं जाहृषाणेन (ऋ० १। १०१। २)। रीषते। मा रीषते सहसावन् (ऋ० १। १८९। ५)। ऋतायुभिः। पवमान ऋतायुभिः (ऋ० ९। ३। ३)। रथीनाम्। रथीतमं रथीनाम् (ऋ० १। ११। १)। साहिषीमहि। वीळु चित्साहिषीमहि (ऋ० ८। ४०। १)। पवीतारः। पवीतारः पुनीतन (ऋ० ९। ४। ४)। कियात्या। अहरहर्यात्यक्तुरपां कियात्या (ऋ० २। ३०। १)। एष आकारः प्रत्युदाहरणार्थो यदन्यदस्ति[3] कियतीति ह्रस्वान्तम्। अथ नास्ति ततो[4] विशेषणार्थः। कियती[5] योषा (ऋ० १०। २७। १२) इत्येतदप्याकारेऽक्रियमाणे सांशयिकं स्यात्। ईकारादि हि परतः प्रतिकण्ठग्रहणं भवति। ई पूरुषत्वता। दीनैर्दक्षैः प्रभूती पुरुषत्वता[6] (ऋ० ४। ५४। ३)। ईकारोपधग्रहणं किमर्थम्। न तस्य विद्म पुरुषत्वता वयम् (ऋ० ५। ४८। ५)। ऋतावरीरिव। ऋतावरीरिव संक्रोशमानाः (ऋ० ४। १८। ६)। हव्यानि गामय। तत्र हव्यानि गामय[7] (ऋ० ५। ५। १०)। हव्यानीति कस्मात्[8]। अधरं गमया तमः (ऋ० १०। १५२। ४)॥

वृषायस्व प्रसवीता ससाहिषे
तातृपाणा तातृपिं स्वादनस्पृशः।

---

(१) अपूरुषम् (Comm.) to गामय omitted in B²I². (२) इत्ये- to पारे omitted in I². (३) अस्तीति B³. (४) ततोपि I². (५) कियतीति B³, कयती I². (६) B² omits this quotation. (७) B² omits this quotation. (८) किं B³.

साह्यामेयान्ति पशुमान्ति जागृधुः
पवीतारं सूर्य्यमुषासमीमहे ॥ ५२ ॥

वृषायस्व प्रसवीता ससाहिषे तातृपाणा तातृपिम् सादनस्पृशः साह्याम इयान्ति पशुमान्ति जागृधुः पवीतारम् सूर्यमुषासमीमहे[1] इत्येतानि च प्लुवन्ते । वृषायस्व । प्रैषिकम्[2] । वृषायस्वायूया[3] बाहुभ्याम्[4] (प्रै० पृ० १४६)[5] । प्रसवीता । उद्वेति प्रसवीता जनानाम् (ऋ० ७ । ६३ । २) । ससाहिष इत्यस्याप्युभयत्र निपातने प्रयोजनं पूर्ववद् द्रष्टव्यम् । ससाहिषे[6] । प्र ससाहिषे पुरुहूत[7] (ऋ० १० । १८० । १) । तातृपाणा । तावेवेदं तातृपाणा[8] (ऋ० १० । ९५ । १६) । तातृपिम् । पिबा वृषस्व तातृपिम् (ऋ० ३ । ४० । २) । सादनस्पृशः । मा नो निर्भाग्वसुनः सादनस्पृशः (ऋ० ९ । ७२ । ८) । साह्याम । साह्याम दासमार्यम् (ऋ० १० । ८३ । १) । इयान्ति । गन्तेयान्ति सवना हरिभ्याम् (ऋ० ६ । २३ । ४) । पशुमान्ति । परि सद्मेव पशुमान्ति होता (ऋ० ९ । ९२ । ६) । जागृधुः । निरामिणो रिपवोऽन्नेषु जागृधुः (ऋ० २ । २३ । १६) । पवीतारम् । अवन्त्यस्य पवीतारमाशवः (ऋ० ९ । ८३ । २) । सूर्यमुषासमीमहे । अनागास्त्वं सूर्यमुषासमीमहे (ऋ० १० । ३५ । २) । सूर्यमिति किम् । दधिक्रां वः प्रथमम-

---

(१) वृषायस्व (Comm.) to - महे omitted in B². (२) B³I², प्रैषिकम् omitted in B²Bⁿ. (३) I²B³, -स्वायूपा B², -स्वापूया Bⁿ. (४) वहुभ्याम् I². (५) B² adds प्रैषिकम्. (६) B² omits ससाहिपे. (७) B² adds शत्रून् ।. (८) B² adds चरामसि ।.

श्विनोषसम् (ऋ० ७ । ४४ । १) । ईमह इति कस्मात्[1] । येभिः सूर्यमुषसं मन्दसानः[2] (ऋ० ६ । १७ । ५)[3] ॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवट[4]-
कृतौ[5] प्रातिशाख्यभाष्ये नवमं पटलम् ॥

॥ प्रातिशाख्यार्धम्[6] ॥

---

(१) किं $B^3 B^2$. (२) उपसं । B^2. (३) B^2 adds साकं सूर्य्यमुपसं गातुं ।. (४) -सुतोव्वट- B^n. (५) -कृते B^n. (६) B^3, प्रातिशाख्यार्धं स्य I^2, omitted in $B^2 B^n$.

क्रमः ॥ १ ॥

क्रम इत्यधिकारो वेदितव्यो यदित ऊर्ध्वमनुक्रमिष्यामः ॥

द्वाभ्यामभिक्रम्य प्रत्यादायोत्तरं तयोः ।
उत्तरेणोपसंदध्यात्तथार्धर्चं समापयेत् ॥ २ ॥

द्वाभ्यां पदाभ्यामभिक्रम्यारभ्येत्यर्थः । तयोर्द्वयोरभिक्रान्तयोरुत्तरं पदं प्रत्यादाय पुनर्गृहीत्वा ताभ्यामुत्तरेण पदेनोपसंदध्यात् । एतेन कल्पेना[1]र्धर्चं समापयेत् । पर्जन्याय प्र । प्र गायत । गायत दिवः । दिवस्पुत्राय । पुत्राय मीळ्हुषे। मीळ्हुष इति मीळ्हुषे[2] (ऋ० क० ७ । १०२ । १) ॥

एकवर्णमनोकारं नते सु स्मेति नःपरे ।
पदेन च व्यवेतं यत्पदं तच्च व्यवायि च ॥
ईं लुप्तान्तं प्लुतादीनि स्कम्भनेनेति लुप्तवत् ।
इतो षिञ्जुतावतसः पूर्वे द्वेपदयोर्द्वयोः ॥
स्वसारमस्कृतेत्युभे परं वीरास एतन ।
अतीत्यैतान्यवस्यन्ति ॥ ३ ॥

एकवर्णं पदमेकाक्षरमित्यर्थः । ओकारं वर्जयित्वा । आ ऊँ इति[3] इत्येते पदे अतीत्यावस्यन्ति । आ मन्द्रम् । मन्द्रमा वरेण्यम् (ऋ० क० ८ । ६५ । २८)। उद्वेति (ऋ० क० ७ । ६३ । २)। उदु त्यम् । ऊँ इत्यूँ । त्यं जातवेदसम्[4] (ऋ० क० १ । ५० । १)।

---

(१) कल्पेना- B³B², Reg.; क्रमेणा- Bⁿ; क्रमेणा I². (२) मीळ्हुष इति मीळ्हुषे B², Reg.; इति मील्हुषे I²; omitted in B³Bⁿ. (३) इति omitted in B². (४) B³I²Bⁿ, Reg.; ऊँ इत्यूँ । त्यं जातवेदसम् omitted in B².

अनोकारमिति कस्मात् । अभूदो[1] (ऋ० क० १। ११३। ११)।[2]

नते सु स्मेति नःपरे। नते षत्वभूते सु स्म[3] इत्येते नःपरे अतीत्यावस्यन्ति। मो षु णः (ऋ० क० १। ३८। ६)। आसु ष्मा णः (ऋ० क० ६। ४४। १८)। नते इति कस्मात्[4]। प्र सू न आयुर्जीवसे[5] (ऋ० ८। १८। २२)। इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् (ऋ० ६। ४४। १८)। नःपरे इति कस्मात्[6]। मो षु त्वा वाघतश्चन[7] (ऋ० ७। ३२। १)। त्वं हि ष्मा च्यावयन्नच्युतानि[8] (ऋ० ३। ३०। ४)।

पदेन च व्यवेतं यत्पदं तच्च व्यवायि च। पदेन च व्यवेतं यत्पदं यच्च व्यवैति ते उभे अतीत्यावस्यन्ति। ईयते नरा च शंसं दैव्यम् (ऋ० क० ९। ८६। ४२)।

ई लुप्तान्तम्। ईमित्येतत्पदं लुप्तान्तमतीत्यावस्यन्ति। यमी गर्भम् (ऋ० क० ९। १०२। ६)। लुप्तान्तमिति कस्मात्[9]। समीं रेभासः (ऋ० ८। ९७। ११)।

प्लुतादीनि। प्लुतादीनि पदानि चाती[10]त्यावस्यन्ति। योनिमारैगप[11] (ऋ० क० १। १२४। ८)। कुरुश्रवणमावृणि राजानम् (ऋ० क० १०। ३३। ४)।

स्कम्भनेनेति लुप्तवत्। स्कम्भनेनेत्येतत्पदं लुप्तवदतीत्यावस्यन्ति। चित्स्कम्भनेन स्कभीयान् (ऋ० क० १०। १११। ५)। लुप्तवदिति कस्मात्[12]। अयं महान्महता स्कम्भनेन (ऋ० ६। ४७। ५)।

---

(१) अभूदो०। B^2, अभूदो। ओ ते। त्यो इत्यो। B^n. (२) एकाक्षरं पदमन्यन्नास्ति added in B^2, Reg., M. M. (a). (३) सुस्मं I^2. (४) किं B^3. (५) अयुः (instead of आयुर्जीवसे) B^2. (६) किं B^3. (७) वावातश्चन I^2, वावनश्चन B^n. (८) च्यावयन् B^2. (९) किं B^3. (१०) च before पदानि in B^2. (११) -थ I^2. (१२) किं B^3.

इतो षिञ्चतावर्तमः पूर्वं द्वैपदयोर्द्वयोः। इतो षिञ्चत। आवर्तमः। इत्येतयोर्द्वैपदयोः पूर्वे पदे अतीत्यावस्यन्ति। इतो षिञ्चत। परीतो षिञ्चत (ऋ० क्र० ९।१०७।१)। आवर्तमः। उषा आवर्तमः (ऋ० क्र० १।९२।४)।

स्वसारमस्कृतेत्युभे। स्वसारमस्कृत[1]। उभे इत्येते पदे अतीत्याव-स्यन्ति[2]। निरु स्वसारमस्कृतोषसम् (ऋ० क्र० १०।१२७।३)।

परं[3] वीरास एतन। वीरास एतन[4]। इत्येतस्य द्वैपदस्य परं पदमतीत्यावस्यन्ति। वीरास एतन। परा वीरासः।[5] वीरास एतन मर्यासः (ऋ० क्र० ५।६१।४)॥

प्लुतादिप्रभृतीनि च॥ ४॥

तान्यतीत्यावस्यन्ति। शुनश्चिच्छेपं निदितम् (ऋ० क्र० ५।२।७)। नरा वा शंसं पूषणम् (ऋ० क्र० १०।६४।३)। किमर्थमिदमुच्यते। ननु—पदेन च व्यवेतं यत्पदं तच्च व्यवायि च (१०।३) इत्येव सिद्धम्। न सिध्यति। कथम्। क्रमो द्वाभ्याम-भिक्रम्य (१०।१—२) इति प्राप्तावसानानि हि—एकवर्णमनोकारम् (१०।३) इत्येवमादीन्यवसानादपोद्यन्ते। तस्माद्यत्रोभे व्यवायि-व्यवेते पदे प्राप्तावसाने तत्रैव स्यात्। ईयते नरा च शंसं दैव्यम् (ऋ० क्र० ९।८६।४२) इति। अन्यत्र न स्यात्। एवमर्थमिद-मुच्यते। एवमेके वर्णयन्ति।

---

(१) स्वसारं। अस्कृत B^n, स्वसारं। अकृत $B^3I^2B^2$. (२) After -स्यन्ति। B^3 B^2 add स्वसारं, struck out in I^2, omitted in B^n. (३) परा B^2. (४) वीरासः। एतन B^n, वीरासः। इतन $B^3I^2B^2$. (५) परा वीरासः। B^2, Reg; परा B^3 I^2; परं B^n.

अपरे[1] पुनः—पदेन च व्यवेतं यत्पदम् (१० । ३) इत्येव सर्वेषु सिद्धमिति मन्यमाना अन्यथा वर्णयन्ति । प्लुतादिप्रभृतीनि चेति चकारं वाशब्दस्यार्थे वर्णयन्ति । प्लुतादिप्रभृतीनि वा[2]तीत्या-वस्यन्ति । योनिमारैक् (ऋ० क० १ । १२४ । ८) । चित्कम्भनेन (ऋ० क० १० । १११ । ५) । वीरास एतन (ऋ० क० ५ । ६१ । ४) । परीतः[3] (ऋ० क० ६ । १०७ । १) । प्लुतादि-प्रभृतीनीति[4] प्रभृतिशब्दः प्रकारार्थो द्रष्टव्यः । प्लुतादिप्रकाराणीति । किं कृतं भवति[5] । वक्ष्यति हेतावनवसानीयेषु केषु[6] केषुचित्—दूरभिक्रमं पूर्वनिमित्तमानिनः (११ । ११) इति । तदिहापि दर्शितं भवति ॥

पूर्वोत्तरकृतं रूपं प्रत्यादानावसानयोः ।
न ब्रूयात् ॥ ५ ॥

पूर्वकृतं रूपं प्रत्यादाने न ब्रूयात् । उत्तरकृतं रूपमवसाने न ब्रूयात्[7] । पूर्वकृतं रूपम् । यच्छकरीषु । शकरीषु बृहता (ऋ० क० ७ । ३३ । ४) । मो षु । मो इति मो । सु त्वा (ऋ० क० ७ । ३२ । १) । प्र णः । न इन्दो (ऋ० क० ६ । ४४ । १) । उत्तरकृतं रूपम् । घनेव वज्रिन् । घनेवेति घनाऽइव । वज्रिञ्छ्नथिहि (ऋ० क० १ । ६३ । ५) । अग्ने अच्छ । अच्छा वद (ऋ० क० १० । १४१ । १) ॥

---

(१) अपरे तु B^2. (२) I^2B^n, M. M.; चा- B^3B^2. (३) परीतो षिञ्चत B^n, (Cp. also the Upalekha by M. Pertsch, P. VII, Note 4.) (४) M. M.; -प्रभृतीनि B^3B^2 I^2; -प्रभृतीति B^n. (५) इति added in B^2. (६) केषु seems to be struck out in I^2. (७) पूर्वकृतं to ब्रूयात् omitted in I^2.

सर्वमेवान्यद्यथासंहितमाचरेत् ॥ ६ ॥

पूर्वकृताद्रूपादुत्तरकृताच्च यदन्यत्तत्सर्वं यथासंहितमाचरेत्। यथा संहिताविधाने विहितं तथैवाचरेदित्यर्थः। वाजेषु सासहिः। सासहिर्भव (ऋ० क्र० ३। ३७। ६)॥

अवगृह्याण्यतिक्रम्य सहेतिकरणानि च।
धक्षिधुक्षिप्रवादौ च विकृतादी प्लुतादि च ॥
अन्तःपदं च येषां स्याद्विकारोऽनन्यकारितः।
एतानि परिगृह्णीयात् ॥ ७ ॥

अवगृह्याणि द्विखण्डानि पूर्वोत्तरपदभूतानि पदा[1]न्यतीत्य परिगृह्णीयात्। ऋषिभिरीड्यः। ऋषिभिरित्यृषिऽभिः (ऋ० क्र० १।१।२)।

सहेतिकरणानि चे[2]तिकरणसहितानि च[3] पदान्यतिक्रम्य परिगृह्णीयात्। इन्द्राग्नी अपात्। इन्द्राग्नी इतीन्द्राग्नी (ऋ० क्र० ६। ५९। ६)।

धक्षि धुक्षि इत्येतौ च प्रवादौ[4] विकृतादी सन्तावतिक्रम्य परिगृह्णीयात्। अनु दक्षि। दक्षि[5] दावने। धक्षीति धक्षि (ऋ० क्र० २। १। १०)। मन्दिनं दुक्षन्। दुक्षन्वृधे। धुक्षन्निति धुक्षन् (ऋ० क्र० १। १२१। ८)। विकृतादी इति किम्[6]। नीचा तम्। धक्षि। धक्ष्यतसम् (ऋ० क्र० ४। ४। ४)। निर्धुक्षन्। धुक्षन्वक्षणाभ्यः (ऋ० क्र० ८। १। १७)।

---

(१) पा- (for पदा-) I^2. (२) सहेतिकरणानि च omitted in B^2. (३) सह (instead of -सहितानि च) B^2. (४) च added in $I^2 B^3 B^n$ (with a mark of deletion in B^3), omitted in B^2. (५) अनु दक्षि (instead of अनु दक्षि। दक्षि) I^2. (६) कस्मात् B^2.

प्लुतादि च पदमतिक्रम्य परिगृह्णीयात् । आरैक्पन्थाम् । अरैगित्यरैक् (ऋ० क्र० १ । ११३ । १६) । आयुत्तातामश्विना अयुत्तातामित्ययुत्ताताम् । (ऋ० क्र० १ । १५७ । १) ।

अन्तर्मध्ये येषां पदानां विकारोऽनन्यकारित आत्मकारित इत्यर्थः : तानि चातिक्रम्य परिगृह्णीयात् । सुषुमा यातम् । सुसुमेति सुसुम (ऋ० क्र० १ । १३७ । १) । वावृधानां शुभः । ववृधानेति ववृधाना (ऋ० क्र० ८ । ५ । ११) । अनन्यकारित· इति किम् । शक्र एषाम् । एनं पीपयत्[1] (ऋ० क्र० ८ । १ । १९) ॥

बहुमध्यगतानि च ॥ ८ ॥

बहूनां पदानां मध्यगतानि च यानि[2] पदानि तानि चा[3]तिक्रम्य परिगृह्णीयात् । ईयते नरा च शंसं दैव्यम् । नराशंसमिति नराशंसम् । चेति च (ऋ० क्र० ९ । ८६ । ४२) । शुनश्चिच्छेपं निदितम् । शुनःशेपमिति शुनःऽशेपम् । चिदिति चित् (ऋ० क्र० ५ । २ । ७) । नरा वा शंसं पूषणम् । नराशंसमिति नराशंसम् । वेति वा (ऋ० क्र० १० । ६४ । ३) । मो षु णः । मो इति मो । स्विति सु (ऋ० क्र० १ । ३८ । ६) ॥

अर्धर्चान्त्यं च ॥ ९ ॥

अर्धर्चान्ते वर्तमानं चा[4]तीत्य परिगृह्णीयात् । पुत्राय मीळ्हुषे[5] । मीळ्हुष इति मीळ्हुषे (ऋ० क्र० ७ । १०२ । १) ॥

नाकारं प्रागतोऽननुनासिकम् ॥ १० ॥

---

(१) B^3B^2, एनं पीपयत् omitted in I^2B^n. (२) च यानि omitted in B^2. (३) च omitted in B^2. (४) च omitted in B^2. (५) B^n, M. M.; पुत्राय मीळ्हुपे omitted in B^3 I^2B^2.

अननुनासिकमा[1]कारमर्धर्चान्त्यात्प्राङ् न परिगृह्णीयात्। मन्द्रमा वरेण्यम्[2] (ऋ० क० ९। ६५। २९)। प्रागत इति किम्। तनूष्वा। एत्या (ऋ० क० ९। ६५। ३०)। अननुनासिकमिति[3] किम्। गभीर आँ उग्रपुत्रे। एत्या (ऋ० क० ८। ६७। ११)॥

प्रत्यादायैव तं ब्रूयादुत्तरेण पुनः सह ॥ ११ ॥

प्रत्यादाय तमननुनासिकमाकारं पुनरुत्तरेणैव सह ब्रूयात्। मन्द्रमा वरेण्म्। आ वरेण्यम्। (ऋ० क० ९। ६५। २९)॥

उपस्थितं सेतिकरणम् ॥ १२ ॥

इतिकरणयुक्तं पदं तदुपस्थितसंज्ञं वेदितव्यम्। बाहू इति (ऋ० प० १। ९५। ७)। उपस्थितसंज्ञायाः प्रयोजनम्—व्ययवद्ध्युपस्थिते (११। ६१) इति॥

केवलं तु पदं स्थितम् ॥ १३ ॥

केवलं तु पदमितिकरणरहितं स्थितसंज्ञं वेदितव्यम्। अग्निम्[4]। स्थितसंज्ञायाः प्रयोजनम्—स्थिति[5]स्थितोपस्थितयोश्च दृश्यते पदं यथावत् (११। ६१) इति॥

तत्स्थितोपस्थितं नाम यत्रोभे आह संहिते ॥ १४ ॥

तत्पदं नाम स्थितोपस्थितं वेदितव्यम्। कतरत्तत्। उभे स्थितोपस्थिते यत्राह संहिते वक्ता। विभावसो इति विभाऽवसो (ऋ० प० १। ४४। १०)। स्थितोपस्थितसंज्ञायाः प्रयोजनम्—स्थितिस्थितो[6]पस्थितयोश्च दृश्यते पदं यथावत् (११। ६१) इति॥

---

(१) अननुनासिकम् B^2I^2, अनुनासिकरहितम् B^3B^n. (२) $B^3I^2B^2$, Reg.; आ मन्द्रम्। मद्रमावरेण्यं। आ वरेण्यम् B^n; आ मन्द्रम्। मन्द्रमा वरेण्यम् M. M. (३) -क इति B^3 I^2. (४) अग्निम् omitted in B^2. (५) I^2, स्थित- $B^3B^2B^n$. (६) स्थितितो- I^2, स्थितिस्थितो- $B^3B^2B^n$.

अदृष्टवर्णे प्रथमे चोदकः स्यात्प्रदर्शकः।
एतदिष्टम् ॥ १५ ॥

प्रथमे द्वैपदे पूर्वपदस्यान्ते वर्णेऽदृष्टे तस्य प्रदर्शकश्चोदकः स्यात्। चोदकः परिग्रह इत्यनर्थान्तरम्। तन्नः। तदिति तत् (ऋ० क्र० १। १०७। ३)। तं नः। तमिति तम् (ऋ० क्र० २। ३४। ७)। तां त्वाम्। तामिति ताम् (ऋ० क्र० १। ४६। ४)। एतत्प्रदर्शनमिष्टम्। कस्मादिति[1] न पठ्यते। इष्टवचनादेवास्यानित्यत्वं गम्यते ॥

समासाँस्तु पुनर्वचन इङ्गयेत् ॥ १६ ॥

समासांस्त्ववगृह्याणि पदानि। तानि च पुनर्वचने परिग्रहस्य द्वितीये वचन इङ्गयेद[2]वगृह्णीयात्। पुरोजिती वः। पुरोजितीति पुरःऽजिती[3] (ऋ० क्र० ६। १०१। १) ॥

इतिपूर्वेषु संधानं पूर्वैः स्वः स्यादसंहितम्।
तदवग्रहवद् ब्रूयात् ॥ १७ ॥

इतिपूर्वेषु पदेषु। परिग्रहे क्रियमाणे य इतिपूर्वास्[4] तेष्वितिना संधानं पूर्वैराचार्यैरिष्टम्[5]। अस्माकमपि[6]। स्वरितीदं[7] पदमसंहितं[8] स्यात्। [9]आचार्यग्रहणं पूजार्थम्। असंहितमिति यथेतिकरणान्तो[10]

(१) यदीष्टं कस्मादिति (instead of कस्मादिति) M. M. (a). (२) The Comm. समासांस्त्व- to इङ्गयेत् omitted in I². (३) पुरःरजिती I². (४) ये इतिपूर्वास् I²; corrected to यानीतिपूर्वाणि on the margin in B³; य इतिपूर्वस् Bⁿ; इतिपूर्वो येभ्यस्ते इतिपूर्वास् B²; इतिः पूर्वो येभ्यस्ते इतिपूर्वास् Reg., M. M. (a). (५) इंष्टं I²Bⁿ, Reg., M. M. (a); इष्टं B³B². (६) I²Bⁿ, Reg., M. M. (a); इष्टं added in B³B². (७) B³I²Bⁿ, Berlin MS. 394 (Cp. Reg.); स्वरिति B², Reg., M.M.(a). (८) पदसंहितं Reg. (९) Before आचार्य- I² adds तदग्रहवत्स्यात्. (१०) -करणांतां B², करणान्तोभि- B³.

निघातं न प्राप्नुयात्स्वरिति प्रत्यये। तदवग्रहवद् ब्रूयात्। अवग्रहवदिति यथा मात्राकालोऽन्तरं स्यात्। स्वरिति स्वः[1] (ऋ० प० १। ५२। १२)॥

संधिर्नार्धर्चयोर्भवेत् ॥ १८ ॥

अस्मिन्क्रमविधानेऽर्धर्चयोः संधिर्न भवेत्। केन प्राप्तावयं प्रतिषेध आरभ्यते। दृष्टक्रमत्वात्समयान्[2] संदध्यात्सर्वशः क्रमे (१०। १९) इति प्राप्ते[3]॥

दृष्टक्रमत्वात्समयान्संदध्यात्सर्वशः क्रमे।
पदेन च पदाभ्यां च प्रागवस्येदतीत्य च ॥ १९ ॥

दृष्टक्रमत्वाद्धेतोः समयान्[4] संदध्यात्सर्वशः क्रमे[5]। पदेन च[6]। समयं प्राप्य पदेनावस्येत्। समयमतीत्य पदाभ्यामवस्येत्। प्रप्र वः। प्रप्रेति प्रऽप्र। वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे (ऋ० क्र० ८। ६९। १)। योनिष्ट इन्द्र सदने अकारि। अकारि तमा नृभिः पुरुहूत। (ऋ० क्र० ७। २४। १)। दृष्टक्रमत्वादिति हेतुसामान्ये सत्यपि[7]—अग्नेर्वयं प्रथमस्यामृतानाम् (ऋ० १। २४। २) इत्येवमादीनामनुदृष्टानां[8][9] सर्वशः संदध्यादिति तन्नोपपद्यते[10]। कस्मात्[11]। समयसंज्ञाया अभावात्॥

---

(१) स्व१रितिऽस्वः B^3. (२) -यांत् B^2I^2, -यात् B^3B^n. (-न्त् B^n). (३) प्राप्तेः Reg. (४) -यांत् B^2I^2, -यात् B^3B^n. (५) Instead of क्रमे B^3 reads संपूर्णसमयेन। न पदाभ्यां पदाभ्यां। क्रमे। न पदकाले।. (६) पदेन च omitted in B^2. (७) -सामान्योत्यपि corrected to -सामान्येपि I^2. (८) -मृतानाम्निम्निर्त्ये- I^2. (९) पदकाले अनुत्सृष्टानां (instead of अनुदृष्टानां) B^2. (१०) तवोपपदंद्यते I^2. (११) कस्मात् omitted in B^3.

नकारस्योष्मवद्वृत्तं प्लुतोपाचरिते नतिः।
प्रश्लेषश्च प्रगृह्यस्य प्रकृत्या स्युः परिग्रहे ॥ २० ॥

नकारस्य यदूष्मवद्वृत्तं[1] प्लुतश्चोपाचरितश्च नतिश्च प्रश्लेषश्च[2] प्रगृह्यस्य य[3] एतानि सर्वाणि प्रकृत्या भवन्ति परिग्रहे क्रियमाणे।

नकारस्योष्मवद्वृत्तम्। अस्माँअस्माँ इत्। अस्मानस्मानित्यस्मान्ऽअस्मान्[4] (ऋ० क० ४ । ३२ । ४)। अभीशूँरिव सारथिः। अभीशूनिवेत्यभीशून्ऽइव (ऋ० क० ६ । ५७ । ६)[5]। विभ्राजमानाँश्चमसान्। विभ्राजमानानिति विऽभ्राजमानान् (ऋ० क० ४। ३३ । ६)। आवदँस्त्वम। आवदन्नित्याऽवदन् (ऋ० क० २ । ४३ । ३)। स्वतवाँः पायुः। स्वतवानिति स्वऽतवान् (ऋ० क० ४ । २ । ६)।

प्लुतः। मक्षूमक्षू कृणुहि। मक्षुमक्ष्विति मक्षुऽमक्षु (ऋ० क० ३ । ३१ । २०)।

उपाचरितः। ज्योतिष्कृदसि। ज्योतिःकृदिति ज्योतिःऽकृत् (ऋ० क० १ । ५० । ४)।

नतिः। सुषुमा यातम्। सुसुमेति सुसुम (ऋ० क० १। १३७ । १)। पितृयाणं द्युमत्। पितृयानमिति पितृऽयानम्। (ऋ० क० १० । २ । ७)।

प्रगृह्यस्य प्रश्लेषः। दंपतीव क्रतुविदा[6]। दंपतीइवेति दंपतीऽइव[7]

---

(१) B², यदूष्मांतवद्वृत्तं B³I², यदूष्मा तद्वद्वृत्तं Bⁿ. (२) प्रश्लेषश्च omitted in B². (३) Bⁿ, after यः B³I²B² add प्रश्लेषः. (४) This quotation is given after स्वऽतवान् (below) in Reg. (५) Bⁿ, Reg. add साह्वांश्चिकित्वान्। सह्वानिति सह्वान् (साह्वानिति साऽह्वान् Bⁿ). (६) B²Bⁿ, दंपतीव Reg., दंपतीव क्रतुविदा omitted in B³I². (७) ऽइव omitted in Reg.

(ऋ० क्र० २ । ३९ । २) । प्रगृह्यस्येति किम् । अग्नीव यः । अग्नीवेति अग्नोऽइव (ऋ० क्र० २ । १२ । ४) ॥

शौद्धाक्षरागमोऽपैति ॥ २१ ॥

शौद्धाक्षराणां संधीनामागमो य उक्तः सोऽपैति परिग्रहे क्रियमाणे। पुरुश्चन्द्रं यजतम् । पुरुचन्द्रमिति पुरुऽचन्द्रम् (ऋ० क्र० ५ । ८ । १) । वनर्षदो वायवः । वनसद इति वनऽसदः (ऋ० क्र० १० । ४६ । ७) ॥

न्याय्यं यान्त्युत्तरे त्रयः ।
रिफितान्यूष्मणोऽघोषे दूभावः स्वधितीव च ॥ २२ ॥

न्याय्यं यान्ति प्रकृतिं गच्छन्तीत्यर्थः । उत्तरे त्रयः संधयः परिग्रहे क्रियमाणे । रिफितानि चोष्मणो[1] यान्यघोषे प्रत्यये । दूभावश्च । स्वधितीवेति च पदम् । अघोषे रिफितानि । स्वर्चक्षा रथिरः । स्वश्चक्षा[2] इति स्वःऽचक्षाः (ऋ० क्र० ९ । ९७ । ४६) । धूर्षदं वनर्षदम् । धूःसदमिति धूःऽसदम् (ऋ० क्र० १० । १३२ । ७) । स्वर्पतिं यत् । स्वःपतिमिति स्वःऽपतिम् (ऋ० क्र० ८ । ९७ । ११) । दूभावः । दूणाशं सख्यम् । दुर्नशमिति दुःऽनशम् (ऋ० क्र० ६ । ४५ । २६) । जनस्य दूढ्यः । दुर्ध्य[3] इति दुःऽध्यः (ऋ० क्र० ८ । १९ । १५) । दूळभो रथः । दुर्दभ इति दुःऽदभः (ऋ० क्र० ४ । ९ । ८) । स्वधितीव रीयते । स्वधितिरिवेति स्वधितिःऽइव (ऋ० क्र० ५ । ७ । ८) । अघोष इति किम् । स्वर्जितं महि । स्वर्जितमिति स्वःऽजितम् (ऋ० क्र० १० । १६७ । २) ॥

अपर इदं सूत्रं योगविभागेन वर्णयन्ति ।

न्याय्यं यान्त्युत्तरे त्रयः ।

---

(१) वा उष्मणा (instead of चोष्मणो) I². (२) स्वस्वचा I². (३) दुध्यs B³.

शौद्धाक्षरागमादुत्तरे त्रयः संधयः प्रकृतिं यान्ति परिग्रहे क्रियमाणे। कतरे[1] त्रयः। जुघुक्षत इति धक्षिधुक्षिप्रवादौ च। न जुगुक्षतः। जुघुक्षत इति जुघुक्षतः (ऋ० क० ८। ३१। ७)। अनु दक्षि। दक्षि दावने। धक्षीति धक्षि (ऋ० क० २। १। १०)। दुक्षन्वृधे। धुक्षन्निति धुक्षन् (ऋ० क० १। १२१। ८)। योगविभागादृते परिग्रह एतेषां प्रकृतिभावो न सिध्यति। योगविभागे ह्यसत्युत्तरे[2] त्रय इति ग्रहणमनर्थकं भवति॥

रिफितान्यूष्मणोऽघोषे द्रूभावः स्वधितीव च।

इति यथोक्तमेवेति॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रट-
पुत्रउवटकृतौ[3] प्रातिशाख्य[4]भाष्ये क्रमपटलं
दशमम्[5]॥

---

(१) कतमे Reg. (२) च added in I². (३) -पुत्रोव्वटकृते Bⁿ. (४) -शाख्ये I². (५) Bⁿ adds समाप्तम्.

अथार्ष्यलोपेन यदाह स क्रमः
समानकालं पदसंहितं द्वयोः ॥ १ ॥

अथार्ष्याः संहिताया अलोपेन द्वयोः[1] पदसंहितं ते च पदे तयोश्च संहितां[2] समानकालं तुल्यकालं यदाह वक्ता स क्रमोऽधिकृतो वेदितव्यः। अग्निमीळे। ईळे पुरोहितम् (ऋ० क० १।१।१)। समानकालं पदसंहितं द्वयोरिति किम्। स्वरानुस्वारोपहितो द्विरुच्यते संयोगादिः स क्रमः[3] (६।१) इति मा भूत्॥

अथो बहूनामविलोपकारणः
परैरवस्यन्त्यतिगम्य कानिचित् ॥ २ ॥

अपि बहूनां पदानामा[4]र्ष्या अविलोपार्थं क्रमो भवतीति वेदितव्यम्[5]। तत्र परैः पदैरवस्यन्त्यतिगम्य कानिचित्पदानि। तानि पदान्युत्तरत्रोदाहरिष्यामः॥

अपृक्तमेकाक्षरमद्वियोनि यत्
तदानुनासिक्यभयादतीयते ॥ ३ ॥

अपृक्तमव्यञ्जनमेकाक्षरमद्वियोन्यसंध्यक्षरं यत्तत्पदमानु[6]नासिक्यभयादतीयते। अष्टावाद्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान्स्वरान् (१।६३) इति तन्मा भूदिति[7]। मन्द्रमा वरेण्यम् (ऋ० क० ८।६५।२८)। उद्वेति (ऋ० क० ७।६३।२)। अपृक्तमिति किम्। दुहितुराः (ऋ० क० १०।६१।५)। एकाक्षरग्रहणं पदविशेषणम्। अपृक्तमेकाक्षरं पदमनवसानीयमिति। इतरथा ह्यक्षरं विशेष्येत[8]। अपृक्तमद्वियोनि यदक्षरं

(१) पदयोः added in B². (२) संहिता Bⁿ, Reg. (३) क्रमोविक्रम B². (४) पदानाम् omitted in B³. (५) B², -तव्यः B³I²Bⁿ. (६) पदं चानु- B². (७) इति omitted in B³. (८) B³I², Reg.; विशिष्येत B²; विशिष्यते Bⁿ.

तदन्तमनवसानीयमिति। अत्र को दोषः। शमीध्वसध्रिगा३उ[1] (ऐ० ब्रा० २। ७। ११) इत्यवसानं न स्यात्।[2] अद्रियोनीति किम्। अभूदो (ऋ० क० १। ११३। ११)॥

नतं च पूर्वेण परस्य कारणं
नतेः परस्योभयहेतुसंग्रहात्॥ ४॥

नतं च पूर्वेण पदेन परस्य च[3] नतेर्यत्कारणं तत्पदमनवसानीयं भवति। किं कारणम्। परस्य पदस्यो[4]भयहेतुसंग्रहार्थम्। मो षु णः (ऋ० क० १। ३८। ६) इत्यत्र—स्वबह्वक्षरेण (५। ५) इति नामिनिमित्तं षत्वम्। षु ण इत्यत्र—नते सु स्म (५। ५८) इति[5] षत्वनिमित्तं णत्वम्। नाम्य[6]भावे षत्वं न स्यात्। षत्वाभावे णत्वं न स्यात्[7]। स विलोपः। अतं उभयहेतुसंग्रहार्थमतीयते। मो षु णः (ऋ० क० १। ३८। ६)। आसु ष्मा णः (ऋ० क० ६। ४४। १८)॥

परीत इत्युत्तरमेतयोर्द्वयोः
परं हि पूर्वं नमतीत्यतीयते॥ ५॥

परि इतः इत्येतयोर्द्वयोः पदयोः परं[8] पदमनवसानीयं भवति। किं कारणम्। अनवसानीयात्परं सिञ्चतेति पदं व्यवहितमपि पूर्वं[9] परीति पदं नमतीति[10]। परीतो षिञ्चत (ऋ० क० ९। १०७। १) इति॥

---

(१) Reg., -गा उ $B^3B^2I^2B^n$. (२) शमी गाव इति तु वृत्तौ added in B^2B^n. (३) पदस्य supplied on the margin after च in I^2. (४) पदस्य omitted in Reg. (५) स्मेति B^2, Reg.; ष्म इति B^n; स्मे इति B^3I^2. (६) नाम्या- B^2. (७) इति (instead of स्यात्) Reg. (८) उत्तरं B^3. (९) पूर्वं corrected to पूर्वः in I^2. (१०) B^2I^2, Reg.; नमयतीति B^3B^n.

ततोऽपरे संध्यमवेक्ष्य कारणं
तदर्थजं द्विक्रममत्र कुर्वते ॥ ६ ॥

ततस्तेभ्योऽपर आचार्या[1] अस्यामवस्थायां संधिजं कारणमवेक्ष्य। किं[2] कारणम्। इतो षिञ्चत (५।१७) इत्योत्वनिपातनम्। तदर्थमेव[3] षत्वार्थमेवौत्वं[4] मन्यमाना द्विक्रममत्र कुर्वते। परीतः। इतो षिञ्चत (ऋ० क० ९।१०७।१)॥

तमःपरं रेफनिमित्तसंशयात्
तथावरित्येतदपोह्यते पदम् ॥ ७ ॥

तमःपरमावरित्येतत्पदं तथा। यथा[5] पूर्वोक्तम्। अ[6]वसाना-दपोह्यतेऽपनीयते। किं कारणम्। रेफनिमित्तसंशयात्। नहि विज्ञायते पूर्वेण पदान्तेनोत्तरेण वा पदादिना रेफो भवतीति। अत उभयहेतु[7]संग्रहार्थमपनीयते[8]। उषा आवर्तमः (ऋ० क० १। ९२।४)॥

अदो पितो सो चिदुषर्वसूयवो
न धक्षि धुक्षीत्यपि चातियन्ति किम् ॥ ८ ॥

यथावरित्येतत्पदं रेफनिमित्तसंशयादनवसनीयं भवति। सांश-यिकनिमित्तानि अदो पितो सो चित् उषर्वसूयवः इतीमानि पदानि धक्षि धुक्षि इत्येतौ च प्रवादौ च[9] किं कारणं नाति-

---

(१) तेभ्यः परे आचार्या Reg., अपर आचार्या omitted in I^2. (२) तत् supplied on the margin in I^2. (३) $B^3 I^2 B^n$; तदर्थजमेव B^2, Reg. (४) ओत्वं (instead of षत्वार्थमेवौत्वं) I^2, षत्वं Reg. (५) यथा omitted in I^2. (६) पूर्वोक्तम- corrected to अ- on the margin in I^2. (७) हेतु- omitted in Reg. (८) -मतीयते Reg. (९) B^2, च। with a mark of deletion in B^3, वा I^2, omitted in B^n.

यन्ति । इमान्यपि हि तेन तुल्यानि । सत्यम् ।[1] क्रमशास्त्रेऽनवसानीयेऽननु[2]गृहीतानीमानि[3] । तस्मान्नातियन्ति । तत्र गृहीतानामिह हेतुरुच्यते ॥

स्वसारमित्येतदपोद्यते पदं
परः सकारोपजनोऽस्कृतेति च ।
निरस्कृतेति ह्युपसर्गकारित-
स्तदन्वयादाचरितं तु पञ्चभिः ॥ ८ ॥

स्वसारमित्येतत्पदमवसानादपोद्यते । अकृतेति च परं पदमपोद्यते । किं कारणम् । परः सकारोपजनः । सकारागम इत्यर्थः[4] । निरस्कृतेत्युपसर्गकारितः[5] । तदन्वयादुपसर्गान्वयात्पञ्चभिरेव पदैरा[6]चरितं क्रमं विद्यात् । आचार्यैः[7] । निरु स्वसारमस्कृतोषसम् (ऋ० क० १० । १२७ । ३) ॥

सहेति चेमेति च रक्तसंहितं
गुणागमादेतनभावि चेतन ।
पदं च चास्कम्भ चिदित्यतः परं
प्रुतादि चैतानि निमित्तसंश्रयात् ॥ १० ॥

---

(१) $B^3 B^n$, M.M. (सत्य on the margin in B^3); यद्यपि तुल्यानि तथापि (instead of सत्यम् ।) B^2, Reg.; सत्यम् omitted in I^2. (२) $B^3 B^n$, -नीयेष्वननु- M.M., -नीये तु न B^2, -नीयेषु न Reg., -नीये अननु- corrected to -नीये न in I^2. (३) गृहीतानामानि corrected to गृहीतानि in I^2. (४) इत्यर्थः struck out in I^2. (५) अस्कृते त्युपसर्गकारिता corrected to निरस्कृतेति ह्युपसर्गकारितः in I^2. (६) पादैरा- B^2. (७) इति शेषः added in B^2, M.M.

सहेति चेम्[1] । इतिकरणयुक्तमीमित्येतत्पदं लुप्तमकारमनवसानीयं भवति । किं कारणम् । निमित्तसंशयात् । न हि विज्ञायते पूर्वेण वा पदान्तेनोत्तरेण वा पदादिना मकारस्य लोपो भवतीति । अत उभयहेतुसंग्रहार्थमतीयते । यमी गर्भम् (ऋ० क्र० ९ । १०२ । ६) ।

एति च रक्तसंहितम् । आ इत्येतत्पदं रक्तसंहितं यत्तदनवसानीयं भवति । किं कारणम्[2] । निमित्तसंशयात् । न[3] ज्ञायते पूर्वेण वा पदान्तेनोत्तरेण वा पदादिना[4] आकारस्य रागो भवतीति । अत उभयहेतुसंग्रहार्थम्[5] । अभ्र आँ अपः[6] (ऋ० क्र० ५ । ४८ । १) ।

गुणागमादेतन भावि चेतन । गुणागमादेकारागमादेतनभूतम् इतन[7] इत्येतत्पदमनवसानीयं भवति । किं कारणम्[2] । न ज्ञायते पूर्वेण वा पदान्तेनोत्तरेण वा पदादिना एकारो[8] गुणागमो भवतीति । अत उभयगतः संशयः[9] । वीरास एतन मर्यासः (ऋ० क्र० ५ । ६१ । ४) ।

---

(१) चेम B^3. (२) B^2, इति added in $B^3B^nI^2$. (३) हि added on the margin in I^2. (४) निमित्तसंशयात् to पदादिना B^2, supplied on the margin by a different hand (नहि for न) in I^2, omitted in B^3B^n. (५) अतीयते added on the margin in I^2. (६) अपः B^2, अपो वृणाना वितनोति $B^3I^2B^n$. (७) इतन इतन B^3. (८) न ज्ञायते to एकारः B^2, omitted in B^3B^n, निमित्तसंशयात् । न ज्ञायते to पदादिना निमित्तेन supplied on the margin by a different hand in I^2. (९) -गतः संशयः B^3B^2, -गतसंशयः B^n, गतः संशयः corrected to-संग्रहार्थमतीयते on the margin in I^2.

पदं च चास्कम्भ चिदित्यत: परम्। चास्कम्भ चित् इत्यस्माद् द्वै[1]पदात्परं स्कम्भनेन इति च पदमनवसानीयम्[2]। किं कारणम्[3]। केन[4] निमित्तेन सकारस्य लोपो भवतीत्युभय[5]गत: संशय:[6]। चित्कम्भनेन स्कभीयान् (ऋ० क० १०।१११।५)।

प्लुतादि च। प्लुतादि च पदं योनिमारैक् इत्येवमाद्यनवसानीयं भवति। प्लुतादिप्रभृतीनि च (१०।४) इत्यत्र गतम्। योनिमारैगप (ऋ० क० १।१२४।८)। अत्र आकारागम: पूर्ववत्संशयित:॥

द्व्यभिक्रमं पूर्वनिमित्तमानिनस्
त्रिषूत्तमेष्वाहुरनन्तरं हि तत्॥ ११॥

द्वाभ्यां पदाभ्यामभिक्रममि[7]च्छन्त्युत्तमेषु[8] त्रिषु निमित्तसंशयेषु। अनवसानीयात्पूर्वं[9] पदं निमित्तं मन्यन्ते। किं कारणम्। अनन्तरं हि तत्पूर्वं[10] पदं गुणागम: सकारलोपश्च दीर्घत्वं[11] चैषां[12] त्रयाणां[13] भवतीति। वीरास एतन (ऋ० क० ५।६१।४)। चित्क-

---

(१) द्वै- B^nI^2, द्वि- B^3B^2. (२) B^2 adds भवति. (३) $B^3I^2B^n$, किं कारण- B^2. (४) गत- corrected to केन on the margin in B^3, तेन B^n, -गत- B^2, (for I^2 see below). (५) भवतीति अत उभय- B^2. (६) Instead of केन निमित्तेन to संशयः I^2 reads गतनिमित्तेन सकारस्य लोपो भवतात्युभय इति गतः संशयः (*sic*). But afterwards all this is struck out and instead of it निमित्तसंशयात is supplied on the margin. (७) अभिक्रमम् इ- B^3B^2, Reg.; अतिक्रम्य ग- I^2; अभिक्रम्य ग- B^n. (८) उत्तरेषु I^2, Reg. (९) पूर्वे- B^n. (१०) पूर्वं B^3, corrected to पूर्व- B^2, पूर्वे- I^2B^n. (११) लोपश्चात्वं Reg.; -लोपश्च दीर्घत्वं corrected to लोपः प्लुतादिश्च in I^2. (१२) B^2, एषां omitted in $B^3I^2B^n$. (१३) द्व्यभिक्रमं added in B^3B^2.

म्भनेन (ऋ० क० १०।१११।५)। योनिमारैक् (ऋ० क० १।१२४।८)॥

अनन्तरं त्वेव चतुर्थषष्ठयोः
परं कथं तत्र च न द्रूयभिक्रमम् ॥ १२ ॥

अनन्तरं तु पुनश्चतुर्थषष्ठयोरनवसानीययोः—उषा आवर्तमः (ऋ० क० १।९२।४) यमी गर्भम् (ऋ० क० ९।१०२।६) इत्येतयोः परं पदं निमित्तं भवितुमर्हति। पूर्वनिमित्तमानिनां हेतुसामान्यात्। कथं तत्र च ते पूर्वनिमित्तमानिनो द्रूयभिक्रमं न कुर्वन्त्येवं स्थितेऽपि। यदि चतुर्थषष्ठयोर्द्रूयभिक्रमं न कुर्वन्ति त्रिषूत्तमेष्वपि न कर्तव्यम्। अथोत्तमेषु कुर्वन्ति चतुर्थषष्ठयोरपि कर्तव्यम्। उभयत्रापि हि विकारहेतुरानन्तर्यमेव॥

अनानुपूर्व्यं पदसंध्यदर्शनात्
पदव्यवेतं च पदं व्यवायि च ॥ १३ ॥

अनानुपूर्व्य[1]संहिते क्रमे क्रियमाणे पदेन यद्व्यवेतं यच्च व्यवैति ते उभे अनवसानीये भवतः। किं कारणम्। पदसंध्यदर्शनात्। शुनःशेपम् चित् इत्येतयोः पदयोरन्योन्येन[2] सह संधिरदृष्टो भवति। शुनश्चिच्छेपं निदितम् (ऋ० क० ५।२।७)॥

ततोऽपरे द्विक्रममाहुराश्रयात्
कृताविलुप्ता हि वर्णसंहिता ॥ १४ ॥

ततोऽपर आचार्या अस्यामवस्थायां द्विक्रममिच्छन्ति। किं कारणम्। आश्रयाल्लक्षणात्कृता ह्यत्राविलोपेन वर्णानां वर्णैः सह संहिता भवतीति। शुन इत्यत्र विसर्जनीयश्चिदिति प्रत्यये—अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे (४।३१) इति शकारमापन्नः। चिदित्यत्र

---

(१) Reg.; -पूर्व्यं $B^3I^2B^2B^n$. (२) पदयोरन्येन Reg.

तकारः शेपप्रत्यये—तालव्येऽघोष उदये चकारम् (४ । ११) इति चकारमापन्नः। सर्वैः प्रथमैरुपधीयमानः शकारः शाकल्यपितुश्छकारम् (४ । ४) इति शकारश्[1] छकारमापन्नः। शेपमित्यत्र मकारः पदान्ते वर्तमानो नकारे प्रत्यये—विस्थाने स्पर्श उदये मकारः सर्वेषामेवोदयस्योत्तमं स्वम् (४ । ६) इति नकारमापन्नः। शुनश्चित्। चिच्छेपम्। शेपन्निदितम्[2] (ऋ० क्र० ५ । २ । ७)[3] ॥

पदानुपूर्व्येण सपूर्व आ ततस्
ततो व्यवेतं च सह व्यवायि च ॥१५॥

पदानामानुपूर्व्येण सपूर्वे विद्यमानपूर्वेऽनानुपूर्व्य[4]संहितेऽर्धर्चस्य पूर्वे द्वैपदशः क्रमो वक्तव्य आ ततोऽनानुपूर्व्यसंहितायाः। द्वा जना। जना यातयन्। यातयन्नन्तः। अन्तरीयते (ऋ० क्र० ६ । ८६ । ४२)। किमर्थमिदमुच्यते। ननु—क्रमो द्वाभ्यामभिक्रम्य (१० । १-२) इत्येव[5] सिद्धम्। न सिध्यति। ईयत इत्ये[6]तस्य नरा इत्येतेन पदैकदेशेन सह संधिर्दृष्टः। नराशंसमित्येतेन पदेन सह संधिरदृष्टः। तदा पदसंध्यदर्शनादीयत इत्येतस्यापि पदस्यानवसानीयता प्राप्नोति। सा मा भूदित्युच्यते।

ततो व्यवेतं च पदं यच्च व्यवैति ते उभे सह वक्तव्ये। केन सह। ईयते दैव्यम् इत्येताभ्यां सह। ईयते नरा च शंसं दैव्यम् (ऋ० क्र० ६ । ८६ । ४२)। एवमेके।

---

(१) शकारश् P, omitted in $B^3B^2I^2B^n$. (२) शुनश्चित्। to निदितम्। Reg., B^3B^2; शुनश्चित्। चिच्छेपं निदितं। I^2; omitted in B^n. (३) $B^3B^2B^n$ add शुनश्चिच्छेपन्निदितं, struck out in I^2. (४) Reg.; -पूर्व्ये $B^3I^2B^2B^n$. (५) इत्येवमेव B^3. (६) इत्ये- omitted in I^2.

अपरे पुनरन्यथा । ईयत इत्येतस्यानवसानीयता नैव प्राप्नोति । कथम् । पदैकदेशेन वा कृत्स्नेन वा पदसंधिर्दृष्टो भवतीति । किमर्थं तर्हीदमुच्यते । ततो ऽव्यवेतं च सह व्यवायि चेत्येवमाद्यपूर्वविधिः । स चानुक्तः[1] पुनरुच्यते ॥

ततो निराहेतरयोश्च ते पदे
ततोऽव्यवेतेन परस्य संहिता ॥ १६ ॥

ततोऽस्यामव[2]स्थायां निराह वक्ता । परिग्रहेण योजयतीत्यर्थः । ते पदे । कतरे । व्यवेतं च यच्च व्यवैति ।[3] नराशंसमिति नराशंसम् । चेति च[4] (ऋ० क्र० ६ । ८६ । ४२) । इतरयोश्च । कतरयोः । अविद्यमानपूर्वयोस्ते पदे निराह । शुनश्चिच्छेपं निदितम् । शुनःशेपमिति शुनःऽशेपम् । चिदिति चित् (ऋ० क्र० ५ । २ । ७) । नरा वा शंसं पूषणम् । नराशंसमिति नराशंसम् । वेति वा (ऋ० क्र० १० । ६४ । ३ ।) ततोऽव्यवेतेन पदेन परस्य संहिता कर्तव्या । दैव्यं च (ऋ० क्र० ६ । ८६ । ४२) । निदितं सहस्रात् (ऋ० क्र० ५ । २ । ७) । पूषणमगोह्यम् (ऋ० क्र० १० । ६४ । ३) । असंदिग्धार्थमिदमाचार्येण विस्तरेणोक्तम् ॥

अनन्तरे त्रिक्रमकारणे यदि
त्रिभिश्च गार्ग्यः पुनरेव च त्रिभिः ॥ १७ ॥

---

(१) तस्मात् added in B³. (२) -स्यामेवाव- B². (३) After व्यवैति । B² and Reg. add ईयते नरा च शंसं दैव्यं, omitted in B³I²Bⁿ. (४) चदि चित् (instead of चेति च) I².

अनन्तरे अव्य[1]वहिते त्रिक्रम[2]कारणे[3] द्वे[4] यदि भवतस्त्रिभिः पदैरवसानमिच्छत्याचार्यो गार्ग्यः[5] । तेषामेव[6] त्रयाणां मध्यमं पदं प्रत्यादाय पुनरेव च[7] त्रिभिः । किं कारणम् । एवमपि निमित्त-[8] निमित्ति[9]नामविलोपो भवतीति[10] । उदू षु । ऊ षु णः (ऋ० क० ८ । ७० । ९) ॥

त्रिसंगमे पञ्चभिरार्ष्यनुग्रहः ॥१८॥

अस्मिन्निमित्तनिमित्तिनां[11] त्रयाणां नामिषत्वणत्वानां सङ्गमे पञ्चक्रमेणार्ष्यां अविलोपो भवतीति मन्यन्त एक आचार्याः । किं कारणम् । उक्तं हि । उदू षु णः (ऋ० ८ । ७० । ९) इत्यत्र नामिनिमित्तं षत्वम् । षत्वनिमित्तं णत्वम् । नाम्यभावे षत्वं न स्यात् । षत्वाभावे णत्वं न स्यात् । स विलोप इति । न इत्येतस्या-

---

(१) B²I², Reg., M.M. (a); -न्तरेऽव्य- B³Bⁿ. (२) I², Reg., M.M. (a); त्रिक्रमयोः B³B²Bⁿ. (३) I², Reg., M.M. (a); कारणे निमित्ते B³B²Bⁿ. (४) द्वे omitted in B³Bⁿ. (५) तदा प्रथमतः त्रिभिः पदैः क्रमं ब्रूयात् (instead of त्रिभिः पदैर् to गार्ग्यः) B³Bⁿ; B² adds it after गार्ग्यः; omitted in Reg., I², M. M. (a). येगार्थः (instead of गार्ग्यः) M. M. (a). (६) I², Reg., M. M. (a); पुनस्तेषामेव B²; पुनः B³Bⁿ. अनन्तरे अव्य- to तेषामेव omitted in I², but supplied on the margin by a different hand with the variants: अव्यहिते, त्रिभिश्च, and इति गार्ग्यो मन्यते (for इच्छत्याचार्यो गार्ग्यः). (७) च omitted in I². (८) निमित्त- omitted in B³I²Bⁿ. (९) -त्ती- B². (१०) इति गार्ग्यो मन्यते added in B³ and गार्ग्यो मन्यते in Bⁿ. (११) Reg., निमित्तीनां B², -नैमित्तिनां B³I² Bⁿ.

नवसानीयत्वं कस्मात्[1] । नकार[2]स्योत्तरेण[3] पदेन सह[4] प्रत्यादाने[5] णो वसो इति[6] सह सन्धिरदृष्टो भवतीति । उदू षु णो वसो (ऋ० क्र० ८ । ७० । ९) ॥

चतुःक्रमस्त्वाचरितोऽत्र शाकलैः ॥ १९॥

एवं पदान्तरगमनेऽप्य[7]स्मिन्नित्रसङ्क्रमे शाकलाश्चतुःक्रममाचरन्ति । तुशब्दः पदान्तरनिवृत्त्यर्थः । उदू षु णः (ऋ० क्र० ८ । ७० । ९) ॥

अलोपभावादपरे बहुक्रमं
प्रतिस्वमार्षीति न कुर्वते क्वचित् ॥२०॥

अलोपभावादार्ष्या लोपस्याभावादपर आचार्या बहुक्रमं क्वचिदपि न कुर्वते[8] । यदि बहुक्रमो न क्रियते निमित्तनैमित्तिक[9]विप्रयोगे[10] कथमार्ष्या अलोपो भवति । प्रतिस्वमार्षी भवतीति[11]। पदान्तस्य पदादिना[12] सन्धौ क्रियमाणे लोपागमविकाराः[13] प्रतिस्वं भवन्ति[14]।

---

(१) अलोप इति कस्मात् (instead of स विलोप to कस्मात्) I^2. (२) $B^3B^2B^n$; णकार- I^2; नकारभूतस्य णकारस्य Reg., M. M. (३) -त्तर- B^n. (४) स B^2, सह omitted in I^2. (५) प्रत्यादाने omitted in I^2. (६) $B^3B^2B^n$, उदू षं णो वसो इति I^2, नो वसो इत्यत्र वसो इत्यनेन Reg., नो वसो इत्यत्र णो वसो इति M. M. (७) -गमनेष्व- B^n. (८) कुर्वन्ति I^2. (९) -निमित्तिक- (for -नैमित्तिक-) Reg. (१०) -प्रयोगे (for -विप्रयोगे) I^2, योगे B^n. (११) B^2I^2, Reg.; प्रतिस्वमार्षी भवतीति omitted in B^3 B^n, M. M. (१२) पदान्तस्य पदादिना $B^3I^2B^n$, M. M.; पदांतपदाद्योः B^2, Reg. (१३) -विकारः I^2. (१४) भवति I^2, omitted in Reg.

एवं[1] द्वयोर्द्वयोः पदयोराष्र्या अलोपो[2] भवति[3] । मो षु । षु नः (ऋ० क० १ । ३८ । ६) ॥

असर्वशस्त्रिप्रभृतिष्वनेकशः
स्मरन्ति संख्यानियमेन शाकलम् ॥ २१ ॥

प्रतिस्वमार्षीति यदुक्तं तदसर्वशः । न सर्वत्र युज्यत इत्यर्थः । कथम् । यत्र पदान्तपदाद्योरन्योन्यं प्रति निमित्तत्वं तत्र युक्तम् । तन्नः । नो मित्रः (ऋ० क० १ । १०७ । ३) इत्यादौ[4] । यत्र तु ताभ्यां[5] पूर्वं पदं[6] विकारस्य निमित्तं भवति[7] न तत्र युक्तम् । त्रि[8]प्रभृतिषु पदेषु । मो षु णः (ऋ० १ । ३८ । ६) इत्यत्र नामिनिमित्तं षत्वम् । षत्वनिमित्तं णत्वम् । नाम्यभावे षत्वं न स्यात् । षत्वाभावे णत्वं न स्यात् । यथापदं सन्धिमपेतहेतुषु (११ । २३) इति वक्ष्यमाणत्वात्[9] । स विलोप इत्युक्तम् । तस्मादनेकशो बहवः

---

(१) एवं I^2; इति Reg.; omitted in $B^3B^2B^n$, M. M. (२) अविलोपो I^2. (३) भवति $B^3B^2B^n$; भवतीति I^2, M. M. द्वयोराष्र्यविलोप एवेति (instead of द्वयोर् to भवति) Reg. After भवति $B^3B^2B^n$ and M. M. add प्रतिस्वमार्षी भवतीति, omitted in I^2 and Reg. -पभावादार्ष्या to कथमार्ष्या अलो- and पदान्तस्य to भवति, with the variants noted above, is supplied on the margin by a different hand in I^2. (४) तन्नः to -दौ omitted in I^2. (५) ताभ्यां $B^3B^2I^2$, द्वाभ्यां Reg., पदाभ्यां B^n, उभाभ्यां M. M. (६) $B^3B^2B^n$, पूर्वपदं च I^2, पूर्वं परं वा Reg., पूर्वं परं वा पदं M. M. (७) न added before भवति by Reg. (wanting in his MS.). (८) युक्तं त्रि- corrected to युक्तस्त्रि- in I^2. (९) न स्यात् to -त्वात् omitted in I^2.

स्मरन्तीच्छन्त्याचार्याः संख्यानियमेन। त्रि[1]क्रमश्चतुःक्रमः पञ्चक्रम इत्येतेन संख्यानियमेन। शाकलविधानम्। मो षु णः (ऋ० क० १।३८।६)। उदू षु णः (ऋ० क० ८।७०।९)। निरु स्वसारमस्कृतोषसम् (ऋ० क० १०।१२७।३)॥

अयावने पूर्वविधानमाचरेत् ॥ २२ ॥

अयावनेऽमिश्रणे। किमुक्तं भवति। यत्र क्रमे वचनप्राप्ताभ्यां पदाभ्यां पूर्व[2]पदं निमित्तं न भवति तत्रेत्युक्तं भवति। पूर्वविधानमाचरेदिति। द्वाभ्यां क्रममाचरेदित्यर्थः। अग्निमीळे। ईळे पुरोहितम् (ऋ० क० १।१।१)। यत्र यत्र यावनं तत्र तत्र बहुक्रममाचरेत्। मो षु णः (ऋ० क० १।३८।६) इति॥

यथापदं संधिमपेतहेतुषु ॥ २३ ॥

यथापदं संधिं कुर्यादपेतहेतुषु पदेषु। प्र णः। न इन्दो (ऋ० क० ९।४४।१)। प्रशब्दो णत्वहेतुस्तस्यापाय उत्तरेण सह प्रत्यादाने क्रियमाणे नत्वम्। विलोपसंशयनिवृत्त्यर्थं ग्रहणम्। न इन्दो[3]॥

अथो पदाभ्यां समयं पदेन च
क्रमेष्ववस्येदतिगम्य संदधत् ॥ २४ ॥

अथो पदाभ्यां समयमतिक्रम्यावस्येत्। संदधत्तथा समयं पदेन। किं पुनः कारणं समयातिक्रमणे। दृष्टक्रमत्वात् (१०।१९) इत्युक्तं क्रमशास्त्र एव। किमर्थं पुनर्द्वाभ्यामतिक्रम्यावसानम्। अदृष्टक्रमत्वादिति वक्तव्यम्। एकेन कस्मात्संदधदवस्यति। संध्यर्थमिति वक्तव्यम्। त्वां ह। ह[4] त्यदिन्द्रार्णसातौ स्वर्मीळ्हे। (ऋ० क० १।६३।६)।

क्रमेष्विति ग्रहणात्पादव्यवस्थायां समयोत्तरपदद्वयान्तेऽवसानं न स्यात्—त्वां ह त्यदिन्द्रार्णसातौ (ऋ० १।६३।६) इत्यादिषु।

---

(१) B² and Reg., त्रिः B³I²Bⁿ. (२) पूर्वं Bⁿ. (३) न इन्द्रो I². (४) त्वां ह (for त्वां ह। ह) I².

यच्चिद्धि सत्य सोमपाः (ऋ० १ । २९ । १) इत्यादिषु तु[1] समयोत्तरपदद्वयान्तेऽवसानं स्यादेव पादलक्षणवशात्[2] ॥

सहेतिकाराणि समासमन्तभाग
बहुक्रमे मध्यगतानि यानि च ।
तृतीयतां गच्छति यस्य सोष्मवा-
ननन्ययोगं विकृतं प्लुतादि च ।
अतीत्य तेषां पदतां प्रदर्शयेत् ॥ २५ ॥

सहेतिकाराणीतिकरणयुक्तानि । समासमवगृह्याणि । अन्तभागधर्चान्तं यत्पदं भजते । बहुक्रमे मध्यगतानि यानि च । त्रिक्रमप्रभृतिषु बहुक्रमेषु[3] यानि मध्यगतानि पदानि[4] । तृतीयतां गच्छति यस्य सोष्मवान् । जुगुक्षतो दुदुक्षन्नित्येवमादि । तेषु सोष्मा घकारादिश्[5] चतुर्थः स्व[6]वर्गतृतीयं[7] गकारादिमा[8]पद्यते । तत्[9] । अनन्ययोगं[10] विकृतम् । अनन्यकृतो यस्य विकार आत्मकारित इत्यर्थः । प्लुतादि च[11] । प्लुतादीनि च पदानि[12]—योनिमारैक् (२ । ७५) इत्येवमादीनि । तेषां पदानामुत्तरेण सह प्रत्यादानं कृत्वा या पदे प्रकृतिर्दृष्टा तां[13] प्र[14]दर्शयेत् । केन । परिग्रहेण । किं कारणम् । स्त इति स्तः (ऋ० क्र० १ । ६१ । ८) स्विति सु[15] (ऋ० क्र० १ । ३८ । ६)

---

(१) B^n omits तु. (२) क्रमेष्विति to -वशात् omitted in I^2. (३) B^n and Reg., -क्रमे $B^3B^2I^2$. (४) B^nI^2 add यानि च. (५) घकारादिश् P (also P^1), घकारश् $B^3B^2I^2B^n$. (६) स्व-P (also P^1), सन् $B^3B^2I^2$, स च B^n. (७) -तृतीयतां B^n. (८) गकारादिमा- P^1, घकारादिमा- P, दकारादिमा- B^2, दकारमा- B^3B^n. (९) तव् $B^3B^2B^n$, omitted in P (also in P^1). (१०) B^2B^n, -योग- B^3 (-गं corrected to -ग-). (११) प्लुतादि च omitted in B^n. (१२) पदादि B^3. (१३) B^3, Reg.; तं B^n, -नां B^2. (१४) B^3B^n omit प्र-. (१५) स्त इति to सु B^3B^n, M.M.; स्विति सु । स्त इति स्तः B^2, Reg.

इत्यत्र—युग्मान्तस्थादन्तमूलीयपूर्वैः (५ । २०) इति परिग्रहस्य द्वितीये वचने[1] षत्वप्रसङ्गः स मा भूदिति । समास इति । दुर्हनो इति दुःऽहनो (ऋ० क० १० । १५५ । ३) इत्यत्र—ऋकाररेफषकारा नकारम् (५ । ४०) इति परिग्रहस्य पूर्ववचने णत्वप्रसङ्गः । स मा भूदिति ।

अन्तभाक् । महान्हि षः । स इति सः (ऋ० क० ८ । १३ । १) इत्यत्र—युग्मान्तस्था० (५ । २०) इति पूर्ववत् । बहुक्रमे मध्यगतानि[2] । मो षु णः (ऋ० क० १ । ३८ । ६) इत्यत्र पूर्ववत् । तृतीयतां गच्छति यस्य सोष्मवान् । जुघुक्षत इति जुघुक्षतः (ऋ० क० ८ । ३१ । ७) इत्यत्र परिग्रहस्य संहितावत्पूर्ववचनं पदवदुत्तरमिति परिग्रहस्य पूर्वे[3] वचने तृतीयत्वप्रसङ्गः । स मा भूदिति[4] । अनन्ययोगं[5] विकृतम् । सुसुमेति सुसुम (ऋ० क० १ । १३७ । १) इत्यत्र परिग्रहस्य संहितावत्पूर्ववचनं पदवदुत्तरमिति परिग्रहस्य[6] पूर्ववचने षत्वप्रसङ्गः । स मा भूदिति । प्लुतादि । योनिमारैक् (२ । ७५) इत्येवमादिषु । अरैगित्यरैक् (ऋ० क० १ । १२४ । ८) इत्यत्र पूर्ववचने दीर्घत्वप्रसङ्गः । स मा भूदिति ॥

अस्यैवापरा योजना । अतीत्य तेषां पदतां प्रदर्शयेदिति । सहेतिकाराणीत्येवमादीन्यतिक्रम्य परिग्रहेण तेषां पदानां पदतां प्रदर्शयेत् । किं कारणम् । नहि परिग्रहादृते तेषां पदता दृश्यते । सहेतिकारेषूप-[7]स्थितान्तप्रदर्शनार्थं च । इन्द्राग्नी तपन्ति । इन्द्राग्नी इतीन्द्राग्नी (ऋ० क० ६ । ५९ । ८) । प्रगृह्यत्व[8]प्रदर्शनार्थं च[9] । प्रातः

(१) वचने omitted in B³Bⁿ. (२) Bⁿ adds यानि. (३) पूर्वे- B². (४) B² omits इति. (५) B³B²Bⁿ. (६) पूर्वे- to परिग्रहस्य omitted in Bⁿ. (७) तावदुप- Bⁿ. (८) Bⁿ omits -त्व-, supplied on the margin in B³. (९) M.M. omits च.

सोमम्। प्रातरिति प्रातः (ऋ० क्र० ७। ४१। १)। रेफप्र[१]दर्शनार्थं च[२]। समासेष्ववग्रहप्रदर्शनार्थं च। पुरोहितं यज्ञस्य। पुरोहितमिति पुरःऽहितम् (ऋ० क्र० १। १। १)। अन्तभागृद्ववर्धर्चान्तख्यापनार्थम्। अर्णाचित्ररथावधीः। अवधीरित्यवधीः (ऋ० क्र० ४। ३०। १८)। पदादिप्रदर्शनार्थं च। बहुक्रमे[३] मध्यगतेषु पदवद्भावप्रदर्शनार्थम्[४]। निरु स्वसारमस्कृतोषसम्। ऊँ इत्यूँ। स्वसारमिति स्वसारम्। अकृतेत्यकृत (ऋ० क्र० १०। १२७। ३)।

तृतीयतां गच्छति यस्य सोष्मवानिति पृथग्ग्रहणमनर्थकम्। अनन्ययोगं[५] विकृतमित्येव[६] सिद्धत्वात्। नानर्थकम्। परिग्रहस्योभयोरपि वचनयोः पद[७]त्वप्रदर्शनार्थम्। दक्षुषः कृष्णजंहसः। धक्षुष इति धक्षुषः (ऋ० क्र० १। १४१। ७)। किमुच्यत उभयोरपि वचनयोः पदत्वप्रदर्शनार्थं पृथग्ग्रहणमिति। अन्येष्वप्यनन्ययोग[८]विकृतेषूभयोरपि वचनयोः पदत्वं प्रदर्श्यते[९]। सत्यम्[१०]। नकारलोपेोष्मरभावमानयेत् (११। ३६) इत्येवमादिवचनात्। यत्र यत्र तु वचनं[११] नास्ति तत्र तत्र परिग्रहस्य पूर्ववचने विकारो भवत्येव। यथा—रजेषितमिति रजःऽइषितम् (ऋ० क्र० ८। ४६। २८)। अनन्ययोगविकृतेषु[१२] पदत्वप्रदर्शनार्थमेव[१३]। सुषुमा यातम्। सुसुमेति

---

(१) B^2 omits -प्र-. (२) B^3 omits च. (३) -क्रमेषु B^n. (४) M.M. adds च. (५) -योग- M.M. (६) इत्येवमेव B^n. (७) गकारादिम् (page 338, line 12) to पद- omitted in I^2. (८) -योगं B^n, corrected to -योग- in B^3. (९) B^2, M.M.; प्रदश्यते $B^3 I^2 B^n$. (१०) I^2 omits सत्यम्, supplied on the margin in B^3. (११) तु वचनं M.M., वचनं B^n, कारणं I^2, कारणं corrected to वचनं on the margin in B^3, तु वचनं कारणं B^2. (१२) पकारः in B^n and यकारा in I^2 added. (१३) -र्थं च M.M.

सुसुम (ऋ० क्र० १ । १३७ । १) ।[1] प्लुतादिषु पदत्वप्र[2]दर्शनार्थमित्येव[3] । आरैक्पन्थाम् । अरैगित्यरैक् (ऋ० क्र० १ । ११३ । १६)॥

कृते तु गार्ग्यस्य पुनस्त्र्यभिक्रमे ॥ २६ ॥

गार्ग्यस्याचार्यस्य पक्षे—त्रिभिश्च गार्ग्यः पुनरेव च त्रिभिः (११ । १७) इति पुनस्त्र्यभिक्रमे कृत एव[4] पदतां प्रदर्शयेत् । उदू षु । ऊ षु णः । ऊँ इत्यूँ । स्विति सु (ऋ० क्र० ८ । ७० । ९) ॥

अदृष्टवर्णे प्रथमे प्रदर्शनं
स्मरन्ति तत्त्वन्न निराह चोदकः ॥२७॥

प्रथमे द्वैपदे पूर्वपदस्यान्त्यवर्णेऽदृष्टे तस्य प्रदर्शनमाचार्याः स्मरन्तीच्छन्ति । तत्तु प्रदर्शनं निराहेति प्रवदति चोदकः परिग्रहः । किं कारणम् । पदान्तसंशयनिवृत्त्यर्थम् । तान्त्वाम् (ऋ० १ । ४९ । ४) इत्यत्रार्धर्चाद्ये द्वैपदे न ज्ञायते नकारान्तं वा पदं मकारान्तं वा । तस्मात्परिगृह्णाति[5] । तामिति ताम् (ऋ० क्र० १ । ४९ । ४) ॥

पदं यदा केवलमाह सा स्थितिः ॥ २८ ॥

पदं केवलमनितिकरणं यदाह वक्ता सा स्थितिरिति वेदितव्या । संज्ञाकरणं स्थित्यभिक्रमार्थम् । तन्नः (ऋ० १ । १०७ । ३) । तत् । तान्नः (ऋ० १० । १५६ । २) । ताम्[6] ॥

---

(१) B[2] adds : ननु च । तृतीयतां गच्छति यस्य सोष्मनित्यस्य पृथगुपादानप्रयोजनाभाव एव । अनन्ययोगमित्यनेनैव सिद्धेः । न सिद्ध्यति । अदोपितो सो चिदुपर्यसूयव इत्यादिसूत्रे निमित्तसंशयेषु धत्तिधुत्तिप्रवादानां गृहीतत्वात् तत्र अनन्यथोगविकृतत्वस्य असंभावितत्वात् । सूक्तं तृतीयतां गच्छति यस्य सोष्मवानिति । (*sic*). (२) B[3], M. M. omit -प्र-. (३) -र्थमेव B[n]. (४) एवं I[2]B[n]. (५) -गृह्णन्ति B[n], -गृह्यं ह्णाति I[2]. (६) B[3]B[2], तंनः (instead of तन्नः to ताम्) I[2], तान्नः तामिति ताम् B[n], तान्नः । ताम् Reg.

यदेतिकारान्तमुपस्थितं तदा ॥ २९ ॥

इतिकरणान्तं यत्पदमाह वक्ता तत्पदमुपस्थितसंज्ञं वेदितव्यम् । संज्ञाकरणमुपस्थितेनाभिक्रमार्थम् । इन्द्राग्नी इति (ऋ० प० ६ । ५९ । ८)[1] ॥

अथो विपर्यस्य समस्य चाह ते
यदा स्थितोपस्थितमाचरन्त्युत ॥ ३० ॥

अथो ते पदे स्थित्युपस्थिते विपर्यस्योपस्थितं तत्पूर्वं कृत्वा स्थितं पश्चात् समस्य च यदाह वक्ता तत्पदं स्थितोपस्थितसंज्ञं वेदितव्यम् । संज्ञाकरणं स्थितोपस्थितेनाभिक्रमणार्थम्[2] । विभावसो इति विभाऽवसो (ऋ० क्र० १ । ४४ । १०) । तान्नः । तामिति ताम्[3] (ऋ० क्र० १० । १५६ । २) । आचरन्त्युत । एवं स्थित्युपस्थित[4]स्थितोपस्थितानामन्यतमेन पदप्रदर्शनमाचरन्ति ॥

पुनर्ब्रुवँस्तत्र समासमिङ्गयेत् ॥ ३१ ॥

तत्र स्थितोपस्थिते क्रियमाणे पुनर्ब्रुवन्वक्ता समासमवगृह्णीयात् । पुरोहितमिति पुरःऽहितम् (ऋ० क्र० १ । १ । १) । अतीत्य तेषां पदतां प्रदर्शयेत् (११ । २५) इत्येवं[5] सिद्ध इदं वचनं परिग्रहस्य पूर्वे[6] वचनेऽवग्रह[7]प्रतिषेधार्थम् ॥

स्वरित्यतोऽन्येषु च संधिमाचरेत् ।
अवग्रहस्येव हि कालधारणा
परिग्रहेऽस्तीत्युपधेत्यनुस्मृता ॥ ३२ ॥

---

(१) B^3B^2 and Reg., तामिति added in B^n, तां नः । तामिति (instead of इन्द्राग्नी इति) I^2. (२) B^3B^2, -क्रमाणार्थं I^2, -क्रमार्थं B^n. (३) नाना । तानिति । तां (instead of तान्नः to ताम्) I^2. (४) -स्थित- omitted in I^2. (५) इत्येव B^2. (६) B^3 I^2, पूर्व- B^2B^n. (७) -ग्रहा- I^2, -ग्रहस्य corrected to -ग्रह B^2.

तस्मिन्नेव च[1] स्थितोपस्थिते स्वरित्येतत्पदं वर्जयित्वान्येषु पदेष्वि[2]तिकरणात्परेषु सत्स्वितिना तेषां यथोक्तं सन्धिं कुर्यात्। और्वभृगुवदित्यौर्वभृगुऽवत् (ऋ० क्र० ८। १०२। ४)। इन्द्राग्नी इतीन्द्राग्नी (ऋ० क्र० ६। ५६। ८)। स्वरित्यतोऽन्येष्विति कस्मात्। स्वरित्येतस्य हि पदस्यावग्रहस्येव हि मात्राकालः कालधारणा परिग्रह इत्युपधास्तो[3]तीतिपूर्वा शाकलैरनुस्मृता। आचार्यग्रहणं पूजार्थम्। स्वरिति स्वः (ऋ० प० १। ५२। १२)। क्रमशास्त्र एव हेतुरुक्तः—इतिपूर्वेषु सन्धानं पूर्वैः (१०। १७) इति॥

अभिक्रमेतोभयतोऽनुसंहितं
ततोऽस्य पश्चात्पदतां प्रदर्शयेत्।
यथापदं वान्यतरेण संदधत्
त्रिपूत्तमेष्वेतदलोपसंभवात् ॥३३॥

अलोप[4]संभवदर्शनादथवाभिक्रमं कुर्यादुभयतः पूर्वेण च परेण चानुसंहितम्। ततः पश्चादस्य पदस्य पदतां प्रदर्शयेत्। क। त्रिपूत्तमेषु निमित्तसंशयेषु[5]। निमित्तहेतोरेवमप्यलोपः संभवति। वीरास एतन। एतन मर्यासः। इतनेतीतन (ऋ० क्र० ५। ६१। ४)। चित्कम्भनेन। कम्भनेन स्कभीयान्। स्कम्भनेनेति स्कम्भनेन (ऋ० क्र० १०। १११। ५)। योनिमारैक्। आरैगप। अरैगित्यरैक् (ऋ० क्र० १। १२४। ८)।

---

(१) च or व struck out in I². (२) पदेषु omitted in I². (३) -सी- I². (४) B³B²Bⁿ; अलोप-omitted in I², M.M. (a), Reg. (५) निमित्तसंशयेषु added in I².

यथापदं वा[1]न्यतरेण पदेन पूर्वेण परेण वा[2] सह संदधत्[3] क्रमं ब्रूयात् । वीरास एतन । इतन मर्यासः । वीरास इतन । एतन मर्यासः (ऋ० क्र० ५ । ६१ । ४) । चित्स्कम्भनेन ।[4] स्कम्भनेन स्कभीयान् । चित्स्कम्भनेन । कम्भनेन स्कभीयान् (ऋ० क्र० १० । १११ । ५) । योनिमारैक्[5] । अरैगप । योनिमरैक् । आरैगप (ऋ० क्र० १ । १२४ । ८) । एवमप्यलोपः संभवति ।

द्वाविमौ पक्षौ । उभयतोऽनुसंहितमिति च यथापदं वा[6]न्यतरेणेति च । एतयोः को[7]ऽभिप्रायः । अज्ञायमाने विकारनिमित्तेऽन्यतरयोगे विकारो भवतीति पूर्वस्याभिप्रायः । अन्यतरवचनादन्यतरं[8] निमित्तं भवितुमर्हतीति परस्य । एवमेके वर्णयन्ति ॥

अपरे पुनर्निवृत्तत्वान्निमित्तसंशयाधिकारस्य त्रिपूत्तमेष्विति प्रकृतानामेव—सहेतिकाराणि (११ । २५) इत्ये[9]तेषां त्रिपूत्तमेषु—तृतीयतां गच्छति यस्य सोष्मवान् (११ । २५) इत्येवमादिषु वर्णयन्ति । पत्मन्दक्षुषः । द[10]क्षुषः कृष्णजंहसः । धक्षुष इति धक्षुषः (ऋ० क्र० १ । १४१ । ७) । वरुणो मामहन्ताम् । मामहन्तामदितिः । ममहन्तामिति ममहन्ताम् (ऋ० क्र० १ । ९४ । १६) । योनिमारैक् । आरैगप । अरैगित्यरैक् (ऋ० क्र० १ । १२४ । ८) ॥ पूर्वोत्तरयोः[11]—अतीत्य तेषां पदतां प्रदर्शयेत् (११ । २५) इत्येव[12]

---

(१) वा- B^n, चा- or वा- (?) I^2, चा- B^{3}B^2. (२) वा Reg., च B^{3}B^{2}I^{2}B^n. (३) After संदधत् I^2 adds स्कंभनेन स्कभीयान् । चित्स्कंभनेन । कंभनेन स्कभीयान् । योनिमारैक । आरैगप. (४) स्कंभनेन । added in B^3. (५) स्कंभनेन to -रैक omitted in I^2. (६) वा- B^n, चा- or वा- (?) I^2, चा- B^{3}B^2, M. M. (७) एतयोस्को I^2. (८) B^3, M. M.; -तर- B^{2}B^n; -वचनांतर- (instead of -वचनादन्यतरं) I^2. (९) -णां नात्येव (instead of -णि इत्ये-) I^2. (१०) ध- Reg. (११) B^{2}B^{3}I^2 (पक्षयोः on the margin in B^3), पक्षयोः पूर्वोत्तरयोः B^n. (१२) B^{2}I^2, इत्येवं B^{3}B^n.

सिद्धत्वादिह ग्र[1]हणमनर्थकम्। नानर्थकम्। यथापदं वा[2]न्यतरेण संदधदित्यपूर्वार्थविधिः। तत्रोक्तो[3]ऽप्यर्थः पुनः कीर्त्यते। परमन्दध्रुषः। धद्गुषः[4] कृष्णजंहसः (ऋ० क० १।१४१।७)।' वरुणो माम-हन्ताम्। म[5]महन्तामदितिः (ऋ० क० १।९४।१६)। योनिमारैक्। अ[6]रैगप (ऋ० क० १।१२४।८)। यदवशिष्टं तत्पूर्ववद् द्रष्टव्यम्॥

अरक्तसंध्येत्यपवाद्यते पदं
पुनस्तदुक्त्वाध्यवसाय पूर्ववत्॥३४॥

अरक्तसंधि आ इत्येतत्पदमपवाद्यते। कस्मात्। परिग्रहात्। कस्य हेतोः। बहुक्रमे मध्यगतानि यानि च (११।२५) इति परिग्रहोऽस्य मा भूदिति। कथं तर्हि वक्तव्यम्। पुनस्तत्पदमुक्त्वा। कतरत्। आ इत्येतत्। पूर्ववत्परेण पदेनाध्यवसानं कृत्वा क्रमेत। मन्द्रमा वरेण्यम्। आ वरेण्यम्[7] (ऋ० क० ६।६५।२९)। अरक्तसंधीति कस्मात्। अभ्र आँ अपः[8]। एत्या[9] (ऋ० क० ५।४८।१)॥

तथा यदृच्छोपनते बहुक्रमे
क्रमेत तस्यैकपदानि निःसृजन्॥३५॥

तथा। कथम्। यथा आकारस्य पद[10]प्रदर्शनार्थं प्रत्यादानमुक्तं पूर्ववदध्यवसानम्। यद[11]च्छोपनते बहुक्रमे तस्य बहुक्रमस्यैकैकं पदं निःसृजन्नपनयन्वक्ता क्रमेत। कस्य हेतोः। यथा सर्वे[12] पदान्ताः

(१) सिद्धत्वात् वि गृ- I^2. (२) वा अ- B^n, च अ- B^3B^2, अ-I^2. (३) तत्रोक्तो- B^2, स य उक्तो- B^3, स पा उक्ता- I^2, स उक्तो- B^n. (४) धद्गुषः omitted in I^2. (५) B^3B^2, मा- I^2B^n. (६) B^3B^2, आ- I^2B^n. (७) B^3B^2, आ वरेण्यम् omitted in I^2B^n. (८) पथ added in I^2. (९) B^3B^2, एत्या omitted in I^2B^n. (१०) पदता M.M. (११) $B^3I^2B^n$, एवं यद- B^2 and M.M. (१२) सर्वेषां B^3.

स्वराश्च सार्थदृष्टाः स्युरिति । आ त्वेता नि । त्वेता नि । एता नि[1] । इता नि (ऋ० क्र० १ । ५ । १)। निमित्तनैमित्तिकप्रसङ्गेन यो बहुक्रमः क्रमशास्त्रेषु[2] नाम्नातः स यदृच्छोपनतः । यथा आ त्वेता नि इत्यत्र आ तु इति द्वाभ्यामवसाने क्रियमाणे तकारस्य द्वित्वाभावात्तदनवसानीयं भवति । अनुनासिकभयात्तृतीयम् । दीर्घभावार्थं चतुर्थम्[3] ॥

नकारलोपोष्मरभावमानये-
दपेतरागां प्रकृतिं परिग्रहे ॥३६॥

नकारस्य खलु लोपभावं चोष्मभावं च रभावं चापेतरागां रागवर्जितां प्रकृतिमानयेत्परिग्रहे क्रियमाणे । कस्य हेतोः । पदप्रदर्शनार्थम् । दृष्टा हि लोपोष्मरभावा[4] द्वै[5]पदाभिक्रमेण[6] भवन्ति । तस्मात्स्वां प्रकृतिमानयेत् । लोपभावः । अस्माँअस्माँ इत् । अस्मानस्मानित्यस्मान्ऽअस्मान् (ऋ० क्र० ४ । ३२ । ४)। ऊष्मभावः । स्वतवाँः पायुः । स्वतवानिति स्वऽतवान् (ऋ० क्र० ४ । २ । ६)। नैतदुदाहरणं युक्तम् । कथम्[7] । स्वतवाँः पायुरिति पायुशब्दे हि नकारस्य विसर्जनीयसम्बन्धः । इदं तर्ह्युदाहरणम् । नॄँः पात्रमिति नॄन्पात्रम् (ऋ० क्र० १ । १२१ । १)। विभ्राजमानाँश्चमसान् । विभ्राजमानानिति विऽभ्राजमानान् (ऋ० क्र० ४ । ३३ । ६)। रभावः[8] । अभीशूँरिव सारथिः । अभीशूनिवेत्यभीशून्ऽइव (ऋ० क्र० ६ । ५७ । ६)।

---

(१) $B^3 B^2$, त्वेत । एत (instead of त्वेता नि । एता नि) $I^2 B^n$ and Reg. (२) सो added in I^2. (३) दीर्घ- to चतुर्थम् omitted in I^2. (४) -भावः B^2. (५) द्वि- I^2. (६) -क्रमणे B^n. (७) $B^3 B^n$, कथम् omitted in $B^2 I^2$. (८) I^2, रभावं $B^3 B^2$, omitted in B^n.

अतीत्य तेषां पदतां प्रदर्शयेत् (११ । २५) इत्येवं सिद्धे किमर्थं नकारलोपादीनां संहितानां परिग्रहे पुनर्निवृत्तिरुच्यते। परिग्रहस्योभयोर्वचनयोर्विकारनिवृत्त्यर्थम्। तेन ह्यु[1]त्तरस्मिन्नेव स्यात्। नैष दोषः। तेनाप्युभयोर्भवतीति ज्ञापकं ब्रूमः। यदयम्—पुनर्ब्रुवंस्तत्र समासमिङ्ग्येत् (११ । ३१) इति पूर्वस्मिन्वचनेऽवग्रह[2]प्रतिषेधार्थं कुर्वन्नेतद्[3] ज्ञापयति। अन्यत्रोभयोरपि वचनयोः पदतया[4] प्रदर्शनं भवतीति। एवं च[5] —अतीत्य तेषां[6] पदतां प्रदर्शयेत् (११ । २५) इत्येवं[7] सिद्धे नकारलोपोष्मरभावमानयेदित्येवमादीनां नियमार्थमनुक्रमणं कुर्वञ्ज्ञापयति। अननु[8]क्रान्तानां विकाराणां[9] परिग्रहस्य पूर्ववचने[10] निवृत्तिर्न[11] भवति। यथा। धनर्चमिति धनऽअर्चम् (ऋ० क्र० १० । ४६ । ५)। ककुद्मानिति ककुत्ऽमान् (ऋ० क्र० १० । ८ । २)। अहोभिरित्यहःऽभिः (ऋ० क्र० १० । १४ । ९)। दशोणिमिति दशऽओणिम् (ऋ० क्र० ६ । २० । ८) ॥

नतिम् ॥ ३७ ॥

नतिं च प्रकृतिमानयेत्परिग्रहे क्रियमाणे। कस्य हेतोः। पदप्रदर्शनार्थम्। सुषुमा यातम्[12]। सुसुमेति[13] सुसुम (ऋ० क्र० १ । १३७ । १)। दुर्हणो[14] इति दुःऽहनो (ऋ० क्र० १० । १५५ । ३)॥

प्लुतोपाचरिते च ॥ ३८ ॥

---

(१) ह्यथु- B². (२) -ग्रहस्य B². (३) B³, कुवन्नेव तद् I², कुर्वं तत् Bⁿ, कुर्वन् B². (४) B³Bⁿ, पदतायाः B², omitted in I². (५) B², चैतत् B³, चेत् Bⁿ, च omitted in I². (६) B² Bⁿ, अतीत्य तेषां omitted in B³I². (७) I²Bⁿ, इत्येव B³B². (८) B³, अनु- I²Bⁿ, इह अननु B². (९) B³B², विकरणानां I²Bⁿ. (१०) B²Bⁿ, पूर्वे वचने I², पूर्वे चने B³. (११) न omitted in I². (१२) B²Bⁿ, सुषुमा यातम् omitted in B³I². (१३) सुसुमेति omitted in I². (१४) दुर्हणो। दुर्हनो Bⁿ.

प्लुतं चोपाचरितं च प्लुतोपाचरिते एते[1] प्रकृतिमानयेत्परिग्रहे क्रियमाणे । कस्य हेतोः । समानो हेतुः पूर्वेण । प्लुतः । मक्षूमक्षू कृणुहि । मक्षुमक्ष्विति मक्षुऽमक्षु (ऋ० क० ३ । ३१ । २०) । उपाचरितः । ज्योतिष्कृदसि । ज्योतिःकृदिति ज्योतिःऽकृत् (ऋ० क० १ । ५० । ४) ॥

यत्र च प्रगृह्यमेकीभवति स्वरोदयम् ॥३९॥

यत्र[2] यस्मिन्समुदाये स्वरोदयं प्रगृह्यं पदमेकीभावं[3] गच्छति । यथा[4]—त्र्यक्षरान्तास्तु नेवे (२ । ५५) इति प्रकृतिभावे प्रतिषिद्धे । तच्च[5] प्रकृतिमानयेत्परिग्रहे क्रियमाणे । कस्य हेतोः । प्रगृह्यस्य[6] प्रकृतिभावप्रदर्शनार्थम्[7] । दम्पतीइवेति दम्पतीऽइव (ऋ० क० २ । ३९ । २) ॥

प्रवादिनो दूणाशदूळ्यदूळभान् ॥ ४० ॥

प्रवादान् दूणाश[8] दूळ्य दूळभ इत्येतांश्च प्रकृतिमानयेत्परिग्रहे क्रियमाणे । कस्य हेतोः । पदप्रकृतिप्रदर्शनार्थम् । दूणाशं सख्यम्[9] । दुर्नशमिति दुःऽनशम् (ऋ० क० ६ । ४५ । २६) । जनस्य दूळ्यः । दुर्ध्य इति दुःऽध्यः (ऋ० क० ८ । १९ । १५) । दूळभो रथः । दुर्दभ इति दुःऽदभः (ऋ० क० ४ । ९ । ८) ॥

परेष्वघोषेषु च रेफसूष्मणः ॥ ४१ ॥

अघोषेषु च परेषूष्मणो रेफः क्रियते तं च प्रकृतिमानयेत्परिग्रहे क्रियमाणे । कस्य हेतोः । पदप्रकृतिप्रदर्शनार्थम् । काण्येना स्वर्चनाः । स्वश्चना इति स्वःऽचनाः (ऋ० क० ९ । ८४ । ५) । धूर्षदं वनर्षदम् ।

---

(१) प्लुतोपाचरिते एते omitted in I^2. (२) यत्र omitted in B^2. (३) यत्रैकीभावं (instead of यत्र to एकीभावं) I^2. (४) I^2B^n, तथा B^3B^2. (५) B^2I^2, तत्र B^3B^n. (६) B^2I^2, प्रगृह्य B^3B^n. (७) After -र्थम् । B^n adds दंपतीव क्रतुविदा. (८) दूणश I^2. (९) तव added in I^2.

धूःसदमिति धूःऽसदम् (ऋ० क्र० १० । १३२ । ७) । पूर्पतिं सुशिष्टौ । पूःपतिमिति पूःऽपतिम् (ऋ० क्र० १ । १७३ । १०) ॥

महाप्रदेशं स्वधितीव चानयेत् ॥४२॥

महाप्रदेशं[1] स्वधितीव[2] इत्येतच्च पदं प्रकृतिमानयेत्परिग्रहे क्रियमाणे । महाप्रदेशमिति । महानयं प्रदेशो यत्प्रतिकण्ठमस्य[3] ग्रहणम् । सर्वाणि हि शास्त्राणि प्रतिकण्ठं पठ्यन्ते । सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् (१ । ५४)। प्रतिकण्ठे चास्य[4] विधिरुक्तः । नाम्ना इन्दुः स्वधितीवाह एव (४ । ४०) इति[5] रेफस्य च लोपो दीर्घत्वं च पुरा[6] निपातितम् । तस्मात्स महाप्रदेशः[7] । स्वधितिरिवेति स्वधितिःऽइव (ऋ० क्र० ५ । ७ । ८) ॥

नुदेच्च शौद्धाक्षरसंध्यमागमम् ॥ ४३ ॥

नुदेच्[8] शौद्धाक्षरसंधिजं चागमम् । प्रकृतिमानयेत् । परिग्रहे क्रियमाणे । कस्य हेतोः । पदप्रकृतिप्रदर्शनार्थम् । सुश्चन्द्र दस्म । सुचन्द्रेति सुऽचन्द्र (ऋ० क्र० ५ । ६ । ५)। परिष्कृण्वन्ननिष्कृतम् । परिकृण्वन्निति परिऽकृण्वन् (ऋ० क्र० ६ । ३६ । २) । धूर्षदं वनर्षदम् । धूःसदमिति धूःऽसदम् । वनसदमिति वनऽसदम् (ऋ० क्र० १० । १३२ । ७) ॥

अभिक्रमे पूर्वविधानमाचरेत्
पुनर्ब्रुवँस्तूत्तरकारितं क्रमे ।

---

(१) B³Bⁿ, महाप्रदेशं omitted in B²I². (२) स्वधितीव omitted in I². (३) B², Reg.; -कंठं चास्य B³I²Bⁿ. (४) प्रतिकण्ठस्य (instead of प्रतिकण्ठमुक्तम् to चास्य) I², Reg. (५) B²I², -धितीवेति B³Bⁿ. (६) युगपत् added in B², Reg. (७) B³B²Bⁿ, तस्मादयं महाप्रदेशः Reg., तस्मात् to -शः omitted in I². After -प्रदेशः B³Bⁿ add प्रकृतिमानयेत्. (८) नुदेच् omitted in B².

विकारमन्यद्यदतोऽनुसंहितं
तदाचरेदन्तगताद्ययोस्तु न ॥४४॥

क्रमविधावभिक्रमे द्वैपदस्य प्रथमे वचने पूर्वविधानमाचरेत् । पूर्वप्रयुक्तं विकारं पठेदित्यर्थः । यथा—प्र ण इन्दो (ऋ० ६।४४।१) इत्यत्र प्र णः । पुनर्ब्रुवन्द्वितीये वचन उत्तरकारितमाचरेत् । न पूर्वकारितं[1] विकारम् । अन्यदिति[2] । यदतः पूर्वोत्तरकृतवि[3]कारादन्यत् । यत्[4] पदं स्वयंविकृतं तदनुसंहितमाचरेत् । क्रमकाल उभयवचनेऽपि यथासंहितं पठेदित्यर्थः । अन्तगताद्ययोस्तु न । अन्तगत[5]स्याद्यगतस्य[6](?) स्वयंविकृतस्याप्यु[7]भयवचने नाचरणं कुर्यात् । तयोरुभयवचनस्याभावादिति भावः ॥

सकृद्यथासंहितमेषु वाचरेत्
पुनर्विवक्षन्पदमप्यसंदधत् ।
परिग्रहे संधिषु कारणान्वयात् ॥४५॥

अथ च सकृद्यथासंहितमेषु वा[8]चरेत् । एषु कतरेषु । नकारलोपोष्मरभावमानयेत् (११ । ३६) इत्येवमादिषु । पुनर्द्वितीयं[9] वचनं विवक्षन् वक्ता । पदमपि क्रियते[10] । संदधत्संधिमकुर्वन्परिग्रहे क्रियमाणे । कस्य हेतोः । संधिषु कारणान्वयात् । एषु हि नकारलोपादिषु

---

(१) I², न इन्दो added in B³B²Bⁿ. (२) अन्यादति I². (३) यदवपूर्वोत्ततधि- (instead of यदतः to वि-) I². -कृतं वि- (for -कृत वि-) B². (४) यत् omitted in I². Reg. (५) B²I²Bⁿ, Reg.; अन्तग० B³, M. M. (६) -द्यगतस्य B²I², Reg.; -द्यगस्य B³Bⁿ, M.M. See note. (७) -विकृतस्यापि च उ- I². (८) चा- or वा- (?) I², चा- B²B³Bⁿ. (९) द्वितीय- B². (१०) B³B²I² P, पदमविक्रियते Bⁿ.

संधिषु[1] यस्मिंस्ते नकारलोपादयो विहितास्[2] तत्कारणमन्वेति परिग्रहस्य पूर्ववचने[3]। श्येनाँइव ध्रजतः[4]। श्येनाँइवेति श्येनान्ऽइव (ऋ० क्र० १। १६५। २)। विश्वश्चन्द्रा अमित्रहन्। विश्वश्चन्द्रा इति विश्वऽचन्द्राः (ऋ० क्र० १०। १३४। ३)॥

अविक्रमं द्व्यूष्मसु चोष्मसंधिषु ॥ ४६ ॥

अविक्रममेव कुर्याद्वक्ता द्व्यूष्मसूष्मसंधिषु परिग्रहे क्रियमाणे। किमर्थमिदमुच्यते। इह[5] निष्षिध्वरीः स्वर्षाता इति च[6] नते[7] रेफस्य च निवृत्तौ कृतायां पुनर्विसर्जनीयस्य—तमेवोष्माणमूष्मणि (४। ३२) इति नित्यविधिं बाधित्वा—ऊष्मणि चानते (४। ३४) इति विभाषा प्राप्नोति। तत्र व्यापत्तिरेवेष्यते न विक्रमः। एवमर्थमिदमुच्यते। निष्षिध्वरीस्ते। निस्सि[8]ध्वरीरिति निःऽसिध्वरीः (ऋ० क्र० ३। ५५। २२)। स्वर्षाता यत्। स्वस्सा[9]तेति स्वःऽसाता (ऋ० क्र० ६। ३३। ४)। द्व्यूष्मस्विति कस्मात्[10]। दिवःपृथिव्योः[11] (ऋ० क्र० २। २। ३) इत्यत्राप्युपाचारस्य[12] निवृत्तौ कृतायाम्—प्रथमोत्तमवर्गीये स्पर्शे वा (४। ३३) इति व्यापत्तिरेव स्यात्। अविक्रममिति परिग्रहे विक्रमस्य प्रतिषेधात्। स्यान्मतम्—अव्यापत्तिः

---

(१) संधिषु B^n; संधौ B^3B^2, M. M.; संधौ हि Reg.; omitted in I^2. (२) $B^3B^2B^n$; यस्मिंस्ते to विहितास् omitted here but given after -वचने in I^2, Reg., M. M. (३) पूर्वे वचने I^2, Reg. (४) B^2, M. M., Reg.; श्ये- to -तः omitted in $B^3I^2B^n$. (५) इह omitted in B^3, M. M. (६) -ति च omitted in I^2. (७) न रेफस्य च नत (for नतेः) I^2. (८) निः सि- I^2B^n. (९) B^3, M. M.; स्वःसा-$I^2B^2B^n$. (१०) I^2B^2, किं B^3B^n. (११) -पृथिव्याः Reg. (१२) B^3B^2, उपचारस्य I^2, उपाचरितस्य B^n.

कखपफेषु वृत्तिः (४ । ३८) इत्युक्तत्वान्न[1] भविष्यतीति[2] । तच्च न । परिग्रहादन्यत्र सावकाशत्वात्तस्य ॥

समानकालावसमानकारणा-
वनन्तरौ वा यदि संनिगच्छतः ।
पदस्य दोषावथ हेत्वसंग्रहे
नियुक्तमार्षमन्यतरेण लुप्यते ॥ ४७ ॥

समानकालावेककालौ । असमानकारणौ नानानिमित्तौ । अनन्तरौ वा अव्यवहितौ[3] निमित्ताद्व्यवहितौ वा[4] । यत्र संनिगच्छतः संनिहितौ भवतः[5] । पदस्य दोषौ विकारावित्यर्थः[6] । अथास्यामवस्थायाम् । हेत्वसंग्रहे बहुक्रमेण निमित्तापरिग्रहे सति । नियुक्तं नियोगतः । आर्षी संहिता । अन्यतरेण वचनेन लुप्यते । पूर्वेण वा परेण वा । प्र णः (ऋ० क० ६ । ४४ । १) इत्यत्र प्रनिमित्तं णत्वमुदात्तनिमित्तमनुदात्तस्य स्वरितत्वं चोत्तरेण सह प्रत्यादाने क्रियमाणे लुप्यते । न इन्दो[7] (ऋ० क० ६ । ४४ । १) । व्यवहिते । शक्र एणम्[8] (ऋ० क० ८ । १ । १६) इत्यत्र रेफनिमित्तं णत्वमुदात्तनिमित्तमनुदात्तस्य स्वरितत्वं तदुत्तरेण प्रत्यादाने क्रियमाणे च[9] लुप्यते । एनं पीपयत् (ऋ० क० ८ । १ । १६) ॥

---

(१) B³Bⁿ, इति वचनान्न B², इत्युक्तत्वान्न omitted in I². (२) भवतीति (instead of भविष्यतीति) I². (३) निमित्ताद्व्यवहितौ वा (instead of अव्यवहितौ) I². (४) निमित्ताद्व्यवहितौ वा omitted in I². (५) संनिहितौ भवतः omitted in I². (६) B², Reg., M.M.; विकारौ कार्यावित्यर्थः Bⁿ; कार्यौ इत्यर्थः I²; कार्यावित्यर्थः corrected to विकारावित्यर्थः on the margin in B³. (७) न इन्द्रो I². (८) एणम् omitted in B³I². (९) च is struck out in I².

मकारलोपे विकृतस्वरोपधे तृतीयभावे प्रथमस्य च ध्रुवम् ॥ ४८ ॥

मकारलोपे विकृतस्वरोपधे सति प्रथमस्य तृतीयभावे च बहुक्रमेऽक्रियमाणे ध्रुवमार्षी लुप्यते। ए रिणन्ति (ऋ० ६। ७१। ६) इत्यत्र चैकादेशनिमित्तमेत्वमुदात्तत्वं च तदुत्तरेण प्रत्यादाने क्रियमाणे लुप्यते। ई[1] रिणन्ति। प्रथमस्य तृतीयभावे। इन्द्रस्य त्रिष्टुप्[2]—इत्यत्र पकारस्य परनिमित्तं तृतीयत्वं तत्पूर्वेण तु[3] वचने[4] लुप्यते। इन्द्रस्य त्रिष्टुबिह भागो अह्नः[5] (ऋ० १०। १३०। ५)॥

विपर्य्ययो वेतरथाभ्युपेयुषाम् ॥ ४६ ॥

अथवा बहुक्रमादृतेऽपि प्रथमस्य तृतीयभावे[6] विपर्ययः। कश्च विपर्ययः। लोप इति प्रकृतमलोपस्तस्य विपर्ययः। इतरथाभ्युपेयुषाम्। कथम्। तस्मादन्यमवसाने तृतीयं गार्ग्यं स्पर्शम् (१। १५) इति गार्ग्यमतं येऽभ्युपगच्छन्ति तेषाम्। इन्द्रस्य त्रिष्टुब्[7] (ऋ० क्र० १०। १३०। ५)॥

अथोभयेषामनुनासिकोदये ॥ ५० ॥

अथाऽन्याऽऽर्षी लुप्यत एवानुनासिकोदये प्रथमे सति। उभयेषाम्। गार्ग्यमतं येऽभ्युपगच्छन्ति ये च शाकटायनमतम्[8]। त्रिककुम्निवर्तत् (ऋ० क्र० १। १२१। ४) इत्यत्र पकारस्य परनिमित्तं मत्वं तत्पूर्वेण सह वचने लुप्यते। प्रसर्गे त्रिककुप् (ऋ० क्र० १। १२१। ४) ॥

---

(१) ईं Reg. (२) B², Reg.; त्रिष्टुबिह B³I²Bⁿ. (३) तु struck out in I². (४) वचनेन Bⁿ. (५) भागो अह्नः omitted in B². (६) -भाव- I². (७) I², Reg.; त्रिष्टुप् B³B²Bⁿ, M. M. (८) Bⁿ; तथा- B³I²B², M. M. (९) यथा added in B².

अथो नतेनोपहितेऽनुनासिके ॥५१॥

अथो नतेनोपहितेऽनुनासिके सति परेण सह बहुक्रमेऽक्रियमाणे आर्षी लुप्यते । मो षु णः (ऋ० १ । ३८ । ६) इत्यत्र षत्वनिमित्तं णत्वं तदुत्तरेण सह प्रत्यादाने क्रियमाणे लुप्यते । नः परापरा (ऋ० क्र० १ । ३८ । ६) ॥

तथाक्षरस्य क्रम एकपातिनः ॥ ५२ ॥

अक्षरस्य क्रमो द्विर्वचनं बहुक्रमेऽक्रियमाणे उभयोर्वचनयोर्लुप्यत एकाक्षरस्य पदस्य[1] । मुञ्चता वि । व्यंहः (ऋ० क्र० ४ । १२ । ६) ॥

न चात्र पूर्वः स्वरितेन संहितां
लभेत तस्मिन्नियतस्वरोदये ॥ ५३ ॥

अत्रैकपातिनः क्रमे तस्मादेकपातिनः पूर्वः[2] स्वरः स्वरितेन संहितां न लभते[3] तस्मिन्नियतस्वरोदये सति । हंसि नि । न्यत्रिणम् (ऋ० क्र० ८ । १२ । १) ॥

यदा च गच्छत्यनुदात्तमक्षरं
वशं पदादेरुदयस्य तेन च ॥५४ ॥

यदा चानुदात्तमक्षरमुदात्तस्य पदादेर्वशं गच्छति । स्वरितं च । उदात्तवत्येकीभाव उदात्तं संध्यमक्षरम् (३ । ११) इति तेनोदात्तेनैकीभावे । तदा च बहुक्रमेऽक्रियमाणे ध्रुवमार्षी लुप्यते । आ तेऽवः (ऋ० ५ । ३५ । ३) इत्यत्र त इत्यनुदात्तस्याव इत्युत्तरेणैकादेश उदात्तत्वम् । तत् पूर्वेण सह वचने[4] लुप्यते । आ ते । त्वां

---

(१) एकाक्षरस्य पदस्य omitted in I². (२) B³B², M.M., Reg.; पूर्व I²Bⁿ. (३) लभेत M.M. (४) B²Bⁿ, प्रत्यादे corrected to वचने on the margin in B³, प्रत्यादे corrected to प्रत्यादाने on the margin I².

सोम[1] पवमानं स्वाध्योऽनु (ऋ० ९ । ८६ । २४) इत्यत्र स्वाध्य[2] इति स्वरि[3]तस्य—उदात्तवत्येकीभावे (३ । ११) इत्युत्तरेणैकादेश उदात्तत्वं तत्पूर्वेण सह पठने[4] लुप्यते । प[5]वमानं स्वाध्यः ॥

उदात्तपूर्वे नियतस्वरोदये परो विलोपोऽनियतो यदावरः ॥ ५५ ॥

उदात्तपूर्व एकादेशे नियतस्वरोदये सति[6] । परः । परेण सह वचन इत्यर्थः[7] । आर्ष्या[8] विलोपो भवतीति[9] । अनियतो यदावरः । अनियत उदात्तो यदा परो भवत्यनुदात्तश्च[10] पूर्वस्तदा । अवरः । पूर्वेण सह वचन इत्यर्थः । आर्ष्या विलोपो भवति । यद्येवं पूर्वस्यायं शेषः[11] । इह कस्मादुच्यते । उदात्तपूर्वेऽप्येकादेशे—इकारयोश्च प्रश्लेषे (३ । १३) इत्येवमादौ शाकले विधाने पूर्वेणापि सह वचन आर्ष्या विलोपो भवतीति ख्यापनार्थम् ।

उदात्तपूर्वे । एन्द्र सानसिम् (ऋ० १ । ८ । १) इत्यत्र आकारेण सहैकादेशनिमित्तमिकारस्योदात्तत्वम् । तस्य परेण सह प्रत्यादाने विलोपः । इन्द्र सानसिम् ।[12] तथा—तेऽवन्तु (ऋ० क्र० १० । १५ । ५) इत्यत्र त इत्युदात्तस्यावन्त्वित्यनुदात्तेन[13] सहैकादेशनिमित्तं

---

(१) B³Bⁿ; त्वां सोम omitted in B²I², Reg. (२) B², स्वाध्यो B³I²Bⁿ. (३) स्वरि- omitted in I². (४) पठने corrected to पाठे in I². (५) पा- B². (६) सति omitted in I². (७) इत्यर्थः । Omitted in Reg. (८) B³I²Bⁿ; आर्षी- B², Reg. (९) B³I²Bⁿ; इति omitted in B², Reg. (१०) अनुदात्तः I². (११) भावः (instead of शेषः) I². (१२) After सानसिम् । Bⁿ adds शाकलविधानस्योदाहरणं which is given as a marginal note in B³. (१३) उदात्तेन (instead of अनुदात्तेन) M.M.

स्वरितत्वम्। तस्य पूर्वेण सह वचने विलोपः। ब्रुवन्तु ते (ऋ०. क्र० १०। १५। ५) इति।[१]

अनियतो यदावर इत्येतस्य पूर्वसूत्रे निर्दिष्टमेवोदाहरणम्॥

स्वरैकदेशं स्वरितस्य चोत्तरं
यदा निहन्यादनिमित्तमक्षरम्॥ ५६॥

स्वरित[२]स्वरस्योत्तरमनु[३]दात्तमेक[४]देशं तूदात्तस्वरित[५]परं सन्तं निहन्ति वक्ता[६]। श्रोण्यो[७] रसम् (ऋ० ९। १६। १) इति। तदक्षरं यदा पूर्वेण सहानिमित्तं ब्रूयादार्षी[८] लुप्यते। सोतार श्रोण्योः (ऋ० क्र० ९। १६। १)॥

उदात्तपूर्वोऽप्यनुदात्तसंगमो
यदा स्वरौ द्वौ लभतेऽपि वा बहून्॥५७॥

उदात्तपूर्वोऽपि[९] स्वरितपूर्वोऽप्य[१०]नुदात्तानामक्षराणां समवायो यदा द्वौ स्वरौ लभते। अपि वा[११] बहून्स्वरान्। तदा बहुक्रमेऽक्रियमाणे आर्षी लुप्यते। उत देवा अवहितम् (ऋ० १०। १३७। १) इत्यत्र देवा इत्यनुदात्तसंगमस्य पूर्वनिमित्तमाद्यस्य स्वरितत्वम्। तदुत्तरेण सह प्रत्यादाने क्रियमाणे लुप्यते। देवा अवहितम्[१२]।

---

(१) After इति there is no pause in B^n and I^2. (२) स्वरितस्य M.M. (३) स्वरस्यानु- I^2. (४) एका- B^2, M.M. (५) -स्वरित- omitted in I^2, repeated in B^3. (६) निहन्ति वक्ता B^2I^2 (वक्तारः corrected to वक्ता in I^2), निहंति वक्तारः B^3 and M.M., निहन्यात्स्वरः B^n. (७) श्रोण्योर२ I^2, M. M., Reg.; श्रोण्योर२ $B^3B^2B^n$. (८) आर्पा corrected to तदा आर्षी on the margin in I^2. (९) $B^3I^2B^2$; -पूर्वः B^n, Reg. (१०) स्वरितपूर्वोऽपि omitted in I^2. (११) B^2, Reg.; वा omitted in $B^3I^2B^n$. (१२) B^3B^2, देवा अवहितम् omitted in I^2B^n.

तथा परनिमित्तमन्त्यस्यानुदात्तत्वम्। तत्पूर्वेण सह वचने लुप्यते। उत देवाः[१]।

स्वरबहुत्वे। पुरू पुरुभुजा यत्[२] (ऋ० ५।७३।१) इत्यत्र पूर्वापाये स्वरितो लुप्यते स्वरितापाये प्रचयाः[३]। पुरुभुजा यत्। उत्तरापाये चानुदात्तः। पुरू पुरुभुजा।

स्वरितपूर्वः। वदता[४] वदद्भ्यः (ऋ० क्र० १०।९४।१) इत्यत्र पूर्वापाये प्रचयस्वरौ लुप्येते[५]। वाचं वदत (ऋ० क्र० १०। ९४।१) इत्यत्रोत्तरापायेऽनुदात्तः॥

यस्माद्ब[६]हुक्रमेऽक्रियमाणे—समानकालावसमानकारणौ (११। ४७) इत्येवमादिभिर्विहितेष्वार्षो लुप्यते तस्माद्बहुक्रममिच्छन्त्येक आचार्याः॥

यथा प्रक्लृप्ते स्वरवर्णसंहिते
तयोस्तयोरक्षरवर्णयोस्तथा।
अदर्शनेऽनार्ष्यविलोप उच्यते
क्रमेष्वनार्षं ब्रुवतेऽपरे स्वरम्॥ ५८॥

यथा येन प्रकारेण प्रक्लृप्ते विहिते स्वरसंहिता वर्णसंहिता च तयोस्तयोर[७]क्षरवर्णयोः। अक्षरस्य स्वरस्य संहिता वर्णानां च वर्णसंहिता। तयोः स्वरवर्णसंहितयोरदर्शने सत्युच्यतेऽनार्ष्यविलोपः। किमिदमनार्ष्यविलोपः। आर्षोविलोप इत्यर्थः। कोऽस्य विग्रहः।

---

(१) B³, उत देवा अवहितं B², उत देवाः। देवा अवहितं I²Bⁿ. (२) I²Bⁿ, Reg., M.M.; यत omitted in B³B². (३) च प्रत्ययाः (instead of प्रचयाः) B². (४) B³Bⁿ, वाचं वदता B²I². (५) -स्वरो लुप्यते I². (६) यस्माद् B³B², यथा I²Bⁿ. (७) तयोस्तयोर् B³B², M.M.; तयोर् I²Bⁿ.

विलोपो विनाशः। तस्याभावोऽविलोपः। आर्ष्या अविलोप आर्ष्यविलोपः। न आर्ष्यविलोपोऽनार्ष्यविलोपः।

प्र णः (ऋ० क्र० ६। ४४। १) इत्यस्मिन्वचने णत्वस्वरितयोर्दर्शनादप्य[1]नार्ष्यविलोपो भवतीति[2]। यद्यपि णत्वस्वरितौ तत्र दृष्टौ। न इन्द्रो। इन्द्रो महे (ऋ० क्र० ६। ४४। १) इत्यत्रेन्द्रो इत्येतस्य प्रचयस्वरस्याभावाद्विलोप एव[3]। नैष दोषः। क्रमेषु ह्यपर आचार्याः स्वरमनार्षं ब्रुवते[4]॥

अदृष्टमार्ष्यां यदि दृश्यते क्रमे
विलोपमेवं ब्रुवतेऽपरे तथा।
स कारणान्यार्ष्यविलोपविक्रमः
क्रमेण युक्तोऽपि बहूनि सन्दधत् ॥५६॥

यद्यप्यन्यतरस्मिन्वचन आर्षी दृश्यते पुनरदृष्टं संहितायां यदि क्रमे दृश्यत एवमस्यामवस्थायामपर[5] आचार्या विलोपं मन्यन्ते। कस्मात्। असतः प्रादुर्भावात्। न इन्द्रो[6] (ऋ० क्र० ६। ४४। १)। तथा। कथम्। यथा—समानकालावसमानकारणौ (११। ४७) इति विहितेषु। स क्रमः। कः। आर्ष्यविलोपविक्रम[7] आर्ष्य[8]विलोपहेतुः। क्रमेण युक्तस्तमलोपं प्र[9]ति कारणानि निमित्तानि बहून्यपि पदानि संदधत्पठति[10]। इमं मे गङ्गे यमुने सरस्वती शुतुद्रि स्तोमम् (ऋ० क्र० १०। ७५। ५)॥

---

(१) अपि omitted in I^2, Reg. (२) भवतीति corrected to भवति I^2, भवति Reg. (३) एव omitted in B^3, M.M. (४) क्रमंते Reg. (५) अवस्थाया अपरे B^3. (६) इति added in I^2, इन्द्रो महे added after इन्द्रो। In B^2. (७) कः। आर्ष्यविलोपविक्रम omitted in I^2. (८) आर्ष्या I^2. (९) -लोपं प्र- omitted in I^2. (१०) पठति omitted in I^2.

पदं पदान्तश्च यदा न गच्छति
स्वरावसानं स तु योऽत्र युज्यते।
तदा न रूपं लभते निराकृतं
न चेन्निराहोपनिवृत्य तत्पदम् ॥ ६० ॥

पदं यदा स्वरं[1] न गच्छति। पदान्तश्च यदावसानं न गच्छति। तदा न[2] रूपं लभते निराकृतम्। विस्मृतमन्येन केनचित्[3] छादितमित्यर्थः।[4] पदकाले स्वरकृतं च वर्णकृतं चोभयम्[5]। यस्त्वत्र[6] युज्यते[7] क्रमकः स उपनिवृत्य तत्पदं[8] न चेन्नि[9]र्ब्रवीति। स्वरकृतम्। तेऽवदन्[10]। त इति ते (ऋ० क० १०। १०९।१)। अत्र परिग्रहादत उदात्तकृतं रूपं न लभते। वर्णकृतम्। नु इत्था। न्विति नु (ऋ० क० १। १३२। ४)। अत्र ह्रस्वकृतं रूपं न लभते॥

स्थितिस्थितोपस्थितयोश्च दृश्यते
पदं यथावद्द्व्यवद्व्युपस्थिते।

---

(१) स्वरं I²Bⁿ, M.M., Reg.; स्वरांतं B³B². (२) B³; तदानु- B² (with marks of correction) I²Bⁿ, Reg., M. M. (a). (३) -वित् B³, -चिदा- Bⁿ. (४) After -र्थः। B² adds पदकाले स्वरकृतं इत्यर्थः।. (५) After चोभयं B³B² Bⁿ add रूपमिति। अस्यामवस्थायां (-या Bⁿ) स आर्षीविलोपेन (-लोपे न B³B²; रूप- to -लोपे given with marks of deletion in B³); च (instead of चोभयम्।) M. M. Reg.; चोभयम् I², M. M.(a). (६) यस्त्वत्र Bⁿ; स्वत्र I², M. M.(a); यत्तत्र M.M. and Paris MS. (cp. Reg.); omitted in B³B². (७) B³B²I²Bⁿ and M.M. (a), जायते M.M. and Reg. (८) पदं B² and M.M., पद I², पदे B³Bⁿ. (९) B², M.M., Reg.; निर् omitted in B³I²Bⁿ. (१०) -वदंनिति B²I².

क्वचित्स्थितौ चैवमतोऽधि शाकलाः
क्रमे स्थितोपस्थितमाचरन्त्युत ॥६१॥

यदुक्तमधस्तात्स्थित्युपस्थितस्थितोपस्थितानामन्यतमेन पदप्रदर्शनमाचरन्तीति तदयुक्तम्। कस्मात्। स्थितिस्थितोपस्थितयोरेव[1] हि यथा[2]वत्पदं दृश्यते।

आरैकपन्थाम्[3] (ऋ० क्र० १। ११३। १६)। अरैगिति। एवमुपस्थिते सति पदान्तस्य पदे दृष्टं स्वरितत्वं तत्र न दृश्यते[4]। तस्माद् व्ययवदित्युच्यते। तथा—मो पू[5] गाः (ऋ० १।१७३।१२) इत्यत्रोपस्थि[6]त्युक्ते ह्रस्वान्तं न दृश्यते। क्वचित्स्थितावप्येवम्। यथोपस्थिते तथा व्ययवद् दृश्यते। प्रातः सोमम् (ऋ० क्र० ७। ४१। १)। प्रातः। इत्यत्र[7] पदे दृष्टो रेफः स[8] न दृश्यते।

अतोऽपि[9] अस्माद्धेतोः शाकलाः क्रमे वर्तमाने स्थितोपस्थितमेवाचरन्ति। अरैगित्यरैक्। स्विति सु। प्रातरिति प्रातः॥

क्रमेत सर्वाणि पदानि निर्ब्रुवन्निति स्मरन्ति ॥६२॥

क्रमेत क्रमं[10] ब्रूयात्क्रमकः सर्वाणि पदान्येकैकं पदं निर्ब्रुवन् द्विक्रमे बहुक्रमे वेति स्मरन्ति। एवमिच्छन्त्येक आचार्याः। कस्य हेतोः। एवं

---

(१) एवं B². (२) अव्ययवत्। अन्यूनवदित्यर्थः marginal note on यथावत् in B³; Bⁿ reads it in the Comm. (३) B³B² add अरैक्। आरैक्पंथां। अरैगित्यरैक्। इति (इति omitted in B²)। आरैक्पंथां।. (४) अदृष्टमनुदात्तत्वं च दृश्यते added in B². Some reading supplied here on the margin in I² is cut off in binding. (५) पु corrected to पू in B². (६) उपस्थि- corrected to स्विती- on the margin in B². (७) प्रातरित्यत्र B²I²Bⁿ, प्रातः। अत्र B³. (८) स omitted in B³. (९) I² is not quite distinct. The reading in it might be अतोपि or अतोधि।. (१०) क्रमे I².

सुखतरमार्ष्यां अविलोपो भवतीति। आ मन्द्रम्। एत्या। मन्द्रमा वरेण्यम्। मन्द्रमिति मन्द्रम्। आ वरेण्यम्। एत्या। (ऋ० क्र० ६। ६५। २६)। एवं सर्वत्र॥

आचरितं तु नोत्क्रमेत्।
क्रमस्य वर्त्म स्मृतिसंभवौ ब्रुवन्
समाधिमस्यान्वितराणि कीर्तयेत्॥ ६३॥

पार्षदे[1] यद्वाचरितं पूर्वशास्त्रविहितम्—क्रमो द्वाभ्यामभिक्रम्य (१०।१–२) इत्येवमादि तत्तु[2] नोत्क्रमेत्। नान्यथा कुर्यादित्यर्थः। क्रमस्य वर्त्म वृत्तं स्मृतिसंभवौ हेतू[3] ब्रुवन्वक्ता। स्मृतिः शास्त्रदर्शनादि[4]। संभव उप[5]पत्तिरित्यनर्थान्तरम्। अस्य क्रमस्य समाधिं संपदमन्वितराणि। अनुगम्यानुलक्ष्य च। इतराणि कतराणि। क्रमहेतौ शासनानि। कीर्तयेत्। किमुक्तं भवति। पूर्वस्मिन्क्रमशास्त्रे या संपदुक्ता तस्या अविरोधेन हेतूक्तानि कुर्यादित्यर्थः[6]। अग्निमीळे। ईळे पुरोहितम् (ऋ० क्र० १।१।१)। हेतौ परिगृह्यमाणेऽत्रापि विक्रमः[7] प्राप्नोति—अदृष्टमार्ष्यां यदि दृश्यते क्रमे (११। ५६) इति॥

अपरे वर्णयन्ति। समाधिमस्यान्वितराणि कीर्तयेत्। अस्य क्रमस्य समाधिमात्रमितराणि क्रमहेतौ शासनानि[8] कीर्तयेत्। कि-

---

(१) B^2B^3 and M. M., पार्षदं B^n, पार्षदं corrected to पर्षदा in I^2, पार्षदीयं M.M. (a) and Reg. (२) तु omitted in I^2. (३) I^2B^n, M.M., Reg.; हेतून् B^3B^2. (४) M.M. (a), Reg. (-णादि Reg.); स्मृतिशास्त्रदर्शनो I^2; स्मृतिशास्त्रे दर्शनादि B^n; स्मृतिः शास्त्रं तत्संदर्शनादि B^2, M.M.; स्मृतिः शास्त्रतत्संदर्शनादि B^3. (५) Reg., M. M.; संभवसुप- $B^3B^2B^n$; संभवोप- I^2. (६) किमुक्तं to -र्थः is found in $B^3B^2B^n$, omitted in I^2 and M. M. (७) त्रिक्रमः B^3. (८) इति added in B^3.

मुक्तं भवति। पूर्वस्मिन्क्रमशास्त्रे या संपदुक्ता तस्या अविरोधेन हेता-वुक्तानि[1] कुर्यादित्यर्थः। यथा—अदृष्टवर्णे प्रथमे प्रदर्शनम् (११। २७)। यथा च प्लुतादिप्रभृतीनीत्येव[2]मादीनि ॥

यथोपदिष्टं क्रमशास्त्रमादितः
पुनः पृथक्त्वैर्विविधैर्न साधुवत् ॥ ६४ ॥

यथोपदिष्टं क्रमशास्त्रमादितस्तदेव साधुवदध्येतव्यम्[3]। पुनः पृथक्त्वै[4]र्विविधैर्यदुक्तं तन्न[5] साधुवद्विद्यात्। किं कारणम्। सर्वथा-भिक्रमे क्रियमाणे स्वं स्वं पक्षान्तरमाश्रित्य संहिताया अविलोप इत्युच्यते ॥

इति प्र बाभ्रव्य उवाच च क्रमं
क्रमप्रवक्ता प्रथमं शशंस च ॥ ६५ ॥

इत्येवं बाभ्रव्यो बभ्रुपुत्रो भगवान्पाञ्चालः[6] क्रमस्य प्रवक्ता शिष्येभ्यः क्रमं प्रथमं प्रोवाच प्रशशंस च[7] हिताय। कथं ज्ञायते हितायेति। प्रथममधिगम्य क्रमकाः[8] कृतसंक्रमा इव मार्गमाक्रमन्तः सुखमाक्रमन्ते। संशयदुर्गाणि च[9] क्रमन्ते। भवति चात्र श्लोकः।

क्रमाभिगमभिन्नानि दुर्गाणि सुमहान्त्यपि।
विलीयन्ते[10]ऽर्कभिन्नानि तमांसीव निशात्यये ॥ इति ॥

क्रमेण नार्थः पदसंहिताविदः
पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः।

---

(१) हेता उक्तानि B^2. (२) -प्रभृतीनि चेत्येव- B^2, -प्रभृतानित्येव- I^2. (३) B^2 and Reg., साधु अध्येतव्यं B^3, साधुरध्येतव्यं I^2B^n (-व्यः B^n). (४) $B^3B^2I^2B^n$, पृथक्तै- Reg. (५) तं न (for तन्न) B^3, तत्र B^n. (६) B^2, पंचालः $B^3I^2B^n$. (७) हि च added in B^3. (८) क्रमकालाः I^2. (९) B^2, च omitted in $B^3I^2B^n$. (१०) विभीयंते B^3.

अकृत्स्नसिद्धश्च न चान्यसाधको
न चोदयापायकरो न च श्रुतः ॥ ६६ ॥

योऽयं विहितो विधिः—क्रमो द्वाभ्यामभिक्रम्य (१० । १–२) इति तेन नार्थः । कस्य हेतोः । पदसंहिताविदः । पदानि विदुषः संहितां चोत्तरकालं क्रमविधिरारभ्यते । किंच[1] । पुराप्रसिद्धाश्रयपूर्वसिद्धिभिः । हेतौ तृतीया[2] । पुराप्रसिद्धः[3] । एवं चास्य क्रमस्य पदसंहितात्[4] पूर्वमप्रसिद्धेः । आश्रयपूर्वसिद्धिभिः । पदसंहितं क्रमस्याश्रयस्तत्पूर्वि[5]काश्चास्य सिद्धयो भवन्ति । पुरा चेन्न विधीयते । न चान्यतो विधीयते । तस्मात्पदसंहितादनन्योऽयं क्रमो भवति । अविशेषे हि विशेषारम्भोऽनर्थकः ।

अकृत्स्नसिद्धश्च । न कृत्स्नसिद्धः[6] क्रमः । यद्यपि चास्य विशेषाः सन्ति संहिताया अविलोपार्थं तथापि[7] पदसंहिताश्रयत्वादकृत्स्नसिद्ध इत्युच्यते । न चान्यसाधक इति । नायं क्रमोऽन्यशास्त्राश्रयत्वाद्[8] विशेषान्[9] साधयति । अकृत्स्नसिद्धस्य ह्यन्यसाधनं न विद्यते । न चोदयापायकर इति । न चायं क्रमोऽध्येतुरभ्युदयकरो न चापायकरः[10] । न च श्रुत इति । न चायं क्रमोऽष्टानां ब्राह्मणपथानामन्यतमस्मिन्[11] ब्राह्मणपथे श्रूयते[12] । यथा ऋषिदैव-

---

(१) B^3B^2, किंच omitted in I^2B^n. (२) $B^3B^2B^n$, पुरा- to तृतीया omitted in I^2. (३) -सिद्धेः B^2. (४) B^3I^2, M.M.; -हिता- B^2B^n. (५) -र्वे- I^2. (६) अकृत्स्नसिद्धः (instead of अकृत्स्न- to -द्धः) I^2. (७) B^2, तथापि omitted in $B^3I^2B^n$. (८) -श्रयत्वाद् B^2, -श्रयाद् B^3B^n, -श्रयात् I^2. (९) विशेषात् I^2. (१०) न चापायकरः omitted in B^2. (११) अस्मिन् (instead of अन्यतमस्मिन्) B^3. (१२) I^2B^n and Reg., श्रुतः B^3B^2 and M. M.

तच्छन्दोयुक्तः[१] स्वाध्यायो[२] यज्ञकर्मसु संहिताविधिः । यथा च नामाख्यातोपसर्गनिपाताः पदमिति पदविधिः । एभिः कारणैः क्रमेण नार्थ इत्युच्यते । भवति चात्र श्लोकः ।

यदि विषयगतो नान्यं[३] जनयति कंचिद् गुणविशेषं कृत्स्नम्[४] ।
कलुषमतिकरं साधुस्[५] तत्पर्षदि न[६] वदेदिति ॥

असिध्यतः सिद्धिविपर्य्ययो यदि
प्रसिध्यतोऽसिद्धिविपर्य्ययस्तथा ॥ ६७ ॥

यदुक्तं पदसंहितात्पूर्वमयं[७] क्रमो न सिध्यति तस्मादस्य प्रसिद्धिविपर्यय इति । तन्नास्ति । कस्य हेतोः । प्रसिध्यन्तोऽसिद्धत्वस्य विपर्ययस्तथा भविष्यति । प्रसिद्धं हि पदसंहित[८]माश्रित्य यद्यं क्रमो वर्तते ततः प्रसिद्ध एव । अनन्य[१०]श्चायं पदसंहितात्[११] क्रमो भवतीति प्रतिज्ञा पूर्वमुक्ता[१२] । एकदेशं हि साधयत्येकदेशी[१३] ॥

---

(१) $B^3B^2I^2$ and M. M. (यज्ञ corrected to युक्तः in I^2, in B^3 also on the margin), ऋषिछंदोदैवतयुक्तः B^n, ऋषिदैवतछंदोयज्ञ- Reg. and M. M.(a). (२) B^3B^2 and M. M.; स्वाध्याय- I^2B^n, Reg.; स्वाध्याम- M.M.(a). (३) B^3, विषयगतौ नान्य I^2, विषयगतो नान्यं B^2, विषयगतो नान्यज् B^n. (४) कंचिद् to कृत्स्नम् B^3B^2, अहयं । कृत्स्नां I^2, गुणान् कृत्स्नं B^n. (५) कलुषमतिकरं साधुस् B^3B^2, खलु ससभिकालं I^2, खलु समभिकालं B^n. (६) तत्पर्षदि न B^3B^2, पर्षदि न I^2, पर्षदिवं B^n. (७) B^2I^2 (-ता- corrected to -तात् I^2), Reg., M. M.; -तापूर्वमयं B^3; -तांपूर्वेयं B^n. (८) B^2I^2, Reg.; -द्ध- B^3B^n, M. M. (९) -ताम् B^2B^n. (१०) B^2, Reg., M. M.; अन्य- B^3B^n; अन्यन्य- I^2. (११) -तात् B^3I^2, Reg., M. M. (-त supplied on the margin in I^2); -ता- B^2B^n. (१२) पूर्वोक्ता B^3B^n. (१३) B^3B^n, M. M.; साधयत्येकदेशः I^2, Reg. (-का- I^2); साधयेदित्येकदेशी B^2.

सहापवादेषु च सत्सु न क्रमः
प्रदेशशास्त्रेषु भवत्यनर्थकः ॥ ६८ ॥

अपवादो[1] निन्देत्यर्थः[2] । सहापवादेषु प्रदेशशास्त्रेषु सत्सु । यैरर्थाः प्रदिश्यन्ते तानि प्रदेशशास्त्राणि यथा सांख्ययोगशास्त्राणि[3] । तेष्वप्यन्यस्मिन्नन्यस्यापवादो दृश्यते । तेषु शास्त्रेषु । सत्सु विद्यमानेष्वित्यर्थः । नायं क्रमोऽनर्थको भवितुमर्हति ॥

विपर्य्ययाच्छास्त्रसमाधिदर्शनात्
पुराप्रसिद्धेरुभयोरनाश्रयात् ।
समभ्युपेयाद् बहुभिश्च साधुभिः
श्रुतेश्च सन्मानकरः क्रमोऽर्थवान् ॥ ६९ ॥

विपर्ययादिति । क्रमेण नार्थः पदसंहिताविदः (११ । ६६) इत्युक्त्वा—प्रसिध्यतोऽसिद्धिविपर्ययस्तथा (११ । ६७) इत्युक्तं स विपर्ययः । असिद्धा[4] अपि हि[5] भावाः सिद्धानाश्रित्य सिद्धा भवन्ति । शास्त्रसमाधिदर्शनाच्चायं क्रमोऽर्थवान्भवति । शास्त्रसमाधिदर्शनादिति । क्रमशास्त्रे ह्यनेक[6]विधिविशेषाः संहितापदादिपदान्तानुग्रहार्था विधीयन्ते । यथैवा[7]नवसानीयानीति[8] निमित्तसंशयानी[9]त्येवमादयः ।

पुराप्रसिद्धेश्चायं क्रमोऽर्थवान्भवति । पुराप्रसिद्धेरिति । कथं हि नाम पुरा अप्रसिद्धः सन्नवसानीयादीन्विशेषानारभेत[10]। उभयोरना-

---

(१) अपवाद- B^3B^n. (२) निवृत्त्यर्थः Reg. (३) B^2, M.M.; संयोगं शास्त्राण corrected to the reading of B^2 in I^2; सांख्यं योगं शास्त्राणां B^3; सांख्ययोगशास्त्राणां B^n; संयोगशास्त्राणि Reg. (४) असिद्धाव् Reg. (५) B^2I^2 and Reg., हि omitted in B^3B^n and M.M. (६) अनेके I^2. (७) -थैवा- corrected to -थैतद- in I^2. (८) B^nB^3 and M. M. (-नीया- omitted in B^3), -नीयान्विति B^2 I^2. (९) -दि- (for -नी-) B^2. (१०) B^2I^2, -भेत् B^3B^n and M. M.

श्रयात्[1] । उभे अपि पदसंहिते अनाश्रित्य क्रमो वर्तते तस्मादप्यर्थवा-न्क्रमः । कथमनाश्रयादित्युच्यते । व्यतिरिक्ते हि पदसंहिते । विशेषा-रम्भश्च[2] क्रमशास्त्रे दृश्यते । यथैवावगृह्याणां परिग्रहणम् । समभ्यु-पेयाद्बहुभिश्च साधुभिः । पूर्वाचार्यैः समभ्युपगमनाच्चायं क्रमोऽर्थवा-न्भवितुमर्हति । कथं हि नामानर्थकं सन्तं बहवः साधवः परिगृह्णीयुः ।

श्रुतेश्च सन्मानकरः क्रमोऽर्थवान् । श्रुतेश्चा[3]यमिष्टः[4] क्रमः । द्वैपदे[5]नाङ्गिरसः प्रोचुः । त्रिपदेन वालखिल्याः । इति । एभिः कार-णैरयं क्रमोऽर्थवान्भवति । भवति चात्र ।

सिद्धोऽयं श्रुतितश्च लक्षितोऽनुमतश्च[6] विविधैर्गुणैर्विशेषै[7]र्वितत्य[8] । संधिं नयति च[9] पदविषयं[10] पुनरपि च विकृतिमुचितां न जहाति ॥

ऋते न च द्वैपदसंहितास्वरौ
प्रसिध्यतः पारणकर्म चोत्तमम् ।
क्रमात् ॥ ७० ॥

इतश्चायं क्रमोऽर्थवान्भवति । क्रमादृते द्वैपदसंहिता च[11] द्वैपद-स्वरश्च न सिध्यति । द्वैपदे हि सिद्ध उत्तरारम्भः शक्यते कर्तुं पादार्ध-र्चेर्क्सूक्तसिद्ध्यर्थम् । पारणकर्म चोत्तममिति[12]। भगवता पा*ञ्चालेन[13] स्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं परम्परया महिम्ना च । भवति चात्र श्लोकः ।

---

(१) -श्रयत्वात् B[2]. (२) -रंभः B[2]. (३) श्रुतेश्चा- B[3] I[2] B[n], श्रुतौ चा- B[2] and Reg. (४) इष्टः I[2], दृष्टः B[2] B[n] and Reg., दृष्टः supplied above the line in B[3]. (५) B[2], Reg., M. M.; द्वैपदा- B[3] B[n]; द्विपदा- corrected to द्विपदे- I[2]. (६) B[2] I[2], -मत- B[3], -मितश्च B[n]. (७) विपर्यैः (for विशेषैर्) I[2]. (८) वितत्या B[n]. (९) B[3] B[2], संधिं न याति च B[n], सिंनिराति I[2]. (१०) पदविषये B[n]. (११) च struck out in I[2]. (१२) I[2] omits पारणकर्म to इति. (१३) See note.

प्रगाथे पुनरादानं[1] दृष्ट्वा यज्ञविधौ मुनिः ।
अर्थवन्तं क्रमं ब्रूयाद् देवता याश्च शाश्वतः ॥

क्रमोऽर्थवान्भवति ।

अतोऽप्यृग्यजुषां च वृंहणं
पदैः स्वरैश्चाध्ययनं तथा त्रिभिः ॥ ७१ ॥

अतोऽप्यस्मादपि हेतोः क्रमोऽर्थवान्भवति । क्रमादृचां च यजुषां च वृंहणं संधारणं[2] क्रियते द्वैपदेन । यथा पदाध्ययनेन चो[3]दात्तानुदात्तस्वरितैर्ऋग्यजुषां धारणं[4] क्रियते । तथाध्ययनं[5] त्रिभिरन्योन्यं वर्तते । संहितापदक्रमैः । तस्माच्चायं क्रमोऽर्थवान्भवति । भवति चात्र श्लोकः ।

शर[6]दुज्ज्वलो वितिमिरो विभाति भगवान्यथांशुमान् ।
सत्यवचनवित्तमः क्रमकः क्रमते हि संशयांस्तमस्त[7]थात्मवान् ॥

इति ॥

इति श्री[8]पार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रट-
पुत्रउवट[9]कृतौ[10] प्रातिशाख्यभाष्ये
क्रमहेतुर्नामैकादशं[11] पटलम् ॥

---

(१) प्रगाथेषु नरादानं B^2. (२) धारणं (for वृंहणं संधारणं) B^n. (३) चो- B^2. (४) संधारणं B^2. (५) I^2 strikes out -ध्ययनं. (६) शरा- I^2. (७) B^n, संशयस्तमस्त- I^2, संशयांस्तमसस्त- B^3B^2. (८) B^2 omits श्री-. (९) -पुत्रोवट- B^2. (१०) -पुत्रोव्वटकृते B^n. (११) क्रमहेतुकमेकादशं B^n. -दशमं I^2 (for -दशं).

ऊष्मान्तस्थर्सोष्मचकारवर्गा
नान्तं यान्त्यन्यत्र विसर्जनीयात् ॥ १ ॥

ऊष्माणश्च अन्तःस्थाश्च[1] ऋकारश्च[2] सोष्माणश्च[3] चकारवर्गश्च[4] इत्येते सप्तविंशति[5]र्वर्णाः पदान्तं न गच्छन्ति। किमविशेषेण। नेत्याह। विसर्जनीयं वर्जयित्वा। विसर्जनीयस्तूष्मसु मध्ये तिष्ठति तथापि[6] पदान्तं[7] गच्छति। अग्निः। वायुः।

परिशेषा[8]दन्ये[9] गच्छन्ति[10]। तानुदाहरिष्यामः। एव। तथा। नृऽभ्यः। अभि। देवी। वसु। बाहू। अग्ने। वायो। वै। तौ। वाक्। अर्वाङ्। विट्। वृषण्ऽवान्। यत्। देवान्। त्रिष्टुप्[11]। इन्द्रम्॥

ऋकारलृकारौ परमर्धमूष्मणां
नादिं तकारादवरे च सप्त ॥ २ ॥

ऋकारः। लृ[12]कारः। ऊष्मणां चोत्तरो[13] भागो विसर्जनीयादिरुच्यते। तकाराच्च पूर्वे ञकारादयः सप्त। एते त्रयोदश वर्णाः पदादिं न गच्छन्ति[14]। पारिशेष्यादन्ये गच्छन्ति। तानुदाहरि-

---

(१) $B^3B^2B^n$ (-श्च supplied afterwards in B^3), -स्थाः I^2 and Reg. (२) $B^3B^2B^n$ (विसर्जनीय corrected to -श्च in B^3), -कारः I^2 and Reg. (३) च omitted in I^2, supplied in B^3. (४) B^3B^2 (-श्च supplied in B^3) -वर्गं B^n and Reg., -वर्गा I^2. (५) सप्तविंशतिर् B^2, सविंशति- I^2. (६) तिष्ठति तथापि omitted in I^2. (७) न added in B^nB^3, but struck out in B^3. (८) B^3B^n, पारिशेष्या- B^2 and Reg. (९) अन्येन B^2. (१०) अग्निः to -न्ति omitted in I^2 (११) त्रिष्टुप् after इन्द्रम् in B^2I^2. (१२) लृ- B^2. (१३) -त्तर. B^3B^n. (१४) एते to -न्ति is given before तकाराच्च in I^2.

ष्यामः[1] । अथ । आत् । ऋतम् । इन्द्रम्[2] । ईषत् । उत । ऊचुः (ऋ० ६ । ४५ । ८)। एषः। ओषधीः। ऐत् । औच्चन् । कः । खनमानः (ऋ० १ । १७९ । ६)। गङ्गे (ऋ० १० । ७५ । ५)। घृतम् । चित्रम् । छाया (ऋ० १० । १२१ । २)। जगत् । तम् । प्रत्नऽथा[3] । देवम् । धनम् । नु । परि । फलिनीः (ऋ० १० । ९७ । १५)। बलम् । भयम् । मम । या । रत्नम् । लक्ष्मीः (ऋ० १० । ७१ । २)। वायुः । हरिण्या[4] (ऋ० ९ । १११ । १)। शतम् । षट् । सः ॥

नान्योन्येन मध्यमा स्पर्शवर्गाः संयुज्यन्ते ॥ ३ ॥

मध्यमा ये त्रयः स्पर्शवर्गास्तेऽन्योन्येन सह न संयुज्यन्ते । स्ववर्गीयैस्तु संयुज्यन्ते । अन्यैश्च । यज्ञनीः[5] (ऋ० १ । १५ । १२)। जभ्भ्र्[6]तीरिव (ऋ० ५ । ५२ । ६)। सुष्टुट्ठु[7] (ऋ० ८ । २२ । १८)। दूड्ढ्यः (ऋ० १ । ९४ । ८)। मण्डूकः (ऋ० ७ । १०३ । ४)। रथ्येव (ऋ० १ । १८० । ४)। अद्ध्वनयत् (ऋ० ६ । १८ । १०)। इन्द्रे (ऋ० १ । ४३ । ८)। ग्धेति ग्ध (ऋ० १ । १५८ । ५)। बद्ध्वः (ऋ० ५ । ४७ । ६)। अर्च्चति (ऋ० १ । ६ । ८)। वज्र्रम् (ऋ० १ । ८ । ३)। उष्ट्ट्राणाम् (ऋ० ८ । ५ । ३७)। वर्त्तनीः (ऋ० ४ । १९ । २)। त्राद्ध्वम् (ऋ० २ । २९ । ६)। श्च्योतन्ति (ऋ० १ । ८७ । २)।

---

(१) B², पारिशेष्यानुदाहरिष्यामः (for पारिशे- to -मः) B³I²Bⁿ. (२) B²I², इदं B³Bⁿ and M. M. (३) प्रत्नऽथा omitted in I². (४) B²Bⁿ, हिरण्या B³ and M.M., हि I². (५) यज्ञंऽनीः I². (६) -फ्र- B³. (७) सुष्टु B², Reg. The duplication in this as well as in the following examples is shown only in B³ and M. M.

सृत्तौति। मध्यमा इति किम्। वाक्पतङ्गाय धीयते[1] (ऋ० १०। १८९। ३)॥

न लकारेण रेफः॥ ४॥

लकारेण सह रेफो न संयुज्यते। अर्येम्यम् (ऋ० ५। ८५। ७)। अर्चन्ति (ऋ० १। १०। १)। सर्पिः (ऋ० ९। ६७। ३२)। बर्हिः (ऋ० १। १३। ५)। वर्षम्[2] (ऋ० ५। ५८। ७)॥

स्पर्शैर्वकारो न परैरनुत्तमैः॥ ५॥

अनुत्तमैः स्पर्शैः परैर्वकारो न संयुज्यते। पूर्वैस्तु संयुज्यते। क्व। ज्वलयन्ती[3]। अनड्वाहौ[4] (ऋ० १०। ८५। १०)। त्वाम्[5]। विभ्वा[6]। अनुत्तमैरिति किम्। दधिक्राव्णः। सुत[7]पाव्ने (ऋ० १। ५। ५)॥

तथा तेषां घोषिणः सर्वथोष्मभिः॥ ६॥

तथैव तेषां स्पर्शानामुत्तमादन्ये घोषिणः सर्वैरूष्मभिः पूर्वैः परैश्च[8] सह न संयुज्यन्ते। अघोषास्तु संयुज्यन्ते। स्कम्भथुः (ऋ० ६। ७२। २)। श्चोतन्ति[9]। स्तौति[10]। स्थ। स्पट्। यक्ष्म (ऋ० १०। ९७। १३)। यक्ष्म[11]। त्सरुः (ऋ० ७। ५०। १)।

---

(१) धीयते omitted in B³. ते I². After धीयते Bⁿ adds अन्यैश्च संयुज्यते; after ते I² adds अन्यैस्तु संयुज्यंते।. (२) वर्ष्यं Reg. (३) B³B², M.M.; ज्वलंती Bⁿ, Reg.; ज्वलता I². (४) अन I². (५) त्वम् M. M. (६) विंत्वा I². (७) सुतं- I². (८) B³B², M.M.; पूर्वैः परैश्च omitted in I²Bⁿ (सह also omitted in Bⁿ), Reg. (९) श्चोतं हि I². (१०) स्तौति omitted in B²Bⁿ. (११) यक्ष्म B².

वत्सम्[1] । विरप्शी । विरफ्शी[2] । अनुत्तमैरिति किम् । यक्ष्म । पृश्निः । विष्णुः । स्म । तेषामिति किम् । ह्वयामि । स्वः । स्यात् ॥

नान्त्यान्तस्था न प्रथमोष्मभिः परैः ॥ ७ ॥

अन्त्यान्तःस्था प्रथमा चोष्मभिः परैर्न संयुज्येते[3] । पूर्वैस्तु संयुज्येते[4] । श्यावाश्वस्य[5] । स्वाहा । अन्त्याप्रथमे इति[6] किम् । अदर्शि । शतवल्शः (ऋ० ३ । ८ । ११) । बर्हिः । वर्ष्यान्[7] (ऋ० ५ । ८३ । ३) ॥

न रेफो रेफेण ॥ ८ ॥

रेफो रेफेण सह न संयुज्यते । अन्यैस्तु संयुज्यते । अर्यमा ॥

न सोष्मणोष्मवान् ॥ ९ ॥

सोष्मणा सहोष्मवान्न[8] संयुज्यते । अन्यैस्तु संयुज्यते[9] । तुच्छ्येनाभ्वपिहितम् (ऋ० १० । १२९ । ३) । अमत्थ्नात् (ऋ० १ । ९३ । ६) ॥

न स्पर्शैरूष्मा प्रथमः परः सन् ॥ १० ॥

स्पर्शैः सह प्रथमोष्मा परः सन्न संयुज्यते । पूर्वैस्तु[10] संयुज्यते[11] पूर्वाह्णे (ऋ० १० । ३४ । ११) । अह्नाह्ना नः (ऋ० १० । ३७ । ९) । स्पर्शैरिति किम् । बर्हिः ॥

---

(१) वत्थ्सं B^3. (२) यक्ष्म to -शी omitted in I^2B^n. (३) B^3, -ज्येत B^n, -ज्यते B^2, -ज्यंते I^2. (४) B^3B^n; पूर्वैस्तु संयुज्यते I^2; (-ज्यं- Reg.) Reg.; omitted in B^2. (५) B^2B^n and Reg., श्यावाश्व B^3I^2 and M.M. (६) -प्रथमेति B^3. (७) वर्षान् I^2. (८) B^n, सोष्म सह ऊष्मवान्न I^2, सोष्मणा सोष्मवर्णः न B^3. (९) अन्यैस्तु संयुज्यते । अर्य्यमा to -ते omitted in B^2, अन्यैस्तु संयुज्यते omitted in B^n. (१०) पूर्वैस्स I^2, पूर्वैस्तु B^n, पूर्वः सन् Reg. (११) -ज्यंते- I^2.

नानुत्तमैः स च सोष्मा च पूर्वौ ॥ ११ ॥

अनुत्तमैः स्पर्शैः स च हकारः सोष्मा च पूर्वौ सन्तौ न संयुज्येते । उत्तमैस्तु संयुज्येते[1] । ब्रह्म । अह्ना । वृत्रघ्नः । अमथ्नात् (ऋ० १ । ९३ । ६)। दध्ना । गृभ्णामि ॥

नानुत्तमा घोषिणोऽघोषिभिः सह स्पर्शैः स्पर्शाः ॥ १२ ॥

अनुत्तमा घोषिणः स्पर्शा अघोषैः स्पर्शैः पूर्वैः परैश्च[2] सह न संयुज्यन्ते । उत्तमास्तु संयुज्यन्ते । पलिक्नीः (ऋ० ५ । २ । ४)। अमथ्नात् (ऋ० १ । ९३ । ६)। अप्नस्वतीमश्विना (ऋ० १ । ११२ । २४)। परोदाहरणानि । य ईङ्खयन्ति[3] (ऋ० १ । १९ । ७)। पन्थाः ॥[4]

नोत्तमा ऊष्मभिः परैः ॥ १३ ॥

उत्तमाः स्पर्शा ऊष्मभिः परैः सह न संयुज्यन्ते । पूर्वैस्तु संयुज्यन्ते । ब्रह्म । विष्णुः । स्म । पृश्निः । उत्तमा इति किम् । अप्सु[5] । विरप्शी ॥

लकारस्पर्शैर्न यकार उत्तरैः ॥ १४ ॥

लकारेण स्पर्शैश्चोत्तरैर्यकारो न संयुज्यते[6] । पूर्वैस्तु संयुज्यते[7] । वित्राल्यम्[8] (ऋ० ४ । ३० । १२)। दूढ्यः । सत्यम् । आरभ्य (ऋ० १ । ५७ । ४)। लकारस्पर्शैरिति किम् । इन्द्रवाय्वोः ॥

ऊष्माणोऽन्योन्येन च न ॥ १५ ॥

---

(१) -ज्यते B². (२) पूर्वैः परैश्च omitted in I². (३) -यंतीः B². (४) परोदाहरणानि to पन्थाः omitted in I². (५) अप्सु omitted in B³. (६) B², युज्यते B³I²Bⁿ. (७) युज्यते B³Bⁿ. (८) विद्याल्यम् B³I²Bⁿ; पातल्ये B², Reg., M.M. (a).

ऊष्माणोऽन्योन्येन च सह न संयुज्यन्ते। स्वैस्तु संयुज्यन्ते। शुनश्शेपः[1]। निषिष्ध्वरीः। निष्षपी[2] (ऋ० १।१०४।५)। शास्सि (ऋ० १।३१।१४)॥

ऋक्पदेष्विदम् ॥ १६ ॥

यदिदमस्मिन्पटले विधानमुक्तं तदृक्षु[3] पदमध्य एव भवति। पदसंधौ न भवतीति वेदितव्यम्। यदुक्तम्—नान्योन्येन मध्यमा स्पर्शवर्गाः (१२।३) इति तत्[4] संधौ न भवति। वषट् ते[5] (ऋ० ७।९९।७)। उप मा षड्[6] द्वाद्वा (ऋ० ८।६८।१४)। तथा—न लकारेण रेफः (१२।४) इति संधौ न भवति। सुमदंशु-र्ललामीः (ऋ० १।१००।१६)। तथा—नोत्तमा ऊष्मभिः परैः (१२।१३) इति संधौ[7] न भवति। देवान्हुवे (ऋ० १०।६६।१)। दध्यङ् ह मे (ऋ० १।१३९।९)। अर्वाङ्[8] शश्वत्तमम् (ऋ० ३।३५।६)। त्वं रजिं पिठीनसे दशस्यन्षष्टिम् (ऋ० ६।२६।६)। प्रत्यङ्[9] स विश्वा (ऋ० ९।८०।३)। शर्मन्स्याम[10] (ऋ० १।५१।१५)। इदमपि पद्मान्तरमित्युदाहरणं भवति[11]॥

नामाख्यातमुपसर्गो निपात-
श्चत्वार्याहुः पदजातानि शाब्दाः ॥ १७ ॥

---

(१) -शेपं B²I². (२) निष्षपी omitted in B². (३) B²Bⁿ, तदृक् ऋक्षु B³, तदृक्- I² and Reg. (४) तत् omitted in B³Bⁿ. (५) चषड्ढे Bⁿ. (६) -ट् B². (७) संधौ omitted in B³Bⁿ. (८) -ङ्क् B²I². (९) -ङ्क् B²I². (१०) -न्त्स्याम B²I². (११) Bⁿ, उदाहरणं न भवति B³B², omitted in I² and M. M.(a).

नाम[1] । आख्यातम् । उपसर्गः । निपातः । इति चत्वारि पदजातानि[2] शब्दविद आहुः ॥

तन्नाम येनाभिदधाति सत्त्वम् ॥ १८ ॥

तन्नामेत्युच्यते येन शब्देनाभिदधाति वक्ता सत्त्वं द्रव्यमित्यर्थः । अग्न इन्द्र वरुण मित्र देवाः (ऋ० ५ । ४६ । २) ॥

तदाख्यातं येन भावं सधातु ॥ १९ ॥

तदाख्यातमित्युच्यते येन शब्देन स[3]धातुनाभिदधाति वक्ता भावं क्रियामित्यर्थः ।[4] हतं तुदेथां नि शिशीतमत्रिणः[5] (ऋ० ७ । १०४ । १) ॥

प्राभ्या परा निर्दुरनु व्युपाप
सं परि प्रति न्यत्यधि सूदवापि ।
उपसर्गा विंशतिरर्थवाचकाः
सहेतराभ्याम् ॥ २० ॥

प्र अभि आ परा निः दुः अनु वि उप अप सम् परि प्रति[6] नि अति अधि सु उत् अव अपि इत्येते विंशतिरुपसर्गा अर्थवाचका अर्थवाचिनः । सहेतराभ्याम्[7] । कतराभ्याम् । नामाख्याताभ्याम् । प्र । प्रयाणे जातवेदसः (ऋ० ८ । ४३ । ६) । प्र देवं देव्या धिया भरत (ऋ० १० । १७६ । २) । अभि । अभिष्टने ते अद्रिवः (ऋ० १ ।

---

(१) Before नाम B³B²I², Reg. and M. M. (a) read उदाहरणं भवति (in B³ with marks of deletion); omitted in Bⁿ. (२) पदजातानि omitted in B³Bⁿ. (३) स- B³B², सा I², सः Bⁿ. (४) स एव च धातुरित्युच्यते added in B². (५) अत्रिणः omitted in I². (६) प्रति omitted in B³. (७) प्र अभि to -भ्याम् omitted in I².

८०। १४)। अभि ष्याम रक्षसः (ऋ० १०। १३२। २)। आ। आयन्तारं महि स्थिरम् (ऋ० ८। ३२। १४)। मरुद्भिरग्न आ गहि (ऋ० १। १९। १)। परा। परायतीं मातरमन्वचष्ट (ऋ० ४। १८। ३)। परा शृणीहि तपसा यातुधानान् (ऋ० १०। ८७। १४)। निः[1]। त्वष्टुर्देवस्य निष्कृतम् (ऋ० १। २०। ६)। तिरश्चता पा[2]र्श्वान्निर्गमाणि (ऋ० ४। १८। २)। दुः[3]। पुराग्ने दुरितेभ्यः (ऋ० ८। ४४। ३०)। दुर्नियन्तुः परिप्रीतः (ऋ० १। १९०। ६)। अनु। अनु नु स्यात्यवृकाभिरूतिभिः[4] (ऋ० २। ३१ ३)। तत्र ऋभुचा नरामनु ष्यात् (ऋ० १। १६७। १०)। वि[5]। विराट् सम्राट् (ऋ० १। १८८। ५)। अपेत वीत वि च (ऋ० १०। १४। ९)। विपाट् छुतुद्री[6] (ऋ० ३। ३३। १)। उप। यज्ञेयज्ञ उपस्तुता (ऋ० १। १३६। १)। इन्द्रमग्निमुप स्तुहि (ऋ० १। १३६। ६)। अप। अस्य प्राणादपानती (ऋ० १०। १८९। २)। अपेहि मनसस्पते (ऋ० १०। १६४। १)। सम्। प्र[7] सम्राजं चर्षणीनाम् (ऋ० ८। १६। १)। सम्राजोरव आ वृणे[8] (ऋ० १। १७। १)। परि। विदुर्विषाणं परिपानम्[9] (ऋ० ५। ४४। ११)। वाजी सन्परि णीयते (ऋ० ४। १५। १)। प्रति। प्रतियन्तं चिदेनसः (ऋ० ८। ६७। १७)। प्रति केतवः प्रथमा अदृश्रन्[10](ऋ० ७। ७८। १)। नि। अपो निषिञ्चन्नसुरः पिता नः[11](ऋ० ५। ८३। ६)। महान्तं कोशमुदचा नि षिञ्च (ऋ० ५। ८३। ८)। अति। अतिविद्धा विथुरेण

(१) निर B^2. (२) प- I^2. (३) दुर B^2. (४) -वृकाभिः B^2. (५) वि omitted in B^2. (६) -तुद्री-। B^2. (७) सम्। प्र omitted in I^2. (८) वृणीमहे B^2. (९) -पानं-। B^2. (१०) प्रथमाः B^2B^n. (११) -ता नः omitted in B^2.

(ऋ०८ । ८६ । २) । अति क्रमिष्टं जुरतं पणेः (ऋ० १ । १८२ । ३) । अधि । मम राष्ट्रस्याधिपत्यमेहि (ऋ० १० । १२४ । ५) । अभि-[1] शस्तेरधीहि (ऋ० १ । ७१ । १०) । सु । सुकृत्सुपाणिः स्ववान्[2] (ऋ० ३ । ५४ । १२) । अश्विना सुषे स्तुहि (ऋ० ८ । २६ । १०) । उत् । उद्यन्नद्य[3] मित्रमहः (ऋ० १ । ५० । ११) । उभे उदेति सूर्यः[4] (ऋ० ७ । ६० । २) । अव । अवस्पर्तरधिवक्तारमस्मयुम्[5] (ऋ० २ । २३ । ८) । अवाधमं वि मध्यमं श्रथाय (ऋ० १ । २४ । १५) । अपि । यदीं गच्छन्त्युशतीरपिष्ठितम् (ऋ० १ । १४५ । ४) । देवा देवानामपि यन्ति पाथः (ऋ० ३ । ८ । ९) ॥

इतरे निपाताः ॥ २१ ॥

इतरे । कतरे । नामाख्यातोपसर्गेभ्योऽन्ये निपाता वेदितव्याः । अस्माश्च ताँश्च (ऋ० २ । १ । १६)[6] ॥

विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव ॥ २२ ॥

---

(१) B^3B^n, पुरा तस्या अभि- B^2, अभि । अभि- I^2. (२) स्ववाँ ऋतावा B^2. (३) उद्यंतं त्वा (for उद्यन्नद्य) Reg. (४) सूर्यो अभि Reg., सूर्यो० । B^2. (५) अस्मयुम् omitted in B^2B^n.(६) I^2, M. M.(a), Reg.; instead of अस्माश्च ताँश्च $B^3B^2B^n$ read : अस्मान् (अअस्मान् B^n) । एतां । उभा । वा । (उवा । B^n) घ । सास्य । (सा । B^n) वां । (स्यचां for वां B^n) आवां । वा (omitted in B^n) । अपां । दूतं । नूनं । शश्वद्ध (शश्वत् B^n) । कुवित् । शकत् (शकृत् B^n) । अथातः । अथ । अथो अरिष्टतातये । विष्णोर्नु कं । अन्यश्चेत्ताभिगच्छति । सहोजाः । कं (तं B^3, ताः B^n.) स्विद् गर्भं (-र्भं B^n) इत्येवमाद्याः मादयस्वेत्येवमादयः ।.

प्र आ निः दुः वि सम् नि सु उत् इत्येत उपसर्गाणां[1] नवसंख्या[2] एकाक्षरा उच्चा उदात्ता इत्यर्थः ॥

आद्युदात्ता दशैतेषाम् ॥ २३ ॥

एतेषामुपसर्गाणां दशाद्युदात्ता वेदितव्याः। परा अनु उप अप परि प्रति अति अधि अव अपि इत्येते ॥

अन्तोदात्तस्त्वभीत्ययम् ॥ २४ ॥

एतेषामेवोपसर्गाणां मध्ये अभि इत्ययमन्तोदात्तो वेदितव्यः। अभि प्रियाणि पवते चनोहितः (ऋ० ९ । ७५ । १) ॥

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥ २५ ॥[3]

निपातानामर्थवशान्निपातना-
दनर्थकानामितरे च सार्थकाः।
नेयन्त इत्यस्ति संख्येह वाङ्मये
मिताक्षरे चाप्यमिताक्षरे च ये ॥ २६ ॥

ऋज्वर्थावेतौ[4] ॥

इति श्री[5]पार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र-उवटकृतौ[6] प्रातिशाख्यभाष्ये द्वादशं सीमापटलम्[7] ॥

इति[8] द्वितीयोऽध्यायः समाप्तः[9] ॥

---

(१) -सर्गा I^2, Reg. (२) I^2, Reg. omit नवसंख्या. (३) B^n adds ऋज्वर्थावेतौ।. (४) B^3B^2, ऋज्वर्थावेतौ omitted in I^2 B^n. (५) I^2 omits श्री- . (६) -पुत्रोव्वटकृते B^n. (७) B^3, द्वादशं पटलं B^2B^n, सामाप्तपटलं द्वादशम् I^2. (८) B^3, इति omitted in $B^2I^2B^n$. (९) B^3B^n, द्विती- to -प्तः omitted in B^2I^2.

वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां नादतां वा वक्त्रीहायाम् ॥ १ ॥

य इमे शारीरा इह पञ्च वायवो नानाकर्माणः प्राणापानव्यानोदानसमानास्तेषां प्राणो हि नाभेरुपरिष्टाद्व्याप्यास्ये[1] व्याचरति[2] । नाभेरधस्तात्पायुमेढ्रयोरपानः । प्रसारणाकुञ्चनो[3]त्क्षेपणावक्षेपण[4]गतिकर्मा व्यानः । कर्मप्रवृत्तिषु[5] बलमारोपयत्युदानः । सर्वक्रियाणामुपरमणः समानः । एवं वाचि वर्तमानं प्राणमेक आचार्या मन्यन्ते । अपर उदानं मन्यन्ते ।

उपरिष्टान्मुखादग्र ऊर्ध्वं यो वर्ततेऽनिलः ।
ऊ[8] कर्मक्रियाः सर्वाः प्राणिनां सम्प्रवर्तयन् ॥
नाभ्युरोऽथ शिरोभागं गच्छन्करणसंयुतः ।
कण्ठताल्वो[6]ष्ठदन्तानां सप्रयत्नः समीरितः ॥
ह्रस्वदीर्घप्लुतान्वर्णान् स्निग्धान्रूक्षांश्च नैकधा[7] ।
उदात्ताननुदात्तांश्च स्वरितान्क[8]म्पितानपि ॥
समान्विकीर्णांश्च तथा संवृतान्विवृतानपि ।
देहिनामव[9]बोधार्थं तेनोदानः स उच्यते ॥

एवमुभयथाचार्यविप्रतिपत्तिदर्शनाच्छौनकेन भगवता[10] प्राणं मन्यमानेनेदं शास्त्रमेवं प्रणीतम्—वायुः प्राणः कोष्ठ्यमनुप्रदानमिति ।

---

(१) -स्ते B^3. (२) -ष्टोद्वारिवोछ्वासेवयाचरति (instead of -ष्टाद् to -ति) I^2. (३) -कुंचितो- B^2. (४) -तचौत्क्षणकक्षेपण- (instead of -त्क्षेपणावक्षेपण-) I^2. (५) कर्मद्व्याप्यास्येव्यावृत्तिषु (for कर्मप्रवृत्तिषु) I^2. (६) -ल्वौ- B^2. (७) I^2 and Reg. (-श्व- I^2), रूक्षांस्त्वनेकधा B^3B^n and M.M. (रू- B^n, M. M.,), रुक्षाननेकधा B^2. (८) -नक- I^2. (९) अव- B^2 and Reg., अपि $B^3I^2B^n$ and M. M. (१०) वता I^2 (before वता I^2 supplies शरीर- on the margin).

ये पुनरुदानं मन्यन्ते तेषामिदं न सिध्यत्युदानाभावात्[1] । तेषां च सिद्धम् । कथम् । शा[2]रीराणां पञ्चानामपि प्राण इति नाम साधारणम्[3] । तस्मात्तेषामपि वायुः प्राणः कोष्ठ्यमनुप्रदानमित्येवं सिद्धम् ।

प्राणो वायुः । कोष्ठमुदरम् । कोष्ठे भवं कोष्ठ्यमनुप्रदानम् । वायुमनु प्रदीयत इत्यनुप्रदानम् । किं च तत् । श्वासनादोभयम्[4] । केन प्रयत्नेन किमनुप्रदानमापद्यते । कण्ठस्य ग्रीवायाः खे गलस्य बिले[5] छिद्रे । विवृते विपुले[6] विशाले महति । संवृते[7] संकुचिते संश्लिष्टेऽल्पे वा[8] सति । आपद्यते श्वासतां श्वासत्वं नादतां नादत्वं वा । वक्त्री[9]हायाम् । ईहा चेष्टा । वक्तुरीहा वक्त्रीहा । तस्यां वक्त्रीहायां स वायुः कण्ठबिले[10] विवृते श्वासत्वमापद्यते संवृते नादत्वम् ॥

उभयं वान्तरोभौ ॥ २ ॥

उभौ[11] विवृतसंवृतावन्तरा कण्ठबिले[12] समे सत्युभयं श्वासं नादमापद्यते[13] ॥

ता वर्णानां प्रकृतयो भवन्ति ॥ ३ ॥

ताः खल्वेताः सर्ववर्णानां श्वासनादोभयात्मिकास्[14] तिस्रः प्रकृतयो भवन्तीति वेदितव्यम् ॥

---

(१) I², Reg., M.M.; -भावे B³B²Bⁿ. (२) श- I². (३) इति added in M.M. (४) -नादौ उभयं B². (५) विले Bⁿ, Reg. (६) I²Bⁿ and Reg, विपुले omitted in B³B² and M.M. (७) वा added on the margin in I². (८) वा omitted in B². (९) -त्क्री- B², -क्री- Bⁿ. (१०) -विले Bⁿ, Reg. (११) उभौ omitted in B². (१२) -विले Reg. (१३) M. M. (a), श्वासं नादं वा आपद्यते B², श्वासं नादमापद्येते B³I² and Reg., श्वासनादावापद्येते Bⁿ. (१४) B² and Reg., -भयास् B³Bⁿ, -भयास corrected to -भयतास् in I².

उक्तेऽप्यस्मिन्न ज्ञायते केषां वर्णानां का प्रकृतिर्भवतीति। तत्र ब्रूमः—

श्वासोऽघोषाणाम् ॥ ४ ॥

अघोषाणां वर्णानां[१] श्वासः प्रकृतिर्भवतीति वेदितव्यम् ॥

इतरेषां तु नादः ॥ ५ ॥

इतरेषाम् । कतराणाम्[२] (?)। स्वराणां घोषवतां च नादः प्रकृतिर्भवतीति वेदितव्यम् ॥

सोष्मोष्मणां घोषिणां श्वासनादौ ॥ ६ ॥

सोष्माणो ये घोषिणो वर्गचतुर्थाः । ऊष्मणां च घोषो हकारः । तेषां वर्णानामेव[३] श्वासनादौ प्रकृतिर्भवतीति वेदितव्यम् ।

श्वासानुप्रदाना अघोषाः । हचतुर्था उभयानुप्रदानाः । अवशिष्टाः सर्वे नादानुप्रदाना इति वेदितव्यम् ॥

तेषां स्थानं प्रति नादात्तदुक्तम् ॥ ७ ॥

तेषां श्वासनादोभयानां[४] स्थानं प्रति यद्वक्तव्यं तदेतद्व्याख्यातम् । नादः परोऽभिनिधानाद् ध्रुवं तत्तत्कालस्थानम् (६ । ३९) इति । एवं श्वासादीनि त्रीण्यनुप्रदानानि वर्णकालस्थानानि भवन्ति । नाधिकानि[५] । न न्यूनस्थानानि ॥

तद्विशेषः करणम् ॥ ८ ॥

तत्र वर्णात्मगुणतत्त्वज्ञाने करणं नाम विशेषो वक्ष्यते[६] । करणं प्रदानमित्यनर्थान्तरमाहुः ॥

---

(१) B^2, वर्णानां omitted in $B^3 I^2 B^n$. (२) $B^3 B^n I^2$, कृतस्वराणां (for कतराणाम्) B^2.(३) एवं B^2. (४) $B^3 B^2 I^2 B^n$. (५) नाधिकानि omitted in I^2. (६) वक्ष्यता corrected to वक्ष्यते in I^2, वक्ष्यति $B^3 B^2 B^n$.

स्पृष्टमस्थितम् ॥ ६ ॥

स्पृष्टं करणं स्पर्शानाम्[1] । तदस्थितं वेदितव्यम् । अस्थितमिति । यत्र वर्णस्थानमाश्रित्य मध्ये जिह्वा न सन्तिष्ठते तदस्थितमित्युच्यते[2] ॥

दुःस्पृष्टं तु प्राग्घकाराच्चतुर्णाम् ॥ १० ॥

दुःस्पृष्टमीषत्स्पृष्टमित्यर्थः । हकारात्प्राक्चतुर्णां वर्णानां यरलवानाम् ॥

स्वरानुस्वारोष्मणामस्पृष्टं स्थितम् ॥ ११ ॥

स्वराणाम् अनुस्वारस्य ऊष्मणां चास्पृष्टं स्थितं वेदितव्यम् । यत्र वर्णस्थानमाश्रित्य जिह्वावतिष्ठते[3] तत्स्थितमित्युच्यते ॥

नैके कण्ठ्यस्य स्थितमाहुरूष्मणः ॥ १२ ॥

एक आचार्याः कण्ठ्यस्योष्मणो हकारस्य च[4] विसर्जनीयस्य चास्पृष्टं करणं न मन्यन्ते । स्पृष्टं दुःस्पृष्टं वा । एवमेके । अपरेऽक-[5] ण्ठ्यस्येति वर्णयन्ति ॥

प्रयोक्तुरीहागुणसंनिपाते वर्णीभवन्गुणविशेषयोगात् ।
एकः श्रुतीः कर्मणाप्नोति बह्वीः ॥ १३ ॥

प्रयोक्तुर्वक्तुरीहा । ईहैव गुण ईहागुणस्तेन संनिपाते योगे कण्ठ्यस्य वायोः । वर्णीभवन्निति वर्णत्वमापद्यमान एकः सन्[6] कण्ठ्यः स वायुर्गुणविशेषयोगात् । गुणा एव विशेषा गुणविशेषास्तैर्योगात् । यः कण्ठ्यवायुर्बह्वीः श्रुतीर्बहुरूपाणि कर्मणा क्रियया प्राप्नोति । केऽत्र गुणविशेषा यैः संयोगाद्वर्णानां श्रुतितो विशेषो भवति । अनुप्रदान-[7]

---

(१) परिशेषात् added in B^n, given as a marginal note in B^3. (२) इति omitted in B^2. (३) -ष्ठेत B^2. (४) च omitted in B^n. (५) B^3B^n and M. M., अपरे क- B^2I^2 and Reg. (६) एकः सन् omitted in Reg., सन् omitted in I^2. (७) अनुप्रदानं B^3, -अनुप्रदान । B^n.

संसर्गस्थानक[1]रणपरिमाणाख्या[2]स्तैः सह संयोगाद्वर्णानां रूपभेदो भवति ।

वर्गे वर्गे तुल्यस्थानानां तुल्यप्रयत्नानामपि प्रथमतृतीयानामनुप्रदानकृतः श्रुतिविशेषः । क च ट त प[3] ग ज ड द ब[4] इति । तथा हकारविसर्जनीययोः । संसर्गेणेति । वक्ष्यति । आहुर्घोषं घोषवतामकारमेकेऽनुस्वारमनुनासिकानाम् (१३ । १५) सोष्मतां च सोष्मणामूष्मणाहुः सस्थानेन (१३ । १६) घोषिणां घोषिणैव (१३ । १७) इति । द्वितीयचतुर्था ऊष्मणा संसृज्यन्ते । अनुस्वारेण पञ्चमः । तत्र तुल्यस्थानप्रयत्नानुप्रदानानामपि प्रथमद्वितीयानां तथा तृतीयचतुर्थानां तथा तृतीयपञ्चमानां च संसर्गकृतः श्रुतिविशेषः । क च ट त प ख छ ठ थ फ । तथा[5] । ग ज ड द ब तथा घ झ ढ ध भ तथा ङ ञ ण न म इति ।

स्थानेनेति । तुल्यप्रयत्नानुप्रदानानामपि स्थानकृतः श्रुतिविशेषः । अ ऋ इ उ । क च ट त प । य र ल व । ह[6] श ष स । करणेनेति । तुल्यस्थानानुप्रदानानामपि इकारजकारयकाराणां करणकृतः श्रुतिविशेषः । परिमाणेनेति । तुल्यस्थानप्रयत्नानुप्रदानयोरपि समानाक्षरयोः परिमाणकृतः श्रुतिविशेषः । यथा । अ आ । ऋ ॠ । इ ई । उ ऊ इति । अपि च श्लोकः ।

अनुप्रदानात्संसर्गात् स्थानात्करणविभ्रमात् ।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात् ॥ (तै० प्रा० २३ । २) इति ॥

---

(१) -का- I[2]. (२) B[2], Reg., M.M.; -ख्या- omitted in B[3]I[2]B[n]. (३) -पा Reg. (४) B[2], -वा B[3]I[2]B[n] and Reg. (५) तथा omitted in B[2]. (६) ह omitted in B[3].

एके वर्णाञ्छाश्वतिकान्न कार्यान् ॥ १४ ॥

एक आचार्या अकारादीन्वर्णाञ्छाश्वतिकान्नित्यान्न कार्यान्न कर्तव्यान्मन्यन्ते ॥

**आहुर्घोषं घोषवतामकार-
मेकेऽनुस्वारमनुनासिकानाम् ॥ १५ ॥**

घोषवतां वर्णानामकारं घोषमाहुरेक आचार्याः। किमुक्तं भवति। घोषवत्स्वकारः स्वस्थानादागत्य घोषत्वं जनयतीति। ग ज ड द ब। य र ल व। ह इति[1]। तथा त एवाचार्या अनुनासिकानां वर्णानामनुस्वारं[2] घोषमाहुः। किमुक्तं भवति। अनुस्वारः स्वस्थानादागत्य घोषत्वं जनयतीति। ङ ञ ण न म इति ॥

सोष्मतां च सोष्मणामूष्मणाहुः सस्थानेन ॥ १६ ॥

सोष्मणां वर्णानां सोष्मत्वं सस्थानेनोष्मणाहुः। खकारस्य ᳵक[3] इत्येते[4]न। छकारस्य श इत्येतेन। ठकारस्य ष इत्येतेन। थकारस्य स इत्येतेन। फकारस्य ᳶप[5] इत्येतेन ॥

घोषिणां घोषिणैव ॥ १७ ॥

घोषिणां सोष्मणां घोषिणैवोष्मणा। हकारेणेत्यर्थः। सोष्मतामाहुः। घ झ ढ ध भ इति[6] ॥

अन्तोत्पन्नावपर ऊष्मघोषौ ॥ १८ ॥

---

(१) ग ज to इति omitted in Reg. (२) नासिक्यं added in B², Reg. (३) B², ष्क corrected to ᳵक in I², ष्क B³Bⁿ and Reg. (४) -ते- omitted in B³I². (५) B². I² corrects ष्प to ᳶप. ष्प B³Bⁿ and Reg. (६) इति omitted in B³.

अत्रैव सोष्मसु घो[1]षवत्सु चोत्पद्येते ऊष्मघोषावित्यपर आचार्या आहुः[2] । यदुक्तमकारो घोषवतां घोषवत्त्वं जनयतीति । अनुस्वारोऽनुनासिकानामिति । सोष्मणां चोष्मा[3] सोष्मत्वमिति । तन्न स्पष्टं लक्ष्यते । कस्मात् । एवमुच्यमाने सति वर्णानामनित्यत्वं प्रसज्येत । नित्याश्च वर्णाः कूटस्थाश्चाविचालिनः ॥

शीघ्रतरं सोष्मसु प्राणमेके ॥ १८ ॥

सोष्मसु द्वितीयचतुर्थेषु शीघ्रतरं प्राणमेक आचार्या मन्यन्ते[4] । सर्वेषु[5] वर्णेषु स्थानकरणानुप्रदानानि त्रयो गुणाः समानाः । सोष्मसू[6]ष्मा गुणोऽधिकः । तत्र गुणबहुत्वान्मात्राकालेन शैघ्र्याद्दते[7] न शक्यमुच्चारयितुमिति तेषु शीघ्रतरं प्राणं मन्यन्ते । पदकारेणाप्युक्तम्— प्रथमद्वितीयाः श्वासानुप्रदाना अघोषाः । एकेऽल्प[8]प्राणा अपरे महाप्राणाः । तृतीयचतुर्था नादानुप्रदाना घोषवन्तः । एकेऽल्प[9]प्राणा अपरे महाप्राणाः[10] । इति सोष्मसु महाप्राणं विदधदेतमेवार्थमाह ॥

रक्तो वचनो मुखनासिकाभ्याम् ॥ २० ॥

मुखेन नासिकया च य उ[11]च्यते स रक्तो वेदितव्यः । ङ ञ ण न म इति । सचाँ इन्द्रः (ऋ० १ । ५१ । ११) । अस्माँअस्माँ इत् (ऋ० ४ । ३२ । ४) । अभीशूँरिव (ऋ० ६ । ५७ । ६) । नॄँः प्रणेत्रम् (प्रै० पृ० १४२) । किमर्थमिदमुच्यते । ननु—

---

(१) अघो- I². (२) इत्याहुः B². (३) I² corrects चोष्मा to चोष्मणा., (४) आहुः (for मन्यन्ते) I². (५) सर्वेषु च B². (६) सोष्मासू- B³, सोष्मसु तु ऊ- I². (७) ऋतेन Reg. (८) एके प्रथमाः अल्प- B². (९) एके तृतीया अल्प- B². (१०) महाप्राणाः omitted in B². (११) यदु- (for य उ-) B³Bⁿ.

रक्तसंज्ञोऽनु[1]नासिकः (१ । ३६) इत्येव सिद्धम्। सत्यम्। न हि संज्ञा क्रियते। किं तर्हि। तत्रानुक्तं मुखनासिकावचनत्वमिह रक्तस्य विधीयते। एवमर्थमिदमुच्यते ॥

एतद्वर्णात्मगुणशास्त्रमाहुः ॥ २१ ॥

एतत्—वायुः प्राणः (१३ । १) इत्येवमादि यदनुक्रान्तं तद्वर्णानामात्मगुणशासनं वेदितव्यम्। एतावन्तो वर्णात्मगुणाः। श्वासता। नादता। उभयता। स्पृष्टता। दुःस्पृष्टता। अस्पृष्टता। कण्ठबि[2]लस्य विवृतता संवृतता। अघोषता। घोषता। सोष्मता। अनुनासिकतेति॥

नपुंसकं यदूष्मान्तं तस्य बह्वभिधानजः।
अनुस्वारो दीर्घपूर्वः सिष्यन्तेषु पदेषु स्वः ॥ २२ ॥

नपुंसकलिङ्गं यच्छब्दस्वरूपमूष्मान्तं तस्य नपुंसकलिङ्गस्य बह्वभिधानजः। बहुवचनोत्पन्न इत्यर्थः। दीर्घपूर्वो नकारजन्यः पदमध्येऽनुस्वारो वेदितव्यः। सि षि इत्येवमन्तेषु पदेषु सोऽनु[3]स्वारो द्र[4]ष्टव्यः। भासांसि वस्ते सूर्यो न शुक्रः (ऋ० ६ । ४ । ३)। चक्षूंषीव सूर्ये सं चरन्ति (ऋ० ५ । १ । ४)। आ दैव्या वृणीमहेऽवांसि (ऋ० ७ । ९७ । २)। व्यर्य इन्द्र तनुहि श्रवांसि (ऋ० १० । ११६ । ६)। तपूंषि तस्मै वृजिनानि सन्तु (ऋ० ६ । ५२ । २)। वपूंषि जाता मिथुना सचेते (ऋ० ३ । ३९ । ३)। आ यस्मिन्मना हवींष्यग्नौ[5] (ऋ० १० । ६ । ३)।

किमर्थमनुस्वारस्य दीर्घपूर्वस्य पदमध्ये वर्तमानस्य बहुभिः श्लोकैर्लक्षणं क्रियते। ननु पाठादेव सिद्धम्। यथान्येषां वर्णानां पाठात्सिद्धम्। सत्यम्। किंतु दुराम्नाननिवृत्त्यर्थमनयोः शिक्षापटलयोर्बहूनां

---

(१) नासिकया to ऽनु- omitted in I². (२) -वि- Reg. (३) स अनु- B³I²B²Bⁿ. (४) इ- I². (५) हवींषि Reg.

वर्णानां लक्षणं क्रियते । यथा—समापाद्यान्युत्तरे षट् पकारे (१३ । ३०) शुनश्शेपो निष्षपी शास्सि निष्षाळ्विक्रमा:*[1] (१४ । ३६) ऐयेरित्यैकारमकारमाहुः (१४ । ४१) इत्येवमादीनि । कथं पुनर्दुराम्नान[2]प्रसङ्गः । सन्ति ह्यतीर्थोषिता अलसा अगुणदोषज्ञा अन्योन्याध्यापकाः सर्ववर्णान्यत्व[3]जनयितारः । तद्दोषनिवृत्त्यर्थमाचार्येण शिष्यहितार्थमिदमारब्धम् । अनुस्वारस्य तावत्स्थाने ङकारं जनयन्ति । तस्माद् ङकारात्परं ककारमन्तःपातं[4] जनयन्ति । हवींषि । सर्पींषि । भासांसि (ऋ० ६ । ४ । ३) । अवांसि । इत्येवम् । तन्निवृत्त्यर्थमनुस्वारलक्षणं क्रियते ।

यद्येवं पदान्तेऽप्यनुस्वारस्य तच्छ्रवणं तुल्यम् । त्वां ह त्यदिन्द्रार्णसातौ (ऋ० १ । ६३ । ६) । तां सु ते कीर्तिं मघवन् (ऋ० १० । ५४ । १) । तस्मादत्रापि यत्नः कर्तव्यः । न कर्तव्यः । रेफोष्मणोरुदययोर्मकारोऽनुस्वारम् (४ । १५) इति विहितमनुस्वारं जानात्यसौ । तत्र पदमध्येऽनुस्वारलक्षणं नास्ति येनानुस्वारं जानीयात् । एवं सत्यपि किमर्थं दीर्घपूर्वो गृह्यते । न ह्रस्वपूर्वः । अयं सो अग्निः[5] (ऋ० ७ । १ । १६) । आ विंशत्या त्रिंशता (ऋ० २ । १८ । ५) । अंसेषु वः (ऋ० ५ । ५४ । ११) इति । उभयत्रापि हि ङकारश्रवणं तुल्यम् । तत्र तावदाहुः । यथा दीर्घपूर्वस्य व्यक्ता ङकारश्रुतिर्न तथा ह्रस्वपूर्वस्य । तस्मान्न गृह्यते । अपर[6] आहुः । अनुस्वारस्योपधां ह्रस्वां केचिद् द्राघयन्त इव पठन्ति । तन्निवृत्त्यर्थं दीर्घपूर्वः परिगृह्यते—एतावानूष्मवनुस्वारो दीर्घात् (१३ । २८) इत्येवमन्तः ॥

(१) -माव् B^3B^2, -मान् I^2B^n. See note on XIV. 36. (२) -म्नाय- Reg. (३) -त्वं B^2. (४) B^3B^n; ककारात्परं पकारं अपरे added in B^2, Reg., M. M.; शकारमपरे added in I^2. (५) अयं सो अग्निः omitted in B^n. (६) परे B^2.

सः सा सौ सं पदान्तेभ्यः पूर्वोऽनाम्युपधस्तथा।
यकारो वा वकारो वा पुरस्ताच्चेदसंधिजः ॥ २३ ॥

सः सा सौ सम् इत्येतेभ्यः[१] पदान्तेभ्यः पूर्वोऽनुस्वारोऽनाम्युपधोऽवर्णोपधस्[२] तथा। कथम्। यथा सिष्यन्तेषु दीर्घपूर्व एवमिहापि दीर्घपूर्वो वेदितव्यः। असंधिजो यकारो वा वकारो वा यदि तस्मादवर्णात्पूर्वो भवति। सः। साह्वांसो दस्युम्[३] (ऋ० ६। ४१। २)। सा। शुश्रुवांसा चित् (ऋ० ७। ७०। ५)। सौ। विद्वांसाविदुरः (ऋ० १। १२०। २)। सम्। श्रेयांसं दक्षं मनसा[४] (ऋ० १०। ३१। २)। वावृध्वांसं चित् (ऋ० ८। ६८। ८)। यकारो वा वकारो वा पुरस्ताच्चेदसंधिज इति कस्मात्[५]। ये व्यंसम्। (ऋ० १। १०१। २)॥

जिघांसन्पांसुरे मांसं पुमांसं पौंस्यमित्यपि।
पदेष्वेवंप्रवादेषु ॥२४॥

जिघांसन् पांसुरे मांसम् पुमांसम् पौंस्यम् इत्येतेषु च पदप्रवादेष्वनुस्वारो दीर्घपूर्वो वेदितव्यः। जिघांसन्। द्रुहं जिघांसन्ध्वरसम् (ऋ० ४। २३। ७)। यस्तोतारं जिघांससि सखायम् (ऋ० ७। ८६। ४)। पांसुरे। समूळ्हमस्य पांसुरे (ऋ० १। २२। १७)। मांसम्। मांसमेकः पिंशति सूनयाभृतम्[६] (ऋ० १। १६१। १०)। ये चार्वतो मांसभिक्षामुपासते[७] (ऋ० १। १६२। १२)। पुमांसम्। पुमांसं पुत्रमा[८] धेहि[९] (ऋ० खि० १०। १८४। ३)।

---

(१) इत्येवं (for इत्येतेभ्यः) B². (२) अवर्णोपधः B² and Reg., अकाराकारोपधः Bⁿ, omitted in B³I². (३) दस्युं०। B². (४) B², Reg.; मनसा omitted in B³ I²Bⁿ. (५) किं B³. (६) सूनयाभृतम् omitted in B²Bⁿ. (७) उपासते omitted in B²Bⁿ. (८) पुत्राना B². (९) Instead of this quotation M.M. has इन्द्र जहि पुमांसं यातुधानान्.

पौंस्यम् । स्तुषे तदस्य पौंस्यम् (ऋ० ८ । ६३ । ३) । चकृषे तानि पौंस्या (ऋ० ४ । ६३ । ८) ॥

नामकार उपोत्तमे ॥ २५ ॥

जिघांसादीनामुपोत्तमे प्रवादेऽमकारे सत्यनुस्वारो दीर्घपूर्वो न भवति । किंतु ह्रस्वपूर्व एव भवति । पुंसः पुत्राँ उत (ऋ० १ । १६२ । २२) ॥

प्रश्लिष्टादभिनिहितात् ॥ २६ ॥

प्रश्लिष्टादेकीभावादभिनिहिताच्च परोऽनु[1]स्वारः पदे ह्रस्वपूर्वः सन् संहितायां दीर्घपूर्वो भवति । प्रश्लिष्टात् । आ भूतांशः (ऋ० १० । १०६ । ११) । अभिनिहितात् । भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचम् (ऋ० १० । ६३ । ९) ॥

मांश्चत्वेऽयांसमित्यपि ॥ २७ ॥

मांश्चत्वे अयांसम् इत्येतयोश्चानुस्वारो दीर्घपूर्वो वेदितव्यः[2] । मांश्चत्वे[3] । मांश्चत्वे वा पृशने वा वधत्रे[4] (ऋ० ९ । ९७ । ५४) । अयांसमग्ने सुक्षितिम्[5] (ऋ० २ । ३५ । १५)।

अयं योगोऽनर्थकः । कथम् । माँश्चत्वे इति[6] नायमनुस्वारः । किं तर्हि—आदिस्वरश्चोत्तरेषां पदेऽपि (४ । ८१) इत्यनुनासिकः[7] स्वरः । अयांसमिति—सः सा सौ सं पदान्तेभ्यः (१३ । २३) इत्येव सिद्धम् ।

नानर्थकः । शाखान्तरे किल मांश्चत्वे इति[8] सानुस्वारं पठन्ति । तत्प्रदर्श्यते । यद्येवं मांस्पचन्याः इति च निपातयितव्यम् । नैतदस्ति

---

(१) पर अनु-B²B³I²Bⁿ. (२) वेदितव्यः omitted in B². (३) मांश्चत्वे omitted in B²Bⁿ. (४) वधत्रे omitted in B². (५) जनाय added in B³I². (६) Reg.; मांश्चत्वेति B³B²I² Bⁿ, M. M. (७) B² I²Bⁿ; -क B³, Reg., M.M. (८) B² and Reg., मांश्चत्वे इति omitted in M. M., इति omitted in B³I²Bⁿ.

प्रयोजनम् । जिघांसन्पांसुरे मांसम् (१३ । २४) इति[1] मांसप्रवादत्वात्सिद्धम् । अयांसमित्येतस्य निपातने[2] प्रयोजनं मृग्यम् *[3] ॥

एतावानृक्ष्वनुस्वारो दीर्घात् ॥ २८ ॥

नपुंसकं यदूष्मान्तम् (१३ । २२) इत्येवमादिर्योऽयमनुस्वारोऽनुक्रान्त[4] एतावानेव ऋक्षु पदमध्ये[5] दीर्घात्परो[6] वेदितव्यः । अत्रैवोदाहृतः ॥

इतरथेतरः ॥ २९ ॥

इतरथा । कथम् । उक्ताद्[7] दीर्घपूर्वाद्विषयादन्यत्र ऋक्षु पदमध्ये रेफोष्मपर इतरः । कतरः[8] । ह्रस्वपूर्वोऽनुस्वारो वेदितव्यः । अंहः । विंशत्या (ऋ० २ । १८ । ५) । अंसेषु । असंदिग्धान्स्वरान् (३ । २९) इत्युक्तः श्लोकार्थः स्वरपटले । अत्र[9] तथैव व्याख्यातव्यः ॥

समापाद्यान्युत्तरे षट् पकारे
राधो रथो ग्ना दिवो जा ऋतश्च ।
अज्ञःपा दुःप्रेति च पूर्वपद्याव-
निङ्गयन्विक्रममेषु कुर्यात् ॥ ३० ॥

समापाद्यानि षट् पदानि पकार उत्तरे । राधः । रथः । ग्नाः । दिवः । जाः । ऋतः[10]। इत्येतानि । अज्ञःपाः । दुःप्र । इत्येतौ च पूर्वपद्यौ[11]। विक्रममेतेषु[12] कुर्यादनिङ्गयन्नवग्रहमकुर्वन् । विक्रमं कुर्या-

(१) मांसमिति omitted in I². (२) निपात- Reg. (३) B²I²Bⁿ, Reg., M. M. (a); प्रयोजनमृग्यं B³. उदाहरणं is added after मृग्यम् in B²B³I²Bⁿ, Reg., M. M. (a). (४) अनुस्वार I². (५) पदसंध्ये I². (६) दीर्घपूर्वोनुस्वारो (instead of दीर्घात्परो) I². (७) उक्तपूर्वाद् B³B². (८) कतरः omitted in I². (९) अत्रापि Bⁿ. (१०) राधः to ऋतः omitted in B². (११) I²Bⁿ, समापाद्यौ added in B³B². (१२) एषु B².

दिति। विक्रममुपचारमपनीय विसर्जनीयमेषु कुर्यात्। राधः[1]। त्वं हि राधस्पते (ऋ० ८। ६१। १४)। राधःपते। रथः[1]। एष ते देव नेता रथस्पतिः (ऋ० ५। ५०। ५)। रथःपतिः। ग्नाः[1]। नराशंसो ग्नास्पतिर्नो अव्याः[2] (ऋ० २। ३८। १०)। ग्नाःपतिः। दिवः[1]। दिवस्पृथिव्योरव आ वृणीमहे (ऋ० १०। ३५। २)। दिवःपृथिव्योः। जाः[1]। सं जास्पत्यम् (ऋ० ५। २८। ३)। जाःपत्यम्। ऋतः[1]। तव वायवृतस्पते (ऋ० ८। २६। २१)। ऋतःपते। अश्वःपाः[1]। यामन्नश्वस्पाइव घेदुपब्दिभिः[3] (ऋ० १०। ९४। १३)। अश्वःपाःऽ[4]इव। दुःप्राव्यः[5]। दुष्प्राव्योऽवहन्तेदवाचः (ऋ० ४। २५। ६)। दुःप्रऽअव्यः[6]।

पूर्वपद्याविति किम्। इममश्वस्पामुभये अकृण्वत[7] (ऋ० १०। ९२। २)। अश्वःऽपाम्[8]। इत्यत्रावगृह्यत्वान्मात्राकालो भवतीति॥

किमिदं समापाद्यमित्यत[9] आह—

समापाद्यं नाम वदन्ति षत्वं
तथा णत्वं सामवशाँश्च संधीन्।
उपाचारं लक्षणतश्च सिद्ध-
माचार्या व्यालिशाकल्यगार्ग्याः॥ ३१॥

समापाद्यं नाम वदन्ति षत्वं तथा णत्वम्। सामवशांश्च संधींस्तथा वदन्ति। लक्षणतः सिद्धमुपाचारं च तथा वदन्ति। के ते। आचार्या

(१) Words before quotations given in B², omitted in B³I²Bⁿ. (२) -पतिः B², -पतिर्नः Bⁿ. (३) B³I², -इवB² and Reg., -इव घेव् Bⁿ. (४) No sign of अवग्रह in I². (५) दुःप्राव्यः B², omitted in B³I²Bⁿ. (६) दुःप्राव्यः I². (७) अकृण्वत omitted in B², Reg. (८) Reg., अंजस्पाम् B³B² I²Bⁿ. (९) अत्र B².

व्याळिशाकल्यगार्ग्याः । षत्वम् । सुषुमा यातम् (ऋ० १ । १३७ । १) । णत्वम् । तदा रभस्व दुर्हणो (ऋ० १० । १५५ । ३) । सामवशः । मक्षूमक्षू कृणुहि[1] (ऋ० ३ । ३१ । २०) । उपाचारम्[2] । त्वं हि राधस्पते (ऋ० ८ । ६१ । १४) ॥

ह्रस्वामर्धस्वरभक्त्यासमाप्तामनुस्वारस्योपधामाहुरेके ।
अनुस्वारं तावतैवाधिकं च ह्रस्वोपधम् ॥ ३२ ॥

ह्रस्वामनुस्वारोप[3]धामर्धस्वरभक्त्या असमाप्तां पादमात्रयार्धपादमात्रया वा[4] न्यूनामाहुरेक आचार्याः । अनुस्वारं च तावता कालेनाधिकं ह्रस्वोपधम्[5] । त्वं राजेन्द्र ये च देवाः[6] (ऋ० १ । १७४ । १) । त्वं ह नु त्यत्[7] (ऋ० ६ । १८ । ३) ॥

दीर्घपूर्वं तदूनम् ॥ ३३ ॥

दीर्घपूर्वमनुस्वारं तथैवार्धस्वरभक्त्या न्यूनमाहुः । दीर्घामुपधां तावताधिकां च[8] । गवां शता (ऋ० १ । १२२ । ७) तां सु ते कीर्तिम् (ऋ० १० । ५४ । १) ॥

---

(१) कृणुहि omitted in B^2. (२) उपाचारं $B^2B^3I^2$, omitted in B^n. (३) -स्वारस्योप- B^2. (४) अर्धपादमात्रया वा omitted in I^2. (५) कालेन ह्रस्वोपधमधिकं कुर्यात् (instead of काले- to -धम्) B^2. (६) ये च B^2, ये व B^n. (७) त्य I^2, त्यत्० । B^2. (८) B^3B^n, अनुस्वारं दीर्घपूर्वं तावता कालेन पादमात्रयाऽर्धपादमात्रया वा न्यूनं त एव आचार्या आहुः (instead of दीर्घपूर्व० मनुस्वारं to च) B^2, दीर्घपूर्वमनु- to च omitted in I^2. Before गवां B^2 reads यावता कालेनोपधायाऽनुपधाया वा [-पधयानुपधया वा Reg., M. M. (a)] वृद्धिर्भवति । तावानिहेति (-निह Reg.) न विज्ञायते । तस्माच्छाखांतरे आगमः कर्त्तव्यः ।. This passage is also quoted by Reg. and M. M. (from *a*), with the readings shown above.

रेफोऽस्त्यकारे च परस्य चार्धे
पूर्वे ह्रसीयाँस्तु न वेतरस्मात् ।
मध्ये सः ॥ ३४ ॥

ऋकारे रेफो विद्यते । परस्य च ऋकारस्य च पूर्वेऽर्धे रेफो विद्यते। ह्रसीयांस्तु ह्रस्वतरः[1] स[2] रेफः । इतरस्मादृकार[3]रेफादल्पतरः । न वा ह्रसीयान् । सम एव वा[4] । मध्ये सः । स रेफस्[5] तस्य ऋवर्णस्य मध्ये द्र[6]ष्टव्यः । नादौ । नान्ते[7] । ऋ ऋ ॥

तस्यैव लकारभावे धातौ स्वरः कल्पयताव्लृकारः ॥ ३५ ॥

तस्य ऋवर्णस्य स्थाने[8] । रेफस्य लकारभावे यदा स रेफो लकारमापद्यते तदा । लृकारो भवति स्वरसंज्ञश्च भवति । कल्पयतावेव धातौ नान्यत्र । चाक्लृप्रे तेन ऋषयो मनुष्याः (ऋ० १० । १३० । ६) इति । अत्र स्वरात्ककारस्य द्विर्वचनं न भवत्यसंयोगादित्वात् । पकारस्य च द्वित्वं भवति स्वरोपधत्वात्[9] ॥

अनन्तस्थं तमनुस्वारमाहुः ॥ ३६ ॥

योऽसौ पुरस्तादविशेषेणानुक्रान्तोऽनुस्वारः—एतावानृद्ध्वनुस्वारो दीर्घात् (१३ । २८) इति तमनुस्वारमनन्तस्थं पदमध्ये वर्तमानमाहुराचार्याः । किमर्थमिदमुच्यते ।[10] नपुंसकं यदूष्मान्तम् (१३ । २२)

---

(१) ह्रस्वतरः omitted in I², Reg. (२) स omitted in Reg. (३) तस्मादृकारे I², तस्मादृकार-Reg. (४) वा omitted in Reg. (५) स रेफस् omitted in B². (६) इ- I². (७) नांत्ये B³Bⁿ. (८) B³B²I²Bⁿ; ऋवर्णस्थस्य (for ऋवर्णस्य स्थाने) Reg. (९) Bⁿ, पकारस्य च भवति (instead of पकारस्य to -त्वात्) Reg., omitted in B³I²B². (१०) स तथे ननु added in I².

इत्येवमाद्यनुक्रमणेनैव सिद्धम्।' सत्यम्। किंतु—एतावानृद्ध्वनुस्वारो दीर्घात् (१३।२८) इत्युक्त[१] एतावानृद्ध्वनुस्वारो[२] दीर्घादिति[३] नियमविधिः प्रसज्येत[४]। तन्निवृत्त्यर्थमुच्यते। सन्ति ह्यन्येऽपि दीर्घात्पदान्ताः। त्वां हि (ऋ० ६।४।७)। त्वां राजानम्[५] (ऋ० २।१।८)। तां सु ते कीर्तिम् (ऋ० १०।५४।१)॥

व्याळिर्नासिक्यमनुनासिकं वा॥ ३७॥

व्याळिराचार्यः सर्वमनुस्वारं नासिकास्थानं मुखनासिकास्थानं वा मन्यते। त्वं राजेन्द्र (ऋ० १।१७४।१)। त्वां राजानम् (ऋ० २।१।८)। अंसेषु वः (ऋ० ५।५४।११)। हवींषि (ऋ० १०।६।३)। त्वँ राजेन्द्र[६]। त्वाँ राजानम्। अँसेषु वः। हवीँषि। पूर्वाणि नासिक्यपक्षे। उत्तराणि त्वा[७]नुनासिक्यपक्षे। अनुस्वारस्य पूर्वोक्तमपि नासिकास्थानं मुखनासिकास्थानविवक्षया[८] पुनरुच्यते॥

संध्यानि संध्यक्षराण्याहुरेके
द्विस्थानतैतेषु तथोभयेषु॥ ३८॥

संध्यानि संधितव्यानि(?) संधिजानि[९] वा संध्यक्षराण्याहुरेक आचार्याः। यथान्यान्यक्ष[१०]राणि स्वयमुत्पन्नानि न तथेमानि। कथमेतदध्यवसीयते। द्वि[११]स्थानता कण्ठतालुस्थानता कण्ठो[१२]ष्ठस्थानता च

---

(१) इत्युक्तं B^2. एतावान्- to -क्त omitted in B^n. (२) एतावानृश्वनुस्वारो omitted in Reg. (३) दीर्घादिति omitted in Reg. (४) प्रसज्यते Reg. After प्रसज्येत। B^2 adds यथान्योनुस्वारो दीर्घपूर्वो नास्तीति।. (५) राजन् B^3I^2. (६) त्वँ राजेन्द्र omitted in I^2. (७) त्वा- Reg., त्व- $B^3I^2B^2$. (८) B^2, Reg.; -नासिक्यविधित्सया B^3B^n, M. M.; -न विध्यर्थं (?) supplied on the margin for -क्यविधित्सया which is omitted in I^2. (९) संहितानि I^2, संधितानि B^n. (१०) यथान्याक्ष- I^2, Reg. (११) B^2I^2, यतो द्वि- B^3B^n and M. M. (१२) -ण्ठ्यो- I^2.

तथा[1] लक्ष्यत उभयेषु संध्यक्षरेषु कण्ठ्य[2]तालव्ययोः कण्ठ्योष्ठ्य-*[3]
योश्च । ए ओ ऐ औ इति ॥

यदि संध्यानि क[4]योर्वर्णयोः संधिजानि भवन्ति ।

**संध्येष्वकारोऽर्धमिकार उत्तरं
युजोरुकार इति शाकटायनः ॥ ३८ ॥**

संध्येषु संध्यक्षरेषु सत्स्वकारः[5] पूर्वमर्धं भवति । इकार उत्तरमर्धं प्रथमतृतीययोर्भवति । युजोर्द्वितीयचतुर्थयोरुकार उत्तरमर्धं भवति । एवं शाकटायन आचार्यो मन्यते । अ इ ए । अ उ ओ । अ ई ऐ[6] । अ ऊ औ[7] । इति ॥

यद्येवमेकारैकारयोरोकारौकारयोर्वा कथं श्रुतिविशेषः ।

मात्रासंसर्गादवरेऽपृथक्श्रुती ॥ ४० ॥

अवरे पूर्वे ए ओ इत्येते मात्रासंसर्गात् । मात्रयोः समयोः क्षीरोदकवत्संसर्गात् । न ज्ञायते कावर्णमात्रा क वेवर्णोवर्णयोरिति । तस्मात्ते अक्षरे अपृथक्श्रुती भवतः । किमिदमपृथक्श्रुती इति । ए ओ इत्येतयोरिवर्णोवर्णयोः पृथक् श्रवणं न विद्यते क्षीरोदकवत्संप्रयुक्तत्वात् । एवं श्रुतिविशेषः ।

अस्यैवापरा योजना ॥

मात्रासंसर्गादवरे पृथक्[8]श्रुती ॥

---

(१) च added in B^2. (२) B^2, कंठ- $B^3I^2B^n$. (३) All the MSS. ($B^2B^3I^2$) and B^n read-ष-. (४) ह्व- B^n. (५) $B^3B^2B^n$, सत्स अकारः I^2, सर्वेषु अकारः Reg. (६) अ ई ऐ B^3B^n, M. M.; आ ई ऐ B^2I^2; आ इ ऐ Reg. (७) अ ऊ औ B^3B^n, M. M.; आ ऊ औ B^2I^2; आ उ औ Reg. (८) ऽपृथक्- B^n.

मात्रयोः क्षीरोदकवत्संप्रयुक्तत्वात् । न ज्ञायते क्वावर्णस्य मात्रा क्वेवर्णोवर्णयोरिति । तस्मादवरे पूर्वे[1] संध्यक्षरे ए ओ इत्येते पृथक्श्रुती भवतः । ऐऔकाराभ्यामेकारौकारौ[2] पृथक्[3] श्रूयेते इत्यर्थः । एवं श्रुतिविशेषो भवति ॥

ह्रस्वानुस्वारव्यतिषङ्गवत्परे ॥ ४१ ॥

परे संध्यक्षरे ऐ औ इत्येते[4] ह्रस्वानुस्वारयोर्यो[5] व्यतिषङ्गोऽनुक्रान्तः—ह्रस्वामर्धस्वरभक्त्यासमाप्ताम् (१३ । ३२) इति तद्वद्व्यतिषङ्गो वेदितव्यः[6] । ऐ औ । किमुक्तं भवति । यथा तत्र ह्रस्वानुस्वारः[7] पादमात्राधिक उपधा च तावता न्यूना[8] एवमिहापि द्रष्टव्यम् । इवर्णोवर्णयोर्भूयसी मात्रा । अल्पीयस्यवर्णस्य । तस्मात्त[9]योर्वैषम्यान्न क्षीरोदकवत्संसर्गो भवति । तस्मात्तयोरवर्णस्य चेवर्णोवर्णयोश्च पृथक् श्रवणं भवति । ऐ औ इति ॥

त्रीणि मन्द्रं मध्यममुत्तमं च
स्थानान्याहुः सप्तयमानि वाचः ॥ ४२ ॥

वाचस्त्रीणि[10] स्थानानि सप्तयमानि सप्तयमा येषु स्थानेषु तानि

---

(१) पूर्वे B², च (for पूर्वे) B³I², omitted in Bⁿ. (२) B², एकारओकारौ B³I²Bⁿ. (३) अपृथक् Paris MS. (cp. Reg.). (४) एते P (also P¹), एतौ B³B²I²Bⁿ. (५) यो BⁿI², Reg.; omitted in B³B², M. M. (६) तद्वद्व्यतिषक्ते वेदितव्ये Reg. (७) यथानुस्वारः (instead of यथा to -रः) I², Reg. (८) Bⁿ, तावतान्यून्यूना I², तावती corrected to तावता by Reg., तावन्यूना B³, तावन्न्यूना B² and M. M. (९) B² I², यस्मात् B³Bⁿ and M. M., तस्य Reg. (१०) वाचस्त्रीणिB³Bⁿ and M.M., त्रीणि B², त्रीणि corrected to मंद्रं मध्यमं उत्तमं चेति त्रीणि वाचः on the margin in I².

सप्तयमान्याहुराचार्याः। तेषु मन्द्रमुरसि वर्तते। मध्यमं कण्ठे वर्तते। उत्तमं शिरसि वर्तते। एतानि स्थानानि स्वरविशेषणान्यपि भवन्ति। यथा मन्द्रेण स्वरेणाधीयते। मन्द्रया वाचा प्रातःसवने शंसेत्[1]। उरसाधीयत[2] इति॥

अनन्तरश्चात्र यमोऽविशेषः॥ ४३॥

अत्रैषु स्थानेष्वनन्तरोऽव्यवहितो यमोऽविशिष्टो भवति। अनन्तरे यमे विशेषो न शक्यते दर्शयितुमित्यर्थः॥

के ते यमा नाम।

सप्त स्वरा ये यमास्ते॥ ४४॥

ये ते[3] सप्त स्वराः—षड्जऋषभगान्धारमध्यमपञ्चमधैवत-निषादाः[4] स्वराः—इति[5] गान्धर्ववेदे समाम्नाताः। तथा सामसु—क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याः (Cp. तै० प्रा० २३। १२) इति[6] ते यमा नाम वेदितव्याः॥

पृथग्वा॥ ४५॥

अथवा स्वरेभ्यः पृथग्भूता अन्ये यमाः स्वरेषु वर्तन्ते। एतेषां मृदुत्वं तीक्ष्णत्वं चेति वेदितव्यम्॥

---

(१) प्रातरेव उच्चसेत् (for प्रातः- to शंसेत्) B^3I^2. (२) -धीत I^2. (३) ते omitted in B^3B^n. (४) -निषाद- B^3I^2. (५) इति स्वराः (for स्वराः इति) B^2. (६) B^3B^n, तथा सामसु क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्यास्वरेषु इति B^2, तथा स्यमसुक्र-काष्टमप्रथमद्वितीयतृतीयचतुर्थमंद्रातिस्त्रयोष्वि इति I^2, यथा समशुकाष्टम-प्रथमद्वितीयचतुर्थमंद्रा इति स्वरेष्विति Reg., M.M.(a) (सप्त for सम- in *a*).

तिस्रो वृत्ती रुपदिशन्ति वाचो
विलम्बितां मध्यमां च द्रुतां च ॥ ४६ ॥

तिस्रो वृत्तीर्वाच उपदिशन्त्याचार्याः। विलम्बितां बालानाम-[1] ध्यापनादिषूपदिशन्ति[2]। मध्यमां व्यवहारादिषूपदिशन्ति[3]। द्रुतामध्ययनस्य बहुरूपाभ्यास[4] उपदिशन्ति[5] ॥

वृत्त्यन्तरे कर्मविशेषमाहुः ॥ ४७ ॥

वृत्तेरन्या वृत्तिर्वृत्त्यन्तरम्। तस्मिन्वृत्त्यन्तरे कर्मविशेषमाहुराचार्याः। विलम्बितायां प्रातःसवनं भवति। मध्यमायां मध्यंदिनं सवनम्[6]। द्रुतायां तृतीयं[7] सवनमि[8]ति। तेषु सवनेष्वेता वृत्तयो भवन्तीत्युक्तं भवति ॥

मात्राविशेषः प्रतिवृत्त्युपैति ॥ ४८ ॥

वृत्तिं वृत्तिं प्रति प्रतिवृत्ति[9] मात्राविशेषो मात्राधिक्यमुपैत्युपगच्छति। द्रुतायां वृत्तौ ये वर्णास्ते मध्यमायां[10] त्रिभागाधिका भवन्ति। तथा मध्यमायां ये वर्णास्ते विलम्बितायां त्रिभागाधिका भवन्ति। चतुर्भागाधिका भवन्तीत्येक इति ॥

अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्।
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम् ॥४९॥

---

(१) B^2B^n and Reg., वाचम् (for बालानाम्) B^3I^2 and M. M. (२) उपदिशन्ति omitted in Reg. (३) उपदिशन्ति omitted in Reg. (४) -शे I^2. (५) उपदिशन्ति omitted in Reg. (६) सवनम् omitted in B^2, Reg. (७) B^n, Reg., M. M.; तृतीय- $B^3I^2B^2$. (८) सवनम् omitted in Reg. (९) प्रतिवृत्ति omitted in B^3B^n. (१०) यदा added in Reg.

चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत्।
शिखी त्रिमात्रो विज्ञेय एष मात्रापरिग्रहः ॥५०॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रट-
पुत्रउवटकृतौ[1] प्रातिशाख्यभाष्ये शिक्षापटलं
त्रयोदशम्[2] ॥

(१) -पुत्रोव्वटकृते Bⁿ. B² omits श्रीपार्षद- to -कृतौ. (२) त्रयोदशं पटलं (for शिक्षा- to -दशम्) B².

समुद्दिष्टा वर्णगुणाः पुरस्तान्-
निर्दिष्टानां सांहितो यश्च धर्मः।
तदायापायव्यथनानि दोषास्
तान्व्याख्यास्यामोऽत्र निदर्शनाय॥ १ ॥

पुरस्तान्निर्दिष्टानां वर्णानां गुणाः समुद्दिष्टाः सम्यगुद्दिष्टाः[1]। सांहितो यश्च धर्मः समुद्दिष्टोऽनुक्रान्तेषु पटलेषु। तदायापायव्यथनानि। तेषां वर्णानामायोऽपायो व्यथनमित्येते दोषाः प्रादुर्भवन्ति। आयो नामासतो वर्णस्योपजनः। यथा ह्वयामीत्यत्र पुरस्तादनुनादः। अपायो नाम सतोऽपकर्षः। यथा ऊनयीरित्यत्र यीरित्येतस्य। व्यथनं नाम सतोऽन्यथाश्रवणम्। यथा रथ्या इत्यत्र थकारस्य सकारवच्छ्रवणम्। तान्दोषानुत्तरत्र नि[2]दर्शनार्थं विस्तरेणासावमुत्रेत्यनुक्रामन्तो व्याख्यास्यामः॥

निरस्तं स्थानकरणापकर्षे ॥ २ ॥

निरस्तं नाम दोष उत्पद्यते स्थानकरणयोरपकर्षेण। ननु स्थानकरणयोरपकर्षो नोपपद्यते। कथम्। स्थानकरणाभ्यां हि वर्णोऽपकृष्यते। नैष दोषः। यथा स्थानकरणाभ्यां वर्णोऽपकृष्टो भवति तथा वर्णादपि स्थानकरणे अपकृष्टे भवतः। तस्मात्स दोषः परिहर्तव्यः॥

विहारसंहारयोर्व्यासपीळने ॥ ३ ॥

विहारो विहरणं विस्तारः[3]। संहारः संहरणमन्यथाकरणं संकोचनं वा[4]। कस्य। स्थानकरणयोः। विहारे व्यासो नाम दोषो जायते। संहारे पीडनं च। व्यासोऽविवेकः[5]। पीडनं द्विर्भावः। तावपि परिहर्तव्यौ॥

---

(१) B^2, Reg.; सम्यगुद्दिष्टाः omitted in $B^3I^2B^n$. (२) B^2, Reg.; नि-omitted in $B^3I^2B^n$. (३) विस्तारः omitted in I^2, Reg. (४) अन्यथा- to वा omitted in I^2, Reg. (५) व्यासो विवेकः Reg.

ओष्ठाभ्यामम्बूकृतमाह नद्धं दुष्टम् ॥ ४ ॥

ओष्ठाभ्यां नद्धम्। बद्धमित्यर्थः। यदाह वक्ता तद्दुष्टमम्बूकृतमित्युच्यते। तदपि वर्ज्यम् ॥

मुखेन सुषिरेण शूनम् ॥ ५ ॥

सुषिरेण विलम्बितेन[1] (?) मुखेन यदाह वक्ता तद्दुष्टं शूनं नाम वेदितव्यम् ॥

संदष्टं तु व्रीळन आह हन्वोः ॥ ६ ॥

व्रीडने हन्वोः[2] संदष्टं नाम दोषो भवति। स वर्ज्यः। व्रीडनं नाम हन्वोर्नीचैर्भावः ॥

प्रकर्षणे तदु विक्लिष्टमाहुः ॥ ७ ॥

हन्वोः प्रकर्षणे विक्लिष्टं नाम दोषो भवति। प्रकर्षणं नाम सर्वतश्चलनम्। विक्लिष्टं नामासंयुक्तम् ॥

जिह्वामूलनिग्रहे ग्रस्तमेतत् ॥ ८ ॥

जिह्वामूलस्य निग्रहे ग्रस्तं नाम दोषो भवति। एतं[3] वर्जयेत्। निग्रहो नाम[4] स्तम्भनम् ॥

नासिकयोस्त्वनुषङ्गेऽनुनासिकम् ॥ ९ ॥

नासिकयोर्यदा वर्णोऽनुपज्यते तदानुनासिकत्वमुत्पद्यते। स दोषस्तं परिहरेत् ॥

अयथामात्रं वचनं स्वराणाम् ॥ १० ॥

यथा मात्रा[5] यथामात्रम्। अयथामात्रं वचनं स्वराणाम्। ह्रस्वदीर्घप्लुतानामयथामात्रोच्चारणं दोषो भवति। प्रायेण दीर्घेषु

---

(१) विलंवितेन B^3B^n, Berlin MS. 394, M.M.; corrected to विलवता on the margin in B^2; तिलवितेन I^2; विलायितेन Reg. (२) हन्वोः omitted in I^2. (३) तं च B^2, तं B^n. (४) ना B^2. (५) मात्रा B^2, मात्रां $B^3I^2B^n$.

ह्रस्वेषु च रक्तेषु[1] मात्राधिक्यं कुर्वन्ति । तदाचार्येण निदर्शनार्थमुत्तरत्रोदाहृतम् । रक्तं ह्रस्वं द्राघयन्त्युग्र श्लोकः (१४ । ५१) इति ॥

संदंशो व्यासः पीळनं निरासः ॥ ११ ॥

संदंशो व्यासः पीडनं निरास इत्येते च पुरस्तात्कीर्तितास्ते स्वराणां भवन्ति । संदंश इति—संदष्टं तु व्रोळन आह हन्वोः (१४ । ६) इति कीर्तितः । व्यासः पीडनमित्येतौ—विहारसंहारयोः (१४ । ३) इति कीर्तितौ । निरास इति—निरस्तं स्थानकरणापकर्षे (१४ । २) इति कीर्तितः ॥

ग्रासः कण्ठ्ययोः ॥ १२ ॥

जिह्वामूलनिग्रहे ग्रस्तम् (१४ । ८) इति यः प्रागुक्तो ग्रासो नाम दोषः स कण्ठ्ययोरकाराकारयोरुत्पद्यते । स वर्जयितव्यः ॥

अनुनासिकानां संदष्टता विषमरागता वा ॥ १३ ॥

अनुनासिकानां वर्णानां संदष्टता दोषो भवति । स व्याख्यातः[2] । विषमरागता वानुनासिकानां भवति । न हि रागं[3] प्रत्याख्यायानुनासिका वर्तन्ते[4] । तस्माद्विषमरागता दोष उच्यते । अक्रतँ एमि (ऋ० १० । ३४ । ५) । अभ्र आँ अपः (ऋ० ५ । ४८ । १) ॥

सान्तस्थानामादिलोपान्तलोपौ ॥ १४ ॥

सहान्तःस्थया वर्तन्त इति सान्तःस्थाः । तेषां सान्तःस्थानां वर्णानां कचिदादिलोपः क्रियते कचिदन्तलोपः । तौ दोषौ ज्ञेयौ । आदिलोपः । पित्रा निषद्य (ऋ० १ । १७७ । ४) । अन्तलोपः । इन्द्रवाय्वोः ॥

---

(१) रक्तेषु omitted in B². (२) संदष्टन्तु व्रीडन आह हन्वोरिति added in Bⁿ, given as a marginal note in B³. (३) नहि राग B³, न निरासं I². (४) -नासिक्यं वर्तते B², Reg.

अदेशे वा वचनं व्यञ्जनस्य ॥ १५ ॥

अथवा अदेशेऽस्थानेऽसद्व्यञ्जनमुच्यते[1] । स दोषो वर्जनीयः । यथा । अस्मान्[2] । स्तोमैरभुत्स्महि (ऋ० ४ । ५२ । ४) । उत्स्नाय (ऋ० २ । १५ । ५) । विश्वप्स्न्यस्य (ऋ० ७ । ४२ । ६) । इत्यत्र सकारात्परस्तकार उच्यते । यथा यदमं दोषण्यम्[3] (ऋ० १० । १६३ । २) । विष्णुः । इत्यत्र षकारादिकारोकारौ[4] ॥

अन्योन्येन व्यञ्जनानां विरागः ॥ १६ ॥

व्यञ्जनानामन्योन्येन सह विरागः क्रियते । स दोषः । यथा । उप मा षड् द्वाद्वा (ऋ० ८ । ६८ । १४) इत्यत्र डकारात्परस्य दकारस्य विरागः[5] क्रियतेऽज्ञातृभिः ॥

लेशेन वा वचनं पीळनं वा ॥१७॥

लेशेन वा व्यञ्जनानां वचनं क्रियते पीडनं वा । लेशेन[6] प्रयत्नशैथिल्येन । पीडनमतिप्रयत्नः । तावुभौ दोषौ सर्वेषु वर्जयेत् ॥

घोषवतामनुनादः पुरस्तादा-
दिस्थानां क्रियते धारणं वा ॥ १८ ॥

पदादिस्थानां घोषवतां पुरस्तादनुनादो ध्वनिः क्रियते । अथवा तेषां घोषवतां धारणं[7] नामानुपलब्धिः । यथा । ह्वयामि इत्यत्र पुरस्तादधिकः शब्दः क्रियते[8] । अथवा तस्य दोषस्य परिहरणार्थं हकारस्यानुपलब्धिः क्रियते । अपरे धारणं द्विर्वचनं मन्यन्ते । ज्योतिष्कृत् (ऋ० १ । ५० । ४) । द्यावा । द्वादश ॥

---

(१) Reg., असद्व्यंजनमित्युच्यते $B^3 I^2 B^n$, व्यंजनवचनं सद्व्यंजनमित्युच्यते B^2. (२) अस्मात् Reg. (३) दोषण्यम् omitted in I^2, Reg. (४) इकारउकारौ $B^3 I^2$, इकारमुकारौ B^n. (५) विकारः (for दकारस्य विरागः) I^2. (६) लेशेनाह I^2. (७) धारणा I^2. (८) अथवा to क्रियते omitted in B^2.

सोष्मोष्मणामनुनादोऽप्यनादः ॥ १९ ॥

सोष्मणामूष्मणामपि पुरस्तात्पदादिस्थानान्ना[1]दोऽशब्दोऽनुनादश्च क्रियते[2]। यथा[3]। अभिख्या। छायामिव[4] (ऋ० ६। १६। ३८)। श्चोतन्ति। स्तौति ॥

लोमश्यं च क्ष्वेळनमूष्मणां तु ॥ २० ॥

ऊष्मणां त्वघोषाणां लोमश्यं च[5] क्ष्वेडनं च दोषौ भवतः। लोमश्यं नामासौकुमार्यम्[6]। क्ष्वेडनं नामाधिको वर्णस्य सरूपो ध्वनिः ॥

वर्गेषु जिह्वाप्रथनं चतुर्षु ॥ २१ ॥

आद्येषु चतुर्षु वर्गेषु[7] जिह्वाप्रथनं क्रियते। स दोषः। जिह्वायाः[8] प्रथनं[9] नाम विस्तारः ॥

ग्रासो मुख्ये ॥ २२ ॥

एतेषां वर्गाणां मुख्य आद्ये वर्गे ग्रासो नाम दोषो भवति। ग्रासो व्याख्यातः ॥

प्रतिहारश्चतुर्थे ॥ २३ ॥

एतेषामेव चतुर्थे वर्गे प्रतिहारो नाम दोषो भवति। अतिप्रयत्नः[10] प्रतिहारः ॥

सरेफयोर्मध्यमयोर्निरासः ॥ २४ ॥

---

(१) -स्थानात् ना- $B^3B^2I^2B^n$, -स्थानां ना- Reg. and M.M. (२) After क्रियते।, स वर्ज्यः supplied on the margin in I^2. (३) यथा omitted in B^2. (४) छायां I^2. (५) च omitted in B^3I^2. (६) सौकुमार्य्यं Reg. (७) वर्गेषु omitted in I^2. (८) Reg., ज़िह्वा- $B^3I^2B^2B^n$. (९) प्रथमं I^2. (१०) अतिप्रतियत्ना I^2.

सह रेफेण वर्तेते इति सरेफौ । एतेषामेव चतुर्णां वर्गाणां यौ मध्यमौ वर्गौ तयोश्च रेफस्य च निरासो नाम दोषो भवति । स व्याख्यातः ॥

विक्लेश स्थाने सकले चतुर्थे ॥ २५ ॥

चतुर्थे वर्गे स्थाने सकले[1] । सह कलाभिः सकलम् । कला अवयवाः । के ते । करणादयः । तेषु करणा[2]दिषु स्थाने च[3] विक्लेशो नाम दोषो भवति । विक्लेशो[4]ऽवैशद्यमि[5]त्येकोऽर्थः[6] ॥

अतिस्पर्शो बर्बरता च रेफे ॥ २६ ॥

दुःस्पृष्टः स रेफोऽतिस्पृश्यते । बर्बरता चोच्यते । तौ दोषौ रेफस्य वर्जयेत् । बर्बरताप्यसौकुमार्यमेव ॥

जिह्वान्ताभ्यां च वचनं लकारे ॥२७॥

जिह्वाग्रेण वक्तव्यः स लकारो यदा जिह्वाया अन्ताग्राभ्यामुच्यते तदा स दोषो भवति । पूर्वोक्तौ चातिस्पर्शबर्बरौ । एते[7] त्रयो दोषा लकारस्य भवन्ति । तान्वर्जयेन्मेधावी ॥

श्वासोऽघोषनिभता वा हकारे ॥ २८ ॥

श्वासो वाधिकोऽघोषसदृशत्वं वा हकारस्य दोषौ[8] लक्षयेत् ॥

निरासोऽन्येषूष्मसु पीळनं वा ॥ २९ ॥

येऽन्ये हकारादूष्माणस्तेषु श[9]कारादिषु निरासः पीडनं चेति[10] द्वौ दोषौ भवतः । तौ व्याख्यातौ ॥

---

(१) सहकले added in I². (२) चरणा-B³. च करणा-I² (३) स्थानेन B³B². (४) विक्लेशे B². (५) -पम्यम् (for -शद्यम्) I², cp. also Reg. footnote. (६) इत्येकोऽर्थः corrected to इत्यर्थः in I². विक्लेशोऽवै- to -र्थः omitted in M. M. (a). (७) B² and Reg., एते omitted in B³I²Bⁿ. (८) दोषौ corrected to दो in I². (९) स- I². (१०) B³Bⁿ, वाते I², चेति B².

स्वरात्परं पूर्वसस्थानमाहु-
दीर्घान्निरस्तं तु विसर्जनीयम् ॥ ३० ॥

दीर्घात्स्वरात्परं विसर्जनीयं पूर्वस्य सस्थानं निरस्तमाहुः ।[1] उक्तः स दोषः[2] । रथीः[3] । वधूः । अग्नेः । वायोः । किमुच्यते दीर्घादिति । ननु ह्रस्वादपि विसर्जनीयः पूर्वसस्थान एव श्रूयते । अग्निः । वायुः । इति । यद्यपि श्रवणं तुल्यं ततो[4]ऽप्यत्राचार्येण दीर्घग्रहणं कृतम् । तस्माद्दीर्घादेव पूर्वसस्थानत्वं[5] भवति[6] न ह्रस्वादपि भवतीति मन्तव्यम् ।

अपरे पुनरन्यथा वर्णयन्ति । अन्यस्थाने[7] दीर्घात्स्वरात्परो विसर्जनीयो देवैरपि न शक्य उच्चारयितुमिति विधिं वर्णयन्ति । दीर्घात्स्वरात्परं पूर्वसस्थानमाहुरा[8]चार्या इच्छन्तीत्यर्थः । तस्मिन्नपि पक्षे दीर्घग्रहणमनर्थकम् । ह्रस्वादपि ते[9] तथैवेच्छन्ति । एवं तर्हि परस्य योगस्यार्थे दीर्घग्रहणं वृत्तवशेनेह पठितं द्रष्टव्यम् । स्वरात्परं पूर्वसस्थानमाहुर्निरस्तं विसर्जनीयमित्य[10]स्मिन्योगे सत्युभयोरपि पक्षयोः अग्निः वायुः रथीः वधूः[11] इति सर्वं सिद्धं भवति ।

किं पुनरत्र युक्तम् । उभयम् । कथम् । शाखान्तरे विधिर्दृश्यते । कण्ठ[12]स्थानौ हकारविसर्जनीयौ (तै० प्रा० २ । ४६) । उदय-

---

(१) स्थाः added in B². (२) उक्तः स दोषः omitted in I². (३) स्थाः (for रथीः) Reg. (४) ततो corrected to तथा in I², तथा Reg. (५) B³I²Bⁿ, पूर्वसस्थानं B², and Reg. (६) भवतीति B³Bⁿ. (७) B³B²Bⁿ; -स्थान- I² and Reg., also Berlin MS. 394 (cp. Reg.). (८) आहुर् omitted in B². (९) ते omitted in B³Bⁿ. (१०) B² and Reg., इति omitted in B³I²Bⁿ. (११) वधीर् B³. (१२) कण्ठ- P¹; कण्ठ्य- B³B²I²Bⁿ, Reg., Berlin MS. 394, P.

स्वरादिसस्थानो हकार एकेषाम् (तै० प्रा० २ । ४७) । पूर्वान्त*-सस्थानो विसर्जनीयः[1] (तै० प्रा० २ । ४८) इति । तेषां विसर्जनीयः पूर्वसस्थानो भवतीति । तस्मात्त[2]दपि युक्तम् । इह दोषसमुच्चयप्रकरणे वचनाद्दोषः सं इति निश्चयः । कथमेतदध्यवसीयते । आचार्यप्रवृत्तिर्[3] दृश्यते । यथानुनासिकपरादूष्मणः परः[4] सस्थानयमागमो भवत्ये-केषाम् । यथा अस्मे विष्णुः इति । त[5]दिहास्माकं प्रतिषिद्धम् । परं यमं रक्तपरादघोषात् (१४ । ३४) । इति । तस्मादेतदध्य[6]वसीयते ॥

कण्ठ्याद्यथा रेफवतस्तथाहुः ॥ ३१ ॥

दीर्घात्कण्ठ्यात्परं विसर्जनीयं यथा रेफवत ऋकारात्परं जिह्वा-मूलीयं तथा निरस्तमाहुः । स दोषः । देवाः[7] । सोमाः[8] । दीर्घा-दिति कस्मात् । देवः । सोमः । ह्रस्वात्कण्ठ्यात्परो विसर्जनीयो ह्रस्व-सस्थान[9] एव भवति ॥

रक्तात्तु नासिक्यमपीतरस्मात् ॥ ३२ ॥

---

(१) उभयस्वरादिस (सं- B^n, संस- I^2)स्थानो विसर्जनीयः (for उदय- to -नीयः) $B^3B^2I^2B^n$ (-भ- corrected to -द- on margin in B^3B^2); उभयस्वर आदिसंस्थानो विसर्जनीयः Reg.; उभये स्वरादिसं-स्थानो हकारस्यैकेषां संस्थानो विसर्जनीयः Berlin MS. 394 (cp. Reg.); उभयस्वरसस्थानविसर्जनीयः P; उभयस्वरापिसस्थानो विसर्जनीयम् P^1. (२) -त्त- omitted in B^3; I^2 supplies it on the margin. (३)-विप्रतिपत्तिर् Reg. (४) पर- B^3I^2. (५) B^n, य- corrected to त- in I^2, य- B^3B^2. (६) B^n, तस्मादध्य- corrected to तस्मादेतदध्य- in I^2, तस्मादध्य- B^3B^2. (७) Reg., देवाः omitted in I^2, देवाः । मातृः supplied on the margin in B^3, देवाः । मातृः B^2B^n. (८) B^2 and Reg., सोमाः omitted in $B^3I^2B^n$. (९) B^3B^n, विसर्जनीयः सस्थान B^2I^2 and Reg.

रक्तात्कण्ठ्याद्दीर्घात्परं विसर्जनीयम् । इतरस्मादपि परम् । कतरस्मात् । ऋकारात् । नासिक्यमाहुः । स दोषः । स्वतवाँः पायुः (ऋ० ४ । २ । ६) । नॄँः पतिभ्यः (प्रै० पृ० १४२) ॥

संयोगादेरूष्मणः पूर्वमाहु-
र्विसर्जनीयमधिकं स्वरोपधात् ॥ ३३ ॥

स्वरोपधात्संयोगादेरूष्मणः पूर्वमधिकं विसर्जनीयमाहुः । स दोषो वर्ज्यः । पावक ते स्तोका श्चोतन्ति (ऋ० ३ । २१ । २)। अभि ष्याम (ऋ० १० । १३२ । २) । संयोगादेरिति किम् । द्विपदे शं चतुष्पदे (ऋ० ७ । ५४ । १) । मो षु णः (ऋ० १ । ३८ । ६)। परि सोमः (ऋ० ९ । ५६ । १) ऊष्मण इति किम् । तव त्यत् (ऋ० ८ । १५ । ७) । स्वरोपधादिति किम् । अप्स्वग्ने (ऋ० ८ । ४३ । ९) ॥

परं यमं रक्तपराद्घोषात् ॥ ३४ ॥

ऊष्मणोऽघोषाद्रक्तपरात्[1] परं यममाहुः । स दोषः । पृश्निः । विष्णुः । स्नात्वाः[2] (ऋ० १० । ७१ । ७) ॥

ऊष्माणं वा घोषिणस्तत्प्रयत्नम् ॥ ३५ ॥

घोषिण ऊष्मणा रक्तपरात्परं तेन घोषिणा[3] तुल्यप्रयत्नमूष्माणं वाहुर्यमम्[4] । स दोषः । तं वर्जयेद् बुधः । ब्रह्म । अह्ना ॥

शुनश्शेपो निष्षपी शास्स निष्षा-
ळविक्रमा ब्रह्म विष्णुः स्म पृश्निः ॥३६॥

---

(१) I[2] omits अघोषाद्रक्तपरात्. (२) B[3]I[2]; स्नात्वा B[2]B[n], Reg. (३) तेन घोषिणा B[2], Reg.; घोषिणं B[3]I[2]B[n], M.M. (४) यमं वाऽऽहुः B[n] (for वाहुर्यमम्).

शुनश्शेपः। निष्षपी। शास्सि। निष्षाट्। ब्रह्म। विष्णुः। स्म। पृश्निः। इत्ये[1]तेऽविक्रमा भवन्ति। एतेषु विक्रमो विसर्जनीयः स दोषो वर्ज्यः। शुनश्शेपः। शुनश्शेपो यमह्वद्[2] गृभीतः (ऋ० १। २४। १२)। निष्षपी। मा नो मघेव निष्षपी परा दाः[3] (ऋ० १। १०४। ५)। शास्सि। प्र पाकं शास्सि प्र दिशो विदुष्टरः (ऋ० १। ३१। १४)। निष्षाट्। प्र वां शरद्वान्वृषभो न निष्षाट् (ऋ० १। १८१। ६)। अभीदमेकमेको अस्मि निष्षाट् (ऋ० १०। ४८। ७)।

ब्रह्म। ब्रह्म च ते जातवेदो नमश्च[4] (ऋ० १०। ४। ७)। विष्णुः। इदं विष्णुर्विचक्रमे (ऋ० १। २२। १७)। स्म। कूटं स्म तृंहद-भिमातिमेति (ऋ० १०। १०२। ४)। पृश्निः। आयं गौः पृश्निर-क्रमीत् (ऋ० १०। १८९। १)॥

स्पर्शोष्मसंधीन्स्पर्शरेफसंधी-
नभिप्रायाँश्च परिपाद*यन्ति॥ ३७॥

चरति चक्रे (४। ७४) इत्येवमादीन्स्पर्शोष्मसंधीन्[5] —ईका-रोकारोपहितः (४। ६९) इति च स्पर्शरेफसंधीन्[6] —विवृत्त्यभि-प्रायेषु च (४। ६८) इत्यभिप्रायाँश्च परिपाद*[7]यन्ति[8]। एतेष्व-नुस्वारं कुर्वन्तीत्यर्थः। स दोषः[9]। ताँस्ते अश्याम (ऋ० ९। ९१। ५)।

---

(1) The Comm. शुनश्शेपः to इति in Bⁿ and to पृश्निः in B² omitted. (2) ह्वहद् (for यमह्वद्) Reg. (3) परा दाः omitted in B². (4) -वेदः B². (5) -संधींश्च I². (6) Bⁿ, -संधींश्च B³I². (7) -त- B³I²Bⁿ. See note on the cor-rection of -त- to -द-. (8) चरति to -यन्ति omitted in B². (9) स दोषः omitted in I².

रश्मीँरिव (ऋ० ८। ३५। २१)। पीवोअन्नाँ रयिवृधः[1] (ऋ० ७। ९१। ३)॥

स्वरौ कुर्वन्त्योष्ठ्यनिभौ सरेफौ
तिस्रो मातॄस्त्रीन्पितॄन्यन्नॄभिर्नॄन् ॥ ३८ ॥

सरेफौ ऋ ॠ इत्येतावोष्ठ्यनिभावुवर्णसदृशौ कुर्वन्ति। स दोषः। तिस्रो मातॄस्त्रीन्पितॄन् (ऋ० १। १६४। १०)। कर्हि स्वित्तदिन्द्र यन्नॄभिर्नॄन् (ऋ० ६। ३५। २)॥

दन्त्यान्सकारोपनिभानघोषान्
रथ्यः पृथ्वी पृथिवी त्वा पृथीति ॥ ३९ ॥

दन्त्यानघोषान्सकारोपनिभान्सकारसदृशान्कुर्वन्ति। स दोषः। रथ्यः पृथ्वी पृथिवी त्वा पृथी इत्येवमादिषु। रथ्यः। असर्जि वक्वा रथ्ये यथाजौ[2] (ऋ० ९। ९१। १)। पृथ्वी। उर्वी पृथ्वी बहुले दूरेअन्ते[3] (ऋ० १। १८५। ७)॥

इदं विचार्यते। पृथिवी त्वेति त्वाग्रहणं विशेषणार्थं पृथग्ग्रहणं वेति। कुतः संदेहः। प्रायेण थकारे सकारोपनिभो[4] दोषः संलक्ष्यते न तकार इति विशेषणार्थमेके मन्यन्ते। अपरे यदि थकारस्यैव स[5] दोषः स्यात्कथं थकारं सकारोपनिभमिति लघीयसा सिद्धे[6] दन्त्यग्रहणमघोषग्रहणं च करोति[7]। तेन पृथग्ग्रहणं मन्यन्ते।

---

(१) सुमेधाः added in B³. (२) B³I²B²; असर्जि रथ्यो यथा (instead of असर्जि to -जौ) Bⁿ, given as a marginal note in B³. (३) दूरेअन्ते omitted in B². (४) -निभता Reg. (५) स omitted in B², Reg. (६) B² and Reg., यद् added in B³I²Bⁿ. (७) कुर्यात् Reg.

पृथिवी[1] । अदितिः सिन्धुः पृथिवी उत द्यौः[2] (ऋ० १ । ९४ । १६)। त्वा। यत्त्वा सूर्य स्वर्भानुः (ऋ० ५ । ४० । ५)। पृथी। पृथी यद्वां वैन्यः सादनेषु (ऋ० ८ । ९ । १०)॥

ऊष्मान्तस्थाप्रत्ययं रेफपूर्वं
ह्रस्वं लुम्पन्त्याहुरथाप्यसन्तम् ।
पुरुषन्तिं पुरुवारार्यमाष्ट्र्यां
हरियोजनाय हरियूपीयायाम् ॥ ४० ॥

ऊष्मप्रत्ययमन्तःस्थाप्रत्ययं च रेफपूर्वं ह्रस्वं लुम्पन्ति नाशयन्ति। अथवासन्तमविद्यमानं ह्रस्वं रेफात्परमाहुरुत्पादयन्ति। तौ दोषौ वर्जयेत्। पुरुषन्तिम। पुरुवार। अर्यमा। आष्ट्राम्। हरियोजनाय। हरियूपीयायाम्[3] । एतेषु[4] । पुरुषन्तिम्। याभिर्ध्वसन्तिं पुरुषन्तिमावतम् (ऋ० १ । ११२ । २३)। पुरुवार। महो रायः पुरुवार प्र यन्धि (ऋ० ४ । २ । २०)। पुरुवीराभिर्वृषभ क्षितीनाम्[5] (ऋ० ६ । ३२ । ४)। अर्यमा। अर्यमा यातयज्जनः (ऋ० १ । १३६ । ३)। आष्ट्राम्। आष्ट्रां पदं कृणुते अग्निधाने[6] (ऋ० १० । १६५ । ३)। हरियोजनाय। अतक्षद् ब्रह्म हरियोजनाय (ऋ० १ । ६२ । १३)। हरियूपीयायाम्। वृचीवतो यद्धरियूपीयायाम् (ऋ० ६ । २७ । ५)। अर्यमा आष्ट्राम इत्येतयोरसन्तमाहुरन्येषु लुम्पन्ति ॥

ऐयेरित्यैकारमकारमाहुर्
वैयश्वेति क्रमयन्तो यकारम् ॥ ४१ ॥

---

(१) पृथिवी omitted in B²Bⁿ. (२) द्यौः omitted in B². (३) B³I², the Comm. from पुरुषन्तिम् to -याम् omitted in B²Bⁿ. (४) एतेषु omitted in I². (५) क्षितीनाम् omitted in B². (६) अग्निधाने omitted in B².

ऐयेरित्यत्र वैयश्वेति[1] च ऐकारस्य स्थाने[2]ऽकारमाहुः परं[3] यकारं क्रमयन्तः। तौ दोषौ। हूणीयमानो अप हि मदैयेः (ऋ० ५। २। ८)। वैयश्व[4]। वैयश्वस्य श्रुतं नरा (ऋ० ८। २६। ११)॥

तदेवान्येषु विपरीतमाहुस्
ते रय्या वय्यं च हृदय्ययेति च॥ ४२॥

तद्दोषद्वयमन्येषु पदेषु विपरीतमाहुः। कथम्। अकार[5]स्थान ऐकारमाहुः परं यकारमक्रामयन्तः। तौ दोषौ। ते रय्या। वय्यम्। हृदय्यया। इत्येवमादिषु। ते रय्या[6]। ते रय्या सं सृजन्तु नः (ऋ० १०। १९। ७)। वय्यम्[6]। परिप्रयन्तं वय्यं सुषंसदम् (ऋ० ९। ६८। ८)। हृदय्यया[6]। श्रद्धां हृदय्ययाकूत्या (ऋ० १०। १५१। ४)॥

अकारस्य स्थान ऐकारमाहु-
र्लुम्पन्ति च सयमीकारमुत्तरम्।
बह्वक्षरं द्व्यक्षरतां नयन्ति
यथोनयीर्ध्वनयीत्कोशयीरिति॥ ४३॥

येन सह वर्तेत इति सयः। तं सयमीकारम्। अकारस्य स्थान ऐकारमाहुः सयमीकारं लुम्पन्ति च। बह्वक्षरं सन्तं द्व्यक्षरतां नयन्ति[7] गमयन्ति[8]। एते त्रयश्चत्वारो वा दोषा भवन्ति। ऊनयीः। ध्वनयीत्। कोशयीः। इत्येवमादिषु। ऊनयीः[9]। जरितुः काममूनयीः (ऋ० १। ५३। ३)। ध्वनयीत्[9]। मा त्वाग्निर्ध्वनयीद्धूमगन्धिः

(१) B^2, -श्व B^3, -श्वे I^2B^n. (२) स्थानयोः I^2. (३) परं परं B^3. (४) B^3I^2, वैयश्व omitted in B^2B^n. (५) अकारस्य Reg. (६) Words before quotations are given in B^3 I^2, omitted in B^2B^n. (७) येन सह to नयन्ति omitted in I^2. (८) B^2I^2, गमयन्ति omitted in B^3B^n. (९) B^3I^2, omitted in B^2B^n.

(ऋ० १ । १६२ । १५) । कोशयोः[1] । दश कोशयोर्दश वाजिनोऽदात् (ऋ० ६ । ४७ । २२) ॥

तदेव चान्यत्र विपर्ययेण
कार्य्यं ऐत्वे सयमीकारमाहुः ।
धातोर्बिभेतेर्जयतेर्नियश्चा-
भैष्म चाजैष्म नैष्टेति चैषु ॥ ४४ ॥

तदेव सर्वत्र चान्यत्रान्येषु पदेषु कर्तव्य ऐत्वे विपर्ययेण अकारं कृत्वा सयमीकारमक्षरमसन्तमाहुः । ते तथैव दोषा भवन्ति । भी जि[2] नी इत्येतेषां धातूनां[3] प्रयोगे । अभैष्म अजैष्मं नैष्ट इति[4] यथा । अभैष्म[5] । अभैष्माप तदुच्छतु[6] (ऋ० ८ । ४७ । १८) । अजैष्म । अजैष्माद्यासनाम च (ऋ० ८ । ४७ । १८) । नैष्ट । दूरं नैष्ट परावतः (ऋ० ८ । ३० । ३) ॥

इकारस्य स्थान ऋकारमाहु-
र्ल्कारं वा चन्द्रनिर्णिक्सुशिल्पे ॥ ४५ ॥

इकारस्य स्थाने क्वचिदृकारमाहुश्चन्द्रनिर्णिगित्येवमादिषु । क्वचिद् ऌ[7]कारमाहुः सुशिल्पे इत्येवमादिषु । तौ दोषौ लक्षयेत् । चन्द्रनिर्णिक्[8] । पतरेव चचरा चन्द्रनिर्णिक्[9] (ऋ० १० । १०६ । ८) । अतः सहस्रनिर्णिजा (ऋ० ८ । ८ । ११) । सुशिल्पे[8] । सुशिल्पे बृहती मही (ऋ० ९ । ५ । ६) ॥

---

(१) कोशयोः omitted in B²Bⁿ. (२) भि जि Bⁿ, जी B³. (३) B²I², धातूनां omitted in B³Bⁿ. (४) अभैष्म अजैष्म to इति omitted in B². (५) B³ B², अभैष्म omitted in I²Bⁿ. (६) -च्छंतु I². (७) ऋ- B³. (८) B³I², omitted in B²Bⁿ. (९) B². This quotation omitted in I², given on the margin in B³ as a correction for the next quotation : अतः to -जा. Bⁿ reads it after the next quotation.

अनन्तरे तद्विपरीतमाहुस्
तालव्ये शृङ्गे बिभृयाद्विचृत्ताः ॥ ४६ ॥

अनन्तरे तालव्ये सति। ऋकारात्पूर्वो वा परो वा यदि तालव्यो वर्णो भवति। तदा तद्विधानं विप[1]रीतमाहुः। यदुक्तमिकारस्य स्थान ऋकारमाहुस्तदिह ऋकारस्य स्थान इकारमाहुः। स दोषो ज्ञेयः। यथा[2]। शृङ्गे। शिशीते शृङ्गे रक्षसे विनिक्षे (ऋ० ५।२।९)। बिभृयात्। यमीर्यमस्य बिभृयादजामि[3] (ऋ० १०।१०।९)। विचृत्ताः। पाशा आदित्या रिपवे विचृत्ताः (ऋ० २।२७।१६)॥

तालुस्थानो व्यञ्जनादुत्तरश्चे-
दयकारस्तत्र यकारमाहुः।
शुनःशेपः शास्सि ववर्जुषीणा-
मत्के विरप्शीति निदर्शनानि ॥ ४७ ॥

यकारादन्यस्तालुस्थानो वर्णो व्यञ्जनादुत्तरो यदि[4] भवति तत्राविद्यमानं यकारमाहुः[5]। यथा[6]। शुनःशेपः[7]। शुनःशेपो यमह्वद् गृभीतः[8] (ऋ० १।२४।१२)। शास्सि[7]। प्र पाकं शास्सि प्र दिशो विदुष्टरः[9] (ऋ० १।३१।१४)। ववर्जुषीणाम्[7]। विशां ववर्जुषीणाम् (ऋ० १।१३४।६)। अत्के[10]।

---

(१) तद्विप-B³. (२) यथा omitted in B². (३) बिभृयात् B². (४) B² and Reg., यदि omitted in B³I²Bⁿ. (५) I² adds शुनःशेपः शास्सि ववर्जुषीणां अत्यत विरप्शी इति. (६) यथा omitted in B². (७) B³I², omitted in B²Bⁿ. (८) अह्वद् गृभीतः omitted in B². (९) प्र दिशो विदुष्टरः omitted in Reg., दिशो०। B². (१०) अत्यत् (for अत्के) I².

आ जामिरत्के अव्यत[1] (ऋ० ९ । १०१ । १४)। विरप्शी[2] । विरप्शी गोमती मही (ऋ० १ । ८ । ८)॥

लुम्पन्ति वा सन्तमेवं व्वकारं
ज्यैष्ठ्याय सम्वारन्नापृच्छ्यमृभ्वा ॥ ४८ ॥

अथवा कश्चिदेवं[3] सन्तं व्यञ्जनादुत्तरं सन्तं यकारं वकारं वा लुम्पन्ति । ज्यैष्ठ्याय । सम्वारन् । अयं वृत्त[4]वशेन पादैकदेशो[5] द्रष्टव्यः । आपृच्छ्यम् । ऋभ्वा । इत्येतेषु । ज्यैष्ठ्याय[6] । इन्द्र ज्यैष्ठ्याय सुक्रतो (ऋ० १ । ५ । ६)। सम्वारन्[6] । सम्वारन्नकिरस्य मघानि[7] (ऋ० १० । १३२ । ३)। आपृच्छ्यम्[6] । आपृच्छ्यं धरुणं वाज्यर्षति (ऋ० ९ । १०७ । ५)। ऋभ्वा[6] । पुरुहूतो यः पुरुगूर्त ऋभ्वा (ऋ० ६ । ३४ । २)॥

व्यस्यन्त्यन्तर्संहतोऽव्यायतं तं
दीर्घायुः सूर्यो रुशदीर्ते ऊर्जम् ॥ ४९ ॥

महतः संयोगस्यान्तर्भूतं महतो दीर्घात्परं वा[8] । अव्यायतमपृथग्भूतं रेफेण संसक्तम्[9] इत्यर्थः । तमन्तर्व्यस्यन्ति रेफात्[10] पृथक् कुर्वन्ति । केनचित्स्वरेण व्यवदधतीत्यर्थः । दीर्घायुः । सूर्यः । रुशदीर्ते ।

---

(१) B³B²Bⁿ, अख्यद्देवो रोचमाना महोभिः (instead of आ जा- to -त) Reg., अख्यदेवो रेमाना माहोभिः I², आ हर्यतो अर्जुने अत्के अव्यत M. M. (२) विरप्शी omitted in B²Bⁿ. (३) एव I²Bⁿ. (४) वृत्ति- B³. (५) -देशे B². (६) B³I², words before quotations omitted in B²Bⁿ. (७) मघानि omitted in B³. (८) B², Reg., M. M.; परं corrected to परमिति वा in I²; वा omitted in B³Bⁿ. (९) B³I² and M. M., रेफेन सक्तम् Bⁿ, परेण संसक्तम् B² and Reg. (१०) B³I²Bⁿ and M.M., रेफं B² and Reg.

ऊर्जम्। इत्येवमादिषु। दीर्घायुः[1]। दीर्घायुरस्या यः पतिः[2] (ऋ० १०। ८५। ३९)। सूर्यः[1]। सूर्यो नो दिवस्पातु[3] (ऋ० १०। १५८। १)। रुशदीर्तें[1]। पवमानो रुशदीर्तें पयो गोः (ऋ० ९। ९१। ३)। ऊर्जम्[1]। इषमूर्ज च पिन्वसे[4] (ऋ० ९। ६३। २)॥

लुम्पन्त्यन्तस्थां क्रमयन्ति वैतां
स्वरात्सस्थानादवरां परां वा।
स्वस्तयेऽधायि भुवनेयमृवुः ॥ ५० ॥

लुम्पन्त्यन्तःस्थामथवा क्रमयन्त्येतां[5] सस्थानात्[6] स्वरादवरां पूर्वां परां वा। लोपो द्विर्भावश्चेति तौ दोषौ परिहरेत्। स्वस्तये। अधायि। भुवना। इयम्। ऋवुः। इत्येवमादिषु। स्वस्तये[1]। स्वस्तये वायुमुप ब्रवामहै[7] (ऋ० ५। ५१। १२)। अधायि[1]। उप प्रागात्सुमन्मेऽधायि मन्म (ऋ० १। १६२। ७)। भुवना[8]। तं संप्रश्नं भुवना यन्त्यन्या[9] (ऋ० १०। ८२। ३)। इयम्[1]। इयं शुष्मेभिर्बिसखाइवारुजत्[10] (ऋ० ६। ६१। २)। ऋवुः[11]। इन्द्रायार्कमहिहत्य ऋवुः (ऋ० १। ६१। ८)॥

रक्तं ह्रस्वं द्राघयन्त्युग्रं श्लोकः ॥ ५१ ॥

---

(१) B³I², words before quotations omitted in B²Bⁿ. (२) पतिः omitted in B². (३) दिवः B². (४) पिन्वसि B². (५) अंतस्थां added in B². (६) संयुक्तात् (instead of सस्थानात्) I². (७) उप ब्रवामहै omitted in B². (८) भुवना omitted in B². (९) यंति B². (१०) शुष्मेभिः B². (११) ऋवुः omitted in B².

रक्तं ह्रस्वं दीर्घं कुर्वन्ति । स दोषः । उग्रँ ओक इति यथा[1]। विश्वेदहानि तविषीव उग्रँ ओकः (ऋ० ७ । २५ । ४)। यथा प्रसूता सवितुः सवायँ एव (ऋ० १ । ११३ । १) ॥

हकारसोष्मोपहितात्यकारा-
द्वकाराद्वा सर्वसोष्मोष्मपूर्वात् ।
तत्सस्थानं पूर्वमूष्मोणमाहु-
स्तुच्छ्यान्दध्या आपृच्छ्यमृभ्वा ह्वयेऽह्यः ॥५२॥

हकारेण सोष्मभिश्चोपहितात्यकाराद्वकाराद्वा सर्वैरूष्मभिः सोष्मभिश्चोपहितात्पूर्वं तेषां समानस्थानमूष्माणमाहुः । स दोषः । तुच्छ्यान् । दध्याः[2] । आपृच्छ्यम् । ऋभ्वा । ह्वये । अह्यः । इत्येवमादिषु । तुच्छ्यान्[3] । तुच्छ्यान्कामान्करते सिष्विदानः[4] (ऋ० ५ । ४२ । १०)। दध्याः[3] । पश्वा स दध्या[5] यो अघस्य धाता (ऋ० १ । १२३ । ५) । आपृच्छ्यम्[3] । आपृच्छ्यं धरुणं वाज्यर्षति (ऋ० ९ । १०७ । ५) । ऋभ्वा[3] । पुरुहूतो यः पुरुगूर्त ऋभ्वा (ऋ० ६ । ३४ । २)। ह्वये[3] । तत्र देवाँ उप ह्वये (ऋ० १ । १३ । १२) । अह्यः[3] । शतचक्रं योऽह्यो वर्तनिः (ऋ० १० । १४४ । ४)। अश्वः[6] । वसिष्व । ह्रस्वः[7] ॥

पकारवर्गोपहिताच्च रक्ताद-
न्यं यमं तृप्णुताम्नानमौभ्नात् ॥ ५३ ॥

---

(१) इति यथा omitted in B^2. I^2 adds उग्रं ओकः after यथा. (२) दृध्याः B^2. (३) B^3I^2, words before quotations omitted in B^2B^n. (४) सिष्विदानः omitted in B^2. (५) दध्या B^2. (६) अश्वः B^3B^2, अश्व्यो B^n, omitted in I^2. (७) वसिष्व । ह्रस्वः omitted in I^2.

पकारवर्गेणोप[1]हितादक्तादनुनासिकात्पूर्वमन्यं यमम[2]धिकमाहुः। तृप्णुत। आप्नानम्। औभ्नात्। इत्येवमादिषु। स दोषो वर्जयितव्यः। तृप्णुत[3]। समु तृप्णुत ऋभवः (ऋ० १।११०।१)। आप्नानम्[3]। आप्नानं तीर्थं क इह प्र वोचत् (ऋ० १०।११४।७)। औभ्नात्[3]। दृळ्हा न्यौभ्नादुशमान ओजः[4] (ऋ० ४।१९।४)॥

अनुस्वारमुपधां वान्यवर्णां
स्वरोपधात्सोष्मयमोदयश्चेत्।
तङ् घ्नन्त्यञ्ज्मो जङ्घ्नत ईङ्खयन्तीः
सञ्ज्ञातरूपोऽथ सञ्ज्ञानमिन्द्रः॥ ५४॥

तत्स[5]स्थानं पूर्वम् (१४।५२) इत्यतः पूर्वमित्यनुवर्तते। पकारवर्गोपहिताच्च रक्तात् (१४।५३) इत्यतो रक्तादिति वर्तते। स्वरोपधाद्रक्तात्पूर्वमनुस्वारमाहुः। उपधां वान्यवर्णाम्। तौ दोषौ परिहरेत्। स रक्तः सोष्मोदयो वा यमोदयो वा यदि भवति। तङ् घ्नन्ति। अञ्ज्मः। जङ्घ्नतः। ईङ्खयन्तीः। सञ्ज्ञातरूपः। सञ्ज्ञानमिन्द्रः। इत्येवमादिषु। तङ् घ्नन्ति। नकिष्टङ् घ्नन्त्यन्तितो न दूरात्[6] (ऋ० २।२७।१३)। अञ्ज्मः[7]। गोभिरञ्ज्मो मदाय कम् (ऋ० ९।४५।३)। जङ्घ्नतः[7]। पवमानस्य जङ्घ्नतः (ऋ० ९।६६।२५)। ईङ्खयन्तीः[7]। ईङ्खयन्तीरपस्युवः[8] (ऋ० १०।१५३।१)। सञ्ज्ञातरूपः[7]।

---

(१) -वर्गोप- B^3. (२) यमं अन्यम् (instead of अन्यं यमम्) B^2. (३) $B^3 I^2$, words before quotations omitted in $B^2 B^n$. (४) -मानः B^2. (५) -सं- I^2. (६) दूरात् omitted in B^2. (७) $B^3 I^2$, words before quotations omitted in $B^2 B^n$. (८) -यन्तीः (for -यन्तीरपस्युवः) B^2.

सञ्ज्ञातरूपश्चिकेतदस्मै (ऋ० १ । ६९ । ५)। सञ्ज्ञानमिन्द्रः[१] । सञ्ज्ञानमिन्द्रश्चाग्निश्च[२] (ऋ० खि० १० । १९१ । १)। एषा योजना ये[३] रक्तात्पूर्वमनुस्वारं कुर्वन्ति तेषाम् ।

ये न कुर्वन्ति ते[४] पूर्वग्रहणं निवर्त्त्य स्वरोपधाद्रक्तात्परमनुस्वारमा[५]हुरुपधां वान्यवर्णां कुर्वन्तीति योजना कर्तव्या ।

केचिद्रक्तमेवानुस्वारमाहुः। तैरेवमयं योगः परिवर्तितव्यः[६] । अनुस्वारमुपधां वान्यवर्णां स्वरोपधं[७] सोष्मयमोदयश्चेदिति । अस्मिन्पक्षे स्वरोपधं रक्तमनुस्वारं कुर्वन्तीति योजना कर्तव्या । तान्येवोदाहरणानि ॥

सान्तस्थादौ धारयन्तः परक्रमं
शर्मन्स्यामास्मिन्नु जनाञ्छुधीयतः ॥ ५५ ॥

सान्तःस्थस्य संयोगस्यादौ[८] रक्तं धारयन्तो विलम्बमानाः परक्रमं[९] कुर्वन्ति । शर्मन्स्याम । अस्मिन्नु । जनाञ्छुधीयतः । इति यथा । शर्मन्स्याम[१०] । शर्मन्स्याम मरुतामुपस्थे[११]

---

(१) B^3 corrects संज्ञानं to संज्ञानमिंद्रः on the margin, संज्ञानं I^2, omitted in B^2B^n. (२) B^n, संज्ञानं यत्परायणं (instead of सञ्ज्ञानमिन्द्रश्चाग्निश्च) $B^2I^2B^3$, but B^3 also supplies on the margin संज्ञानमिन्द्रश्चाग्निश्च by way of correction. (३) तु added on the margin in I^2. (४) ते in all; Reg. suggests तेषां instead of ते. (५) अनुस्वारम् omitted in I^2. (६) -वर्त्तितव्यः corrected to -वर्त्तयितव्यः in I^2. (७) I^2 and Reg., -पधात् $B^3B^2B^n$. (८) संयोगादौ Paris MS. (९) $B^3B^2B^n$; परिक्रमं I^2, M.M. (a), and Reg. (१०) B^3I^2, omitted in B^2B^n. (११) I^2B^n, मरुतां B^2, मरुता B^3.

(ऋ० ७ । ३४ । २५)। अस्मिन्सु[१] । अस्मिन्स्वेतच्छकपूत एनः[२] (ऋ० १० । १३२ । ५)। जनाञ्छ्रुधीयतः । सं यावप्नस्थो अपसेव जनाञ्छ्रुधीयतः (ऋ० ६ । ६७ । ३) ॥

रक्तौ रागः समवाये स्वराणां
न नूनं नृम्णं नृमणा नृभिर्नॄन् ॥ ५६ ॥

रक्तैः समवाये स्वराणां रागः क्रियते। न नूनम्। नृम्णम्। नृमणाः। नृभिर्नॄन्। इत्येवमादिषु। न नूनम्[१] । न नूनमस्ति नो श्वः (ऋ० १ । १७० । १) । नृम्णम्[१] । नृम्णं तद्धत्तमश्विना (ऋ० ८ । ९ । २ ।) । नृमणाः[१] । नृमणा वीरपस्त्यः (ऋ० ५ । ५० । ४) । नृभिर्नॄन्[१] । कर्हि स्वित्तदिन्द्र यन्नृभिर्नॄन् (ऋ० ६ । ३५ । २) ॥

रक्तात्तु सोष्मा क्रियते हकारो
दध्यङ् ह देवान्हवते महान्हि ॥ ५७ ॥

रक्तात्परो हकारः सोष्मा क्रियते। दध्यङ् ह। देवान्हवते। महान्हि। इत्येवमादिषु। दध्यङ् ह[१] । दध्यङ् ह मे जनुषम् (ऋ० १ । १३९ । ९)। देवान्हवते[३] । देवान् हवत ऊतये (ऋ० १ । १०५ । १७) । महान्हि[३] । दक्षसो महान्हि षः (ऋ० ८ । १३ । १)॥

संयोगानां स्वरभक्त्या व्यवायो
विक्रमणं क्रमणं वाययोक्तम् ।

---

(१) B^3I^2, omitted in B^2B^n. (२) अस्मिन्सु ते सवने अस्तोक्यं Reg., अस्मिन्स्वे३तत Berlin MS. 391 (cp. Reg.)
(३) B^3I^2, omitted in B^2B^n.

विपर्ययो वा व्यत तिल्विलेऽज्म-
न्द्रप्सोऽजुषन्त्साञ्जयोऽष्ट्रां प्र नेष्ट्रात् ॥ ५८ ॥

संयोगानां क्वचिदविद्यमानया स्वरभक्त्या व्यवायः क्रियते । क्वचिद्वि[1]क्रमणम् । वि[2]क्रमणं नाम द्विर्व[3]चनाभावः । संयोगस्य च मध्ये क्वचित्स्वरमुत्पादयन्तीत्यर्थः[4] । क्वचिच्चायथोक्तं[5] क्रमणं क्रियते । क्वचिद्विपर्ययः । विपर्ययो नाम विद्यमानां स्वरभक्तिं न कुर्वन्तीत्यर्थः । इमे चत्वारो दोषाः संयोगस्य भवन्ति । तान्वर्जयेत् ।

व्यत इत्यत्र वि[6]क्रमणम् । तिल्विले । अज्मन् । इत्येतयो॰ द्विर्त्वाभिधानमकृत्वा अतीर्थोषिता उच्चारयन्ति । तत्र स्वरभक्त्या व्यवाय इव भवति । द्रप्सः । वि[7]क्रमणमेव । अजुषन् । इत्यत्र षकारात्परं ट[8]कारमिव किञ्चिदुत्पाद्यायथोक्तं[9] क्रमणं कुर्वन्ति । साञ्जयः । इत्यत्र विपर्ययः । अष्ट्राम् । प्र । नेष्ट्रात् । इत्येतेषु च[10] क्रमणमेव ।

व्यत । शूरो यो युत्सु तन्वं परिव्यत (ऋ० २ । १७ । २) । तिल्विले[11] । भद्रे क्षेत्रे निमिता तिल्विले वा (ऋ० ५ । ६२ । ७) ।

---

(१) वि- I^2, Reg.; अवि- $B^3B^2B^n$. (२) वि- I^2, Reg.; अवि- $B^3B^2B^n$, M.M. (३) द्विव- B^3I^2, M.M. (४) Reg. reads संयोगस्य to -र्थः after व्यवायः क्रियते (above). (५) च यथोक्तं B^n. (६) -त्र वि- $B^2I^2B^n$, Reg.; -त्रावि- B^3, M.M. (७) वि- B^n; अवि- $B^3B^2I^2$, Reg., M. M. (८) ट- B^2, ड- corrected to ट-B^3, डा- corrected to ड- I^2, अ- B^n, र- M.M.(a)., ड- Reg. (९)-द्यते अयथोक्तं B^n. (१०) B^3B^2, M. M. omit च. (११) omitted in B^2.

अज्मन्[१] । विश्वो वो अज्मन्भयते वनस्पतिः[२] (ऋ० १। १६६। ५)। द्रप्सः[३] । द्रप्सश्चस्कन्द प्रथमाँ अनु द्यून् (ऋ० १०। १७। ११)। अजुषन्[१] । स्वसारः श्यावीमरुषोमजुषन् (ऋ० १। ७१। १)। साञ्जयः[१] । भरद्वाजान्साञ्जयो अभ्ययंष्ट (ऋ० ६। ४७। २५)। अष्ट्राम्[१] । अष्ट्रां पूषा शिथिरामुद्वरीवृजत्[४] (ऋ० ६। ५८। २)। प्र[१] । प्र देवं देव्या धिया (ऋ० १०। १७६। २)। नेष्ट्रात्[१] । नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः (ऋ० २। ३७। ३)॥

विवृत्तिषु प्रत्ययादेरदर्शनं
यथा या ऐच्छश्च य औशिजश्च ॥ ५९ ॥

विवृत्तिषु प्रत्ययस्यादेरदर्शनं लोपः क्रियते। स दोषः। यथा। या ऐच्छः[५] । इमा गावः सरमे या ऐच्छः (ऋ० १०। १०८। ५)। य औशिजः। कक्षीवन्तं य औशिजः (ऋ० १। १८। १)॥

इउसंधौ संध्यवचनं च कासुचित्
स इदस्ता कस्त उषो यथैते ॥ ६० ॥

इ उ इत्येतयोः संधौ कासुचिद्विवृत्तिषु[६] संध्यक्षरवचनं प्रत्ययादर्शनं च क्रियते। तौ दोषौ वर्जयेत्। यथा। स इदस्ता। स इदस्तेव प्रति धादसिष्यन् (ऋ० ६। ३। ५)। स इन्द्र चित्राँ अभि तृन्धि वाजान्[७] (ऋ० ६। १७। २)। कस्त उषः। कस्त उषः कधप्रिये

---

(१) Omitted in B²Bⁿ. (२) I² omits वनस्पतिः. (३) Omitted in B². (४) शिथिरां। B². (५) या ऐच्छः omitted in B². (६) वृत्तिषु Reg. (७) अभि तृन्धि वाजान् in B² and तृन्धि वाजान् in Bⁿ omitted.

(ऋ० १ । ३० । २०)। त उत्स्नाय रयिमभि प्र तस्थुः[1] (ऋ० २ । १५ । ५) ॥

समानवर्णासु विपर्ययो वा
यथा हयूती इन्द्र क आसतश्च ॥ ६१ ॥

समानवर्णासु विवृत्तिषु[2] कासुचिद्विपर्ययः क्रियते । प्रत्ययादेर्वा प्रदर्शनम् । को[3] विपर्ययः । वर्णयोः[4] पूर्वो वर्णः परः क्रियते परश्च[5] पूर्वः क्रियते[6] । स विपर्ययः । तौ दोषौ लक्षयेत् । ऊती इन्द्र । क आसतः । इति यथा । ऊती इन्द्र[7] । आ न स्तुत उप वाजेभिरूती इन्द्र (ऋ० ४ । २९ । १) । अच्छा यो गन्ता नाधमानमूती इत्था (ऋ० ४ । २९ । ४) । क आसतः[8] । क आसतो वचसः सन्ति[9] (ऋ० ५ । १२ । ४) । त आ गमन्तु त इह[10] (ऋ० ६ । ४९ । १) ॥

अभिव्यादानं च विवृत्तिपूर्वे
कण्ठेय ता आपोऽवसा एति दीर्घे ॥ ६२ ॥

विवृत्तिः पूर्वा अस्मात्स विवृत्तिपूर्वः । तस्मिन्विवृत्तिपूर्वे कण्ठ्ये दीर्घे प्रत्यय इति । यदि सप्तमीनिर्देशो विज्ञायते क आसत इत्येवमादिष्वभिव्यादानमेव स्यात् । स तत्र विपर्यय उक्तः—समानवर्णासु विपर्ययो वा (१४ । ६१) इति । तस्मान्न[11] सप्तमीनिर्देशः । कथम् ।

---

(१) प्र तस्थुः omitted in B^2. (२) वृत्तिषु Paris MS. (३) को B^3B^n, कस्य B^2I^2. (४) B^2I^2 and Reg., वर्णयोः omitted in B^3B^n. (५) परो वा B^2, परश्च omitted in I^2. (६) पूर्वः क्रियते omitted in I^2, क्रियते omitted in B^n. (७) ऊती इन्द्र omitted in B^2B^n. (८) B^2B^n omit क आसतः. (९) B^2I^2 omit सन्ति. (१०) B^2 adds श्रुवंतु. (११) तस्मान्न B^2, तस्मात् $B^3I^2B^n$.

विवृत्तिः पूर्वास्माद्[1] अक्षरात्तद्वि[2]वृत्तिपूर्वमक्षरम्। विवृत्तेः पूर्वमपि विवृत्तिपूर्वम्। ते उभे कण्ठ्ये दीर्घे यदा भवतस्तदा कासुचिद्विवृत्तिष्वभिव्यादानं क्रियते। कासुचित्प्रत्ययादेरदर्शनम्। एतौ[3] दोषौ वर्जयेन्मेधावी।

किमिदमभिव्यादानमिति। आदानमारम्भः। विविधं विपुलं[4] विशालं वा आदानम्। अथवा आदानमेव व्यादानम्।[5] केनचिदभिव्याप्तम[6]भिभूतं वा[7] व्यादानं यस्य तदिदमभिव्यादानं भवत्यक्षरम्। किमुक्तं भवति।[8] पादमात्रा विवृत्तिरिह[9] समधिका[10] क्रियते। तया परस्यारम्भो व्याप्यत इत्यर्थः। क। ता आपः। अवसा आ। इत्येवमादिषु।

ता आपः[11]। ता आपो देवीरिह मामवन्तु[12] (ऋ० ७। ४९। १)। अवसा आ[13]। स्वस्त्या गृहेभ्य आवसा आ विमोचनात् (ऋ० ३। ५३। २०)। या आपो दिव्याः[14] (ऋ० ७। ४९। २)। ता आ चरन्ति (ऋ० ४। ५१। ८)।

ते दोषाः। तत्र श्लोकः।

अभ्रमध्ये यथा विद्युद् दृश्यते मणिसूत्रवत्।
एष च्छेदो विवृत्तीनां यथा वालेषु कर्तरी॥
(या० शि० ९३)॥

---

(१) पूर्वा यस्माद् M. M. (२) B³Bⁿ omit तद्. (३) तौ B². (४) वा added in B²I², M. M. (५) B², Reg.; अथवा added in B³I²Bⁿ, M. M. (६) अभिव्यादाम् (for केनचिदभिव्याप्तम्) I². (७) वा Reg., omitted in B³B²I²Bⁿ and M. M. (८) B³I²Bⁿ; अर्धमात्राविवृत्तेरपि added in B², M. M. (a). (९) B³ adds अपेक्षितानुपादोनमात्रा. (१०) समधि- B³I². (११) B²I² omit ता आपः. (१२) देवीः। B², (१३) B²Bⁿ omit अवसा आ. (१४) दिव्या उत। B².

न दोषाणां स्वरसंयोगजाना-
मन्तो गन्यः संख्ययाथेतरेषाम् ॥ ६३ ॥

एषां दोषाणां स्वरसंयोगजानाम्। स्वरेपूच्यमानेषू[1]त्पद्यन्ते ये[2] दोषास्तेषामित्यर्थः। अथेतरेषां[3] व्यञ्जनसंयोगजानाम्। संख्यया गणनयान्तः पारं गन्तुमशक्यम्[4]। कस्मात्। उच्चावचाः प्रयोक्तारो नानास्थानकरणानुप्रदान[5]स्वरोच्चारणास्तथा नानाप्रकृतिस्वभाव[6]शील-समाचाराः[7] केषु वर्णेषु कान्दोषाञ्जनयन्तीत्यज्ञानात् ॥

शक्यस्तु शास्त्रादधि साधु धर्मो
युक्तेन कृत्स्नः प्रतिपत्तुमस्मात् ॥ ६४ ॥

अस्माच्छास्त्रादधि वर्णानां कृत्स्नो धर्मः*[8] साधु युक्तेन[9] साधु धर्मयुक्तेन प्रतिपत्त्रा[10] प्रतिप ुं शक्यः। साधु युक्तो नाम मनोवाग्बुद्धि-युक्तस्तत्त्वार्थदर्शी[11] शिक्षालक्षणविदूहापोहवितर्कज्ञः शास्त्रागमकुशलो ध्यानपरोऽवितथाध्यवसायी ॥

अकारस्य करणावस्थयान्यान्स्वरान्ब्रूयात् ॥६५॥

अ ऋ इ उ एवमाद्यान्स्वरान्ब्रूयात् ॥[12]

तद्धि संपन्नमाहुः ॥ ६६ ॥

---

(१) After -मानेषु I^2 supplies on the margin: असंयु-ज्यमानेषु च. (२) ये B^2, Reg.; ये supplied in I^2; omitted in B^3B^n. (३) I^2 adds कतरेषां on the margin. (४) न शक्यं Reg. (५) -दातान- B^2. (६) -स्वभाव- B^2, Reg.; -स्वरभाव- B^3B^n; -स्वरस्वभाव- I^2 (स्व given above the line). (७) -चारा B^3. (८) धर्म P^1, वर्णधर्मः $B^3B^2I^2B^nP$. (९) युक्तेन Reg., P; युक्तः साधयि(-य- I^2B^n)ताकृत्स्नेन $B^3I^2B^2B^n$. (१०) प्रतिपत्त्रा P, omitted in $B^3B^2I^2B^n$. (११) -दर्शी Reg., P; omitted in $B^3B^2I^2B^n$. (१२) अ ऋ to ब्रूयात् found in $B^3B^2I^3$ B^n P.

अकारस्य करणावस्थया इ ई[1] उ ऊ इत्येवमाद्यानन्यान[2]पि स्वरान्ब्रूयात्। तद्धि संपन्नं[3] भवति ॥

परानकारोदयवद्विवक्षेत्
सर्वत्र वर्णानिति संपदेषा ॥ ६७ ॥

परान्ककाराद्दीन[4]पि[5] व्यञ्जनसंज्ञकान्वर्णान्। अकारोदयवदकारोदयानिव[6]। विवक्षेद्वक्तुमिच्छेत्। सर्वत्र वर्णानित्याहुराचार्याः। क का कि की कु कू इति यथा। संपदेषा वर्णानाम्। सा संपदुभाभ्यां पटलाभ्यां व्याख्याता ॥

शास्त्रापवादात्प्रतिपत्तिभेदान्नि-
न्दन्त्यकृत्स्नेति च वर्णशिक्षाम् ॥ ६८ ॥

शास्त्राणामपवादात्। दोषाः[7] सन्ति पुनरुक्तताविस्पष्टार्थता कष्टशब्दता[8]शक्यार्थतेत्येवमादयः। तेष्वशक्यार्थता दोषोऽ[9]स्मिञ्छास्त्रे संनिहितः[10]। नहि[11] एकमक्षरं यथो[12]च्चारयितुं[13] शक्यम्। अस्माच्छास्त्राप[14]वादात्।

---

(१) इ ई B^2PB^n, ई इ B^3, इ इI^2, ऋ ऋ इ ई Reg. (२) B^n omits अन्यान्. (३) B^2 and Reg. add संपूर्णं. (४) -न- B^2 Reg., P; -न्य- I^2B^n; -न्य- corrected to -न- in B^3. (५) Reg.; व्यंजनानि added in $B^3B^2I^2B^n$ P. (६) इव B^3B^2, Reg.; इति B^nI^2P. (७) अपवादा दोषाः Reg. (८) -शब्दता- Reg., M. M.; -शब्दार्थता $B^3I^2B^2$ P; -शब्दातार्था B^n. (९) तेष्वशक्यार्थता दोषो B^2, Reg., M. M. (a); तेष्वशक्या(-कया- B^n, -क्ता- B^3, -क्तया- I^2)दिषु दोषेषु $B^3I^2B^n$; तेष्वपि शक्तयादिषु दोषेषु P. (१०) संनिहितः B^2, Reg., M.M. (a); ऽसंहितम् B^3; संहितम् I^2B^nP. (११) नहि B^2, Reg., M. M. (a); अपि $B^3I^2B^n$ P. (१२) तथो- Reg., M. M. (a). (१३) Reg., M.M.(a)· न added in $B^3I^2B^2B^n$ P. (१४) -स्त्रादप- $B^3I^2B^n$ P.

प्रतिपत्तिभेदाच्च निन्दन्त्यकृत्स्नेति च वर्णशिक्षाम्। किमिति। अकृत्स्नेत्यप्रयोजनेत्यर्थः। प्रतिपत्तिभेदो नाम—आहुर्घोषं घोषवतामकारम् (१३।१५) इत्युक्त्वा—अत्रोत्पन्नावपर ऊष्मघोषौ (१३।१८) इत्येवमादीनां[1] वर्णप्रतिपत्तिभेदो विरुद्धविधानानि[2] ॥

सैतेन शास्त्रैर्न विशिष्यतेऽन्यैः
कृत्स्नं च वेदाङ्गमनिन्द्यमार्षम् ॥ ६८ ॥

यदुच्यते। इह यथोक्तं तथा वर्णोच्चारणं कर्तुमशक्यं[3] तस्मादकृत्स्नेयं वर्णशिक्षेति। तन्न। कथम्। शिक्षैतेनैव विधानेनान्यैः शास्त्रैर्न विशिष्यते। अन्येष्वपि हि शास्त्रेषु ग्रस्त निरस्त इत्येवमादयो वर्णानां दोषा विधीयन्ते। तानि चाशक्यार्थविधानादकृत्स्नानीति नोच्यन्ते। तानि च[4] कृत्स्नान्येव भवन्ति। तस्मादिदमपि शास्त्रं कृत्स्नं भवितुम[5]र्हति।

प्रतिपत्तिभेदश्च न। अन्येष्वपि शास्त्रेष्वेवंविधा विकल्पाः सन्ति। तस्मादनिन्द्यम्। वेदाङ्गं च[6]। षट्सु वेदाङ्गेष्विदमप्येकमङ्गम्। कल्पो व्याकरणं निरुक्तं शिक्षाच्छन्दोविचिति[7]र्ज्योतिषामयनमिति। तस्माच्चानिन्द्यम्। आर्षं च वेदाङ्गशास्त्रम्। आगमश्च[8] लोके प्रमाणं भवति। तस्माच्चानिन्द्यम्। अपि चात्र श्लोकाः।

---

(१) -दीनि Reg. (२) -विघातानि Reg. (३) न शक्यं Reg. (४) च omitted in B^2. (५) Reg., संभवितुम् B^3 B^2B^n, सं- struct out in I^2. (६) वेदाङ्गं च Reg., षडंगवत् $B^3B^2I^2B^n$. (७) -विवेकितः (for -विचितिर्) I^2. (८) आगश्च B^2, आर्षं शास्त्रं आर्षं च (आर्षमश्च corrected to आर्षं च) I^2.

उक्तो[१]दाहरणं किंचिद् बहुग्रन्थधरो नरः ।
आक्षिप्तः शैक्षिकेणेह तृणाग्निरिव शाम्यति ॥
सुबहुज्ञोऽपि यो भूत्वा शिक्षां चेन्नाधिगच्छति ।
न राजति सभायां स शैक्षिकस्य समीपतः ॥
ब्राह्मणेषु समेतेषु विद्वत्सु[२] च बहुष्वपि ।
ब्रह्मोद्ये[३] संप्रवृत्ते यः शैक्षिकः स विराजते ॥

इति श्री[४]पार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र-उवटकृतौ[५] प्रातिशाख्यभाष्ये[६] चतुर्दशं[७] पटलम्[८] ॥

---

(१) B^3 and M.M., उक्तो- $B^2I^2B^n$. (२) विश्वद्वृत्स I^2. (३) B^3I^2, M. M.; ब्रह्मौद्येद्ये B^n; ब्रह्मौद्ये (or -घे) B^2. (४) B^2 omits श्री-. (५) -पुत्रोव्वटकृत्ते B^n. (६) I^2 adds आदितश्. (७) I^2B^n, -दश- B^3B^2. (८) B^3B^n add समाप्तम्.

पारायणं वर्तयेद् ब्रह्मचारी
गुरुः शिष्येभ्यस्तदनुव्रतेभ्यः ।
अध्यासीनो दिशमेकां प्रशस्तां
प्राचीमुदीचीमपराजितां वा ॥ १ ॥

पारायणमध्यापनं वर्तयेत्कुर्याद् गुरुरुपाध्यायो ब्रह्मचारी भूत्वा तावन्तं कालम् । शिष्येभ्यस्[1] तदनुव्रतेभ्यः । गुरावध्ययने च ये भक्तास्तेभ्यः । प्रशस्तामेकां दिशमध्यासीनः । प्राचीं पूर्वामुदीचीमुत्तरामपराजितां वा प्रागुदीचीम् ॥

एकः श्रोता दक्षिणतो निषीदेद् द्वौ वा ॥ २ ॥

एकः श्रोता शिष्यो दक्षिणतो निषीदेत् । उपविशेदित्यर्थः । द्वौ वा[2] श्रोतारौ[3] दक्षिणत एव निषीदेताम् ॥

भूयांसस्तु यथावकाशम् ॥ ३ ॥

भूयांसो बहवः श्रोतारो यदि स्युर्[4] यथावकाशं यत्र,यत्रावकाशस्तत्र तत्र निषीदेयुः ॥

तेऽधीहि भो३ इत्यभिचोदयन्ति
गुरुं शिष्या उपसंगृह्य सर्वे ॥ ४ ॥

ते सर्वे शिष्या उपसंगृह्य गुरोः पादौ पाणिभ्यामुपपीड्य शिरसि कृत्वाधीहि भो३[5] इत्यनेन गुरुमभिचोदयन्ति ॥

स ओ३मिति प्रस्वरति त्रिमात्रः
प्रस्वार स्थाने स भवत्युदात्तः ।
चतुर्मात्रो वार्धपूर्वानुदात्तः
षण्मात्रो वा भवति द्विःस्वरः सन् ॥ ५ ॥

---

(१) After शिष्येभ्यो I^2 adds माणवकेभ्यः on the margin. (२) द्वौ वा B^2, द्वौ I^2, यदि द्वौ $B^3 B^n$. (३) स्यातां added in $B^3 B^n$. (४) यदि स्युर omitted in I^2. (५) $B^3 B^n$, भो $B^2 I^2$.

स गुरुः ओ३मिति प्रस्वरति शब्दं करोति। त्रिमात्रः प्रस्वारः। स ओंकारशब्दस्त्रिमात्रः। स्थाने भवति। उदात्तश्च। किमिदं स्थानमिति। उपांशुस्थानमिति। उपांशुस्थानानि[1] निषादे पञ्चमे मन्द्र[2]मध्यमतारेषु[3] स्थानानि[4]। स्थाने प्रयोज्यः[5] स्यात्। तेनैव प्रकारेण प्रणवं[6] कुर्यात्। तान्येतान्युक्तानि भवन्ति। अथवा चतुर्मात्रः सं[7]भवति। अर्ध[8]पूर्वोऽनुदात्तो यस्य सोऽर्धपूर्वो[9]ऽनुदात्तः। अथवा षण्मात्रो[10] भवति द्विः[11]स्वरः सन्। इमे त्रयः प्रणवाः। तेषामाद्यो बहुभिः परिगृहीतः। न मध्यमः। किमिति न ज्ञायते। अस्माभिस्तूत्तममन्त्यं[12] मत्वा तथा पठ्यते[13]॥

अध्येतुरध्यापयितुश्च नित्यं स्वर्गद्वारं ब्रह्म वरिष्ठमेतत्।
मुखं स्वाध्यायस्य भवेत्॥ ६ ॥

---

(१) B², Berlin MS. 394 (margin); उपांशुस्थानां B³; उपांशुस्थाना I², M.M.(a), P; उपांशुस्थाना corrected to उपांशुस्थानं in Reg.; उपांशुस्थानं Bⁿ. (२) निषादे पञ्चमे मन्द्र- M. M. (a), Reg., P (मंत्र- for मन्द्र-); निषादे पंचम० I²; निषादपंचममंद्र- B²; निषादपंचमम- B³; निषादपंचम- Bⁿ; पादे पंचममध्यममंत्रे Berlin MS. 394 (margin). (३) ०मध्यतारेषु M. M. (a), Reg. (४) स्थानानि I², M. M. (a)., P, Berlin MS. 394 (margin); corrected to स्थानेषु in Reg.; स्थानेषु B²; omitted in B³; ते येन Bⁿ. (५) स्थाने प्रयोज्यः B³B², M.M.(a), P, Reg., Berlin MS. 394; स्थाने प्रयोज्यं I²; स्थानेन प्रयोज्यं Bⁿ. (६) प्रवणं B³. (७) स B². (८) अर्धः B²B³; अर्धपूर्वानुदात्तः। अर्ध- Berlin MS. 394. (९) अनुदात्तो यस्य स अर्धपूर्वो B³B²I²BⁿP; अनुदात्तस्य अर्धपूर्वो M. M. (a), Reg.; अनुदात्तस्य अर्धपूर्वा- Berlin MS. 394. (१०) Bⁿ, वा added in B³B²I²P. (११) द्विः- B³Bⁿ; द्वि- B²I²P, Reg. (१२) उत्तममन्त्यं B³B²Bⁿ, M.M.; उत्तमं I², Reg., P. (१३) पाठ्यते I²P, -पद्यते Bⁿ.

अध्येतुः शिष्यस्याध्यापयितुश्च नित्यं ध्रुवं[1] प्रणवो भवति स्वर्गद्वारम् । वरिष्ठं प्रधानं ब्रह्मेत्येतदक्षरं प्रतीयात् । जानीयात् । मुखमादौ स्वाध्यायस्य भवेत्तद्ब्रह्म[2] ॥

न चैतत्संदध्यात्स्वाध्यायगतं परेण ॥ ७ ॥

एतदोंकारमक्षरं[3] स्वाध्यायार्थं प्रयुक्तं परपादेन वा[4] अर्धर्चेन वा न संदध्यात् । यज्ञकर्मणि तु संधानं भवति[5] चोदितत्वात् ॥

प्रचोदितोऽभिक्रमते यथास्य
क्रमः परस्ताद्विहितस्तथैव ॥ ८ ॥

तथा शिष्येण[6] प्रचोदितो गुरुरोंकारं कृत्वाभिक्रमतेऽध्ययनमुच्चारयति । यथास्य क्रम आनुपूर्व्यं परस्तादुत्तरत्र विहितम्—दक्षिणाय प्रथमं प्रश्नमाह (१५ । २१) इति तथैव ॥

सर्वोदात्तं त्विह तस्मिन्नपृक्त-
मक्षैप्रयुक्तं द्विरुपस्थितं वा ॥ ६ ॥

इह पारायण[7]प्रवचने तस्मिन्नभिक्रमणे[8] सर्वोदात्तं च यत्तत्पदम् । अक्षैप्र[9]युक्तम्[10] अपृक्तं वा उपस्थितं वा । शिष्यज्ञापनार्थं[11] गुरुर्द्विरुच्चा-

---

(१) नित्यं ध्रुवं B^2, Reg.; नित्यं मुखं I^2B^3P; मुखं नित्यं B^n. (२) भवेत ब्रह्मा I^2; भवेद्ब्रह्म Reg.; भवेत् । ब्रह्म P. (३) Reg.; अक्षरं omitted in $B^3B^2I^2PB^n$. (४) B^3B^n; वा omitted in B^2I^2, Reg. (५) संभवति B^2, Reg. (६) B^2, शिष्यस्य $B^3I^2B^nP$. (७) -यणे I^2. (८) -क्रमे B^n. (९) Cp. M.M. (a), Reg. (cp. his foot-note); आक्षैप्र- P; अक्षिप्र- $B^3I^2B^2B^n$. (१०) -युक्तम् B^3, -युक्तं च P, -युक्तं वा $B^2I^2B^n$. (११) -नार्थं Paris MS. (cp. Reg.).

रयति। प्र। आ। रोदसी इति। उभे इति यथा। अचैप्रयुक्तमिति[१] कस्मात्। उद्वेति (ऋ० ७। ६३। १)। एवमेके॥

अपर उकारा[२]कारयोरपि सर्वोदात्तमित्येव सिद्धत्वादपृक्तम्[३] अचैप्र[४]युक्तमित्यनर्थकं भवति। तस्मात्पाठान्तरेण[५] वर्णयन्ति[६]। उद्वेति यथा[७]। ननु अत्राप्युपस्थितमित्येव सिद्धम्। सत्यं[८] नियमार्थमिदमुच्यते। इह मा भूत्। क। उद्वेति[९]। उदु ष्य देवः (ऋ० २। ३८। १)। इत्येवमादौ[१०] नियमः[११] स्यात्।

अथवोपस्थितं वेति[१२] उपस्थिते[१३] विभाषाप्राप्तेर्नित्यार्थमस्य ग्रहणम्। अपृक्तमचैप्र[१४]युक्तमिति॥

अभिक्रान्ते द्वैपदे वाधिके वा
पूर्वं पदं प्रथमः प्राह शिष्यः॥ १०॥

---

(१) Cp. M.M.(a), Reg. (cp. his foot-note); आचैप्रमिति P; अचिप्रमिति B^2; अचप्रमिति I^2; अचिप्रयुक्तमिति B^3B^n. (२) उकारा- I^2P; उद्वादा- B^n; प्रशङ्का-B^3B^2. (३) अपृक्तम् $B^3B^2B^n$, omitted in I^2P. (४) अचैप्र- cp. Reg. and M.M. (foot-notes); आचैप्र- P; अचिप्र-$B^3B^2I^2B^n$. (५) तस्मात्पाठान्तरेण B^2, Reg. (?); कस्मात् तस्मात्पाठांतरेण P; कस्मात् तस्मात्त्वामंतरेण I^2; तस्मात्त्वामंतरेणB^n.; तस्मात् वमंतरेण B^3. (६) वर्तयंति B^2, Reg. (७) B^3P; अपृक्तं सन्नचैप्रयुक्तमिति added in B^2B^n; अपृक्तं यन्न प्रयुक्तमिति added in I^2 (margin). (८) सत्यं $B^3B^2B^n$, बाढं सिद्धं I^2 (margin), omitted in P. (९) क। उद्वेति $B^3B^2B^n$, कुत्र I^2, क P. (१०) इत्येवमादौ B^3B^2, इत्येवमादौ तु B^n, इत्येवं वर्णमेवा (-मेवा on the margin) I^2, इत्येवं P. (११) नियमात् B^2. (१२) उपस्थितं वेति $B^3B^2B^n$ P, उपस्थितस्य (?) I^2. (१३) B^2P, उपस्थित- B^3B^n, omitted in I^2. (१४) Reg., cp. M. M. (a); आचैप्र- P; अचिप्र- $B^3B^2I^2B^n$.

गुरुणा द्वैपदे वाधिके वा प्रोक्ते पूर्वं पदं प्रश्नाद्यं पदं प्राह दक्षिणः[१] शिष्यः। ततः पश्चादितरे प्राहुः। अस्मिन्पटले यदुक्तं विधानं तेन दाक्षिणात्याः[२] पठन्ति। तस्मादिष्टज्ञापनत्वा[३]भिप्रायेण किंचिदुक्तं मत्वा तत्कश्चिच्छिष्यत[४] इति ॥

निर्वाच्ये तु भो३ इति चोदना स्या-
न्निरुक्त ओं भो३ इति चाभ्यनुज्ञा ॥ ११ ॥

शिष्येण निर्वक्तव्ये[५] गुरौ[६] भो३ इति चोदना स्यात्। तेन निरुक्त ओं भो३ इति चार्थं पुनर्[७] गृहीतमावर्तयन्नभ्यनुज्ञा[८] स्यात् ॥

परिपन्नं प्राकृतसूष्मसंधिं
नकारस्य लोपरेफोष्मभावम्।
असंयुक्तमृपरं रेफसंधिं
विवृत्तिमित्यत्र निदर्शनानि ॥ १२ ॥

परिपन्नम्। त्वं राजेन्द्र[९] (ऋ० १। १७४। १) इत्येवमादि। प्राकृताक्षरमूष्मसंधिम्[१०]। अग्निश्च[११] (ऋ० ५। ६०। ७)। यस्ते मन्यो (ऋ० १०। ८३। १)। यश्शम्बरं पर्वतेषु (ऋ० २। १२। ११)।

---

(१) दक्षिणस्थानः I². (२) B³B²BⁿP, न added in I². (३) -पनात् स्वाभि- Reg., M.M.(a); -पनत्वाभि-corrected to -पनात्स्वाभि- in I². (४) छिष्यत B³P; छिचत B²Bⁿ; छिष्यत corrected to छिक्षिष्यत in I²; छिष्य Reg., M.M. (a); चिष्यत Berlin MS. 394. (५) -व्यो B². (६) गुरोः Bⁿ, गुरो P. (७) इति चार्थं पुनर् B³B²Bⁿ; इति च। पुनर् वा P; चार्थं पुनर् I²; वाठं पूर्णं Reg.; पाठं पूर्णं M. M. (a). (८) आवर्तयितुमभ्यनुज्ञा Bⁿ. (९) राजा B² P, Reg., M. M. (१०) Reg., M. M. (a); प्राकृतमक्षरमूष्मसंधिं PB²; प्राकृतमक्षरं ऊष्मसंधौ B³Bⁿ. (११) B², M. M.; अग्निश्चित् Reg., P; अग्निश्च यः B³Bⁿ.

नकारस्य लोपभावम्। अस्माँअस्माँ इत् (ऋ० ४। ३२। ४)। रेफभावम्। रश्मीँरिव (ऋ० ८। ३५। २१)। अभीशूँरिव (ऋ० ६। ५७। ६)। ऊष्मभावम्[1]। पशून्ताँश्चक्रे (ऋ० १०। ९०। ८)। ताँस्ते अश्याम (ऋ० ९। ९१। ५)। नॄँः पात्रम्[2] (ऋ० १। १२१। १)। असंयुक्तम्। तव वायवृतस्पते (ऋ० ८। २६। २१)। ऋपरम्। यन्नॄभिर्नॄँन्[3] (ऋ० ६। ३५। २)। रेफसंधिम्। अन्तर्वावत् (ऋ० १। ४०। ७)। अग्नी रक्षांसि (ऋ० ७। १५। १०)। विवृत्तिम्। स ईं पाहि[4] (ऋ० ६। १७। २)।[5] इत्येतानि निदर्शनान्याहुराचार्याः। कस्य निदर्शनानीत्येतदागमयितव्यम्। केचिदेतं श्लोकं न[6] पठन्ति॥

> प्रत्युच्चार्यैतद्वचनं परस्य
>
> शिष्यस्य स्याद् भो३ इति चोदना वा।
>
> अर्धर्चोदर्केषु तु वर्जयेयु-
>
> रध्यायान्तेषूभयथा स्मरन्ति॥ १३॥

प्रत्युच्चार्यैतद्वचनं परस्य। गुरोरित्यर्थः। शिष्यस्य भो३ इति चोदना स्यात्। भो३ इति चोदना स्याद्वा[7] न वा[8]। अर्धर्चोदर्केष्वर्धर्चे-

---

(१) -भावं Reg.; -भावः $B^3B^2B^n$ P. (२) पतिभ्यः Reg., P. (३) $B^3B^nB^2$ (पदं for ऋपरं B^n). असंयुक्त। आवतु (उ आवतुः Reg.)। ऋपरम्। प्र ऋभुभ्यः। M.M. (a); also cp. Reg. (४) B^2 omits स ईं पाहि. (५) Instead of असंयुक्तम् to पाहि, P (also cp. Reg. and M.M.) reads : असंयुक्तस्य ऋपरं विवृत्तिपरं इत्यत्र निदर्शनानि परिपन्नमसंयुक्तं। ऋकारपरं रेफसंधिजं। आयंतु नः स ईं पाहि।. Instead of the Comm. परिपन्नम् to पाहि, I^2 reads परिपन्नसंयुक्तं ऋकारपरं रेफसंधिजं आयंतु नः स ईं पाहि।. (६) न omitted in Reg., P, M.M. (a); न on the margin in I^2. (७) B^2 omits वा. (८) न वा स्यात् (for भो३ इति to वा) B^n.

समयेपु[१] तां चोदनां वर्जयेयुः । अध्यायान्तेष्व[२]र्धर्चोदर्केषूभयथा स्मरन्त्याचार्याः । वर्जनं वा न वेति ॥

गुरुः शिष्यस्य पदमाह मुख्यं
समासश्चेदसमासो यदि द्वे ॥ १४ ॥

गुरुः शिष्यस्य प्रश्ने[३] मुख्यमेकं पदमाह यदि समासः । यद्य-समासो द्वे पदे ब्राह ॥

एतेन कल्पेन समाप्य प्रश्नं
प्रत्याम्नायुस्तं पुनरेव सर्वे ॥ १५ ॥

एतेन विधानेन प्रश्नं समाप्य सर्वे शिष्यास्तमेव प्रश्नं पुनः पुनर-भ्यस्येयुः[४] ॥

तत ऊर्ध्वं संततं संवृतेन
प्रविग्रहेण मृद्ववग्रहेण ।
सर्वोदात्तेन च चचयेयुः सर्व
इमान्युपस्थापयन्तः पदानि ॥ १६ ॥

तस्मादभ्यासादूर्ध्वं संततमविच्छिन्नम्[५] । संवृतं समानं समान-शब्देन । मृद्ववग्रहणेन[६] प्रविग्रहेण ।[७] प्रश्लिष्टो[८] यस्मिन्[९] संभवति स

---

(१) -समयेपु B³I²Bⁿ P;- समासिपु B², Reg., M.M. (a). (२) After अध्यायान्तेपु I² adds उभयम्. (३) B³Bⁿ; शिष्यप्रश्ने I²P; शिष्यस्य प्रश्न- B², Reg. (४) Reg.; अभ्यासयेयुः corrected to अभ्यस्येयुः in I²; अभ्यास्ययेयुः P; अभ्यासयेयुः B³B²Bⁿ. (५) I² P, Reg.; अव्यवछिन्नं B³; अन्यवस्थितं Bⁿ; अवछिन्नं B². (६) मृद्ववग्रहणेन P, मृद्वग्रहणेन I², omitted in B³B²Bⁿ. (७) Bⁿ adds स. (८) B² adds विग्रहे; I² gives it on the margin. प्रश्लिष्टावग्रहेण (for प्रश्लिष्टो) M. M. (a), प्रवग्रहणेन (for प्रविग्रहेण । प्रश्लिष्टो) P. (९) B² adds परिग्रहे ; given on the margin in B³.

प्रविग्रहः[1] । उद्वेति[2] (ऋ० ७ । ६३ । १) इत्येवमादिषु प्रविग्रहेषु प्रश्लिष्टं विश्लिष्टं[3] कुर्यात् । कालाधिक्येन[4] कुर्यादित्यर्थः । मृद्ववग्रहेण[5] । मृदवोऽवग्रहा[6] यस्मिन्स मृद्ववग्रहस्तेन । सर्वोदात्तेन स्वरेण[7] चर्चयेयुः । आदिपदिकाश्चोत्तरपदिकाश्च भूत्वा सर्वे शिष्यास्तमेव प्रश्नम् । इमानि पदानि । यानि[8] वक्ष्यामस्तान्युपस्थापयन्तः । सेतिकरणानि कुर्वन्त इत्यर्थः ॥

अभ्युत्परा निर्व्युप सं प्रति प्र
न्यध्यत्यपा दुः स्वपि पर्यवानु ॥ १७ ॥

अभि । उत् । परा । निः[9] । वि । उप । सम् । प्रति । प्र । नि अधि । अति[10]। अप । आ । दुः । सु । अपि । परि । अव । अनु । इत्येतानि पदानि[11] केषांचिच्छाखिनां[12] सेतिकरणानि भवन्ति । उदिति । परेति[13] । अस्माकं तु न। पुन[14]र्यानि सेतिकरणानि[15] तेष्वेवायं विधिः कर्तव्यः ॥

आद्यं स्थितोपस्थितसेकलेषा-
मर्धर्चान्ते कुर्युरथो द्विषंधौ ॥ १८ ॥

---

(१) परिग्रहः (for स प्रविग्रहः) M.M. (a); स परिश्लिष्टाग्रहः P. (२) इन्दो (for उद्वेति) B^n. (३) प्रग्रहेषु श्लिष्टं विश्लिष्टं न (for प्रविग्रहेषु to -ष्टं) M.M. (a). (४) कालाधिक्यं न M.M. (a). (५) B^n omits मृद्ववग्रहेण. (६) -ग्रहः B^2. मृदु अवग्रहो B^3 (a marginal note). (७) B^2 adds च (margin). (८) यानि यानि I^2. (९) निः B^n, Reg.; निर् B^3B^2, M.M.; निर I^2. (१०) अधि । अति B^2B^n; अधि I^2; अति । अधि B^3, (११) B^2I^2 omit पदानि. (१२) B^2, Reg. add एतानि; I^2 adds एतानि पदानि. (१३) I^2 omits उदिति । परेति. (१४) पुनर् omitted in Reg.; पुनरस्माकं मुप I^2. (१५) I^2 adds अनिधिकरणानि.

तेषामुपसर्गाणामाद्यमभीत्येकमुपसर्गमर्धर्चान्ते वर्तमानमथो[1] द्विपधौ वा[2] विवृत्तिस्थाने[3] स्थितोपस्थितं[4] कुर्युः । तेषामेव शाखिनाम् । अभीत्यभि ॥

च घ हि वेति च सर्वत्र तेषा-
मनेकं चेत्संनिपतेद् द्वितीयम् ॥ १८ ॥

च । घ । हि । वा । इत्येतानि सर्वत्र स्थितोपस्थितानि कुर्युः । चेति च । घेति घ[5] । तेषामुपसर्गाणां यद्यनेकं संनिपतेद् द्वितीयमेव सेतिकरणं कुर्युः[6] । नेतरत्[7] । उत् । परेति[8] ॥

सम्रस्यन्तश्च द्विपदाद्यर्धर्चौ
व्यवस्यन्त इतराश्चर्चयेयुः ॥ २० ॥

पश्वा न तायुम् (ऋ० १ । ६५ । १) इत्येवमादीनां द्विपदानामु[9]क्तानां द्वौ द्वावर्धर्चावेकैकाम्[10] ऋचं कुर्वन्तः । व्यवस्यन्तः[11] पृथक्कुर्वन्तः । इतरा अधिका याः सूक्तेषु । साधुर्न गृध्नुः (ऋ० १ । ७० । ६) इति यथा । तास्तथैव चर्चयेयुः । आदिग्रहणम्[12] आदि-[13]पदस्यैतदुच्यते[14] ॥

---

(१) यमथो I². (२) B² omits वा. (३) -स्थान I². (४) I² omits स्थितोपस्थितं. (५) Bⁿ omits घेति घ; I² omits चेति to घ. (६)तेषाम्—कुर्युः given on the margin in I²; B² reads it after उत् । परेति; cp. Reg.; instead of it B³Bⁿ also B² (at this place) read तेषामुपसर्गाणामभ्यादि (-दिः Bⁿ) वांतानां यद्यनेकं संनिपतेत् (-ते Bⁿ) तर्हि द्वितीयमेव सेतिकरणं कुर्युः।. (७) नेतरौ I² (marg.). (८) उत् । परेति B²B³, उदिति Bⁿ, omitted in I². (९) I² corrects उ- to सू-. (१०) एकैकाम् B², Reg.; एकाम् B³I²Bⁿ, M.M. (११) अवस्यंतः (for व्यवस्यन्तः) occurs after कुर्वन्तः in I². (१२) B²I², Reg.; -णाद् B³Bⁿ. (१३) आद्वि-(for आदि-) B². (१४) आदि- to उच्यते is marked to be deleted in B³.

दक्षिणाय प्रथमं प्रश्नमाह प्रदक्षिणं तत ऊर्ध्वं परीयुः ॥२१॥

दक्षिणाय शिष्याय[1] प्रथमं प्रश्नमाह गुरुः। ततोऽध्ययनारम्भादूर्ध्वं कचिद्गच्छन्तः शिष्याः दक्षिणम्[2] आचार्यं कृत्वा परीयुः। प्रदक्षिणावृत्ताः परीयुरिति वा योजयितव्यम् ॥

एवं सर्वे प्रश्नशोऽध्यायमुक्त्वो-
पसंगृह्यातिसृष्टा यथार्थम् ॥ २२ ॥

एवमेतेन विधिना प्रश्नशः सर्वे शिष्या अध्ययनान्तं[3] गत्वोपसंगृह्य गुरुं तेनातिसृष्टा[4] यथार्थाः स्युः। यद्यत्स्व[5]कर्म तत्तत्[6] कुर्युरित्यर्थः ॥

किमिदं प्रश्न इति।

प्रश्नस्तृचः ॥ २३ ॥

तृचः प्रश्न इत्युच्यते ॥

पङ्क्तिषु तु द्वृचो वा ॥ २४ ॥

पङ्क्तिषु तु ऋक्षु[7] द्वृचो वा प्रश्नो भवति। तृचो वा ॥

द्वे द्वे च पङ्क्तेरधिकाक्षरेषु ॥ २५ ॥

तस्याः पङ्क्तेरधिकाक्षरेषु त्रिष्टुबादिषु छन्दःसु[8] द्वे द्वे एव ऋचौ[9] प्रश्नो भवति ॥

एका च सूक्तम् ॥ २६ ॥

एका ऋग्यत्सूक्तं भवति सा[10] च प्रश्नो भवति ॥

---

(१) B² I² omit शिष्याय. (२) B², Reg.; प्रदक्षिणम् B³ I² Bⁿ. (३) Bⁿ; अध्ययनानन्तरं corrected to अध्ययनान्तं in I²; अध्ययनानन्तरं B³ B², Reg. (४) Bⁿ adds यथार्थं. (५) स्वं B³. (६) तत्तत्कर्म I², तत् B². (७) B² omits ऋक्षु. (८) B², Reg.; त्रिष्टुभादिषु तस्या (for तस्याः to -सु) B³ Bⁿ; तस्याः पङ्क्तेरधिकाक्षरेष्वृक्षु (पङ्क्तेर् to -क्षु on the margin) I². (९) B², Reg.; ऋचः B³ Bⁿ; ऋचः corrected to ऋचौ in I². (१०) स B², Reg.

समयास्त्वगण्याः परावराध्यीः ॥ २७ ॥

समयाः परावराध्यीः प्रश्नेषु[1] न[2] गण्यन्ते ॥

द्विपदे यथैका ॥ २८ ॥

द्विपदे यथैका ऋक्तथा गण्येते[3] ॥

सूक्तस्य शेषोऽल्पतरो यदि स्यात्पूर्वं स गच्छेत् ॥ २९ ॥

एवं प्रश्नेषु परिकल्प्यमानेषु सूक्तस्य शेषो[4] यद्यल्पतरः[5] स्यात्प्रश्नात्पूर्वं स प्रश्नं[6] गच्छेत् ॥

यदि तु द्वृचो वा ॥ ३० ॥

यदि सूक्तस्य[7] शेषो द्वृचो भवति पूर्वं प्रश्नं गच्छेद्वा न वेति। पङ्क्त्याः प्राक्[8] छन्दसो द्वृचं[9] पूर्वमेव गच्छेत्। यदि पराणि पङ्क्त्याः स्युस्तदा पूर्वं न गच्छेत्। यदि[10] मिश्राणि स्युः पङ्क्त्या[11] तर्हि कचित्[12] पृथक्स्यात्। पूर्वं गच्छेद्वा[13] संख्यावशेन[14] ॥

ते षष्टिरध्याय उपाधिका वा सूक्तेऽसमाप्ते यदि ते समाप्ताः ॥ ३१ ॥

---

(१) समयेपु (for प्रश्नेषु) I² (with marks of deletion). (२) B², न omitted in B³I²Bⁿ. (३) B³I², गण्यंते B²Bⁿ. (४) शेषं B³Bⁿ. (५) -तरं Bⁿ, corrected to -तरः in B³. (६) पूर्वं स प्रश्नं B³, पूर्वं प्रश्नं स B², पूर्वं प्रश्नं I², पूर्वप्रश्नो Reg., पूर्वं स प्रश्नो Bⁿ. (७) B³Bⁿ; सूक्त- B²I², Reg. (८) युक्ताः पंक्ति- (प्राक् corrected to पंक्ति-) I² (for पङ्क्त्याः प्राक्) (९) B³B²Bⁿ; द्वृचः Reg.; द्वृचं corrected to द्वृचः in I². (१०) पङ्क्त्याः स्युस् to यदि omitted in I², Reg. (११) पंक्त्या Bⁿ, पंक्त्यंतं Reg. (१२) न कचित् (for तर्हि कचित्) I², Reg. (१३) I², Reg. omit वा. (१४) B³ adds वा.

ते प्रश्ना एवं गण्यमाना एकैकस्मिन्नध्याये षष्टिर्भवन्ति। उपाधिका वा[1] भवन्ति सूक्तेष्वसमाप्तेषु[2] यदि ते प्रश्नाः समापयन्ति[3]। यदि षष्टिः पूर्णा[4] भवन्ती[5]त्यर्थः। तदा यावद्भिः प्रश्नैः सूक्तशेषः समाप्यते तावद्भिरधिका ष[6]ष्टिर्भवति। एवं प्रायेण सर्वत्र युज्यते।

क्वचित्सूक्ते समाप्त इति। जातिग्रहणं द्रष्टव्यम्। सूक्तेषु समाप्तेष्विति। यथा चतुःषष्टिरध्यायाः॥

भो३ इत्यर्धर्चे गुरुणोक्त आह
शिष्य ओं भो३ इत्युचितामृचं च॥ ३२॥

अध्यायस्यान्त्ये[7]ऽर्धर्चे समाप्ते भो३ इति गुरुणोक्तः शिष्य ओं भो३ इत्याह।[8] बाढं युष्मदनुध्यानात्समाप्तमित्यर्थः। उक्तां च ऋचमाह। उचितामृचं च। उचिता ऋक्। शतधारमुत्सम् (ऋ० ३। २६। ९) इति[9]। तथा—नमो ब्रह्मणे नमोऽस्त्वग्नये (आ०गृ०३। ३। ४) इति या[10] नित्यं[11] स्वाध्याये परिधानीया ऋक्स्यात्[12]॥

अथैके प्राहुरनुसंहितं तत्पारायणे प्रवचनं प्रशस्तम्॥ ३३॥

---

(१) I^2 omits वा. (२) समाप्तेषु (for असमाप्तेषु) I^2, Reg. (३) समाप्ता भवंति Reg. M.M. (a). (४) षष्टिः पूरणा B^2; षष्टिपूरणा Reg., M.M.(a). (५) Corrected to भवती- in I^2. (६) र- B^3. (७) -न्ते I^2, Reg. (८) M.M. (a), Reg.; चार्थे added in $B^3B^2B^nI^2$ (चार्य or वार्य I^2). (९) उचिताम् to इति (Comm.) B^2 (उत्सम् omitted), M.M. (a), Reg. (उचिता च for उचिता); उचितामृचः B^3I^2, उचिता स्यात् B^n. after इति B^3I^2, M.M. (a), Reg. add कार्य्येवत्स्यात्. (१०) सा B^2, यो I^2. (११) नित्य- I^2, Reg. (१२) I^2 omits स्यात्.

अथैक आचार्याः प्राहुरेतदेव पारायणस्य प्रवचनमनुसंहितं संहिताक्रमेण प्रशस्तमिति[1] ॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र-
उवटकृतौ[2] प्रातिशाख्यभाष्ये[2] पञ्चदशं
पटलम् ॥

(१) न क्रमेण प्रश्न इति (for संहिताक्रमेण to इति) B^3; प्रश्न इति corrected to संहिताक्रमेण प्रशस्तमिति in I^2 (margin). (२) -पुत्रोवटकृते B^n. (३) B^3 adds समाप्तमिदं.

गायत्र्युष्णिगनुष्टुप्च बृहती च प्रजापतेः।
पङ्क्तिस्त्रिष्टुब्जगती च सप्त च्छन्दांसि तानि ह।
अष्टाक्षरप्रभृतीनि ॥ १ ॥

गायत्री। उष्णिक्। अनुष्टुप्। बृहती। पङ्क्तिः। त्रिष्टुप्। जगती। इत्यष्टाक्षरप्रभृतीनि सप्त च्छन्दांसि। तानि प्रजापतेर्वेदितव्यानि ॥

चतुर्भूयः परं परम् ॥ २ ॥

यथापरंपरं तेषु च्छन्दःसु पूर्वस्मात्[1] पूर्वस्माच्[2] छन्दस उत्तरमुत्तरं चतुर्भिरक्षरैर्भूयो भवति ॥

दैवान्यपि च सप्तैव ॥ ३ ॥

देवानामपि सप्तैव[3] च्छन्दांसि भवन्ति ॥

सप्त चैवासुराण्यपि ॥ ४ ॥

आसुराण्यपि[4] सप्तैव[5] च्छन्दांसि भवन्ति ॥

एकोत्तराणि देवानां तान्येवैकाक्षरादधि ॥ ५ ॥

तान्येव गायत्र्यादीन्येकाक्षर[6]प्रभृतीन्येकोत्तराणि देवानां भवन्ति ॥

एकावमान्यसुराणां ततः पञ्चदशाक्षरात् ॥ ६ ॥

तान्येव पञ्चदशाक्षरात्प्रभृति चेमान्ये[7]कावमान्येकैकन्यूनान्यसुराणां भवन्ति ॥

तानि त्रीणि समागम्य सनामानि सनाम तत्।
एकं भवत्यृषिच्छन्दस्तथा गच्छन्ति संपदम् ॥७॥

---

(१) पूर्वस्मात् omitted in B³, Reg. (२) पूर्वमस्माच् Reg. (३) सप्त B³Bⁿ. (४) -राणि I². (५) सप्त (for सप्तैव) I². (६) B³Bⁿ, -क्षरात् B²I² and Reg. (७) गायत्रीछंदस आरभ्य (instead of प्रभृति चेमानि) B², Reg.

तानि प्रजापतिदेवासुराणां छन्दांसि । समाननामानि तानि त्रीणि समागम्य सह भूत्वा[1] सहभूतानां सनाम तदेकमृषिच्छन्दो भवति । तथा । कथम् । प्रजापतेर्गायत्रमष्टाक्षरं देवानामेकाक्षरमसुराणां पञ्चदशाक्षरम् । तानि चतुर्विंशतिश्[2] चतुरुत्तराणि भवन्ति । एवं सर्वाणि ऋषिच्छन्दांसि[3] संपदं गच्छन्ति ॥

एवं त्रिप्रकृतीन्याहुर्युक्तानि चतुरुत्तरम् ।
ऋषिच्छन्दांसि ॥ ८ ॥

एवं कथम् । युक्तानि समाननामानि सनामेति च । त्रि[4]प्रकृतीनि ऋषिच्छन्दांसि चतुरुत्तराण्याहुः ॥

तैः प्रायो मन्त्रः श्लोकश्च वर्तते ॥ ९ ॥

तैरृ[5]षि[6]च्छन्दोभिः प्रायेण मन्त्रोऽनुवर्तते । श्लोकश्च ॥

तत्पादो यजुषां छन्दः साम्नां तु द्वावृचां त्रयः ॥ १० ॥

तत्पादस्तेषामृषि[6]च्छन्दसां चतुर्थोऽशो यजुषां छन्दो वेदितव्यम् । साम्नां छन्दो द्वौ पादौ वेदितव्यौ । ऋचां छन्दस्त्रयः पादा वेदितव्यम्[7] ॥

गायत्र्यादि जगत्यन्तमेकद्वित्र्यधिकं तु तत् ।
आर्षवत्तत्समाहारो ब्राह्मो वर्गः षळुत्तरः ॥ ११ ॥

---

(१) Bⁿ, सह भूत्वा सह भूत्वा B³, सह भूत्वा omitted in I², सह भूत्वा तेषां B² and Reg. (२) -विंशतिः Reg., -विंशतिः । अथैकं गायत्रं भवंति । B², -विंशतेः B³I²Bⁿ. (३) छंदांसि (instead of ऋषिच्छन्दांसि) B³Bⁿ. (४) B², Reg.; त्रिः B³I²Bⁿ. (५) Bⁿ, तैस्त्रिभिश् B²I² and Reg., तैः त्रिभिः corrected to तैरृषि- on the margin in B³. (६) ऋषि- omitted in B³. (७) -तव्याः Reg. (Berlin MS. 394).

तानि च्छन्दांसि यजुःसामऋचां गायत्र्यादिजगत्यन्तानि क्रमेणै-कद्वित्र्यधिकानि भवन्ति । कः क्रमः । यजुषां गायत्री षडक्षरा । उष्णिक्सप्ताक्षरा । एवम्[1] । तथा साम्नां द्वादशाक्षरा गायत्री । उष्णिक् चतुर्दशाक्षरा । तथा ऋचां गायत्र्यष्टादशाक्षरा[2] । उष्णिगेकविंशत्य-क्षरेति । एवं सर्वत्र[3] । तत्समाहारस्तेषामृग्यजुःसाम्नां छन्दसां समा-हार आर्षवद्दैवच्छन्दोवद् द्रष्टव्यः । स ब्राह्मो[4] ब्रह्मणोऽयं वर्गो गणः[5] षडुत्तरो वेदितव्यः ॥

अक्षराणि तु षट्त्रिंशद्गायत्री ब्रह्मणो मिता ॥ १२ ॥

एवं समाहारे गायत्री ब्राह्मो[6] षट्त्रिंशदक्षरा वेदितव्या[7] ॥

यजुषां षळृचां त्रिः षट् साम्नां द्वादश संपदि ॥ १३ ॥

कथं यद्ब्रह्मणो गायत्री षट्त्रिंशदक्षरा भवतीति मन्यसे । तच्छृणु । यजुषां गायत्री षडक्षरा । ऋचां त्रिः षट् । अष्टादशाक्षरेत्यर्थः । साम्नां द्वादशाक्षरा । अस्यां संपदि षट्त्रिंशदक्षरा भवति[8] ॥

ऋषीणां तु त्रयो वर्गाः सप्तका एकधेतरे ॥१४॥

ऋषीणां वर्गास्तु त्रयः सप्तका वेदितव्याः । इतरे प्रजापतिदेवासुर-यजु[9]ऋक्सामब्रह्मणां वर्गा एकधैकप्रकारा भवन्तीत्यर्थः । एतदुक्तं

---

(१) एवम् B³B², omitted in Bⁿ. (२) B³B², अष्टादशाक्षरा गायत्री Bⁿ. (३) The Comm. of this सूत्र up to एवं सर्वत्र omitted in I² and Paris MS. (cp. Reg.). (४) Bⁿ and Reg., ब्रह्मणः B³B²I². (५) I² and Reg., वर्गगणः B³B²Bⁿ. (६) ब्राह्मा Reg. (७) B², Reg.; एवं समाहारे to वेदितव्या omitted in B³I²Bⁿ. (८) एकोत्तरो यजुर्वर्गः साम्नो वर्गस्तु द्व्युत्तरः । ऋचां तु त्र्युत्तरो वर्गो ब्राह्मो वर्गः षळुत्तरः । क्षेपकः । added in B³. Cp. also Reg. (९) यजुर् M.M., यजु B³B².

भवति। आर्षादन्येषां सप्तानामुदाहृतानां छन्दसां ये वर्गास्ते गायत्र्यादि-जगत्यन्त्या इत्यर्थः[१] ॥

ऋषिच्छन्दांसि ॥ १५ ॥

प्रजापतिप्रभृतीनां[२] छन्दांसि व्याख्यातानि । तेषु ऋषिच्छन्दांसि सोदाहरणानि विस्तरेण वक्ष्यति ॥

गायत्री सा चतुर्विंशत्यक्षरा ।
अष्टाक्षरास्त्रयः पादाश्चत्वारो वा षळक्षराः ॥ १६ ॥

तेषु गायत्री चतुर्विंशत्यक्षरा स्यात् । तस्या[३] अष्टाक्षरास्त्रयः पादा[४] भवन्ति । अग्निमीळे पुरोहितम् (ऋ० १ । १ । १) । षडक्षरा वा चत्वारः पादा भवन्ति ॥

इन्द्रः शचीपतिर् बलेन वीळितः ।
दुश्च्यवनो वृषा समत्सु सासहिः ॥ १७ ॥

इति षडक्षराया उदाहरणम् ॥

पञ्चकाः पञ्च षड् वान्त्यः पदपङ्क्तिर्हि सा भुरिक् ।
द्वौ वा पादौ चतुष्कश्च षट्कश्चैकस्त्रिपञ्चकाः ॥१८॥

---

(१) The Comm. ऋषीणां to इत्यर्थः supplied on the margin in B³; B² reads it after वक्ष्यति in the next Sūtra's Comm.; instead of it, I² supplies on the margin: ऋषीणां सप्तकात्त्रयो वर्गा वेदितव्याः गायत्र्यादिः प्रथमो वर्गः अतिजगत्यादिर्द्वितीयः कृत्यादिस्तृतीयः । एकधेतरे । इतरे तु प्राजापत्याद्यो ये वर्गास्ते एकधा भवन्ति त्रिधा न भवन्तीत्यर्थः । अथवा पादादिविभागो न भवति एकत्रैव पठ्यत इत्यर्थः ।; omitted in Bⁿ, M.M. (a), Paris MS. (cp. Reg.). (२) B³, Reg.; -प्रभृतीनि B³ I² Bⁿ. (३) B³ Bⁿ, तस्याम् B², तस्याः पादाः I². (४) पादा struck out in I².

पञ्चाक्षराः पञ्च पादा भवन्ति यस्याः सा[1] पदपङ्क्तिर्नाम वेदितव्या। षडक्षरो वान्त्यः पादो भवति चत्वारश्च पञ्चकाः सा भुरिक् पदपङ्क्तिर्नाम वेदितव्या। अथवा[2] द्वौ पादावेकश्चतुष्क एकः षट्कः। त्रयश्च पञ्चाक्षरा भवन्ति। सापि[3]। तासामुदाहरणं वक्ष्यति॥

अधा हीन्द्रेति च तृचौ घृतमग्ने तमित्यृचः॥ १९॥

अधा हि। इन्द्र। इति तृचौ[4]। घृतम्। अग्ने तमद्य। इत्येताश्च ऋचस्तासामु[5]दाहरणानि भवन्ति[6]। अधा ह्यग्ने (ऋ० ४।१०।२)। इन्द्रेति षोडशिनः स्तोत्रियः। इन्द्र जुषस्व प्रवहा याहि शूर हरीह[7]। पिबा सुतस्य मतिर्न मध्वश्चकानश्चारुर्मदाय (शा० श्रौ० ९।५।२)। एवमष्टाक्षरैर्विना पञ्चकाः पञ्च पादा भवन्ति। घृतं न पूतम् (ऋ० ४।१०।६)। अग्ने तमद्य (ऋ० ४।१०।१)॥

अष्टको दशकः सप्तो विद्वांसाविति सा भुरिक्॥२०॥

अष्टकः प्रथमः पाद उत्तरो दशकोऽन्त्यः सप्तकः सा भुरिक्। उदाहरणम्[8]। विद्वांसाविद् दुरः[9] पृच्छेत्[10] (ऋ० १।१२०।२)॥

युवाकु हीति गायत्री त्र्यः सप्ताक्षरा विराट्।
सैषा पादनिचृन्नाम गायत्र्येवैकविंशिका॥ २१॥

युवाकु हि शचीनाम्[11] (ऋ० १।१७।४) इत्येषा त्रिः सप्ताक्षरा गायत्र्येव विराडेकविंशत्यक्षरा पादनिचृन्नाम वेदितव्या॥

---

(१) I², Reg., M.M. (a); भुरिक् added in B³B²Bⁿ. (२) B² and Reg.; अथवा omitted in B³I²Bⁿ. (३) B³ B²; सापि omitted in I²Bⁿ, Reg., M.M. (a). (४) ऋचौ I². (५) एतासाम् B². (६) भवन्ति omitted in B². (७) हरीह I²Bⁿ, हरी इह B³B². (८) उदाहरणम् omitted in B². (९)- वित् दुरः I². (१०) इत्युदाह- । added in B². (११) शचीनाम् omitted in B².

षट्कः सप्तकयोर्मध्ये स्तोतॄणां विवाचीति ।
यस्या सातिनिचन्नाम गायत्री द्विर्दशाक्षरा ॥ २२ ॥

सप्तकयोर्मध्ये यस्याः—स्तोतॄणां विवाचि—इति[1] षट्कः पादः सातिनिचृन्नाम[2] विंशत्यक्षरा गायत्री । पुरूतमं पुरूणां स्तोतॄणाम्[3] (ऋ० ६ । ४५ । २९) इति ॥

षट्कसप्तकयोर्मध्ये स्तुह्यासावातिथिम् ।
षळक्षरः प्रकृत्यैष व्यूहेनाष्टाक्षरोऽपि वा ॥ २३ ॥

तथा यस्या मध्ये—स्तुह्यासावातिथिम्[4] —प्रकृत्यैष[5] षडक्षरो[6] व्यूहेनाष्टा[7]क्षरः[8] सा च गायत्र्यतिनिचृदेव । प्रेष्ठ[9]मु प्रियाणाम् (ऋ० ८ । १०३ । १०) इति ॥

उत्तरोत्तरिणः पादाः षट् सप्ताष्टाविति त्रयः ।
गायत्री वर्धमानैषा त्वमग्ने यज्ञानामिति ॥ २४ ॥

उत्तरोत्तरिण एकैकाक्षरेण वर्धमानास्त्रयः पादाः षट्सप्ताष्टाक्षरा यस्याः सा गायत्री वर्धमाना नाम वेदितव्या । त्वमग्ने यज्ञानाम् (ऋ० ६ । १६ । १) इति[10] ॥

अष्टकौ मध्यमः षट्क एकेषामुपदिश्यते ॥ २५ ॥

एकेषां शाखिनामाद्यन्तावष्टकौ पादौ मध्यमः षट्को यस्याः सा वर्धमानैवो[11]पदिश्यते ॥

---

(१) यस्याः स्तोतॄणां विवाचीति B², omitted in B³I²Bⁿ. (२) अति- (for साति) I². (३) स्तोतॄणाम् omitted in B²I². (४) तथा to -तिथिं B² and Reg., omitted in B³I²Bⁿ. (५) प्रकृत्य Reg. (६) षडक्षरो omitted in I², षळक्षरं Reg. (७) B², Reg.; अक्षरव्यूहेनाष्टा- I²Bⁿ, अक्षरव्यूहे अष्टा- B³. (८) षट्कसप्तकयोर्मध्ये added in B³I²Bⁿ. (९) -स्थ- I², -ष्व- Bⁿ. (१०) य- । (instead of यज्ञानामिति) B². इति omitted in Bⁿ. (११) यस्याः सा वर्धमानैव omitted in I².

स नो वाजेषु पादौ द्वौ जागतौ द्विपदोच्यते ॥२६॥

स नो वाजेष्वविता पुरूवसुः (ऋ० ८।४६।१३) इति जागतौ पादौ[1] द्विपदा गायत्र्युच्यते ॥

आद्यान्त्यौ सप्तकौ यस्या मध्ये च दशको भवेत् ।
यवमध्या च गायत्री स सुन्व इति दृश्यते ॥ २७ ॥

आद्यान्त्यौ पादौ सप्तकौ यस्या मध्ये च दशको भवेद्यवमध्या नाम सा गायत्री वेदितव्या। स सुन्वे यो वसूनाम् (ऋ० ९।१०८। १३)[2] ॥

षळक्षरः सप्ताक्षरस्तत एकादशाक्षरः ।
एषोष्णिग्गर्भा गायत्री ता मे अश्व्यानामिति ॥२८॥

षडक्षरः प्रथमः[3] पादस्ततो द्वितीयः[4] सप्ताक्षरस्तृतीय एकादशाक्षरो यस्या[5] एषोष्णिग्गर्भा नाम गायत्री[6] वेदितव्या। ता मे अश्व्यानां हरीणां नितोशना (ऋ० ८। २५। २३) इति[7] ॥

अष्टाविंशत्यक्षरोष्णिक् सा पादैर्वर्तते त्रिभिः ।
पूर्वावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः ॥ २९ ॥

यस्या अष्टाविंशत्यक्षराणि[8]। त्रिभिश्च पादैर्वर्तते। पूर्वावष्टाक्षरौ पादौ[9] तृतीयो द्वादशाक्षरः[10]। सोष्णिग्भवति ॥

---

(१) यस्याः सा added in B². (२) इति दृश्यते added in B³ I². (३) प्रथमः omitted in B². (४) द्वितीयः omitted in B²I². (५) यस्याः सा B². (६) गायत्री नाम (for नाम गायत्री) B², गायत्री omitted in I². (७) आश्व्यामिति (instead of अश्व्यानां to इति) I²; नितोशना इति omitted in B²; इति omitted in Bⁿ. (८) सा उष्णिग्भवति added in I²Bⁿ. (९) पादौ omitted in B². (१०) यस्या अष्टाविंश- to -क्षरः omitted in B³.

पुरउष्णिक् तु सा तस्मिन्प्रथमे मध्यमे ककुप् ॥३०॥

तस्मिन्द्वादशाक्षरे प्रथमे सति पुरउष्णिग्भवति । तस्मिन्द्वादशाक्षरे मध्यमे सति ककुब्भवति ॥

अग्ने वाजस्य तच्चक्षुः सुदेवः समहेति च ।
ऋचो निदर्शनायैताः परा यास्ता यथोदिताः ॥ ३१ ॥

उष्णिक्पुरउष्णिक्ककुभो क्रमेणैता ऋचो निदर्शनानि[1] भवन्ति[2] । अग्ने वाजस्य गोमतः (ऋ० १।७९।४) । तच्चक्षुर्देवहितं शुक्रमुच्चरत् (ऋ० ७।६६।१६)। सुदेवः समहासति (ऋ० ५।५३।१५)। परा या ऋचस्ता[3] यथोदिता यथा[4] कथ्यमानास्तथा[5] जानीयात् ॥

सप्ताक्षरैश्चतुर्भिर्द्वे नदं मंसीमहीति च ।
पादैरनुष्टुभौ विद्यादक्षरैरुष्णिहाविमे ॥ ३२ ॥

सप्ताक्षरैश्चतुर्भिः पादैर्द्वे ऋचावु[6]ष्णिहौ भवतः । पादैरनुष्टुभौ जानीयात् । अक्षरैः कृत्वोष्णिहौ भवतः । नदं व ओदतीनाम् (ऋ० ८।६९।२) मंसीमहि त्वा वयम् (ऋ० १०।२६।४) इत्येते ॥

ददी रेक्ण इति त्वेषा ककुम्न्यङ्कुशिरा निचृत् ।
एकादशोऽस्याः प्रथम उत्तमश्चतुरक्षरः ॥ ३३ ॥

अस्याः प्रथम एकादशाक्षरः । नाम्नि[7] ककुप्शब्दाद् द्वितीयो द्वादशाक्षरः । उत्तमस्तृतीयश्चतुरक्षरः । एषा[8] ककुम्न्यङ्कुशिरा

---

(१) निदर्शनाय B^2. (२) एता ऋचो निदर्शनानि (instead of उष्णिक् पुर- to भवन्ति) I^2, cp. also Reg. (३) ता अपि B^3B^n, ता अपि उत्तरत्र B^2. (४) उत्तरत्र यथा B^3B^n. (५) तथा B^2I^2, Reg.; तत्र तत्र यथा B^3; तत्र तथा B^2. (६) एते (for ऋचौ) B^2. (७) B^2, नाम्नि B^3, नाम्नि B^n. (८) B^3B^n, एका B^2.

निचृत् । उदाहरणम् । ददो रेक्णस्तन्वे ददिर्वसु[1] (ऋ० ८ । ४६ । १५)[2] ॥

एकादशाक्षरौ च द्वौ मध्ये चैकः षळक्षरः ।
उष्णिक् पिपीलिकमध्या हरी यस्येति दृश्यते ॥ ३४ ॥

यस्या एकादशाक्षरौ द्वौ पादौ तयोर्मध्य एकः षडक्षरः पिपीलिकमध्या नाम सो[3]ष्णिग्वेदितव्या । हरी यस्य सुयुजा विव्रता वेः[4] (ऋ० १० । १०५ । २) ॥

ताभ्यां परः षळक्षरः प्र या तनुशिरा नाम ॥ ३५ ॥

ताभ्यामेकादशाक्षराभ्यां पादाभ्यां[5] षडक्षरः पादः परो भवति सोष्णिक्[6] तनुशिरा नाम वेदितव्या । प्र या घोषे भृगवाणे न शोभे (ऋ० १ । १२० । ५)[7] ॥

आद्यः पञ्चाक्षरः पाद उत्तरेऽष्टाक्षरास्त्रयः ।
अनुष्टुब्गर्भोष्णिक् सागस्त्येऽस्ति पितुं न्विति ॥ ३६ ॥

आद्यः पञ्चाक्षरः पाद उत्तरे त्रयः[8] पादा अष्टाक्षरा यस्या एषानुष्टुब्गर्भोष्णिग्[9] भवति । सा[10]गस्त्य ऋषौ विद्यते । पितुं नु स्तोषम् (ऋ० १ । १८७ । १) इति ॥[11]

---

(१) ददिर्वसु omitted in B². (२) तृतीयः (-य Reg.) पादः चतुरक्षरः (instead of the whole Comm. अस्याः to वसु) I² and Paris MS. (cp. Reg). (३) I², नामो- B³B²Bⁿ. (४) विव्रता वेः omitted in B². इति दृश्यते added in B³I². (५) पादाभ्यां omitted in B². (६) I² adds भवति. (७) इति added in I². (८) त्रयः omitted in I². (९) B³Bⁿ, अष्टाक्षराः पादाः यस्याः सा अनुष्टुप्गर्भैव एषा उष्णिग् (instead of पादा to उष्णिग्) B², पादा अष्टाक्षरा यस्याः सानुष्टुब्गर्भैव एषा उष्णिग् I². (१०) अग- (for साग-) I². (११) B²I², इति omitted in B³Bⁿ.

द्वात्रिंशदक्षरानुष्टुप् चत्वारोऽष्टाक्षराः समाः ॥३७॥

या[1] द्वात्रिंशदक्षरा सानुष्टुब्भवति । तस्याश्चत्वारः पादा अष्टाक्षरास्ते च समा वेदितव्याः ।[2] उदाहरणम्[3] । गायन्ति त्वा गायत्रिणः (ऋ० १ । १० । १) इत्येवमादयः[4] ॥

कृतिर्द्वौ द्वादशाक्षरावेकश्चाष्टाक्षरः परः ॥३८॥

यस्याः पादौ द्वादशाक्षरौ पूर्वौ स्तः परः पादोऽष्टाक्षरो भवति सानुष्टुप् कृतिर्नाम[5] वेदितव्या । उदाहरणं वक्ष्यति[6] ॥

यस्यास्त्वष्टाक्षरो मध्ये सा पिपीलिकमध्यमा ॥३९॥

यस्यास्तु द्वादशाक्षरयोर्मध्येऽष्टाक्षरः पादो भवति सा पिपीलिकमध्यानुष्टुब्भवति[7] । वक्ष्यमाणोदाहरणम्[8] ॥

नवकौ द्वादशी द्व्यूना
ता विद्वांसेति काविराट् ॥ ४० ॥

नवकावाद्यन्तौ पादौ मध्ये च द्वादशी पादो द्वाभ्यां न्यूना[9] का[10]विराड् वेदितव्या । ता विद्वांसा हवामहे वाम् (ऋ० १ । १२० । ३) इति ॥[11]

तेषामेकाधिकावन्त्यौ
नष्टरूपा वि पृच्छामि ॥ ४१ ॥

---

(१) यं I². (२) B² adds सानुष्टुप् भवति.. (३) उदाहरणम् omitted in I². (४) इत्येवमादयः B²I², इति B³, omitted in Bⁿ. (५) B³Bⁿ, कृतिर्नामानुष्टुप्सा (for सा to नाम) B²I². (६) उदाहरणं वक्ष्यति omitted in I². वक्ष्यति (for वक्ष्यति) B². (७) B³Bⁿ, नाम वेदितव्या (for अनुष्टुब्भवति) B²I². (८) वक्ष्य- to-म् omitted in I². (९) विराळित्यर्थः added in B³Bⁿ. (१०) का- omitted in I², Reg., Berlin MS. 394 (cp. Reg.). (११) B²I², इति omitted in B³Bⁿ.

तेषामेव नवकद्वादशिनां पादानाम[1]न्त्यावे[2]कैकेनाक्षरेणाधिकौ भवतः। नवाक्षरः प्रथमः पादः। दशाक्षरो द्वितीयः। त्रयोदशाक्षरोऽन्तिमः[3]। सानुष्टुम्नष्टरूपा नाम वेदितव्या। वि पृच्छामि पाक्या न देवान्[4] (ऋ० १।१२०।४)॥

दशाक्षरास्त्रयो विराट् त्रयो वैकादशाक्षराः॥ ४२॥

दशाक्षरास्त्रयः पादा एकादशाक्षरा वा त्रयो यस्या[5] भवन्ति अनुष्टुब् विराण्नाम सा वेदितव्या। तयोरुदाहरणे वक्ष्यामः[6]॥

षण्महापदपङ्क्तिस्तु षट्कोऽन्त्यः पञ्च पञ्चकाः॥ ४३॥

षड्भिः पादैर्यानुष्टुप्सा महापदपङ्क्तिरित्युच्यते। अन्त्यः पादः[7] षट्कः। सर्वे[8] पञ्च पञ्चका आद्याः[9]। उदाहरणं वक्ष्यति[10]॥

मा कस्मै पर्यू षु अध्यग्ने
तव स्वादिष्ठा ता ऋचः॥ ४४॥

---

(१) -दशिनां पादानाम् omitted in I^2. (२) After अन्त्यौ $B^2 I^2$ add पादौ यस्या अनुष्टुभः. (३) Instead of अन्त्याव् to -न्तिमः I^2 reads only दशाक्षरोन्तिमः; but अन्त्यौ to त्रयोदशाक्षर उ, with the variants noted above, is supplied on the margin, while दशाक्षरोन्तिमः is corrected to दशाक्षरा त्तमः. The reading is meant to be supplied before -त्तमः. (४) देवान् omitted in B^2; इति added in I^2. (५) यस्यां B^3 B^2. (६) तयोर् to -मः omitted in I^2. (७) पादः omitted in I^2. (८) सर्वे omitted in $B^3 B^n$. (९) आद्याः omitted in I^2. (१०) उदा- to -ति omitted in I^2.

मा कस्मै । पर्यू षु । श्रुधि । अग्ने । तव स्वादिष्ठा[1] । इत्ये[2]ता ऋचो निर्दिष्टलक्षणानाम[3]निर्दिष्टो[4]दाहरणानामुदाहरणानि ।

कृतिः[5] । मा कस्मै धातमभ्यमित्रिणे नः (ऋ० १ । १२० । ८) । अनुष्टुप् पिपीलिकमध्या[5] । पर्यू षु[6] प्र धन्व वाजसातये (ऋ० ९ । ११० । १) । दशाक्षरा विराट्[5] । श्रुधी[7] हवं विपिपानस्याद्रेः[8] (ऋ० ७ । २२ । ४) । एकादशाक्षरा[5] । अग्न[9] इन्द्रश्च दाशुषो दुरोणे[10] (ऋ० ३ । २५ । ४) । महापदपङ्क्तिः[5] । तव[11] स्वादिष्ठाग्ने संदृष्टिः (ऋ० ४ । १० । ५) ॥

चतुष्पदा तु बृहती प्रायः षट्त्रिंशदक्षरा ।
अष्टाक्षरास्त्रयः पादास्तृतीयो द्वादशाक्षरः ॥४५॥

बृहती षट्त्रिंशदक्षरा चतुष्पदा भवति । तस्यास्त्रयः पादा अष्टाक्षराः । तृतीयो द्वादशाक्षरः पादो भवति । एषा बृहती प्रायः । किमिदं प्राय इति । प्रायेण प्रयुज्यत[12] इत्यर्थः । मा चिदन्यद्वि शंसत (ऋ० ८ । १ । १) इति यथा ॥[13]

पुरस्ताद्बृहती नाम प्रथमे द्वादशाक्षरे ।
उपरिष्टाद्बृहत्यन्त्ये द्वितीये न्यङ्कुसारिणी ।
स्कन्धोग्रीव्युरोबृहती त्वेधैनां प्रतिजानते ॥ ४६ ॥

---

(१) The Comm. मा to -ष्ठा omitted in B^2. (२) I^2, the Comm. मा to इति is given before कृतिः (below) in $B^3 B^n$. (३) निर्दिष्ट- to -नाम् omitted in I^2. (४) निर्दिष्टो- (for अनिर्दिष्टो-) I^2. (५) These names of metres omitted in I^2. (६) पर्यू षु । पर्यू षु I^2. (७) श्रुधि । श्रुधी I^2. (८) -पानस्य B^2. (९) अग्ने । अग्न I^2. (१०) दुरोणे omitted in B^2. (११) तव स्वादिष्ठा । तव I^2. (१२) युज्यत B^2. (१३) इति यथा omitted in $B^3 B^n$.

प्रथमे द्वादशाक्षरे सति पुरस्ताद्बृहती नाम वेदितव्या ।[1] अन्तिमे[2] द्वादशाक्षरे सत्यु[3]परिष्टाद्बृहती नाम भवति[4] ।[5] द्वितीये[6] द्वादशाक्षरे न्यङ्कुसारिणीति[7] केचिदाहुः । अपरे स्कन्धोग्रीवीति[8] मन्यन्ते । उरोबृहतीत्यन्ये[9] । तासामुदाहरणानि[10] वक्ष्यति[11] । एवमेनां त्रिधा[12] प्रतिजानत आचार्याः ॥

त्रयो द्वादशका यस्याः सा होर्ध्वबृहती विराट् ॥४७॥

यस्या बृहत्यास्त्रयः पादा द्वादशाक्षराः सा विराडूर्ध्वबृहती नाम वेदितव्या । उदाहरणं वक्ष्ये[13] ॥

महो योऽधीन्न तं मत्सीजानमिदजोजनः ॥४८॥

महो यः । अधीत् । न तम् । मत्सि । ईजानमित् । अजोजनः[14] । निर्दिष्टलक्षणानामनिर्दिष्टोदाहरणानामि[15]त्येतान्यु[16]दाहरणानि । पुरस्ताद्बृहत्या द्वे[17] । महो[18] यस्पतिः शवसो असाम्या

(१) तस्या उदाहरणे वक्ष्यामः । added in B^3. (२) B^3B^n, अंते B^2, अंत्ये Reg., तस्मिन्नन्त्ये I^2. (३) द्वादशाक्षरे सति B^2, द्वादशाक्षरे B^3B^n, सति I^2. (४) भवति B^3, omitted in B^n, वेदि० । B^2, विज्ञेया I^2. (५) उदाहरणं वक्ष्यति added in B^3. (६) द्वितीयेस्मिन् I^2. (७) $B^3I^2B^n$, -रिणी B^2 and Reg. -णी। स्कन्धो- (Text) to न्यङ्कुसारि- (Comm.), with the variants noted above, is supplied on the margin by a different hand in I^2. (८) -ग्रीवी B^3B^n. (९) -बृहत्यन्ये B^n. (१०) B^n, -हरणे B^3. (११) B^3, वक्षति B^n. तासां to -ति omitted in B^2I^2. (१२) त्रेधा B^2. (१३) उदा- to वक्ष्ये omitted in I^2. (१४) महो यः to -जनः omitted in B^2. (१५) निर्दिष्ट- to -नाम् omitted in I^2. (१६) इत्येतानि omitted in B^3B^n. (१७) पुर- to द्वे omitted in I^2. (१८) महो यः । महो I^2.

(ऋ० १० । २२ । ३)। अधी[1]न्न्वत्र सप्ततिं च सप्त च (ऋ० १० । ६३ । १५) । उपरिष्टाद्बृहत्याः[2] । न[3] तमंहो न दुरितम् (ऋ० १० । १२६ । १)। न्यङ्कुसारिणीस्कन्धोग्रीव्युरोबृहतीनां द्वे[4] । मत्स्य[5]पायि ते महः (ऋ० १ । १७५ । १)। ईजानमिद्[6] द्यौर्गूर्ता-वसुः (ऋ० १० । १३२ । १)। विराडूर्ध्वबृहत्याः[7] । अजीजनो[8] अमृत मर्त्येष्वा (ऋ० १० । ११० । ४) ॥

अष्टिनोर्दशकौ मध्ये विष्टारबृहती युवम् ॥४९॥

अष्टिनोः पादयोर्मध्ये दशकौ यस्याः सा विष्टारबृहती नाम वेदि-तव्या[9] । युवं ह्यास्तं महो रन् (ऋ० १ । १२० । ७) इति[10] ॥

एकागस्त्ये पितुस्तोमे नवाक्षरपदोत्तमा ॥ ५० ॥

अगस्त्य ऋषावन्नस्तुतिसूक्त उत्तमान्त्यैका नवाक्षरपादा विद्यते । बृहत्येव[11] । तं त्वा वयं पितो वचोभिः[12] (ऋ० १ । १८७ । ११) ॥

द्वयोश्चोपेदमाहार्षं सर्वे व्यूहे नवाक्षराः ॥ ५१ ॥

उपे[13]दमुपपर्चनम् (ऋ० ६ । २८ । ८) आहार्षं त्वाविदं त्वा (ऋ० १० । १६१ । ५) इत्येतयोश्च द्वयोॠचोः सर्वे पादा व्यूहे सति नवाक्षरा भवन्ति । बृहत्येव[14]॥

---

(१) अधीन्न् । अधीन् I^2. (२) उप- to -त्याः omitted in B^2I^2. (३) न तं । न I^2. (४) न्यङ्कु- to द्वे omitted in B^2I^2. (५) मत्सि । मत्स्य- I^2. (६) ईजानमित् । ईजान-मिद् I^2. (७) विरा- to -त्याः omitted in B^2I^2. (८) अजीजनः । अजीजनो I^2. (९) नाम वेदितव्या omitted in B^3B^n. (१०) इति omitted in B^3B^n. (११) बृहत्येव omitted in I^2. (१२) वचोभिः omitted in B^2. (१३) उपेदम् । उपे- I^2. (१४) बृहत्येव omitted in B^2I^2.

त्रयोदशाक्षरौ च द्वौ मध्ये चाष्टाक्षरो भवेत् ।
अभि वो वीरमित्येषा सा पिपीलिकमध्यमा॥ ५२ ॥

त्रयोदशाक्षरयोर्मध्ये चाष्टा[1]क्षरः पादः सा पिपीलिकमध्यमा बृहती[2] नाम वेदितव्या। अभि वो वीरमन्धसो मदेषु गाय (ऋ० ८ । ४६ । १४)[3] ॥

नवकाष्ट दश सहैकः परमोऽष्ट च यदि पादाः ।
बृहती विषमपदा सा सनितः सुसनितरुग्र ॥ ५३ ॥

नवाक्षरः प्रथमः पादः। अष्टाक्षरो द्वितीयः। एकादशाक्षरस्तृतीयः। परमश्चा[4]ष्टाक्षर इति। ईदृशा यदि भवन्ति सा बृहती विषमपदा नाम वेदितव्या। सनितः सुसनितरुग्र (ऋ० ८ । ४६ । २०) इति[5] ॥

पङ्क्तिरष्टाक्षराः पञ्च ॥ ५४ ॥

सा[6] पङ्क्तिरिष्यते यस्या अष्टाक्षराः पञ्च पादा भवन्ति। इन्द्रो मदाय वावृधे (ऋ० १ । ८१ । १) ॥

चत्वारो दशका विराट ॥ ५५ ॥

यस्याश्चत्वारः पादा दशकाः सा विराट्पङ्क्तिर्भवति[7]। मन्ये त्वा यज्ञियं यज्ञियानाम् (ऋ० ८ । ९६ । ४) ॥

आदेशेऽष्टाक्षरौ विद्यात्सोपसर्गेषु नामसु ॥ ५६ ॥

---

(१) वा अष्टा- I². (२) बृहती occurs after नाम in B². (३) इति added in I². (४) परमोन्त्यश्चा- B³, परमः अंत्यो- Bⁿ. (५) इति omitted in B³. (६) सा omitted in B³I². (७) B³Bⁿ, विराड् भवति B²I².

आस्तारपङ्क्तिः (१६ । ५९) इत्येवमादिषु[1] सोपसर्गेषु नामस्वादितोऽन्ततो मध्यत इत्येवमादिष्वष्टाक्षरौ पादौ विद्यात् ॥

युग्मावष्टाक्षरौ पादावयुजौ द्वादशाक्षरौ ।
सा सतोबृहती नाम ॥ ५७ ॥

यस्या युग्मौ द्वितीयचतुर्थौ पादावष्टाक्षरौ भवतः । अयुजौ प्रथमतृतीयौ द्वादशाक्षरौ । सा पङ्क्तिः सतोबृहती नाम वेदितव्या । मा ते राधांसि मा त ऊतयो वसो[2] (ऋ० १ । ८४ । २०) ॥

विपरीता विपर्यये ॥ ५८ ॥

तेषां विपर्यये युग्मौ द्वादशाक्षरावयुजावष्टाक्षरौ । सा विपरीता पङ्क्तिर्नाम[3] वेदितव्या । य ऋष्वः श्रावयत्सखा (ऋ० ८ । ४६ । १२) ॥

आस्तारपङ्क्तिरादितः ॥ ५९ ॥

आद्यावष्टाक्षरौ[4] । अन्त्यौ द्वादशकौ[5] । सास्तारपङ्क्तिर्नाम । अग्निं न स्ववृक्तिभिः (ऋ० १० । २१ । १) इति[6] ॥

प्रस्तारपङ्क्तिरन्ततः ॥ ६० ॥

यस्या अन्त्यौ पादावष्टाक्षरौ[7] भवतः[8] । आद्यौ द्वादशकौ[9] ।

---

(१) अष्टाक्षरा पंक्तिरित्येवमादिषु (instead of आस्तार- to -षु) B^3; but on the margin is given आस्तारपंक्तिरादित इत्येवमादौ either as a correction or as a note. (२) मा त ऊतयो वसो omitted in B^2. इति added in I^2. (३) तेषां आदिपश्चाद्भावे विपरीता नामेति (instead of तेषां to नाम) I^2. Also cp. Reg. (४) B^2 adds पादौ यस्याः. (५) अन्त्यौ द्वादशकौ omitted in I^2. (६) इति omitted in B^3B^n. (७) यस्या अष्टाक्षरौ पादौ अंततः अंत्यौ (instead of यस्या to -क्षरौ) B^2. (८) भवतः omitted in B^2B^n. (९) आद्यौ द्वादशकौ omitted in I^2.

सा प्रस्तारपङ्क्तिर्नाम वेदितव्या[1]। महि द्यावापृथिवी भूतमुर्वी[2] (ऋ० १०।९३।१)॥

संस्तारपङ्क्तिर्मध्यतः॥ ६१॥

मध्येऽष्टाक्षरौ पादावाद्यान्त्यौ[3] द्वादशाक्षरौ भवतः। सा संस्तारपङ्क्तिर्नाम वेदितव्या[4]। पितुभृतो न तन्तुमित्सुदानवः[5] (ऋ० १०।१७२।३) इति[6]॥

विष्टारपङ्क्तिर्बाह्यतः॥ ६२॥

आद्यान्त्यौ[7] चाष्टाक्षरौ[8] मध्ये[9] द्वादशाक्षरौ[10] भवतः। सा विष्टारपङ्क्तिर्नाम वेदितव्या[11]। अग्ने तव श्रवो वयः (ऋ० १०।१४०।१) इति[12]॥

मन्ये त्वा मा ते राधांसि
य ऋष्व आग्निं महीति च।
पितुभृतो नाग्ने तव
ता ऋचोऽत्र निदर्शनम्॥ ६३॥

मन्ये त्वा यज्ञियम्[13] (ऋ० ८।९६।४)। मा ते राधांसि[14] (ऋ० १।८४।२०)। य ऋष्वः श्रावयत्सखा[15]

---

(१) B[3]B[n] omit वेदितव्या. (२) पितुभृतो न०। (instead of महि to उर्वी) B[2], एषा स्यावो मरुत इति। I[2]. (३) -द्यंतौ I[2]. (४) B[3]B[n] omit वेदितव्या. (५) B[3] omits इत्सुदानवः. (६) B[3]B[n] omit इति. (७) आद्यांतौ I[2]. (८) B[2] adds पादौ. (९) I[2] adds द्वौ. (१०) द्वादशकौ B[3]B[n]. (११) B[3]B[n] omit वेदितव्या. (१२) B[3]B[n] omit इति. (१३) B[3] adds यज्ञियानां. (१४) I[2], राधांसि मा त ऊतयो वसो B[3], राधांसि मा त B[n]. (१५) B[3]I[2], श्रावय B[n].

(ऋ० ८ । ४६ । १२) । अग्निं न स्ववृक्तिभिः (ऋ० १० । २१ । १) । महि द्यावापृथिवी[1] (ऋ० १० । ९३ । १) । पितुभृतो न तन्तुम्[2] (ऋ० १० । १७२ । ३) । अग्ने[3] तव[4] (ऋ० १० । १४० । १) । ता[5] ऋचोऽत्र निदर्शनं यथाक्रमम्[6] । पुरस्तादेव निदर्शितानि[7] ॥

चतुश्चत्वारिंशत् त्रिष्टुबक्षराणि चतुष्पदा ।
एकादशाक्षरैः पादैः ॥ ६४ ॥

चतुश्चत्वारिंशदक्षरैकादशाक्षरैः[8] पादैश्चतुष्पदा त्रिष्टुब्भवति । पिबा सोममभि यमुग्र तर्दः (ऋ० ६ । १७ । १)[9] ॥

द्वौ चेत्तु द्वादशाक्षरौ ।
प्रायस्योपजगत्येषा
परस्यास्य तु सा त्रिष्टुप् ॥ ६५ ॥

यदि द्वौ द्वादशाक्षरौ भवतः द्वावेकादशाक्षरौ । परस्य जागतस्य । प्रायसि भवा प्रायस्या[10] । जागत[11]प्राये वर्तमानेत्यर्थः । उपजगती नाम वेदितव्या । यथा । सो चिन्नु वृष्टिर्यूथ्या स्वा

---

(१) Bⁿ, भूतमुर्वी added in B³, वीतिवा added in I². (२) Bⁿ, तन्तुमित्सुदानवः B³. (३) नाग्ने (for न तन्तुम् । अग्ने) I². (४) I²; श्रवो in Bⁿ and श्रवो वयः in B³ added. (५) एता Bⁿ. (६) Bⁿ adds विराट्पंक्तीत्यादीनां. (७) -तानां Bⁿ. Instead of the Comm. मन्ये त्वा to -तानि, B² reads : उदाहरणानि उक्तानि । यथाक्रमं पुरस्तादेव ।. (८) B² adds चतुर्भिः. (९) I² adds इति. (१०) B², Reg., M. M. ; जागतस्य to प्रायस्या omitted in B³I²Bⁿ. (११) जागत- Reg., M.M. ; जागतं B² ; जगती- B³I²Bⁿ.

सचा (ऋ० १० । २३ । ४) इति[1] । अस्य तु[2] त्रिष्टुभः प्रायस्था[3] सा त्रिष्टुन्नाम्ना[4] वेदितव्या । यथा । सनेमि चक्रमजरं वि वावृते[5] (ऋ० १ । १६४ । १४)[6] ॥

वैराजजागतैः पादैर्या वाचेत्यभिसारिणी ॥ ६६ ॥

द्वौ दशाक्षरौ भवतः । द्वौ च[7] द्वादशाक्षरौ । अभिसारिणीसंज्ञा वेदितव्या । यो वाचा विवाचो मृध्रवाचः (ऋ० १० । २३ । ५)[8] ॥

नवको दशको वा स्या-
देकोऽनेकोऽपि त्रिष्टुभः ।
एकादशाक्षरश्चापि
विराट्स्थाना ह नाम सा ॥ ६७ ॥

त्रिष्टुभः पाद एकोऽप्यनेकोऽपि नवको वा[9] दशको वा स्यात् । एकादशाक्षरश्चैकोऽप्यनेको वा स्यात् ।[10] सा विराट्स्थाना नाम वेदितव्या । श्रुधी हवमिन्द्र मा रिषण्यः (ऋ० २ । ११ । १) इति[11] ॥

पूर्वौ दशाक्षरौ पादा उत्तरेऽष्टाक्षरास्त्रयः ।
विराट्पूर्वा ह नामैषा त्रिष्टुप् पङ्क्त्युत्तरैव वा ॥६८॥

---

(१) इति omitted in B³Bⁿ. (२) B² omits तु. I² adds सा after तु. (३) प्रायस्था M.M., P; प्रायस्थ B³B²I²Bⁿ. (४) B² adds च; struck out in B³. (५) चक्रं । B². (६) I² adds इति. (७) च I²; चेद् B³, Reg. (८) I² adds इति. (९) B² omits वा. (१०) Bⁿ adds : एतदुक्तं भवति यद्येको नवकः द्वौ दशकौ भवतः । एको दशकः द्वौ नवकौ । उभयत्राप्येकस्त्रैष्टुभः द्वौ चेत्त्रैष्टुभौ एकैकौ इतरौ ।. (११) इति omitted in B²Bⁿ.

यस्याः पूर्वौ द्वौ पादौ दशाक्षरौ भवतः । उत्तरे चाष्टा[1]क्षरा-स्त्रयो भवन्ति । एषा त्रिष्टुब् विराट्पूर्वा पङ्क्त्युत्तरा नाम वा वेदितव्या । यथा[2] । एवेन्द्राग्निभ्यामहावि हव्यम् (ऋ० ५ । ८६ । ६)[3] ॥

त्रयश्चैकादशाक्षरा एकश्चाष्टाक्षरः परः ।
विराड्रूपा ह नामैषा त्रिष्टुम्नाक्षरसंपदा ॥ ६९ ॥

यस्यास्त्रयः पादा एकादशाक्षरा एकश्चापरोऽष्टाक्षरः[4] सा विराड्-रूपा नाम त्रिष्टुब् वेदितव्या । यद्यप्यक्षरसंपन्नास्ति । उक्तं हि ।

त्रिष्टुभो या विराट्स्थाना विराड्रूपास्तथापराः[5] ।
बहूना अपि ता ज्ञेयास् त्रिष्टुभो ब्राह्मणं तथा[6] ॥ इति ।

क्रीळन्नो रश्म आ भुवः (ऋ० ५ । १९ । ५) इति[7] ॥

त्रयश्च द्वादशाक्षरा एकश्चाष्टाक्षरः क्वचित् ।
एषा ज्योतिष्मती नाम ततो ज्योतिर्यतोऽष्टकः ॥ ७० ॥

यस्यास्त्रयः पादा द्वादशाक्षरा एकश्चाष्टाक्षरः क्वचिद्भवत्येषा त्रिष्टुप् ज्योतिष्मती नाम वेदितव्या । यतोऽष्टकः पादस्ततो ज्योति-रित्युच्यते । यथा[8] । यद्वा यज्ञं मनवे संमिमिक्षथुः (ऋ० ८ । १० । २)

---

(१) उत्तरेष्टा- B^3B^n. (२) यथा omitted in B^n. (३) इति added in I^2. (४) एकश्चाष्टाक्षरः परः B^2. (५) विराड्रूपा तथापरा B^n, विराड्रूपास्तथापरे P. (६) बहूना अपि (आपि B^n) ता ज्ञेया (विराड्ज्ञेया B^3, विज्ञेया B^2) त्रिष्टुभो ब्राह्मणं तथा $B^3B^2B^n$, Reg., M.M. ; बहून्यपि विराड्ज्ञेया त्रिष्टुभोस्तथा (ब्राह्मण supplied on the margin) I^2 ; बहूना अपि ता ज्ञेयास्त्रिष्टुभो ब्राह्मणे हि ताः P. (७) इति omitted in B^3B^n. (८) B^2, यथा omitted in $B^3I^2B^n$.

इति[1] मध्येज्योतिः । अग्निनेन्द्रेण वरुणेन विष्णुना (ऋ० ८ । ३५ । १) इत्यु[2]परिष्टाज्ज्योतिः ॥

चत्वारोऽष्टाक्षराः पादा एकश्च द्वादशाक्षरः ।
सा महाबृहती नाम ॥ ७१ ॥

यस्या अष्टाक्षराश्चत्वारः पादा एकश्च द्वादशाक्षरः सा त्रिष्टुब्[3] महाबृहती नाम वेदितव्या । यथा[4] । नमोवाके प्रस्थिते अध्वरे नरा (ऋ० ८ । ३५ । २३) ॥

यवमध्या तु मध्यमे ॥ ७२ ॥

आद्यावष्टाक्षरौ तृतीयो द्वादशाक्षरश्[5] चतुर्थपञ्चमौ चाष्टाक्षरौ सा त्रिष्टुब्[6] यवमध्या नाम वेदितव्या[7] । यथा[8] । बृहद्भिरग्ने अर्चिभिः (ऋ० ६ । ४८ । ७)[9] ॥

सो चिन्नु सनेमि शुध्येव क्रीळन्यद्वाग्निनेन्द्रेण ।
नमोवाके बृहद्भिश्च ता ऋचोऽत्र निदर्शनम् ॥७३॥

उक्तान्येवोदाहरणानि ॥

पञ्चाशज्जगती द्व्यूना चत्वारो द्वादशाक्षराः ।
तदस्या बहुलं वृत्तम् ॥ ७४ ॥

---

(१) I², इति omitted in B³B²Bⁿ. (२) I², इति omitted in B³B²Bⁿ. (३) Bⁿ, त्रिष्टुप् occurs after महाबृहती in B³B²I². (४) यथा omitted in B²Bⁿ. (५) Bⁿ, तृतीये द्वादशाक्षरे B³B². (६) B³Bⁿ, मध्ये द्वादशाक्षरे सति added in B², मध्ये द्वादशाक्षरो सति (instead of आद्यावष्टाक्षरौ to त्रिष्टुब्) I². (७) B²I², नाम ज्ञातव्या B³, ज्ञेया Bⁿ. (८) यथा omitted in B²Bⁿ. (९) I² adds इति.

द्वाभ्यामूनानि पञ्चाशदक्षराणि सा जगती नाम भवति । चत्वारः पादा द्वादशाक्षरा भवन्ति । तद् वृत्तं बहुलमस्याः प्रायेण भवति[१] । उदाहरणम्[२] । प्र देवमच्छा मधुमन्त इन्दवः (ऋ० ६ । ६८ । १)[३] ॥

महापङ्क्तिः षळष्टकाः ॥ ७५ ॥

यस्याः षट् पादा[४] अष्टाक्षरा[५] भवन्ति[६] सा जगती महापङ्क्तिरित्युच्यते ॥

अष्टकौ सप्तकः षट्को दशको नवकश्च वा ॥ ७६ ॥

द्वौ पादावष्टाक्षरौ । एकः सप्ताक्षरः । अपरः षडक्षरः । एको दशाक्षरः[७] । अन्यो[८] नवाक्षरः[९] । सा वा महापङ्क्तिः । सेहान उग्र पृतनाः (ऋ० ८ । ३७ । २) । सूर्ये विषम्[१०] (ऋ० १ । १९१ । १०)[११] ॥

महसतोबृहत्यर्धे व्यूहयोरेतयोः सह ।
संपाते त्वेति पादान्ते देववान्सप्तविंशके ॥७७॥

---

(१) B², बहुलं तद् वृत्तं जगती (instead of तद् वृत्तं to भवति) B³, तद्वृत्तं जगती I², बहुलं तद्वृत्तं जगती प्रायेण भवतीत्यर्थः Bⁿ. (२) B², अस्या उदाहरणम् B³I²Bⁿ. (३) -मंतः B². (४) षट् पादाः B², पादाः षट् Bⁿ, पादाश्च षट B³I². (५) अष्टाक्षरा Bⁿ, अष्टाक्षराः पादाः B², अक्षरा B³I². (६) B³Bⁿ, भवन्ति omitted in B²I². (७) दशाक्षरोन्यः (for एको दशाक्षरः) Bⁿ. (८) इतरे (for अन्यो) Bⁿ. (९) Bⁿ adds भवति. (१०) Bⁿ, विषं० । B³. विषमा स० । B². (११) The Comm. द्वौ पादौ to विषम् omitted in I², Paris MS., Berlin MS. 394 (cp. Reg.).

एतयोर्ऋचो:[१] सहाष्टाक्षर[२]द्वादशाक्षरयो: पादयो: सह व्यूह्ययो: सतो[३]र्महासतोबृहती नाम जगती वेदितव्या ॥

अस्मा ऊ षूभे यदिन्द्र सेहान उग्रेति षट् ।
आ य: पप्रौ विश्वासां च ता ऋचोऽत्र निदर्शनम् ॥ ७८ ॥

अस्मा ऊ षु प्रभूतये (ऋ० ८। ४१ । १)। उभे यदिन्द्र रोदसी (ऋ० १० । १३४ । १)। सेहान उग्र पृतना: (ऋ० ८ । ३७ । २)। इति[४] षट् । एता महापङ्क्तय: । आ य: पप्रौ भानुना रोदसी उभे (ऋ० ६ । ४८ । ६)। विश्वासां गृहपतिर्विशामसि[५] (ऋ० ६ । ४८ । ८)। एते महासतोबृहत्यौ[६] ॥

द्वावतिच्छन्दसां वर्गा उत्तरौ चतुरुत्तरौ ॥ ७९ ॥

जगत्या उत्तरावतिच्छन्दसां द्वौ वर्गौ चतुरुत्तरौ[७] वेदितव्यौ ॥

प्रथमातिजगत्यासां सा द्विपञ्चाशदक्षरा ॥ ८० ॥

आसां प्रथमा या द्विपञ्चाशदक्षरा सातिजगती नाम वेदितव्या । यथा[८] । तमिन्द्रं जोहवीमि मघवानमुग्रम्[९] (ऋ०८। ९७ ।१३) ॥

---

(१) B³B² add : महपंक्त्यो अर्द्धंष्टाक्षराद्युक्तलक्षणपादत्रये सति ; Bⁿ adds : महापंक्त्यो: अर्द्धं. (२) अष्टाक्षर- omitted in Bⁿ, सहाष्टाक्षर- omitted in B³. (३) सतोर् B², M.M. (a), Reg. ; इव सतो: B³Bⁿ ; इव I² ; एव Berlin MS. 394 (cp. Reg.). After सतो: Bⁿ adds : द्वादशाक्षरौ त्रयश्चाष्टाक्षरा अनिमेन यस्या: सा. (४) इत्याद्या: B². (५) -पति: । B². (६) Bⁿ adds : इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रट-पुत्रोव्वटकृते प्रातिशाख्यभाष्ये षोडशपटलं समाप्तम् ।. (७) चतुरक्षरौ B². (८) यथा omitted in B²I². (९) मघवानमुग्रम् omitted in B². इति यथा added in I².

षट्पञ्चाशत्तु शक्वरी ॥ ८१ ॥

षट्पञ्चाशदक्षरा शक्वरी भवति।[1] प्रो ष्वस्मै पुरोरथम्[2] (ऋ० १०। १३३। १)॥

षष्टिरेवातिशक्वरी ॥ ८२ ॥

षष्टिरक्षराण्यतिशक्वरी भवति। सुषुमा यातमद्रिभिः[3] (ऋ० १। १३७। १)॥

उत्तराष्टिश्चतुष्षष्टिः ॥ ८३ ॥

तस्या उत्तरा या सा चतु[4]ष्षष्टिरक्षराणि[5] भवति[6]। साष्टिर्नाम वेदितव्या[7]। त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मः (ऋ० २। २२। १) इति[8] ॥

ततोऽष्टाषष्टिरत्यष्टिः ॥ ८४ ॥

तत उत्तराष्टा[9]षष्टिरक्षराणि सात्यष्टिर्भवति। अया रुचा हरिण्या पुनानः (ऋ० ९। १११। १) इति[10] ॥

धृतिः पूर्वा द्विसप्ततिः ॥ ८५ ॥

अतिधृतेः[11] पूर्वा या द्विसप्तत्यक्षरा सा धृतिर्भवति। सखे सखायमभ्या ववृत्स्व (ऋ० ४। १। ३)[12]॥

षट्सप्ततिस्त्वतिधृतिः ॥ ८६ ॥

(१) B^2I^2 add अच्छा नो मित्रमहो देव देवान्. (२) -रथं ०। B^2; इति added in I^2. (३) यातमिति I^2. (४) I^2, उत्तरा (-रो B^n) या अष्टिः सा चतु- B^3B^n, उत्तरा याश्चतु- B^2. (५) -क्षरैः B^3B^n. (६) भवंति B^2I^2. (७) वेदितव्या omitted in B^3B^n. (८) इति omitted in B^3B^n. (९) उत्तरा या अष्टा- B^2. (१०) इति omitted in B^3B^n. (११) B^3B^n, तस्या अतिधृतेः B^2 and Reg., धृतिः I^2. (१२) I^2 adds इति.

यस्याः षट्सप्तत्यक्षराणि भवन्ति[1] सातिधृतिर्[2] भवति । स हि शर्धो न मारुतं तुविष्वणिः[3] (ऋ० १ । १२७ । ६) ॥

सर्वा दाशतयीष्वेताः ॥ ८७ ॥

एता अतिजगत्यादयः सर्वा दाशतयीषु विद्यन्ते ॥

उत्तरास्तु सुभेषजे ॥ ८८ ॥

उत्तरा या वक्ष्यन्ते ताः सुभेषज[4] ऋचो द्रष्टव्याः ॥

कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिस्तथा ।
षष्ठी चाभिकृतिर्नाम सप्तम्युत्कृतिरुच्यते ॥ ८९ ॥

कृतिः प्रकृतिः आकृतिः विकृतिः संकृतिः अभिकृतिः उत्कृतिः इति तथा[5] ॥

अशीतिश्चतुरशीतिरष्टाशीतिर्द्विनवतिः ।
षण्णवतिः शतं पूर्णमुत्तमा तु चतुःशतम् ॥ ९० ॥

कृत्यादीनामक्षरपरिमाणानि क्रमेण । अशीतिः चतुर[6]शीतिः अष्टाशीतिः द्विनवतिः षण्ण[7]वतिः । शतं पूर्णम् । उत्तमान्त्या चतुःशतमिति[8] ॥

तमिन्द्रं प्रो षु सुषुम त्रिकद्रुकेष्वया रुचा ।
सखे च स हि शर्धश्च मध्यमो वर्ग उच्यते ॥ ९१ ॥

---

(१) B[2] omits भवन्ति. (२) सातिधृतिर् B[2]B[n], अतिधृतिः सा B[3]I[2]. (३) I[2] omits तुविष्वणिः. (४) सुभेषजे ऋषौ B[2], Reg. (५) तथा omitted in B[3]B[n]. (६) -रा- I[2]. (७) -ण्न- B[3]I[2]. (८) कृत्यादीनामक्षरपरिमाणं स्पष्टं (instead of कृत्यादीनाम् to इति) B[2]; चतुरशीतिः to इति omitted in B[n]; इति omitted in B[3]. (cp. Reg.).

तास्तु यथाक्रमं पुरस्तादेवो[1]दाहृताः ॥

आ सु कृतिस्तु प्रकृतिर्ध्रुवं पूर्वा ततस्तु या ।
आकृतिर्यदि ते मात्रा मेषी विकृतिरुच्यते ॥
संकृतिस्तु न वै तत्र देवो अग्निस्त्वभिकृतिः ।
सर्वस्येत्युत्कृतिस्तत्र तृतीयो वर्ग उच्यते ॥ ९२ ॥

कृतिः । आ सुरैतु परावतः (cp. प्रै० पृ० १२३,१२५) इति[2] । प्रकृतिः । ध्रुवं पूर्वा (cp. प्रै० पृ० १२४-१२५) इति । ततः प्रकृतेः परा या[3]कृतिः । यदि ते मात्रा (cp. प्रै० पृ० १२४-१२५) इति । मेषी (cp. प्रै० पृ० १२४-१२५) इति[4] विकृतिरुच्यते । संकृतिस्तु न वै तत्र । तस्मिन् सुभेषजेऽपि न विद्यते । एवं प्रायेण वर्णयन्ति । केचिद्वर्णयन्ति । संकृतेः—न वै (प्रै० पृ० १२४) इत्येतदु[5]दाहरण-मिति[6] । अभिकृतिः । देवो अग्निः स्विष्टकृत् (प्रै० पृ० १२४) इति[7] । उत्कृतिः । सर्वस्य (cp. प्रै० पृ० १२४-१२५) इति[8] ।

---

(१) एवो- $B^3 I^2$, Reg.; उ० B^2; तत्तल्लक्षणे उ B^n. (२) आ सुरैतुपरावत इति I^2; आ सुरैरु परावत इति $B^3 B^n$; आ सुरैरु परावेति B^2; आ सुरैतु परा वेति Reg.; आ सुरैतु परा च M.M. (a). (३) याः B^2, आ-B^n. (४) $B^3 B^n$ omit इति. (५) न वै इत्येतद् B^3; न वा इत्येतद् B^n; न वै तद् I^2; नवै तत्र इत्येतद् B^2, Reg. (६) B^n omits इति. (७) B^2 omits इति. (८) A comparison of प्रै० (pages 123-125) shows that the text of Sūtra 92, adopted here in accordance with the Comm., is not quite the original one. It seems that the author of the Comm. was not aware of the quotations, given here, in their original. For further details on this point see Additional Notes.

अपदक्रम आम्नातत्वादिह संज्ञाभिरुदाहृताः । अत्रास्यामुक्तौ तृतीयो वर्गः समाप्यते ॥

इति श्री[1]पार्षद्व्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र उवट-[2] कृतौ[3] प्रातिशाख्यभाष्ये षोडशं पटलम्[4] ॥

---

(१) I^2 omits श्री-. (२) -पुत्रोवट- B^2. (३) -कृते B^n. (४) B^2, समाप्त॰ added in $B^3 I^2 B^n$. This colophon is given in B^n as a foot-note from ख पुस्तक.

एवं क्लृप्तप्रमाणानां छन्दसामुपदिश्यते ॥ १ ॥

एवं क्लृप्तप्रमाणानां चतुर्विंशत्यक्षरादीनां चतुरुत्तराणां चतुःशतपर्यन्तानामेकविंशति[1]च्छन्दसां कश्चिद्विशेष उपदिश्यते ॥

कोऽसौ विशेषः ।

एकद्व्यूनाधिका सैव निचृदूनाधिका भुरिक् ॥ २ ॥

एकेन द्वाभ्यां वोना[2] निचृद्भवति । एकेन द्वाभ्यां[3] वा[4] ऋग्[5] अधिका सा[6] भुरिग्भवति । यः शुक्रइव सूर्यः (ऋ० १ । ४३ । ५) इति[7] निचृत् । परि धामानि यानि ते (ऋ० ९ । ६६ । ३) इति[8] भुरिक् ॥

विराजस्तूत्तरस्याहुर्द्वाभ्यां या विषये स्थिताः ।
स्वराज एवं पूर्वस्य याः काश्चैवंगता ऋचः ॥ ३ ॥

द्वाभ्यामक्षराभ्यां या ऋचोऽधिका न्यूना वा[9] विषये मध्ये[10] स्थिता उत्तरस्य पूर्वस्य च[11] च्छन्दसः । विराजस्ता आहुरुत्तरस्य । स्वराजः पूर्वस्य । यथा षड्विंश[12]त्यक्षरा ऋचो गायत्रीप्राये स्वराजो गायत्र्यो भवन्ति । उष्णिक्प्राये विराज उष्णिहो भवन्ति । यथा । जोषा सवितर्यस्य ते (ऋ० १० । १५८ । २) इति[13] स्वराड्गायत्री । अतिथिं मानुषाणाम् (ऋ० ८ । २३ । २५) इति[14] विराडुष्णिक् । उत्तरत्रापि याः काश्चैवंगता[15] ऋचो भवन्ति ॥

---

(१) B^2 adds संख्या. (२) द्वाभ्यां वा ऊना $B^3B^2I^2$, ऊना B^n. (३) B^n omits द्वाभ्यां. (४) वा B^2B^n, वां B^3, या I^2. (५) ऋग् omitted in B^2B^n. (६) B^2 omits सा. (७) B^3B^n omit इति. (८) B^n omits इति. (९) I^2 omits न्यूना वा. (१०) मध्ये I^2B^n and Reg., omitted in B^3B^2. (११) B^2 omits च. (१२) षट्त्रिंश- B^3. (१३) B^2 omits इति. (१४) इति omitted in B^2I^2. (१५) एता एव added in B^n.

याः काश्चिद्बहुपादास्तु गायत्र्यो हीनतां गताः ।
अक्षरैर्बहुभिस्तास्तु गायत्र्य उपधारयेत् ॥ ४ ॥[1]

गायत्र्यो द्वाभ्यां त्रिभिश्चतुर्भिः पञ्चभिर्वा न्यूनाः सत्यो[2] गायत्र्य एव विराजो भवन्ति। पूर्वस्य च्छन्दसोऽभावात्। भगवतोभय-[3] च्छन्दसां मध्ये तदु[4]क्तम्[5] ॥

ताराड् विराट् स्वराट् सम्राट् स्ववशिनी परमेष्ठी ।
प्रतिष्ठा प्रत्नममृतं वृषा शुक्रं जीवं पयः ॥
तृप्तमर्णोंऽशोऽम्भोऽम्बु वार्यापश्चोदकमुत्तमम् ॥५॥

विषये[6] स्थिता द्वाभ्यां ता इमाः। ताराट्। विराट्। स्वराट्। सम्राट्। स्ववशिनी। परमेष्ठी। प्रतिष्ठा। प्रत्नम्। अमृतम्। वृषा। शुक्रम्। जीवम्। पयः। तृप्तम्। अर्णः। अंशः। अम्भः। अम्बु। वारि। आपः[7]। उदकम्। इति यथैकविंशतिर्विराजश्च[8] द्वाविंशत्यक्षरादयो द्विशताक्षरपर्यन्ताः। एवं स्वराजः[9] ॥

दैवतं छन्दसामत्र वक्ष्यते तत उत्तरम् ।
अग्नेर्गायत्र्यतोऽधि द्वे भक्त्या दैवतमाहतुः ।
सप्तानां छन्दसामृचौ ॥ ६ ॥

---

(१) After उपधारयेत्। (text) B^3 has अक्षरैर्बहुभिस्ताश्च गायत्र्य उपधारयेत् with marks of deletion; it is struck out in I^2. (२) B^n, संत्ये B^3B^2, संत्यो corrected to सत्यो in I^2. (३) भगवता तु I^2. (४) भगवता उभयसंभवे ह्येतत् (instead of भग- to तद्) Reg. (५) B^n, गायत्र्यो द्वाभ्यां to उक्तम् is given at the end of the preceding Sūtra's Comm. in $B^3B^2I^2$ and Boroooah; cp. Reg. (६) या विषये Reg. (७) अपः B^3I^2. (८) विराजःश्च corrected to विराजः स्वराजश्च by supplying स्वराज on the margin in I^2. (९) B^n and Boroooah, एवं स्वराजः omitted in B^3I^2, काश्च एवंगता ऋचः B^2.

ताराडादीनां छन्दसामुत्तरं गायत्र्यादीनामतिच्छन्दसां[1] च[2] देवताः कथ्यन्ते । अग्नेर्गायत्र्यभवत्सयुग्वा (ऋ० १० । १३० । ४) इत्यत आरभ्य द्वे ऋचौ छन्दसां भक्त्या दैवतमाहतुः सप्तानाम् । तस्मादग्नेर्गायत्री भवति[3] । साविर्त्र्युष्णिक् । सौम्यनुष्टुप् । बार्हस्पत्या बृहती[4] । मैत्रावरुणी विराट् । ऐन्द्री त्रिष्टुप् । वैश्वदेवी जगती।

छन्दसां देवताज्ञाने[5] धर्मः[6] प्रयोजनं भवत्येव । संशये छन्दसां दैवतेनाध्यवसायो भवति । यथा—तव स्वादिष्ठा (ऋ० ४ । १० । ५) शिवा नः सख्या (ऋ० ४ । १० । ८) इत्युष्णिगनुष्टुभोर्मध्ये—घृतं न पूतम् (ऋ० ४ । १० । ६) इति षड्विंशत्यक्षरे द्वे ऋचौ दैवतेन स्वराजौ गायत्र्यावध्यवसीयेते । न विराजावुष्णिहौ ॥

न पङ्क्तेः ॥ ७ ॥

पङ्क्तेर्दैवतमेते ऋचौ नाहतुः । सप्तसु मध्ये यस्मात्पङ्क्तिस्तस्मादिदमुच्यते ॥

सा तु वासवी ॥ ८ ॥

सा पङ्क्तिर्वासवी वेदितव्या ॥

प्राजापत्या त्वतिच्छन्दा ॥ ९ ॥

यातिच्छन्दा ऋक्सा प्राजापत्या वेदितव्या ॥

विच्छन्दा वायुदेवता ॥ १० ॥

या विच्छन्दा ऋक्सा वायुदेवता[7] वेदितव्या ॥

द्विपदा पौरुषं छन्दः ॥ ११ ॥

---

(१) B²B³, अतिछंदानां corrected to अतिछंदसां in I², छंदसां Bⁿ. (२) I² omits च. (३) भवतीति I², omitted in B². (४) बार्हस्पत्या बृहती B²I², बृहती बार्हस्पत्या B³Bⁿ. (५) दैवतज्ञाने Bⁿ. (६) धर्म I². (७) B²I², -दैवता B³Bⁿ.

या द्विपदा ऋक्सा पौरुषी वेदितव्या ॥

ब्राह्मी त्वेकपदा स्मृता ॥ १२ ॥

यैकपदा ऋक्सा ब्राह्मी स्मृता ॥

एतेनैव क्रमेणैषां वर्णतो भक्तिरुच्यते ॥ १३ ॥

येन क्रमेण च्छन्दसां दैवतमुक्तं तेनैव क्रमेणैषां वर्णतो भक्तिरुच्यते ॥

श्वेतं च सारङ्गमतः पिशङ्गं कृष्णमेव च ।
नीलं च लोहितं चैव सुवर्णमिव सप्रभम् ।
अरुणं श्यामगौरे च बभ्रु वै नकुलं तथा ॥ १४ ॥

श्वेतं शङ्खवर्णं गायत्रम् । सारङ्गं द्विवर्णं कृष्णशुक्लम्[1] औष्णिहम् । पिशङ्गं रोचनावर्णमानुष्टुभम् । कृष्णमगुरु[2]वर्णं बार्हतम् । नील-मुत्पलवर्णं वैराजम् । लोहितमिन्द्रगोपवर्णं त्रैष्टुभम् । सुवर्णरूप-[3]वर्णं जागतम् । अरुणं प्रातःसंध्याभ्रवर्णं पाङ्क्तम् । श्यामं शुक-वर्णम्[4] अतिच्छन्दः । गौरं सिद्धार्थवर्णं विच्छन्दः । बभ्रु कपि-लवर्णं द्वैपदं छन्दः । नकुलं[5] नकुलवर्णमेकपदं[6] छन्दः । एतावता[7] देवताक्रमेण विधिः[8] ॥

---

(१) B² and Reg., द्विवर्णं शुक्लकृष्णसारंगम् Bⁿ, शुक्लकृष्ण-द्विवर्णं सारङ्गम् Borooah, सार्धचन्द्रवर्णं सारंगं द्विवर्णम् I², चंद्रवर्णं सारंगम् (चंद्र- corrected on the margin to द्विकृष्णशुक्ल-)B³. (२) अगरु- B², अरुण- Paris MS., एगु- corrected to एव in Berlin MS. 394 (cp. Reg.). (३) -सुरूप- B², -सरूप- Reg. (४) शुकवर्णम् Reg., कृष्णशुकवर्णम् Borooah, शुक्ल-वर्णम् corrected to कृष्णवर्णं in B², कृष्णवर्णं B³Bⁿ,शुक्लवर्णं I² and Berlin MS. 394 (cp. Reg.). (५) नकुलं omitted in Bⁿ, Borooah. (६) -पद- I². (७) -वतो Bⁿ, Borooah. (८) वर्णविधिः B².

पृश्निवर्णं तु वैराजम् ॥ १५ ॥

पृश्निवर्णं बहुवर्णं चित्रं[1] वैराजम्। अथ कस्माद्वैराजस्य द्विवर्णोपदेशः क्रियते। तत्र[2] क्रमेणैव नीलत्वं सिद्धम्[3]। न सिध्यति। कथम्। एतास्तिस्रो विराजोऽनुष्टुबेका पङ्क्तिरेका द्वाभ्यां न्यूना चैका। तत्र पूर्वयोर्नीलो[4] वर्णः। अस्याः पृश्निरिति वेदितव्यम्। एवमपि कथमेतदध्यवसीयते पूर्वयोर्नीलः अस्याः पृश्निरिति। निचृद्भुरिजोर्न्यूनाधिकयोः सहो[5]पदेशादस्याः पृश्निर्भवति[6]। परिशेषादितरयोर्नील इत्यध्यवसीयते। तयोरप्येकं[7] क्रमात्[8] पङ्क्तेरेव विराजो नीलत्वं मन्यन्ते।

निचृच्छ्यावम् ॥ १६ ॥

कृमिदूपितपत्रवर्णं[9] निचृद्भवति ॥

पृषद्भुरिक् ॥ १७ ॥

विन्दुमद्[10] भुरिग्भवति ॥

ब्रह्मसामर्ग्यजुश्छन्दः कपिलं वर्णतः स्मृतम् ॥ १८ ॥

---

(१) I^2 and Berlin MS. 394, -वर्णंचित्रं B^3B^n and Borooah, -वर्णं चित्रवर्णं B^2 and Reg. (२) तच्च B^2. (३) सिध्यति (marg.) I^2. (४) नील- B^3B^n, Borooah. (५) समीपे- B^n, Borooah. (६) B^3B^2, पृश्निरिति B^n and Borooah, पृथग्भवति I^2. (७) अपरे तयोरप्येक- Reg. (८) क्रमत्वात् Reg. (९) $B^3B^2B^n$ and Borooah, कृमिदूपितदर्भवर्णं I^2, कृमिदूपितदन्तवर्णं M. M. (a), कृमिदूपितं दंतवर्णं Berlin MS. 394, कृमिदूपितदंदर्भस्तवर्णं Paris MS. (cp. Reg.). (१०) B^2I^2 and Reg., विद्रुमवत् B^n and Borooah, विद्रुमवत् corrected to विंदुमत् in B^3.

ब्रह्मणः सामर्ग्यजुषां च छन्दो वर्णतः[1] कपिलं जटाकलापवर्णं[2] स्मृतम् ॥

मा प्रमा प्रतिमोपमा संमा च चतुरक्षरात् ।
चतुरुत्तरमुद्यान्ति पञ्च छन्दांसि तानि ह ॥ १८ ॥

मा प्रमा प्रतिमा उपमा संमा चेति चतुरक्षराच्चतुरुत्तराणि । तानि[3] गायत्र्याः पूर्वाणि पञ्च छन्दांसि वेदितव्यानि ॥

हर्षीका सर्षीका मर्षीका सर्वमात्रा विराट्कामा ।
द्व्यक्षरादीनि मादीनां वैराजान्यनुचक्षते ॥ २० ॥

इत्येतानि च द्व्यक्षरादीनि चतुरुत्तराण्यष्टादशाक्षरपर्यन्तानि[4] मादीनां वैराजान्यनुचक्षते ॥

अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम् ।
विद्याद्विप्रतिपन्नानां पादवृत्ताक्षरैर्ऋचाम् ॥२१॥

पादैर्वृत्तैरक्षरैश्च विप्रतिपन्नानामृचां सर्वत्र बलवत्तरं निमित्तमक्षराण्येव विद्यात् । यथा । सूर्ये विषमा सजामि (ऋ० १ । १९१ । १०) । पादैर्विप्रतिपन्नास्तिस्रोऽक्षरैर्जगत्योऽध्यवसीयन्ते[5] । यथा[6] । नवानां नवतीनाम् (ऋ० १ । १९१ । १३) इति पङ्क्तिः । यथा

---

(१) वर्णतः omitted in B²I². (२) I², M.M., Reg.; जटाकलापसूर्यरश्मिवर्णं B³ B² Bⁿ, Borooah (-कलापं Borooah). (३) चतुरक्षराच्चतुरक्षरादारभ्य चतुरुत्तराणि (-क्षराच्चतु- corrected to -क्षरादारभ्य चतु-) आत्तानि (for चतुरक्षराच्चतुरुत्तराणि तानि) I². (४) अष्टादशाक्षरपर्यन्तानि omitted in I². (५) ननु च अष्टकौ सप्तकः षट्क (षट् B²) इति ये पठंति तेषामुदाहरणं न भवति। तेषां । शिवा नः सख्या संत्विति । added in B² and Reg. (with marks of deletion in B²). (६) यथा omitted in B³Bⁿ, given on the margin in I².

च[1] । अभ्रप्रुषो न वाचा प्रुषा वसु (ऋ० १० । ७७ । १) इति वृत्तैर्विप्रतिपन्नाक्षरैस्त्रिष्टुबध्यवसीयते । यथा[2] —यास्ते प्रजा अमृतस्य (ऋ० ९ । ४३ । ९) इत्यनुष्टुप् । यथा च । ये नः सपत्ना अप ते भवन्तु (ऋ० १० । १२८ । ९) इति त्रिष्टुप्प्राये चा[3]क्षरैरेव जगत्यध्यवसीयते[4] ॥

व्यूहेदेकाक्षरीभावान्पादेषूनेषु संपदे ॥ २२ ॥

ऊनेषु पादेषु संपदि[5] कर्तव्यायाम्[6] एकाक्षरीभावान्[7] संधीन्व्यूहेत्पृथक्कुर्यादित्यर्थः । प्रेता जयता नरः (ऋ० १० । १०३ । १३) । सास्माकेभिरेतरी न शूषैः (ऋ० ६ । १२ । ४) इति यथा[8] । ऊनेष्विति किम् । सेमं यज्ञं मधुमन्तं कृधी नः (ऋ० ३ । ४ । २) । संपद[9] इति कस्मात् । आ इ[10]तायामोप गव्यन्त इन्द्रम्[11] (ऋ० १ । ३३ । १) इत्यत्र त्रय एकीभावास्तत्र[12] पूर्वस्यैव व्यूहेन संपत्सिद्धेरुत्तरयोर्[13] न कर्तव्यो भवति ॥

क्षैप्रवर्णांश्च संयोगान्व्यवेयात्सदृशैः स्वरैः ॥ २३ ॥

क्षैप्रवर्णांश्च[14] संयोगान् । सान्तःस्थान्संयोगानित्यर्थः । व्यवेयात् । व्यवधानं कुर्यादित्यर्थः । सदृशैः समानस्थानैः स्वरैः । त्र्यम्बकं यजा-

---

(१) यथा च omitted in B^n. (२) यथा B^n, तथा $B^3I^2B^2$ and Reg. (३) After च I^2 supplies अक्षरैर्विप्रतिपन्ना on the marg. (४) B^n adds तथा मां धुरिन्द्रं नाम देवतेति जगती प्रायवृत्ताभ्यां विप्रतिपन्नापि त्रिष्टुप् I. (५) संपदां या I^2, संपदा Berlin MS. 394. (६) कर्तव्या I^2, Berlin MS. 394. (७) -भावा B^2.. (८) इति यथा omitted in B^3B^n. (९) संपदि B^2. (१०) आ । ए B^2. (११) B^2 omits इन्द्रम्. (१२) त्रय एकीभावाः । तत्र p; त्रय एकीभावा B^nI^2 (त्रय on the margin in I^2); एकीभावात् B^3B^2, Reg. (१३) व्यूहो added on the marg. in I^2. (१४) -वर्णां I^2.

महे (ऋ० ७। ५६। १२)। उद्वृत्स्वस्मा अकृणोतना तृणम् (ऋ० १। १६१। ११)। गोर्न पर्व वि रदा तिरश्चा (ऋ० १। ६१। १२)। पादेषूनेष्विति च्छन्दसः[१] संपद इत्ये[२]वानुवर्तते। ऊनेष्विति कस्मात्। प्रत्यग्रभीष्म नृतमस्य नृणाम् (ऋ० ५। ३०। १२)। संपद इति[३] कस्मात्। अगोह्यस्य यदसस्तना गृहे (ऋ० १। १६१। ११) इत्यत्र द्वौ चैप्रवर्णसंयोगौ। तत्र पूर्वेण[४] व्यवायेन संपदः[५] सिद्धेरुत्तरस्मिन्न कर्तव्यो भवति।

अत्र केचित् चैप्रसंधिकृतानन्तःस्थासंयोगान्व्यूहेत्। एकाक्षरीभावानित्येवं सिद्ध[६] इति मन्यन्ते। तेषाम्—उद्वृत्स्वस्मा अकृणोतना तृणम् (ऋ० १।१६१।११) इति व्यूहः[७] कर्तव्यः। तत्सदृशैः[८] स्वरैर्व्यवायः।[९] अस्य[१०] तु ये[११] स्वाभाविका अन्तःस्था-[१२]संयोगास्त उदा[१३]हरणत्वेन भवन्ति। यथा। त्वमद्भ्यस्[१४] त्वमश्मनस्परि (ऋ० २।१।१) इति[१५]। गोर्न पर्व वि रदा तिरश्चा (ऋ० १।६१।१२) इति।

अयं व्यवायो यकारवकारसंयोग एवेष्यते। रेफलकारसंयोगयोर्न। कथं ज्ञायते। अयं ध्रुवो रयीणां चिकेत यत् (ऋ० ८।१०२।४)

---

(१) छन्दसः omitted in Reg. (२) संपदीत्ये- B², Reg. (३) संपदीति B². (४) पूर्वेण corrected to पूर्वस्मिन् in I². (५) B² and Reg., संपद I², संपत् B³Bⁿ. (६) सिद्धे Bⁿ, Borooah. (७) व्यूहो न B². (८) न वा तत्सदृशैः B². (९) नास्य ते महिमानमिति यथा added in B², cp. also Reg. (१०) अस्यां B². (११) ये प्रश्न I². (१२) I² and Reg., अन्तस्थाः B², अन्तस्थ- B³Bⁿ and Borooah. (१३) B²I² and Reg., तेष्युदा- B³, ते तूदा- Bⁿ and Borooah. (१४) त्वमद्भिस् B³I². (१५) I² omits इति.

इत्यत्र दीर्घत्वप्रतिषेधार्थम्—जामिषु जासु[1] चिकेत (८।४५) इति चिकेतशब्दस्य पाठात् ॥

पदाभेदेन पादानां विभागोऽभिसमीक्ष्य तु ।
छन्दसः संपदं तां तां यां यां मन्येत पादतः ॥ २४ ॥

छन्दसां पादतो यां यां संपदं मन्येत तां तां सम्यक्पूर्वमभिसमीक्ष्य पादांश्च पश्चात्पदानामभेदेन पादानां विभागः कर्तव्यः । यद्यप्युत्तरैः पादज्ञानहेतुभिर्विरोधो भवति । यथा । माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य[2] (ऋ० ८।३७ १) इत्येतयोः पादयोः पदभेदेनाष्टाक्षरयोः क्रियमाणयोर्यद्यपि प्रायवृत्तसंपद्भवति । अनादृत्य तां माध्यंदिनस्य सवनस्येत्येवं विभागः कर्तव्यः । तथा—एकराळस्य भुवनस्य (ऋ० ८।३७ ३) इति विभागः कर्तव्यः[3] ।

प्रायोऽर्थो वृत्तमित्येते पादज्ञानस्य हेतवः ॥ २५ ॥

प्रायोऽर्थो वृत्तमित्येते पादज्ञानस्य हेतवो भवन्ति । त्रिष्टुभः प्रायः[4]—गोर्न पर्व वि रद (ऋ० १ ६१।१२) इति प्रकृत्या[5] दशाक्षरो व्यूहेनैकादशाक्षरः[6] क्रियते । तथार्थः । स गृणानो अद्भिर्देव[7]वान् (ऋ० १०।६१ २६) इति । तथा वृत्तम् । अलाय्यस्य परशुर्ननाश तम् (ऋ० ९।६७।३०) इति प्रकृत्यैकादशाक्षरो[8] विकर्षेण द्वादशाक्षरः क्रियते । वृत्तादेव—अर्यो गिरः सद्य आ जग्मुषीरा (ऋ० १। १२२।१४) इति[9] पादान्तः ॥

विशेषसंनिपाते तु पूर्वं पूर्वं परं परम् ॥ २६ ॥

---

(१) B^3I^2 omit जासु. (२) -न- omitted in B^n. (३) I^2 omits कर्तव्यः. (४) प्रायो $B^3I^2B^n$, प्राये B^2 and Reg. (५) B^2 and Reg., प्रकृत्या omitted in $B^3I^2B^n$. (६) दशा- to -क्षरः omitted in B^2. (७) अद्भिर्देव- B^3. (८) दशाक्षराद्व्यूहेनैकादशाक्षरः added in B^3. (९) जग्मुषीरिति B^n.

एतेषामेव विशेषाणां संनिपाते तु पूर्वं निमित्तं पूर्वं भवति। परं निमित्तं परं भवति। पूर्वो हेतुरुत्तराद्बलीयानित्यर्थः। त्वं चकर्थ मनवे स्योनान् (ऋ० १०।७३।७) इत्यत्र प्रायो[1]ऽर्थयोर्विरोधे प्राय-[2] बलीयस्त्वादस्मात्[3] स्योनानिति पादान्तः। येषां पुनरर्थो बलीयां-स्तेषाम्—मनवे स्योनान्पथः (ऋ० १०।७३।७) इति पादान्तो गम्यते। प्रायबलीयस्त्वादेव—ऊर्ध्वो वाजस्य सनिता यदञ्जिभिः (ऋ० १।३६।१३) इति पादान्तः।[4] न सनितेति[5]।

[6]प्रायवृत्तविरोधे प्रायबलीयस्त्वात्—प्रत्यग्रभीष्म नृतमस्य नृणाम् (ऋ० ५।३०।१२) इति पादान्तः। एकादशाक्षर एव भवति। न वृत्ताद्विकृष्यते। अर्थवृत्तविरोधेऽर्थबलीयस्त्वात्—यदग्ने स्यामहं त्वम्[7] (ऋ० ८।४४।२३) इति पादान्तः। न वृत्तादहमिति। एवं सर्वत्र बलाबलमभिसमीक्ष्य पादं जिज्ञासेत्॥

अनुदात्तं तु पादादौ नोवर्जं विद्यते पदम्॥ २७॥

चतुःषष्ट्यां पादादावनुदात्तं पदं न विद्यते।[8] उकारस्तु विद्यते। यथा। उ लोककृत्नुमद्रिवो हरिश्रियम् (ऋ० ८। १५। ४)। उ लोको यस्ते अद्रिवः (ऋ० ३। ३७। ११)।[9] अयमपि पादा-न्तज्ञाने[10] हेतुरेव सर्व[11]हेतुभ्यो बलवत्तमः। तस्मात्सर्वान्बाधित्वा—

---

(१) प्राया- Reg. (२) प्रायो- B[n], Borooah. (३) B[3]I[2] B[n], अस्मात् omitted in B[2] and Reg., अस्माकं Borooah. (४) B[2] adds अर्थतः।. (५) न सनिता B[3]B[n], corrected to न सनितति (*sic*) in I[2], सनितेति B[2]. (६) I[2] reads here the passage अयमपि पादान्त- to त्वमवासि इति पादान्तः (given below under Sūtra 27). (७) त्वं त्वम् B[3]. (८) उकारं वर्जयित्वा added on the marg. in I[2]. (९) I[2] adds निमित्तपूर्वो . (१०) -ज्ञान- B[3]B[n]. (११) सर्वत्र B[3].

व्रतो व्रतासि यम नैव ते[1] (ऋ० १० । १० । १३) इति पादान्तः । तथा—त्त्राय त्वमवसि (ऋ० ८ । ३७ । ६) इति पादान्तः ॥

पादादावनुदात्तं तु यदन्यत्तदिहोदितम् ॥ २८ ॥

तु पुनः पादादौ यान्यनुदात्तानि पदानि तान्याचार्यः सूत्रे[2] पठति । वशेऽस्तीयच्चसि (१७ । २९) इत्येवमादयः[3] ॥

वशेऽस्तीयक्षसीत्येकम् ॥ २९ ॥

इदं चैकं[4] वश ऋषौ पादादावनुदात्तं पदमस्ति । इयच्चसि गाये त्वा नमसा गिरा (ऋ० ८ । ४६ । १७)[5] ॥

तृचे चाभिष्ट इत्यपि । नेति पूर्वाणि सर्वाणि ॥ ३० ॥

आभिष्ट इति च[6] तृचे नेतिपूर्वाणि सर्वाणि । आभिष्टे अद्य (ऋ० १० । ४ । ४) इत्येतस्मिंस्तृचे[7]ऽनुदात्तानि[8] सन्ति तानि सर्वाणि नेत्येवंपूर्वाणि[9] । स्तनयन्ति शुष्मा: (ऋ० ४ । १० । ४) । रोचत उपाके (ऋ० ४ ।१०। ५)। रोचत स्वधावः (ऋ० ४।१०।६) इति ॥

मधुच्छन्दस्यृतावृधौ ॥ ३१ ॥

मधुच्छन्दसि ऋषावृतावृधावित्येकमनुदात्तमस्ति । ऋतावृधावृतस्पृशा (ऋ० १ । २ । ८) इति ॥

स्तोमशब्दे परेऽधायि ॥ ३२ ॥

स्तोमशब्दे प्रत्यये[10]ऽधायीत्येकम्[11] अनुदात्तम्[12] अस्ति । अधायि स्तोमः (ऋ० ७ । ३४ । १४) ॥

---

(१) मन added in B³. (२) सूत्रो I². (३) B³B², इत्यादयः I²Bⁿ. (४) अनुदात्तं पदमस्ति added in I²Bⁿ. (५) I² adds इति. (६) B² omits च. (७) -स्मिन्तृचे B², -स्मिं तृचे I². (८) -त्तादीनि I². (९) नेत्येवंपूर्वाणि omitted in I²Bⁿ. (१०) B² omits प्रत्यये. (११) एकपदम् B³. (१२) अनुदात्तं पदम् B².

ऋतशब्दे परे स्निधत् ॥ ३३ ॥

ऋतशब्दे प्रत्यये स्नि[1]धदित्येकमनुदात्तमस्ति[2]। मा यज्ञो अस्य स्निधदृतायोः (ऋ० ७। ३४। १७) इति[3] ॥

हुवे तुराणां यत्पूर्वम् ॥ ३४ ॥

हुवे तुराणामिति[4] द्वैपदे यत्पूर्वं पदं तदनुदात्तम्। प्रिया वो नाम हुवे तुराणाम्[5] (ऋ० ७। ५६। १०) ॥

तृपन्मरुत उत्तरम् ॥ ३५ ॥

तृपन्मरुतो[6] द्वैपदे यदुत्तरं पदं तदनुदात्तमस्ति। मरुत इति। आ यत्तृपन्मरुतो वावशानाः (ऋ० ७। ५६। १०) ॥

प्रेदं ब्रह्मेति चैतस्मिन्सूक्ते पादोऽस्ति पञ्चमः।
सर्वानुदात्तः षट्स्वृक्ष्वादितश्च चतुर्दशः ॥ ३६ ॥

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ (ऋ० ८। ३७। १) इत्येतस्मिन्सूक्ते[7] षट्सु ऋक्षु सर्वानुदात्तः पादोऽस्ति पञ्चमः[8]। वृत्रहन्नवेध (ऋ० ८। ३७। १) इति। अस्यैव सूक्तस्यादितश्चतुर्दशः पादः स च सर्वानुदात्तोऽस्ति। राजसि शचीपते (ऋ० ८। ३७। ३) इति।

एवमिमे सप्त सर्वानुदात्ताः सन्ति। मधुच्छन्दस्येकः[9] —ऋता-वृधावृतस्पृशा (ऋ० १। २। ८) इति[10]। आभिष्ट इति च[11] तृच एकः[12]—रोचत स्वधावः (ऋ० ४। १०। ६) इति। एताभ्यां सह नव भवन्ति। न दशमः ॥

---

(१) ऽस्नि- B²Bⁿ. (२) पदमस्ति B². (३) इति omitted in B²Bⁿ. (४) इति omitted in B². (५) B² omits हुवे तुराणाम्।. (६) तृपन्मरुते I²Bⁿ. (७) प्रेदं ब्रह्मेति सूक्ते (instead of प्रेदं ब्रह्म to सूक्ते) I². (८) षट्सु ऋक्षु पंचमः पादः सर्वानुदात्तः अस्ति B². (९)-स्येदेकः B². (१०) B² omits इति. (११) B² omits च. (१२) च एकः स्यात् (for एकः) B².

पादौ गायत्रवैराजावष्टाक्षरदशाक्षरौ ॥ ३७ ॥

अष्टाक्षरदशाक्षरौ पादौ गायत्रवैराजौ विद्यात् ।

एकादशिद्वादशिनौ विद्यात् त्रैष्टुभजागतौ ॥ ३८ ॥

एकादशद्वादशाक्षरौ पादौ त्रैष्टुभजागतौ विद्यात् ॥

वर्षिष्ठाणिष्ठयोरेषां लघूपोत्तममक्षरम् ।
गुर्वेवेतरयोर्ऋक्षु तद् वृत्तं छन्दसां प्राहुः ॥३९॥

एषां पादानां वर्षिष्ठाणिष्ठयोरष्टाक्षरद्वादशाक्षरयोः पादयोरुपोत्तममक्षरं लघु भवति । यथा । अग्निमीळे पुरोहितम् (ऋ० १ । १ । १) । प्र देवमच्छा मधुमन्त इन्दवः (ऋ० ९ । ६८ । १) इति । इतरयोर्दशैकादशाक्षरयोरुपोत्तमं गुरु भवति । श्रुधी हवं विपिपानस्याद्रेः (ऋ० ७ । २२ । ४) । पिबा सोममभि यमुग्र तर्दः (ऋ० ६ । १७ । १) इति[१] । छन्दसामृक्षु तद्वृत्तमाहुराचार्याः ॥

एतैश्छन्दांसि वर्तन्ते सर्वाण्यन्यैरतोऽल्पशः ।
एतद्विकारा एवान्ये सर्वे तु प्राकृताः समाः ॥४०॥

एतैः पादैः सर्वाणि च्छन्दांसि वर्तन्ते । अत[२] एभ्योऽन्यैः पादैरल्पशो वर्तन्ते । ये त्वन्ये पादास्त एतेषामेव[३] पादानां विकारा भवन्ति । अष्टाक्षरात्पूर्वे पादास्ते गायत्रस्य[४] पादस्य विकारा भवन्ति । नवाक्षरो वैराजस्य विकारो यदि गुरूपोत्तमः । अन्यस्तु गायत्रस्यैव । त्रयोदशाक्षरप्रभृतिषु ये गुरूपोत्तमास्ते त्रैष्टुभस्य । ये लघूपोत्तमास्ते जागतस्य ।

---

(१) इति omitted in B²Bⁿ. (२) अतः omitted in B³I². (३) पादास्त एतेषामेव omitted in B². (४) गायत्र- Bⁿ, Borooah.

सर्वे तु प्राकृताः पादाः[1] समा वेदितव्याः। ते[2] प्राकृता अष्टाक्षरादयश्चतुर्विधाः। यद्येवं नैते समाः। बहवो ह्यष्टाक्षरा अल्पीयांसो दशाक्षराः[3]। यद्येवं समा इत्येषां संज्ञा[4] स्यात्। न संज्ञायाः प्रयोजनमस्ति।

एवं तर्ह्यन्योऽर्थः कथ्यते[5]। सर्वे तु प्राकृताः समाः। तु-शब्दः पक्षव्यावर्तकः। यदुक्तमेतेषां विकारा अन्ये[6] पादा इति। तन्न। यथा[7] सर्वे पादाः प्राकृता एव। नान्योन्यस्य[8] विकाराः। तस्मात्समाः। न संख्याकृतं[9] समत्वम्।

अपरे पुनरन्यथा वर्णयन्ति। सर्वे तु प्राकृताः समाः। सर्वेऽष्टाक्षरप्रभृतयश्चतुर्विधाः प्राकृताः समास्तुल्या भवन्ति। किमुक्तं भवति। नान्योन्यस्य विकारा भवन्तीत्युक्तं भवति॥

एक एकपदैतेषां द्वौ पादौ द्विपदोच्यते।
ते तु तेनैव प्रोच्येते सरूपे यस्य पादतः॥ ४१॥

तेषां चतुर्णां पादानामेकः पादो यस्याः सै[10]कपदा ऋगित्युच्यते। यथा। असिक्न्यां यजमानो न होता (ऋ०४।१७।१५)। तेषामेव चतुर्णां द्वौ पादौ यस्याः सा[11] द्विपदा ऋगित्युच्यते। साधुर्न

---

(१) प्राकृताः पादाः B^3I^2, प्राकृताः पादास्ते सर्वे B^2 and M. M. (a), प्राकृताः ये समाः पादाः ते सर्वे B^n and Boroo ah. (२) के M. M. (a). (३) -क्षरादयः B^n, Borooah. (४) समा इत्येषां संज्ञा omitted in B^3I^2. (५) कथ्यते $B^3I^2B^2$; कल्प्यते B^n, Borooah, M. M. (a). (६) अन्ये तु B^3I^2. (७) B^3, Reg.; तन्न। तथा B^2B^n, M. M. (a), Borooah; तन्न यथा changed to तत्तु तथा in I^2. (८) नान्यस्य Reg. (९) तेषां added in B^n, Borooah. (१०) यस्याः सा omitted in B^3I^2. (११) यस्याः सा omitted in B^3I^2.

गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु (ऋ० १ । ७० । ६) इति । तेनैव च्छन्दसा प्रोच्येते ते[1] द्वि[2]पदैकपदे[3] छन्दसां मध्ये यस्य च्छन्दसः पादतः सरूपे भवतः । यदि गायत्रस्य सरूपे भवतो[4] यदि त्रिष्टुभः[5] । गायत्री द्विपदा त्रिष्टुबेकपदेति ॥

न दाशतय्येकपदा काचिदस्तीति वै यास्कः ।
अन्यत्र वैमद्याः सैका दशिनी मुखतो विराट् ॥४२॥

दशतये[6] भवा दाशतयी काचिदेकपदा नास्तीति वै[7] यास्क आचार्यो मन्यते । अस्माकं या एकपदास्ताः सर्वाः पूर्वासां[8] ऋचामध्यासान्मन्यन्ते[9] । अन्तानित्यर्थः[10] । किम्[11] अविशेषेण । नेत्याह । अन्यत्र वैमद्या एकपदायाः[12] । सा तु स्यान्मुखतः । वैमदस्य[13] आदावित्यर्थः । दशिनी विराडेकपदास्त्येव ॥

आहुस्त्वेकपदा अन्ये अध्यासानेकपातिनः ।
अध्यासानपि केचित्त्वाहुरेकपदा इमाः ।
आ वां सुम्ने असिक्न्यां द्वे उरौ देवाः सिषक्तु नः ॥४३॥

इमान्युदाहरणानि । आ वां सुम्ने वरिमन्सूरिभिष्ष्याम् (ऋ० ६ । ६३ । ११)। असिक्न्यां यजमानो न होता (ऋ० ४ । १७ । १५) ।

---

(१) ते I²Bⁿ, omitted in B³B². (२) द्वै- B²I². (३) I² adds एव. (४) भवतः Bⁿ; omitted in B², Reg. (५) B² Bⁿ, Reg.; यदि गायत्रस्य to त्रिष्टुभः omitted in B³I². (६) दाशतये B², दाशतयी B³. (७) वै B³B²I², omitted here but given after आचार्यो in Bⁿ. (८) सर्वाः पूर्वासाम् Reg., सर्वासाम् B³B²I²Bⁿ. (९) मन्यन्ते B²I²Bⁿ, मन्यते B² and Reg. (१०) Bⁿ, अन्तानित्यर्थः supplied on the margin in I², omitted in B³B². (११) किम् Bⁿ, सा किम् B³B²I². (१२) एकपदा या B³. (१३) B², वैमंद्रस्य Bⁿ, omitted in B³I².

उरौ देवा अनिबाधे स्याम[1] (ऋ० ५ । ४२ । १७॥ ऋ० ५ । ४३ । १६)। सिषक्तु न ऊर्जव्यस्य पुष्टेः (ऋ० ५ । ४१ । २०) । इति । तानप्येकपातिनोऽध्यासानन्य आचार्या एकपदा[2] आहुः । अस्मिन्पाठान्तरे—ता तरेम (ऋ० ६ । २ । ११) इत्येवमादीनां पुनःपादानाम्[3] अनेकपातिनामध्यासानाम्[4] एकपदाशङ्कैव न[5] भवति[6] ॥

पादा एकाधिकाः सन्ति च्छन्दसां चतुरक्षरात् ।
सन्त्यतिच्छन्दसां पादा एकोत्कर्षेण जागतात् ।
षोळशाक्षरपर्यन्ता एकश्चाष्टादशाक्षरः ॥४४॥

छन्दसां पादाश्चतुरक्षरात्प्रभृति षोडशाक्षरपर्यन्तास्त एकेनैके[7]नाधिकाः सन्ति । एकश्चाष्टा[8]दशाक्षरः । नूनमथ (ऋ० ८ । ४६ । १५) । अग्ने तमद्य (ऋ० ४ । १० । १) । ऋध्यामा त ओहैः (ऋ० ४ । १० । १) । नदं व ओदतीनाम् (ऋ० ८ । ६९ । २) । अग्निमीळे पुरोहितम् (ऋ० १ । १ । १) ।[9] तं त्वा वयं पितो वचोभिः (ऋ० १ । १८७ । ११) । श्रुधी हवं विपिपानस्याद्रेः (ऋ० ७ । २२ । ४) । पिबा सोममभि यमुग्र तर्दः (ऋ० ६ ।

---

(१) उरौ देवाः B². (२) एकपादा I². (३) B³B², पुनःपाठानाम् (-दा- corrected to -ठा-) I², पुनःपदानां Bⁿ and Borooah. (४) अनेकपातिनामध्यासानाम् B², अनेकपादानां अध्यासानाम् Bⁿ, अनेकपादा अध्यासानाम् B³ I² (-पादाः I²), अनेकपादां अध्यवसानानाम् Borooah, अनेकपादाध्यवसाना M. M. (a). (५) एकपदाशंकैव न BⁿB² (B² has a mark of deletion above न), एकपादाशंकैव न M.M. (a), एकपदादिशंकेव B³I² (-पा- I²), एकपदाशंकेव Borooah. (६) I², M.M. (a); तस्मादुदाहरणान्युक्तानि added in B³B²Bⁿ, Borooah. (७) एकैके- Bⁿ. (८) एकोष्टा- Bⁿ. (९) B² adds तथा.

१७ । १)। प्र देवमच्छा मधुमन्त इन्दवः (ऋ० ९ । ६८ । १) । तमिन्द्रं जोहवीमि मघवानमुग्रम् (ऋ० ८ । ९७ । १३)। अपूरुषघ्नो अप्रतीत शूर सत्वभिः (ऋ० १ । १३३ । ६)। अभि त्यं देवं सवितारमोण्योः कविक्रतुम् (ऋ० खि० १० । १०३ । ४)। त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मः (ऋ० २ । २२ । १)। एते चतुरक्षरादारभ्य षोडशाक्षरपर्यन्ताः । अर्चामि सत्यसवं[1] रत्नधामभि प्रियं मतिं कविम् (ऋ० खि० १० । १०३ । ४)। एष[2] चाष्टादशाक्षरः ।

केचित्पाठान्तरं वर्णयन्ति । जागतादारभ्याष्टादशाक्षरपर्यन्ताः पादा[3] अतिच्छन्दसां विद्यन्ते । ते व्याख्याता[4] इति[5] ॥

एकादशैव च्छन्दसि पादा ये षोळशाक्षराः ।
सर्वे त्रिकद्रुकीयासु नाकुलोऽष्टादशाक्षरः ॥४५॥

छन्दसि संहितायां ये षोडशाक्षराः पादा[6] एकादशैव ते सर्वे त्रिकद्रुकीयास्वृक्षु[7] दृश्यन्ते । यथा[8] —त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मः[9] (ऋ० २ । २२ । १) इति[10] प्रथमायां चत्वारः । द्वितीयायां तृतीयायां च[11] त्रयस्त्रयः[12] पादाः । चतुर्थ्यामेकः । एवमेते[13] त्रिकद्रुकीयासु सर्वे भवन्ति । नकुलस्यार्षेऽष्टादशाक्षरः ।

---

(१) सत्यसंव I^2. (२) एवं Reg. (३) पादा omitted in I^2, Reg. (४) व्याख्या इवा I^2. (५) B^2 omits इति. (६) B^2 omits पादा . (७) B^2 and Reg., त्रिकद्रकीयासु B^n, त्रिकद्रुकीयास्वृक्षु omitted in B^3I^2. (८) दृश्यन्ते यथा B^2B^n, omitted in B^3I^2. (९) महिषो to -शुष्मः omitted in B^n. (१०) B^n adds सूक्तस्य. (११) B^n omits तृतीयायां च. (१२) त्रयस्त्रयः B^2, त्रयः $B^3I^2B^n$. (१३) चतुर्थ्यामेकः । एवमेते B^2I^2, चतुर्थ्यामेकः एव । एते B^3, चतुर्थ्यामेकः । तृतीयायां त्रयः । एवं B^n.

पर्चामि सत्यसवं[1] रत्नधामभि प्रियं मतिं कविम् (ऋ० खि० १० । १०३ । ४) इति ॥

अवर्महोऽविकर्षेण ज्येष्ठा दाशतयीष्वृचाम् ॥ ४६ ॥

अवर्मह इन्द्र (ऋ० १ । १३३ । ६) इत्येषा अविकर्षेण सप्तत्यक्षरा[2] सा ज्येष्ठा महती दाशतयीषु ऋक्षु । बह्वक्षरेत्यर्थः ॥

विकर्षेण तु पादैश्च स हि शर्ध इति स्मृता ॥४७॥

विकर्षेण तु षट्सप्तत्यक्षरा भवति । पादैश्चाष्टपदा[3] भवति । तस्माज्[4] ज्येष्ठा स्मृता । स हि शर्धो न मारुतं तुविष्वणिः (ऋ० १ । १२७ । ६) इति ॥

अणिष्ठा बहुपादानां भारद्वाजी पुरूतमम् ॥४८॥

बहुपादानामृचां मध्येऽणिष्ठात्यल्पा[5] विंशत्यक्षरा भारद्वाजी[6] । पुरूतमं पुरूणां स्तोतॄणाम्[7] (ऋ० ६ । ४५ । २९) इति । ऋषिग्रहणात्—पुरूतमं पुरूणामीशानम् (ऋ० १ । ५ । २) इति मास्तु[8] ॥

अविकर्षेण सौभरी प्रेष्ठस्वादि ह्रसीयसी ॥४९॥

अविकर्षेण सौभरिणा दृष्टा—प्रेष्ठमु प्रियाणाम् (ऋ० ८ । १०३ । १०) इत्येषा ह्रसीयस्यल्पाक्षरतरा भवत्येकोनविंशत्यक्षरेति ॥

विराजो द्विपदाः केचित्सर्वा आहुश्चतुष्पदाः ।
कृत्वा पञ्चाक्षरान्पादांस्तास्तथाक्षरपङ्क्तयः ॥५०॥

पश्वा न तायुं गुहा चतन्तम्[9] (ऋ० १ । ६५ । १) इत्येवमाद्यो या विराजो द्विपदास्ताः सर्वाः पश्वा न तायुमित्येवं पञ्चाक्षरान्पादान्

---

(१) सत्यसंव I^2. (२) सप्तचरा I^2. (३) -पदी B^n. (४) B^3I^2 omit तस्माज्. (५) B^2, अणिष्ठा अंत्या B^3, अणिष्ठा अल्पा I^2, कनिष्ठा अल्पा B^n. (६) I^2 omits भारद्वाजी. (७) I^2 omits स्तोतॄणाम्. (८) ऋषि- to -स्तु omitted in I^2. (९) तायु B^2.

कृत्वा चतुष्पदा आहुः केचिदाचार्याः । तास्तथा क्रियमाणा अक्षरपङ्क्त्यो नाम भवन्ति ॥

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र-[१]
उवटकृतौ[२] प्रातिशाख्यभाष्ये सप्तदशं
पटलम्[३] ॥

(१) -पुत्रे I^2. (२) -पुत्रोव्वटकृते B^n. (३) B^3 adds समाप्तम्. I^2 adds ॥ इति नामा ॥.

बार्हतो बृहतीपूर्वः ककुप्पूर्वस्तु काकुभः ।
एतौ सतोबृहत्यन्तौ प्रगाथौ भवतो द्वृचौ ॥ १ ॥

यो बृहतीपूर्वः स बार्हतः । ककुप्पूर्वो यः स काकुभः । उभावेतौ सतोबृहत्यन्तौ द्वृचौ प्रगाथौ भवतः ॥

त्वमङ्ग प्र प्र वो यह्वं मा चिद्दू बृहदु गायिषे ।
बार्हताः काकुभानाहुस्तं गूर्धय वयम्विति ॥ २ ॥

त इमे बार्हताः प्रगाथाः । त्वमङ्ग प्र शंसिषः (ऋ० १ । ८४ । १९–२०) । प्र वो यह्वं पुरूणाम् (ऋ० १ । ३६ । १–२) । मा चिदन्यद्वि शंसत (ऋ० ८ । १ । १–२) । बृहदु गायिषे वचः (ऋ० ७ । ९६ । १–२) ।

काकुभानाहुः । तं गूर्धया स्वर्णरम् (ऋ० ८ । १९ । १–२) । वयमु त्वामपूर्व्य (ऋ० ८ । २१ ।१–२) इति ॥

अनुष्टुब्द्वे च गायत्र्यावेष आनुष्टुभः स्मृतः ।
विराजावभिसंपन्नः पद्याक्षर्यं स उत्थितः ॥ ३ ॥

एकानुष्टुब्द्वे च गायत्र्यावेष प्रगाथ आनुष्टुभः स्मृतः । विराजौ द्वे अभिसंपन्नः । पद्या चाक्षर्या च[1] । पादैरक्षरै[2]श्चेत्यर्थः । दश पादाः[3] सैका[4] विराट् । अशीतिरक्षराणि त्वक्षर्या[5] । स इति प्रतीकम् । स पूर्व्यो महानाम् (ऋ० ८ । ६३ । १–२) इति । उत्थित इति[6] प्रशंसा कृता । अन्ये प्रगाथाः षड्भिः सप्तभिरष्टाभिर्वा पा[7]दैर्भवन्ति । अयं तु दशभिः । तस्मादुत्थित इति प्रशस्यते ॥

---

(१) पद्ये चाक्षर्ये च Berlin MS. 394 (cp. Reg.). (२) पादेक्षरै- B^3, पादैरनुक्षरै- B^n. (३) पदाः B^n. (४) सैका B^3B^2 I^2 B^n, पद्या Reg. (५) त्वक्षर्या Reg.; अक्षर्या B^n; omitted in $B^3B^2I^2$. (६) B^3 omits इति. (७) प- B^3.

आकृतिर्व्यपदेशानां प्राय आदित आदितः ॥ ४॥

आदितः प्रायेण प्रगाथः क्रियते[1] व्यपदिश्यते । बार्हतः काकुभ आनुष्टुभ इति। तेषामादितो यच्[2] छन्दस्तेनैव व्यपदेशः कृतो द्रष्टव्यः[3]। नोभाभ्यां यथा गायत्रबार्हत[4] इति ॥

गायत्र्यादिस्तु बार्हते प्रायो गायत्रबार्हतः ॥५॥

गायत्र्यादिर्बृहत्यन्त एष प्रगाथः प्रायो[5] गायत्रबार्हत इत्यु-च्यते[6] । यथा । तमिन्द्रं दानमीमहे (ऋ० ८ । ४६ । ६–७) इति[7] ॥

गायत्रकाकुभो नाम प्रायो भवति काकुभे ॥ ६ ॥

गायत्र्यादिः ककुबन्तः प्रगाथो गायत्रकाकुभो नाम वेदितव्यः । यथा । सुनीथो घा स मर्त्यः (ऋ० ८ । ४६ । ४–५) इति[8] ॥

औष्णिहस्तूष्णिहापूर्वः ॥ ७ ॥

उष्णिहापूर्वः सतोबृहत्यन्तः प्रगाथ औष्णिह इत्युच्यते । यथा । यमादित्यासो अद्रुहः (ऋ० ८ । १९ । ३४–३५) इति[9] ॥

पङ्क्त्यन्तः पाङ्क्तकाकुभः ॥ ८ ॥

पङ्क्त्यन्तः ककुप्पूर्वः पाङ्क्तकाकुभो नाम वेदितव्यः । यथा । अदा-न्मे पौरुकुत्स्यः (ऋ० ८ । १९ । ३६–३७) इति[10] ॥

---

(१) प्रगाथाकृतिर्यैर् (instead of प्रगाथः क्रियते) B^2. (२) यः B^3. (३) कर्त्तव्यः (instead of कृतो द्रष्टव्यः) B^2. (४) -र्हता B^2 and Reg., -र्हते Borooah. (५) बार्हतप्राये (for प्रायो) B^2. (६) B^2, -बार्हत उच्यते B^n, -बार्हतो वर्त्तते B^3 I^2. (७) इति omitted in $B^3 B^2$. (८) इति omitted in $B^3 B^2$. (९) B^3 omits इति. (१०) इति omitted in $B^3 B^n$.

तमिन्द्रं च सुनीथश्च यमादित्यास एव च।
अदान्मे पौरुकुत्स्यश्च ता ऋचोऽत्र निदर्शनम् ॥९॥

पुरस्तादेव निदर्शनान्युक्तानि ॥

महासतोबृहत्यन्तो यो महाबृहतीमुखः।
स महाबार्हतो नाम ॥ १० ॥

महासतोबृहत्यन्तो महाबृहतीमुखो यः प्रगाथः स महाबार्हतो नाम वेदितव्यः। यथा। बृहद्भिरग्ने अर्चिभिः (ऋ० ६ । ४८ । ७–८) इति[1] ॥

बार्हतो बृहतीमुखः ॥ ११ ॥

बृहतीमुखो जगत्यन्तो यः[2] प्रगाथः स[3] बार्हत इत्युच्यते। यथा। तं वः शर्धं रथेशुभम् (ऋ० ५ । ५६ । ९ ॥ ५ । ५७ । १) इति[4] ॥

अथो अतिजगत्यन्तः ॥ १२ ॥

अपि चातिजगत्यन्तो बृहतीमुखो यः प्रगाथः स च[5] बार्हत एव[6]। यथा। नेमिं नमन्ति चक्षसा[7] (ऋ० ८ । ९७ । १२–१३) इति[8] ॥

यवमध्योत्तरोऽपि च ॥ १३ ॥

---

(१) B³ omits इति. (२) B³ omits यः. (३) B³ omits स. (४) B³ omits इति. (५) प्रगाथः स च B², स प्रगाथः स च B³, प्रगाथः स I², omitted in Bⁿ. (६) Bⁿ adds सः. (७) वामी वामस्य धूतयः (for नेमिं to चक्षसा) B³. (८) B³ omits इति. Another reading also for this Sūtra and its Comm. is thus given on the margin in B³: (*sic*) जगत्यतिजगत्यंतः। उक्तो बार्हतः बृहतीमुखः जगः अतिजगत्यंतश्च भवति। जगत्यंते उक्तमुदाहरणम्। अतिजगत्यंते तु नेमि नम.

यवमध्योत्तरो बृहतीमुखो यः प्रगाथः स च[1] बार्हतः[2] । यथा । वामी वामस्य धूतयः (ऋ० ६ । ४८ । २०–२१) इति[3] ॥

बृहद्भिस्तं वो नेमिं च वामी वामस्य ता ऋचः ॥१४॥

पुरस्ताद्देवोदाहृताः ॥

नहि ते विपरीतान्तः ॥ १५ ॥

नहि ते शूर राधसः (ऋ० ८ । ४६ । ११–१२) इत्ययं प्रगाथो विपरीतान्तो बृहतीमुखो विपरीतान्तो नाम वेदितव्यः ॥

मो षु त्वा द्विपदाधिकः ॥ १६ ॥

मो षु त्वा वाघतश्चन (ऋ० ७ । ३२ । १–३) इति प्राकृत एव[4] प्रगाथो द्विपदाधिको वेदितव्यः । रायस्कामो वज्रहस्तं सुदक्षिणम्[5] (ऋ० ७ । ३२ । ३) इत्येतया सहितो द्रष्टव्यः ॥

अनुष्टुब्जगतो चैव विश्वेषामिरज्यन्तं च ॥ १७ ॥

विश्वेषामिरज्यन्तं वसूनाम्[6] (ऋ० ८ । ४६ । १६–१७) इत्ययं प्रगाथोऽनुष्टुप्पूर्वो जगत्यन्तो वेदितव्यः ॥

द्विपदा बृहती चैव स नो वाजेष्विति स्मृतः ॥ १८ ॥

स नो वाजेष्वविता पुरूवसुः[7] (ऋ० ८ । ४६ । १३–१४) इत्ययं प्रगाथो[8] द्विपदापूर्वो बृहत्युत्तरः[9] स्मृतः ॥

---

(१) Bⁿ omits प्रगाथः स च. (२) एव in I² and एव सोपि in Bⁿ added; omitted in B³. (३) यवमध्योत्तरोऽपि च (Sūtra) to इति omitted in B³. (४) वाघत एव (for वाघतश्च to एव) Reg. (५) सुदक्षिणम् B², सुदक्षिणं पुत्रो न पितरं हुवे Reg., omitted in B³ I² Bⁿ. (६) वसूनाम् omitted in B². (७) पुरूवसुः omitted in B². (८) अयं प्रगाथः omitted in B³. (९) द्विपदा बृहती चैव (instead of द्विपदापूर्वो बृहत्युत्तरः) I².

ककुप्पूर्वस्तु को वेद स्मृतः काकुभबार्हतः ॥ १९ ॥

ककुप्पूर्वो बृहत्यन्तः काकुभबार्हतो नामायं प्रगाथः स्मृतः[1] । यथा । को वेद जानमेषाम् (ऋ० ५ । ५३ । १–२) इति[2] ॥

आनुष्टुभौष्णिहं विद्यात्ते म आहुर्य आययुः ॥ २० ॥

ते म आहुर्य आययुः (ऋ० ५ । ५३ । ३–४) इत्ययं प्रगाथः । तमानु[3]ष्टुभौष्णिहं विद्यात । अनुष्टुप्पूर्वो अपरोष्णिगिति[4] ॥

ते नस्त्राध्वं बृहत्यादिर्बार्हतानुष्टुभः स्मृतः ॥ २१ ॥

ते नस्त्राध्वं तेऽवत (ऋ० ८ । ३० । ३–४) इत्ययं प्रगाथो बृहत्यादिरनुष्टुबन्तो बार्हतानुष्टुभः स्मृतः ॥

अग्निं वः पूर्व्यमित्येषोऽनुष्टुप्पङ्क्तिरेव च ॥ २२ ॥

अग्निं वः पूर्व्यं गिरा[5] (ऋ० ८ । ३१ । १४–१५) इति प्रगाथोऽनुष्टुप्पूर्वः पङ्क्त्यन्त आनुष्टुभ[6]पाङ्क्त इति स्मृतः ॥

यदध्रिगावो अध्रिगू ककुप् च त्रिष्टुबेव च ॥ २३ ॥

यदध्रिगावो अध्रिगू[7] (ऋ० ८ । २२ । ११–१२) इत्येष प्रगाथः ककुप्पूर्वस्त्रिष्टुबन्तः काकुभ[8]त्रैष्टुभ इति स्मृतः ॥

यदद्य वामनुष्टुप्च त्रिष्टुप्चैवोपदिश्यते ॥ २४ ॥

यदद्य वां नासत्या (ऋ० ८ । ९ । ९–१०) इत्ययं[9] प्रगाथोऽनुष्टुप्पूर्वस्त्रिष्टुबुत्तर आनुष्टुभ[10]त्रैष्टुभ[11] इत्युपदिश्यते ॥

---

(१) वेदितव्यः B^2. (२) B^3 omits इति. (३) तमनु- B^3B^2. (४) B^3, परा उष्णिगिति B^2, अपरा तूष्णिगिति Reg., अपरा उष्णिहाविति B^n, अ ररा उष्णिह इति I^2. (५) गिरा omitted in B^2, Reg. (६) -ष्टुभः B^n. (७) अध्रिगू omitted in B^2. (८) -भस् B^2B^n, -भास् B^3. (९) B^3I^2, नामेत्ययं B^n, नासत्यायं B^2. (१०) -भस् B^3B^2, -भः B^n. (११) -त्रैष्टुभ omitted in Paris MS.

यत्स्थो दीर्घेति च त्वेष बृहती त्रिष्टुबेव च ॥ २५ ॥

यत्स्थो दीर्घप्रसद्मनि (ऋ० ८ । १० । १–२) इत्येष प्रगाथो बृहतीपूर्वस्त्रिष्टुबुत्तरो बार्हत[1]त्रैष्टुभ इत्युच्यते ॥

आ यन्मा वेनास्त्रिष्टुप्च जगती चोपदिश्यते ॥२६॥

आ यन्मा वेना अरुहन्नृतस्य (ऋ० ८ । १०० । ५–६) इत्ययं प्रगाथस्त्रिष्टुप्पूर्वो जगत्युत्तरस्त्रैष्टुभजागत इत्युपदिश्यते[2] ॥

ता वृधन्तावनुष्टुप्च महासतोमुखेव च ॥ २७ ॥

महासतोमुखेति विराट्पूर्वा[3] त्रिष्टुबुच्यते । ता वृधन्तावनु द्यून (ऋ० ५ । ८६ । ५–६) इत्ययं प्रगाथो[4]ऽनुष्टुप्पूर्वस्त्रिष्टुबुत्तर आनुष्टुभ[5]त्रैष्टुभ इत्युपदिश्यते[6] ॥

जागतस्त्वददा अर्भा प्रगाथस्त्रिष्टुबुत्तरः ॥ २८ ॥

अददा अर्भां महते वचस्यवे (ऋ० १ । ५१ । १३–१४) इति प्रगाथस्त्रिष्टुबुत्तरो जागत इत्युच्यते[7] ॥

उत्तरस्त्रैष्टुभस्तस्माज्जगत्युत्तर उच्यते ॥ २९ ॥

तस्मादुत्तरः प्रगाथः—इदं नमो वृषभाय स्वराजे (ऋ० १ । ५१ । १५ ॥ १ । ५२ । १) इति जगत्युत्तरस्त्रैष्टुभ[8] इत्युच्यते ॥

त्वमेताञ्जन च द्वौ द्वौ स घा राजेति च स्मृतौ ॥३०॥

---

(१) -तस् B^3B^2. (२) $B^2I^2B^n$, इत्युच्यते B^3 and Reg. (३) -पूर्वस् B^3. (४) विराट्पूर्वस्त्रिष्टुबुच्यते added in I^2. (५) -भस् B^3B^2, -भः B^n. (६) इत्युच्यते B^3. (७) B^3B^2, जागत इत्युपदिश्यते B^nI^2, जागतो जागतत्रैष्टुभ इत्युपदिश्यते Reg. (८) त्रैष्टुभजागत Reg.

त्वमेताञ्जनराज्ञो द्विर्दश (ऋ० १ । ५३ । ९—११ ॥ १ । ५४ । १) इति द्वौ[1] प्रगाथौ पूर्ववद् द्रष्टव्यौ । यथा[2] पूर्वो जागतस्त्रिष्टुबुत्तर इत्युच्यते । तस्मादुत्तरः[3] प्रगाथः—य उदृचीन्द्र देवगोपाः (ऋ० १ । ५३ । ११ ॥ १ । ५४ । १) इति त्रैष्टुभजागत इत्युच्यते । उत्तरौ—स घा राजा सत्पतिः शूशुवज्जनः (ऋ० १ । ५४ । ७—१०) इति च द्वौ प्रगाथौ स्मृतौ । पूर्वो जागतत्रैष्टुभः[4] । तुभ्येदेते बहुला अद्रिदुग्धाः (ऋ० १ । ५४ । ९—१०) इति त्रैष्टुभो जगत्युत्तरः[5] ॥

त्वमस्य पारे रजसो जागतौ त्रिष्टुबुत्तरौ ॥ ३१ ॥

त्वमस्य पारे रजसो व्योमनः (ऋ० १ । ५२ । १२—१५) इति द्वौ प्रगाथौ जागतौ त्रिष्टुबुत्तरौ[6] ज्ञेयाविति ॥

सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम् ॥ ३२ ॥

व्यञ्जनेन युक्तोऽनुस्वारेण सहितः । अथवानुस्वारेण रहितो व्यञ्जनेन रहितः[7] स्वरोऽक्षरसंज्ञो[8] भवति ॥

व्यञ्जनान्युत्तरस्यैव स्वरस्यान्त्यं तु पूर्वभाक् ॥ ३३ ॥

व्यञ्जनान्युत्तरस्यैव स्वरस्याङ्गं भवन्ति । तदस्य (ऋ० १ । १५४ । ५) । तन्नः (ऋ० १ । १४२ । १०) । अन्त्यं तु पूर्वभाक् । अन्त्यं तु व्यञ्जनं पूर्वमक्षरं भजेत् । तत् । वाक्[9] ॥

---

(१) द्वौ B³I²Bⁿ, द्वौ द्वौ B² and Reg. (२) B²Bⁿ and Reg., तथा B³I². (३) उत्तरतः B². (४) I² and Reg., जागतस्त्रैष्टुभः B³B², जागतः त्रिष्टुबंतः Bⁿ. (५) B³I²Bⁿ, त्रैष्टुभौ जागत इत्युत्तरः B², त्रैष्टुभजागत इत्युच्यते Reg. (६) B³B², जागत-त्रिष्टुबुत्तरौ I², त्रिष्टुबुत्तरो जागतो Bⁿ. (७) अथवाऽनुस्वारव्यंजनाभ्यां रहितः (instead of अथ- to रहितः) Bⁿ. (८) B³ B²I², -संज्ञको Bⁿ and Reg. (९) I² omits तत् । वाक्.

विसर्जनीयानुस्वारौ भजेते पूर्वमक्षरम् ॥ ३४ ॥

विसर्जनीयोऽनुस्वारश्च पूर्वमक्षरं भजेते ।[1] यः सोम (ऋ० १। ९१। १४)। त्वं सोम (ऋ० १। ९१। १) ॥

संयोगादिश्च वैवं च ॥ ३५ ॥

संयोगादिर्वा पूर्वमक्षरं भजते । तस्य । यस्य ॥

सहक्रम्यः परक्रमे ॥ ३६ ॥

क्रमेण सह क्रम्यो वर्णः[2] पूर्वमक्षरं वा[3] भजते परक्रमे सति[4] । अर्क्कः । ऊर्ज्जम् ॥

गुर्वक्षरम् ॥ ३७ ॥

दीर्घमक्षरं गुरुसंज्ञं भवति । नू देवासो वरिवः कर्तना नो भूत (ऋ० ७। ४८। ४) ॥

लघु ह्रस्वं न चेत्संयोग उत्तरः ॥ ३८ ॥

ह्रस्वमक्षरं लघुसंज्ञं भवति संयोगः परतो न चेद्भवति[5] । यथा । मित्रमहो[6] अवद्यात् (ऋ० ४। ४। १५) ॥

अनुस्वारश्च ॥ ३९ ॥

अनुस्वारश्च यद्युत्तरो न भवति तदा लघुसंज्ञं[7] भवति । यथा[8] । अस्ति सोमो अयं सुतः (ऋ० ८। ९४। ४) इति[9] ॥

---

(१) तस्य यस्य added in I². (२) B³B²Bⁿ; क्रमेण to वर्णः omitted in I², Ber. MS. 394 (cp. Reg.), cp. M.M. (a). (३) I² and Ber. MS. 394 omit वा. (४) Bⁿ adds सन्निमम् ।; Paris MS. adds सन्नि ।. Instead of क्रमेण to सति, Paris MS. reads: - - - - सह क्रम्यते परक्रमे । (*sic*).(५) B² omits भवति. (६) द्रुहो निदे मित्रमहो B². (७) B³, यदि तस्मादनुस्वारश्च न (-स्वारः संयोग I²) उत्तरो B²I². (८) B² omits यथा. (९) इति omitted in B³.

संयोगं विद्याद्व्यञ्जनसंगमम् ॥ ४० ॥

व्यञ्जनानां मेलकः[1] संयोगसंज्ञो भवति । आ त्वा रथम् (ऋ० ८ । ६८ । १) । अनुस्वार इत्यनुवर्तते । इदं श्रेष्ठम् (ऋ० १।११३। १) इति ॥

गुरु दीर्घम् ॥ ४१ ॥

दीर्घमक्षरं गुरुसंज्ञं भवति । आ रुक्मैरा[2] युधा नरः (ऋ० ५ । ५२ । ६) इति । सिद्धेऽप्यर्थे उत्तरक्रियार्थं पुनरुच्यते ॥

गरीयस्तु यदि सव्यञ्जनं भवेत् ॥ ४२ ॥

गरीयस्तु गुरुतरं विद्याद्दीर्घं सव्यञ्जनं सत् । राष्ट्री । इति[3] ॥

लघु सव्यञ्जनं ह्रस्वम् ॥ ४३ ॥

ह्रस्वमक्षरं सव्यञ्जनं लघुसंज्ञं भवति । क कि कु[4] ॥

लघीयो व्यञ्जनादृते ॥ ४४ ॥

ह्रस्वमक्षरं व्यञ्जनवर्जं लघीयःसंज्ञं भवति[5] ॥

छन्दस्तुरीयेण समानसंख्या
याश्छन्दसोऽन्यस्य भवन्त्यृचोऽन्याः ।
यावत्तुरीयं भवति स्वमासां
तावत्य एता इतरा भवन्ति ॥ ४५ ॥

कस्य च्छन्दसः केन सह का संपद्भवतीति विचारणायां[6] तत इदमुच्यते । छन्दस्तुरीयेण च्छन्दसो गायत्र्यादेर्[7]क्षराणां चतुर्थेन[8]

---

(१) व्यंजनामेलापकः I². (२) आरुरिथं । अनुमै (for आ रुक्मैरा) I². (३) B³ omits इति. (४) कु० । B². (५) B²; ह्रसीयःसंज्ञं भवति । B³I². अ इ उ इति added in Berlin MS. 394 (cp. Reg.) (६) विचारणां या B³. (७) I² omits गायत्र्यादेर्. (८) चतुर्थे- B³.

भागेन गायत्र्या[1] समानसंख्या अन्य[2]स्योष्णिक्छन्दस ऋचो भवन्ति। आसामुष्णिहां यावच्छन्दस्तुरीयं भवति तावत्य एता इतरा[3] गायत्र्यो भवन्ति। तथा चोक्तं[4] रहस्ये। सप्त गायत्र्यः षळुष्णिहो भवन्ति। यदिन्द्राहं यथा त्वम् (ऋ० ८। १४। १) इति यथा। आभिः सप्तभिः षळुष्णिहो भवन्ति[5]। एवं सर्वेषां छन्दसामन्योन्यस्य चतुर्थेन भागेन[6] संपद्भवति॥

द्वाभ्यामवस्येत् त्रिपदासु पूर्वं
पादेन पश्चात्क्वचिदन्यथैतत्॥ ४६॥

त्रिपदासु[7] ऋक्षु द्वाभ्यां पादाभ्यां पूर्वमवस्येत्पश्चात्पादेन। अग्निमीळे पुरोहितम् (ऋ० १। १। १)। क्वचिदेतदन्यथा[8]। पूर्वं पादेन पश्चाद् द्वाभ्याम्। दृतेरिव तेऽवृकमस्तु सख्यम् (ऋ० ६। ४८। १८) इति[9]॥

मध्येऽवसानं तु चतुष्पदानाम्॥ ४७॥

चतुष्पदानां[10] मध्येऽवसानं भवति। गायन्ति त्वा गायत्रिणः (ऋ० १। १०। १) इत्येवमादयः॥

त्रिभिः समस्तैरवरैः परैर्वा॥ ४८॥

---

(१) गायत्र्या B^2 and Reg., गायत्र्याः I^2, omitted in B^3. (२) I^2 and Berlin MS. 394, समानसंख्याऽन्य- Paris MS., समानसंख्यया अन्य- $B^3 B^2$. (३) एता इतरा B^2 and Reg., इति $B^3 I^2$. (४) तथोत्रोक्तं Reg. (५) B^2, Reg., M. M. (a); तथा चोक्त to भवन्ति omitted in $B^3 I^2$. (६) गणन I^2. (७) B^2. Reg.; -पादासु $B^3 I^2$. (८) एतदन्यथा B^2, सकृदन्यथा I^2, अन्यथा B^3. (९) B^3 omits इति. (१०) $B^2 B^n$, -पादानां B^3 I^2.

त्रिभिः समस्तैः पादैः पूर्वम्[1] अवसानं भवति[2] । पादेनोत्तरम् । यथा । एतं शंसमिन्द्रास्मयुष्ट्वम् (ऋ० १० । ९३ । ११) । पादैर्वा[3] त्रिभिः परम[4]वसानं भवति । पादेन पूर्वम् । अधीन्न्वत्र सप्तति च सप्त च (ऋ० १० । ९३ । १५) इति[5] ॥

पङ्क्त्यां द्विशो वा तत उत्तरेण
त्रिभिः परैर्वा विपरीतमेतत् ॥ ४९ ॥

पङ्क्त्यां पञ्चपदास्वित्यर्थः । द्विशो द्वाभ्यां द्वाभ्यामवस्येत्[6] । पादेनो-त्तरमवसानम्[7] । अयं चक्रमिषणत्सूर्यस्य (ऋ० ४ । १७ । १४-१५) इति[8] । त्रिभिः पादैः परमवसानं वा[9] । द्वाभ्यां पूर्वम्[10] । नकिष्टं कर्मणा नशत् (ऋ० ८ । ३१ । १७) इति[11]। एतद्वा विपरीतम्[12] । त्रिभिः पूर्वं द्वाभ्यामुत्तरम्[13] । नकिर्देवा मिनीमसि (ऋ० १० । १३४ । ७) इति[14]॥

द्विशस्त्रिशो वा परतश्चतुर्भिः
स्यात्षट्पदानामवसानमेतत् ॥ ५० ॥

द्वाभ्यां द्वाभ्यां वा त्रिभिस्त्रिभिर्वावस्येत् । विश्वान्देवान्हवामहे (शा० श्रौ० ७ । १० । १४) । एषा तु कौषीतकि[15]नां षट्पदा

---

(१) Bⁿ, पूर्वम् omitted in B²I². (२) गायन्ति to भवति omitted in B³. (३) परैर्वा B². (४) पादैर् (for परम्) B². (५) B³ omits इति. (६) B³ omits अवस्येत्. (७) B³ adds यथा. (८) B³ omits इति. (९) वा I²Bⁿ; च B³B², M.M.; omitted in Reg. (१०) B³ adds यथा. (११) B³ omits इति. (१२) एतद्विपरीतं वा Bⁿ. (१३) यथा added in B³B². (१४) B³ omits इति. (१५) -की- P' Bⁿ.

शस्यते। अस्माकं यः पञ्चमः पादः स तेषां न विद्यते[1]। अस्मिन्पक्ष उदाहरणम्। त्रिशो वा। त्रिभिस्त्रिभिरवस्येत्। स चपः[2] परि षस्वजे (ऋ० ८।४१।३)।[3] अथवा परतश्चतुर्भिरवस्येत्। द्वाभ्यां पूर्वम्। निष्कं वा घा कृणवते (ऋ० ८।४७।१५)। एवं त्रिविधमवसानं षट्पदानां स्यात्॥

त्रिभिस्तु पूर्वं तत उत्तरं स्याद्
द्विशस्त्रिशो वा यदि वा समस्तम्।
द्वाभ्यां पुनः सप्तपदावसानम् ॥५१॥

सप्तपदानां तु पूर्वमवसानं त्रिभिः पादैः स्यात्। तस्मादुत्तरं द्विशः। यथा[4]। सुषुमा यातमद्रिभिः (ऋ० १।१३७।१) इति। त्रिशो वा यदि पूर्वमवसानं तदोत्तरं समस्तम्। चतुर्भिरित्यर्थः[5]। यथा। नहि वां वव्रयामहे (ऋ० ८।४०।२) इति[6]। द्वाभ्यां पुनः पूर्वमवसानम्। उत्तरं समस्तं पञ्चभिः स्यात्। यथा।[7] प्रो ष्वस्मै पुरोरथम् (ऋ० १०।१३३।१) इति॥

द्वाभ्यां च मध्येऽष्टपदासु विद्यात् ॥ ५२ ॥

अष्टपदासु ऋक्षु मध्ये द्वाभ्यामवसानं स्यात्। परिशेषादाद्यन्तयोस्त्रिभिस्त्रिभिरवसानं भवति। स हि शर्धो न मारुतं तुविष्वणिः (ऋ० १।१२७।६) इति॥

---

(१) अस्माकं to विद्यते is given with marks of deletion in B³. (२) सं चपः Bⁿ, सपक्षः B³. (३) इति added in B²I². (४) यथा Bⁿ, तथा B³B² and M.M., तस्माच्च तथा I². (५) B²Bⁿ and M.M., -रितीत्यर्थः B³, -रितित्यर्थः I². After -त्यर्थः। परतश्चतुर्भिरिति त्वनुवर्तते added in B² and M.M. (a), cp. also Reg.; Bⁿ adds अस्यानुवृत्तिः पूर्वसूत्राद्वा. (६) B³ omits इति. (७) Bⁿ omits यथा.

अग्निमीळे दूतेरिव गायन्त्येतसधीन्न्विति ।
अयं चक्रं नकिष्टं च नकिर्देवा मिनीमसि ॥
विश्वान्देवान्हवामहे स क्षपो निष्कं सुषुम ।
नहि वां यो षु स हि शर्धस्ता ऋचोऽत्र निदर्शनम् ॥५३॥

यथाक्रमं पुरस्तादेव निदर्शितानि[1] ॥

द्वाभ्यां पादेन द्वाभ्यां तु तव त्यत्पञ्चपदाष्टिः ।
अव्यूहेनातिशक्वरी तृतीयः षोळशाक्षरः ॥ ५४ ॥

द्वाभ्यामवस्येत् । ततः पादेन । पुनर्द्वाभ्याम्[2] । तव त्यन्नर्यं नृतोऽप इन्द्र (ऋ० २ । २२ । ४) इति[3] । सेयं[4] पञ्चपदाष्टिर्विज्ञेया । अव्यूहेनातिशक्वरी । अस्याम्[5] तृतीयः षोडशाक्षरः ॥

चतुर्भिस्तत एकेनाग्ने तमद्येति च ॥ ५५ ॥

चतुर्भिः पूर्वमवसानं तत एकेन[6] । अग्ने तमद्याश्वं न स्तोमैः[7] (ऋ० ४ । १० । १) इति ॥

चतुर्भिस्तु परं द्वाभ्यां तव स्वादिष्ठा तच्छंयोः ॥ ५६ ॥

चतुर्भिः पूर्वमवसानं परं द्वाभ्याम् । तव स्वादिष्ठाग्ने संदृष्टिः (ऋ० ४ । १० । ५) इति[8] । तच्छंयोरा वृणीमहे (ऋ० १० । १९१ । ५) ॥

---

(१) निदर्शनानि B². (२) B³ adds यथा. (३) इति B³B², इत्यत्रावसानं BⁿI². (४) सेयं B²Bⁿ, omitted in B³I². (५) अस्यां B². (६) B³ adds यथा. (७) अग्ने तमद्य B³. (८) B³, इति omitted in B²I²Bⁿ.

भरद्वाजाय तच्चक्षुरधीद् वृक्षा दृतेरिव ।
एतासु न व्यवस्यन्त्येके द्वादशकादिषु ॥ ५७ ॥

एतासु द्वादशकादिषु ऋक्ष्वेकेऽवसानं न कुर्वन्ति[1] । भरद्वाजायाव धुक्षत द्विता धेनुं च (ऋ० ६ । ४८ । १३) । तच्चक्षुर्देवहितं शुक्रमुच्चरत्पश्येम (ऋ० ७ । ६६ । १६) । अधीन्न्वत्र सप्ततिं च सप्त च सद्यो दिदिष्ट (ऋ० १० । ९३ । १५) । वृक्षाश्चिन्मे अभिपित्वे अरारणुर्गाम् (ऋ० ८ । ४ । २१) । दृतेरिव तेऽवृकमस्तु सख्यमच्छिद्रस्य (ऋ० ६ । ४८ । १८) ॥

प्रश्नस्तृचः पङ्क्तिषु तु द्वृचो वा
द्वे द्वे च पङ्क्तेरधिकाक्षरेषु ।
एका च सूक्तं समयास्त्वगण्याः
परावराध्यां द्विपदे यथैका ॥
सूक्तस्य शेषोऽल्पतरो यदि स्यात्
पूर्वं स गच्छेद्यदि तु द्वृचो वा ।
ते षष्टिरध्याय उपाधिका वा
सूक्तेऽसमाप्ते यदि ते समाप्ताः ॥ ५८ ॥

इत्युक्तौ[2] श्लोकावोङ्कारपटले । अत्र च । तत्रैव व्याख्यातौ ॥

---

(१) ऋक्षु न व्यवस्यंति । अंतरमवसानं न कुर्वंतीत्यर्थः । एके आचार्याः । (instead of ऋक्ष्वे- to -न्ति) Berlin MS. 394. (२) All the MSS. read प्रश्नस्तृच इत्युक्तौ (for प्रश्नस्तृचः to इत्युक्तौ).

सर्वाणि भूतानि मनो गतिश्च
स्पर्शाश्च गन्धाश्च रसाश्च सर्वे।
शब्दाश्च रूपाणि च सर्वमेतत्
त्रिष्टुब्जगत्यौ समुपैति भक्त्या ॥ ५९ ॥

सर्वाणि भूतानि मनो गतिश्च[१] स्पर्शाश्च[१] गन्धाश्च[१] सर्वे[२] रसाः शब्दाश्च[१] रूपाणीत्येतत्सर्वं त्रिष्टुब्जगत्यौ त्रिष्टुभं च जगतीं च[३] भक्त्या समुपगच्छति ॥

गुर्वक्षराणां गुरुवृत्ति सर्वं
गुर्वक्षरं त्रैष्टुभमेव विद्यात् ॥ ६० ॥

यत्[४] किंचित्स्थावरं[५] जङ्गमं गुरुवृत्ति तत्सर्वं गुर्वक्षराणामेव[६]। किं पुनर्गुर्वक्षरम्। त्रैष्टुभमिति ॥

लघ्वक्षराणां लघुवृत्ति सर्वं
लघ्वक्षरं जागतमेव विद्यात् ॥ ६१ ॥

यत्स्थावरं जङ्गमं लघुवृत्ति तत्सर्वं लघ्वक्षराणामेव[७] विद्यात्। किं पुनस्तल्लघ्व[८]क्षरम्। जागतमिति ॥

---

(१) च omitted in Bⁿ. (२) रसाश्च। सर्वे B². (३) Bⁿ omits त्रिष्टुभं च जगतीं च. (४) B³Bⁿ, समुपगच्छति यत् B², समुपैति समुपगच्छति यत् I² and Reg. (५) -वर- Reg. (६) B³ I² and Berlin MS. 394, -क्षरमेव B²Bⁿ and Paris MS. (७) -क्षरमेव Bⁿ. (८) पुनर्लघ्व- Bⁿ.

यश्छन्दसां वेद विशेषमेतं
भूतानि च त्रैष्टुभजागतानि।
सर्वाणि रूपाणि च भक्तितो यः
स्वर्गं जयत्येभिरथामृतत्वम् ॥ ६२ ॥

स्वर्गं जयत्येभिरथामृतत्वम् ॥

यो ब्राह्मणश्छन्दसामेतं विशेषं वेद । भूता[1]नि च त्रैष्टुभजागतानि[2] यो वेद। सर्वाणि[3] रूपाणि च। किमिति[4]। यो द्वादशाध्यायानां त्रयाणां चाभ्यासं करोति। भूतानि च त्रैष्टुभजागतानि सर्वाणि रूपाणि च भक्तितः। स[5] स्वर्गं जयत्येभिरथामृतत्वम् ॥

[एवमेवाचार्याणां[6] नमस्कारं दद्यात्। शास्त्रान्ते चा[7]चार्याणां नमस्कार उपपद्यते। तस्माच्छास्त्रत्वम्। मुखे[8] शास्त्रत्वे प्रसिद्ध आप्त[9]त्वसंज्ञां[10] निवर्तयति। एकशास्त्रभावप्रदर्शनार्थं संबन्धं करोति। संबन्धे प्रयोजनं पूर्ववदेव। नित्यो हि वेदः[11]। कः पुनरनित्यत्वे प्रसङ्गः। सर्वाणि श्रौतानि। इमानि च स्मार्तानि[12]। पूर्वैः सहा[13]तुल्यत्वात्स्यादनित्यत्वम्। तस्मान्नित्यत्वम्। नैष दोषः। एतस्य समाम्नायस्य वितान[14] इति योऽयं नियम आरब्धः स एतेष्वपि प्रसज्यताम्[15]। वैतानिकसंज्ञालाभे सति नियमो[16]

---

(१) Owing to the loss of folio 203, the reading from-नि च to the end of the Comm. is wanting in I^2. (२) च added in B^n. (३) स सर्वाणि B^2. (४) किमिति is given with marks of deletion in B^3. (५) B^3 omits स. (६) B^3 adds च. (७) शास्त्रांतरे त्वा- B^2. (८) मुखे B^n, गुरुत्वे B^3, गुरुत्वे B^2. (९) प्रसिद्धे आप्त-B^2, प्रसिद्धे आप्त- B^3, आप्त- B^n. (१०) संज्ञां B^n. (११) पदः B^3. (१२) स्मार्ताभ्यां B^n. (१३) सहा- B^n, सह B^3B^2. (१४) विनान B^3. (१५) प्रसज्यते B^2. (१६) नियमे B^n.

ममाग्ने वर्च इति यथेन्धन[1]वर्चो वैश्वदेवः प्रयुज्यते। युज्यते[2] ममाग्ने वर्च इति प्रत्यृचं समिध[3] इव सर्वत्रेष्यते। अग्न्याधेयोत्तर[4]कालं च नैव निवर्तयितव्याः[5]। कथं प्राप्तिः शाखभेदात्[6]। पूर्वे द्वादशाध्यायाः शौनकस्य[7]। अमी चत्वार आश्वलायनस्य। एवमप्राप्तसंज्ञा। किमिति निवर्तयति। सकलं पुनर्नाना शाख आगमादाचार्य[8]प्रदर्शनाच्च।

स्वामिकुमारपुत्रेण मुद्गलेन तु[9] धीमता।
क्रियमाणायेदं दत्तं आत्रे शिष्याय धीमते॥]*

त्रैष्टुभजागतानि यो वेद भक्तितः स स्वर्गं लोकं जयति। एभिश्छन्दोभिः। अथामृतत्वं च गच्छति। इत्याह भगवाञ्छौनकः[10]। श्लोकाः।

गायत्र्यादीनि च्छन्दांसि सोमो यैराहृतः[11] पुरा।
तानि सर्वमिदं कृत्स्नं त्रैलोक्यं सचराचरम्॥[12]
स्वर्ग्यं यशस्यमायुष्यं पुण्यं[13] वृद्धिकरं शुभम्[14]।
कीर्तिमृग्यं[15] यशस्यं च छन्दसां ज्ञानमुच्यते॥

---

(१) यथेन्धनं B^n. (२) B^n omits युज्यते. (३) समिद्ध B^n. (४) -त्तरं B^n. (५) -तव्यः B^2. (६) शाखभेदात् P, शासास्वतेतास B^3B^2, सास्वते तैः B^n. (७) शौनकस्य P, सौनकस्य B^n, शौधनस्य B^2, शोधनकस्य B^3. (८) शाख आगमादाचार्य- B^3, शाख आत्तमादाचार्य- B^2, शाखमादाय रामाचार्य- B^n. (९) B^2, -पुत्रे मुद्गले मनु- B^3B^n. (१०) श्रीशौनकः B^3. (११) सोमो यैराहृतः Benares College MS. No. 1., सोमेन व्याहृतः B^3B^2, सोमेन वाहृतः B^n. (१२) Ben. College MS. No. 1, सर्वमिदं······B^3, सर्वत्रमिदं·········B^2, this line omitted in B^n. (१३) पुण्यB^3. (१४) परं (for शुभम्) B^2. (१५) B^3B^n, कीर्तिमृस्यं B^2.

---

* The passage एवमेवाचार्याणाम्—धीमते, though found in most of the MSS., really does not seem to belong to the Comm. See note.

छन्दोज्ञानं नान्यस्[1] तस्मात् प्रयत्नं कुरु महा··· ।
······नां[2] ना[3]ऽन्यदस्तीति तत्त्वं[4] किम् ।[5]

इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवट[6]-
कृतौ प्रातिशाख्यभाष्येऽष्टादशं[7] पटलं समाप्तम् ॥
प्रातिशाख्यभाष्ये तृतीयोऽध्यायः[8] ॥

॥ इति उवटकृतभाष्यसहितमृग्वेदप्रातिशाख्यं समाप्तम् ॥

---

(१) नान्यस् B^3B^2, नान्यं Ben. College MS. No. 1. (२) महा·········नां B^3, माहा·········नां B^2, महाज्ञानात् Ben. College MS. No. 1. (३) ना-B^2, ता- B^3. (४) तत्वं B^3, तत्व-B^3. (५) छन्दोज्ञानं to किम् omitted in B^n. (६) -पुत्रोव्वट-B^n. (७) -दश- B^2. (८) B^3, प्रातिशाख्यभाष्ये तृतीयोऽध्यायः omitted in B^2B^n.

CORRECTIONS.

Page	line		read	for
Page 4	line 3	delete	परावर इति च ।	
" 8	" 9	read	मत्वा	for मत्व
" "	" 23	"	half-stanza	" line
" 15	" 20	"	"	" "
" 17	" 12	"	ऐ॰ब्रा॰१।२२।१५	" ऐ॰ ब्रा॰ १।४।१५
" 18	" 23	"	-रलृकाराव्	" -रलृकाराव
" 21	" 18	"	वस्त्यं (?=वस्त्र्यं)	" वस्त्यं-
" 29	" 8	"	ँ प श्रं	" ँ प श्र
" 35	" 27	"	out	" off
" 36	" 17	"	विन्दतीँ ३	" विन्दती३
" "	" 20	"	सप्रैप-	" स ैष
" 38	" 2	"	सार्धोना	" सार्धांना
" 41	" 20	"	M. M. (a)	" a (M.M.)

(This correction is required on a few other pages also; e. g. see pp. 155, 270.)

Page	line		read	for
Page 50	line 12	read	नस्यं	for नस्'
" 155	" 3	"	४।४३	" १।४।४३
" 62	" 15	"	नेतस्	" नतस्
" 63	" 17	"	दोषा-	" दोशा-
" "	" 19	"	किमविशेषेण	" िकमविशेषेण
" 65	" 17	"	त्वयं	for त्व'
" 67	" 3	"	अर्धे-	" अर्धा-
" "	" 6	"	-अदर्शि	" अदृशि
" "	" 14	"	यत्कि-	" यात्क-

Page		line		read		for
Page	175 line	10	read	पत्वं	for	पत्व
,,	,, ,,	19	,,	this line as		युग्मान्तस्थादन्तमूलीयपूर्वं-
,,	176 ,,	3	,,	अन्तःपद-	for	अन्तःपदे
,,	200 ,,	8	,,	रात्र्याश्	,,	रा याश्
,,	,, ,,	20	,,	चक्रे	,,	चक्र
,,	212 ,,	6	,,	ह	,,	ह-
,,	215 ,,	5	,,	व्य-	,,	व्य-
,,	216 ,,	7	,,	तत्र	,,	तत्र
,,	221 ,,	21	,,	Bn	,,	I2
,,	222 ,,	5	,,	इत्येतस्मिन्	,,	इंत्येयेस्मिन्
,,	243 ,,	22	,,	चक्रुः	,,	चक्रः
,,	256 ,,	18	,,	भरेति च	,,	भरेति
,,	259 ,,	1	,,	गीर्भिः	,,	गार्भिः
,,	260 ,,	3	,,	तू	,,	तु
,,	,, ,,	5	,,	,,	,,	,,
,,	282 ,,	19	,,	धेनुं न	,,	धेनुंन
,,	,, ,,	24	,,	च Bn	,,	च B2
,,	291 ,,	14	,,	सूमयं	,,	समयं
,,	294 ,,	15	,,	द्९कारान्त-	,,	९दकारान्त-
,,	296 ,,	19	,,	श्रुत-	,,	ुत-
,,	297 ,,	8	,,	प्राप्नोति	,,	प्राप्नाति
,,	,, ,,	17	,,	-श्रावयन्त-	,,	-श्रावयन्त-
,,	310 ,,	14	,,	पूरुपत्वता	,,	पुरुषत्वता
,,	313 ,,	13	,,	इतो	,,	इता
,,	,, ,,	,,	,,	-वर्तमः	,,	-वतमः
,,	317 ,,	18	,,	तं	,,	•
,,	318 ,,	2	,,	अश्विना ।	,,	अश्विना
,,	332 ,,	2	,,	शाकल्य-	,,	शाकन्य-
,,	334 lines	{23, 24	,,	added		after Bn
,,	344 line	9	,,	अन्यतरन्	for	अन्यतरं

			read		for
Page	484	lines 4,7	read	मै॰पु॰ १०६॥ आ॰श्रौ॰ ४।६।३	for ऋ॰खि॰ १०।१०३।७
”	485	” 1-2	”	”	” ”
”	489	line 13	”	बृहती-	” बृहतो-